THE

CHOWKHAMBÂ SANSKRIT SERIES.

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

Nos. 265, 266, 273, 274, 287, 304, 305, 307, 311.
320, 325, 327, 331, 334, 360, 364, 368, 369,
370, 381, 395, 401.

THE

NIRṆAYASINDHU

By

KAMALÂKARA BHAṬṬA

With a Commentary by Kṛṣṇam Bhaṭṭa.

Edited with Notes by

Pandit Gopâl S'âstri Nene, Professor,
Govt. Sanskrit College, Benares.

FASCICULUS I to XXII. १ से २२

PUBLISHED & SOLD BY THE SECRETARY,
CHOWKHAMBA SANSKRIT SERIES OFFICE,
Vidya Vilas Press, North of Gopal Mandir, Benares.

1930

चौखम्बा-संस्कृत-ग्रन्थमाला

ग्रन्थ-संख्या ५२

नं० २६५, २६६, २७३, २७४, २८७, ३०४, ३०५, ३०७, ३११, ३२०, ३२५,
३२७, ३३१, ३३४, ३६०, ३६४, ३६८, ३६२, ३७०, ३८१, ३९५, ४०१.

कमलाकरभट्टविरचितो

निर्णयसिन्धुः

कृष्णंभट्टकृतव्याख्यासहितः ।

काशीस्थराजकीयसंस्कृतपाठशालायां व्याकरणधर्मशास्त्राध्या
पकेन नेने-इत्युपाख्येन पं० गोपालशास्त्रिणा
संशोधितष्टिप्पण्या परिष्कृतश्च ।

प्रकाशकः—
जयकृष्णदास-हरिदासगुप्तः—
चौखम्बा संस्कृत सीरिज़ आफिस,
विद्याविलास प्रेस, गोपालमन्दिर के उत्तर फाटक,
बनारस सिटी ।

१९८७

श्रीगुरुः शरणम् ।

प्रास्ताविकम् ।

उपक्रमः—

विदितमेवेदं सर्वेषां जनानां यच्चतुर्विधपुरुषार्थेषु धर्माख्यः प्रथमः पुरुषार्थः, संप्राप्ते च धर्मे पुरुषार्थे नातिदुर्लभा इतरे काम-अर्थ-मोक्षाः पुरुषार्था इति । स च धर्मः कथं प्राप्तव्य इत्यत्र शब्द एव प्रमाणम् । प्रत्यक्षादीनामलौकिकेऽनवतारात् धर्मस्य चालौकिकत्वात् । तदाह मीमांसासूत्रकारस्तत्र भवान् भगवान् जैमिनिः—"चोदनालक्षणोऽर्थो धर्मः" १-१-२ इति । विधिवाक्यैकगम्य इष्टार्थसाधको धर्म इति तदर्थः । विधयश्च श्रौताः स्मार्ताः पौराणाश्च । तत्र श्रौता विधयो 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' 'यावज्जीवमग्निहोत्रं जुहोति' इत्यादयः । स्मार्तास्तावत्—

पितृयज्ञं तु निर्वर्त्य विप्रश्चन्द्रक्षयेऽग्निमान् ।
पिण्डान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकम् ॥

इत्यादयः । पौराणाश्च—

प्राप्ते हरिदिने सम्यग्विधाय नियमं निशि ।
दशम्यामुपवासस्य, प्रकुर्याद्वैष्णवव्रतम् ॥

इत्यादयः । ते च धर्माः केन कदा कस्मै कुत्रानुष्ठेया इति निर्णयस्य श्रुतिस्मृतिपुराणेषु एकत्रानुपलब्धेरस्मादृशां मन्दधीनां कृतेऽस्य हेमाद्रिमाधवादिमतमीमांसापूर्वकं सकलसंशयोच्छेदकस्य निबन्धस्यान्वर्थनामधेयस्य निर्णयसिन्धोः कियानुपयोग इति धार्मिकाणां न तिरश्चीनम् ।

ग्रन्थावश्यकता ।

हेमाद्रिमाधवादिकृतेष्वन्येषु सत्स्वपि ग्रन्थेषु यथाऽनेन निबन्धेन विषयसंशयजनकतदप्रामाण्यसन्देहानां विचारविधया निवृत्त्या निर्णयो, तथा

न तैर्ज्ञायते इत्यनन्यथासिद्धोऽयं निबन्ध इति । ग्रन्थकृताऽपि प्रतिज्ञातम्—

सन्ति यद्यपि विद्वांसस्तन्निबन्धाश्च कोटिशः ।
तथाप्यमुष्य वैदग्धीं केचिद्विज्ञातुमीशते ॥ इति ।

विषयाः ।

अयं निबन्धः खलु परिच्छेदत्रये विभक्तः । तत्र प्रथमे परिच्छेदेऽब्दायनर्तुमाससंक्रान्तीनां सामान्यतो विशेषतश्च लक्षणनिरूपणमुखेन तत्र कर्तव्याकर्तव्यनिरूपणं, ततस्तिथितद्वैधतत्कर्तव्याकर्तव्यनिरूपणमुखेन भक्तैकभक्तायाचितोपवासादिव्रतानां लक्षण-तदधिकारि-तदारम्भकाल-तन्नियम-तदुद्यापननिरूपणं तद्भङ्गे प्रायश्चित्तनिरूपणं च, तत आशौचादिप्रतिबन्धे ऽनेकव्रतानां युगपत्सन्निपाते वा व्रतानुष्ठानविधिनिरूपणं ततः प्रतिपदादिषोडशतिथिविशेषतत्कृत्यनिरूपणमिष्टिदर्शपिण्डपितृयज्ञकालनिरूपणमुखेन दर्शे वार्षिकादिप्राप्तौ तदनुष्ठाननिरूपणं ततो ग्रहणतत्कालतत्कर्तव्याकर्तव्यनिरूपणमन्ते समुद्रस्नाननिरूपणमिति सामान्यतः कालनिर्णयः ।

द्वितीये चैत्रादिफाल्गुनान्तद्वादशमासेषु यस्मिन् पक्षे यस्यां तिथौ यत्कर्तव्यमकर्तव्यं वा तस्य सर्वस्यापि निरूपणं तिथिद्वैधे तद्ग्राह्याग्राह्यानिरूपणं चेति विशेषतः कालनिर्णयः ।

प्रकीर्णनिरूपकश्च तृतीयः परिच्छेदः । स च द्वेधा विभक्तः पूर्वार्ध उत्तरार्ध इति । तत्र पूर्वार्धे प्रथमं गर्भाधानादिविवाहान्ताः संस्काराः सविशेषं निरूपिताः । तेषामेव प्रसङ्गतो गर्भिणीतत्पतिधर्माः, अशुभकालजननशान्तयस्तत्फलानि च जन्मदापूजनादौ सूतकाभावः, दत्तकपुत्रपरिग्रहः, यमलविषये ज्येष्ठकनिष्ठभावोऽनुपनीतकामचारादिः, संस्कारलोपे प्रायश्चित्तं, ब्रह्मचारिधर्माः, द्विजानां नैमित्तिकः पुनःसंस्कारः, अनध्यायाः, महानाम्न्यादिव्रतं, स्नातकव्रतं, छुरिकाबन्धः, सापिण्ड्यं, गोत्राणि, प्रवराश्च, सगोत्रादिविवाहे प्रायश्चित्तं, विवाहे गुर्वर्कबलं, बृहस्पतिशान्तिः, कुम्भविवाहो, विवाहे प्रतिकूलानि, मातू रजोदोषे विवाहादिकर्तव्याकर्तव्यता,

(ग्रन्थटीकाकर्त्रोः परिचयः)

अस्य महानिबन्धस्य रचयिता तत्र भवाननेकग्रन्थनिर्माता सुगृहीतनामधेयो विश्वामित्रसगोत्रो भट्टकमलाकराख्यः प्रसिद्ध एव । न खल्वेतदन्ववायोऽविदितस्तत्र लोकेऽल्पसंस्कृतज्ञानामपि, यतो भारतवर्षे चतसृष्वपि दिक्षु नैतादृशी विद्वत्परस्परा संजाता कस्मिंश्चिद्प्येकस्मिन्नेव कुलेऽविच्छेदेन, यादृश्यनवच्छिन्नविद्वत्परम्परा पुत्रपौत्रादिक्रमेणैतस्मिन् भट्टकुले दृश्यते । अनेन कमलाकरभट्टेन धर्मशास्त्रेऽन्येऽपि आचारदीपः आह्निकप्रयोगो गयाकृत्यं दानकमलाकरः गोत्रप्रवरदर्पणं पूर्तकमलाकरः व्रतकमलाकरः शान्तिकमलाकरः समयकमलाकरः संस्कारकमलाकरः मन्त्रकमलाकरः नीतिकमलाकरः प्रायश्चित्तरत्नं शूद्रधर्मतत्त्वं कर्मविपाकरत्नं विवादताण्डवश्चेत्यादयो ग्रन्था आरचिताः ; पूर्वमीमांसायां मीमांसासूत्राणां व्याख्यानं धर्मतत्त्वं शास्त्रमाला वा, तन्त्रवार्तिकटीका, शास्त्रदीपिकाटीका शास्त्रदीपिकालोकश्च ; काव्यसाहित्ये काव्यप्रकाशव्याख्या, गीतगोविन्दभाष्यं रत्नमालाभिधं, रामकौतुकमहाकाव्यं चेत्यादयो बहवः प्रसिद्धा ग्रन्था रचिता वर्तन्ते ।

अनेन ग्रन्थकृताऽयं ग्रन्थः १६६८ तमे वैक्रमे रौद्रे सम्वत्सरे माघमासे कृष्णपक्षे शिवरात्र्यां चतुर्दशीतिथौ पूर्णतां गमित इति तदन्तश्लोकेन निश्चीयते । यथा—

> वसुऋतुऋतुभूमिते गतेऽब्दे
> नरपतिविक्रमतोऽथ याति रौद्रे ।
> तपसि शिवतिथौ समापितोऽयं
> रघुपतिपादसरोरुहेऽर्पितश्च ॥ इति ।

अस्य खलु माता उमा, पिता भट्टश्रीरामकृष्णः, ज्येष्ठो भ्राता च दिवाकरभट्ट आसन् । रामकृष्णभट्टस्य पिता नारायणभट्टः तत्पिता रामेश्वरभट्टः तत्पिता गोविन्दभट्टः तत्पिता अङ्गदेवभट्टः तत्पिता च श्रीनागनाथभट्ट इति पितृपरम्परा तत्तद्ग्रन्थस्थश्लोकतो निर्णीता । तथा

हि, प्रकृतग्रन्थमङ्गलाचरणे—

"वेदार्थधर्मरक्षायै मायामानुषरूपिणम् ।
पितामहं हरिं वन्दे भट्टनारायणाह्वयम् ॥
यत्पादसंस्मृतिः सर्वमङ्गलप्रतिभूर्मता ।
तान् भट्टरामकृष्णाख्यान् श्रीतातचरणान्नुमः ॥
सर्वकल्याणसंदोहनिदानं यत्पदद्वयम् ।
द्युनदीसोदरीमम्बामुमाख्यां नौमि सादरम् ॥
बिन्दुमाधवपादाब्जरोलम्बीकृतविग्रहम् ।
ज्यायांसं भ्रातरं भट्टदिवाकरमुपास्महे ॥

श्रीमन्नारायणभट्टकृतवृत्तरत्नाकरटीकायां —

भट्टश्रीनागनाथात्समजनि विबुधश्चाङ्गदेवाख्यभट्टः
प्रासोष्टासौ तनूजं रघुपतिनिरतं भट्टगोविन्दसञ्ज्ञम् ॥
विश्वामित्रान्ववायाम्बुधिविधुरधिकं वर्धते तत्तनूजो
विद्याब्धौ लब्धपारः प्रथितपृथुयशा भट्टरामेश्वराख्यः ॥
नारायणेन सुधिया काश्यां निवसता सता ।
वृत्तरत्नाकरे टीका तद्भुवा रचिताऽञ्चिता ॥ इति ।

टीकानिर्माता च आर्डे इत्युपनामा कृष्णशर्मा वर्तते इत्यवोचम् । अनेनापि बहवः प्रसिद्धा महान्तो ग्रन्था न्यायशास्त्रे रचिता वर्तन्ते । केवलमयमेवैको ग्रन्थो धर्मशास्त्रे एतत्कृत उपलभ्यते । न्यायशास्त्रे च षष्टिः सप्ततिर्वा ग्रन्था उपलभ्यन्ते प्रकृतग्रन्थकर्तृरचिताः । अस्य माता कमला, पिता रङ्गनाथो, ज्येष्ठो भ्राता नारायणः गुरुश्च हरिरासीत् इति तदीयमङ्गलाचरणेन ज्ञायते । अयं खलु प्रथमपरिच्छेदान्तिमश्लोकेन एकोनविंशतिशतकस्य तृतीये भागे संजात इति ज्ञायते । यथा—

गुणरसेभमनाथमिताब्दकाधिकनभस्य सितेऽष्टमिकातिथौ ।
सुरगुरावलिखल्लघुमूलजित् प्रथमनिर्णयसिन्धुजटिप्पणम् ॥

तदेवं बहुशः संस्क्रियमाणस्यापि निर्णयसिन्धोः सटीकस्य कु-

त्राप्यसंस्कृततया ऋते टीकां च संशयासिन्धूयमानतया मन्दधीजनानां दुर्ज्ञेयतादुःखमनुमिन्वाद्भिरस्माकं पूज्यपादैर्गुरुवर्यैः महामहोपाध्याय-विरुदावलीविराजितैः श्री १०८ माद्भिः पर्वतीयनित्यानन्दपन्तमहोदयैः प्रथममेव मुद्रापणकार्ये प्रवर्तयद्भिस्ताच्छिल्पमुपदेष्टुमेवैतत्संस्करणभारवा-हनायादिश्यमानस्तत्प्रदर्शितरीतिमनुसृत्य तदुपदिष्टविशेषार्थांस्तत्र तत्र टिप्पण्यां निवेशयन् प्रायशो मीमांसाधिकरणानि संशयपूर्वपक्षसिद्धान्त-प्रदर्शनेन च विवृण्वन्नद्य तत्कृपयैवैतत्कार्यं समापयन् क्षिप्तशिरोभारः श्रीमद्गुरुचरणेष्वेव समर्पये संस्करणमिदम् ।

दशादर्शपुस्तकान्यालभ्यैतत्संस्करणं सम्पादितम् । तत्र सप्त पुस्तकानि टीकायाश्चत्वारि मूलमात्रस्यासन् । तत्राप्येकं सटीकम् । तच्च 'ख' संज्ञकमस्मत्सुहृद्वरैः कच्छभुजराजधानीराजप्रतिष्ठापितसंस्कृत-विद्यालये व्याकरणादिशास्त्राध्यापनमनुतिष्ठद्भिः श्रीदुर्गाप्रसादभट्टमहो-दयैः समर्पितम् । 'क' संज्ञकं मूलमात्रमस्मद्गुरुबन्धुभिः काशिकराजकीय-प्रधानसंस्कृतपाठशालायां भूतपूर्वव्याकरणधर्मशास्त्राध्यापकानां गुरुवराणां धर्माधिकारिनागेश्वरपन्तमहोदयानां पुस्तकसंग्रहात्तदीयसुपुत्रैःश्रीलक्ष्मी-धरपन्तैः प्रत्यर्पितमतीव शुद्धम् । प्रथमपरिच्छेदमात्रस्यैकमपरं च द्वितीयप-रिच्छेदस्य टीकामात्रं पुस्तकद्वयमलमोडाऽऽङ्ग्लपाठशालाध्यापकैर्वाराण-स्यभिजनैः पर्वतीय श्रीकृष्णानन्दशर्मभिः समर्प्य महत्साहाय्यमाचरितम् । काशिकराजकीयप्रधानसंस्कृतपाठशालायां भूतपूर्वव्याकरणसांख्यशास्त्र-प्रधानाध्यापकानां महामहोपाध्यायतात्याशास्त्र्यपरनामधेयश्रीरामकृष्ण-शास्त्रिणामेकं सम्पूर्णं नातिशुद्धं टीकायाः पुस्तकमुपलब्धम् । अस्यैव पुस्तकस्याधारेण टीकासंस्करणं सम्पन्नमिति । इमानि त्रीणि खसंज्ञकं चेति चत्वारि पुस्तकानि टीकासंस्करणस्याधारभूतानि वर्तन्ते । घसंज्ञ-कमन्ते खण्डितं टीकामात्रमशुद्धप्रायं शीतलाघट्टस्थ जडेइत्युपनामकबाबु-दीक्षितानां पुस्तकसंग्रहात्तेषामेव कृपयोपलब्धम् । 'ङ' संज्ञकं च श्रौत-विद्याधुरंधरयाज्ञिकप्रवरश्रीवामनाचार्याणां पुस्तकालयात्तदीयसत्पुत्राणां

रमानाथआचार्याणां कृपालेशेन तृतीयपरिच्छेदैकभागमात्रमुपलब्धम् । एकं च टीकायाः पुस्तकमशुद्धप्रायं खण्डितं च सम्पादनसमाप्तिसमयेऽस्मत्सुहृद्वरैः काशिकराजकीयसंस्कृतपाठशालायां साहित्यशास्त्राध्यापकैः भारद्वाज-श्रीगङ्गाधरशास्त्रिभिः समर्पितम् । निर्णयसागरयन्त्रालयमुद्रितं मूलमात्रं संस्करणाधारभूतं च गसंज्ञकम् । छसंज्ञकं च मदीयं संपूर्णं मूलमात्रमिति ।

अन्ते च उक्तमहोदयेभ्यः पुस्तकप्रदानेनापूर्वसाहाय्यमाचरद्भ्यो बहुशो धन्यवादान् कृतज्ञतया वितीर्य प्रूफसंशोधनादिसाहाय्यमाचरद्भ्यां चास्मत्प्रियशिष्याभ्यां बेहेरे-चिन्तामणिशास्त्रि केलकर-दामोदरशास्त्रिभ्यामाशिषं प्रदाय हंसक्षीरन्यायेन दोषदृष्टीरपहाय गुणैकपक्षपातिनो भवतश्चैतत्पुस्तकसंग्रहकरणेन श्रेष्ठिवर-श्रीजयकृष्णदासगुप्तमहोदयानामेतत्पुस्तकमुद्रापणव्ययभारमुद्वहतामल्पशः साहाय्यदानाय सम्प्रार्थ्य भवानीविश्वनाथयोः साष्टाङ्गं प्रणम्य च विरमामि इति । शुभम् ।

गवर्न्मेंन्ट संस्कृत कालिज
बनारस ।
गुरुपौर्णिमा सम्वत् १९८७

निवेदकः—
गोपाल शास्त्री नेने

वंशवृत्तः

- भट्ट श्रीनागनाथ
  - अङ्गदेव भट्ट
    - भट्ट गोविन्द
      - दिवाकर भट्ट
        - अनन्त भट्ट
      - रामेश्वर भट्ट
        - भट्ट नारायण (१६०२ वै०)
          - भट्ट रामकृष्ण (धर्मपत्नी उमा)
            - भट्ट कमलाकर (१६१६)
            - दिवाकरःज्येष्ठः

सटीकनिर्णयसिन्धुविषयसूची ।

(१) 'कणगे' (२) 'कोद' इति महाराष्ट्रे प्रसिद्धम्

इति प्रथमः परिच्छेदः ।

श्रीः ।

द्वितीयपरिच्छेदः ।

इति द्वितीपरिच्छेदानुक्रमणिका।

सटीकानिर्णयसिन्धुतृतीयपरिच्छेदः

श्राद्धप्रकरणम् ।

इति श्राद्धविधिः ।

अथाशौचप्रकरणम् ।

इति सापिण्डीकरणम् ।

प्रथमाब्दकर्तव्यादीनि ।

इति श्रीसटीकनिर्णयसिन्धुविषयानुक्रमणिका समाप्ता

ॐनमः सदुद्धराय माधवाय ।

सव्याख्येनिर्णयसिन्धौ

प्रथमःपरिच्छेदः

मङ्गलाचरणम् ।

*कारुण्यैकनिकेतं रामं सीतालतायुक्तम् ॥
विश्वामित्रान्ववायव्रततिसमालम्ब्यशाखिनं वन्दे ॥१॥
*लक्ष्मीसहायं कल्पद्रु*तलं रञ्जितगोकुलम् ॥

श्रीगणेशाय नमः ॥

लक्ष्मीनारायणं नत्वा पितरौ च गुरूनपि ॥
कृष्णशर्मा वितनुते सारार्थां सिन्धुदीपिकाम् ॥ १ ॥
कमलाभू राङ्गनाथिः कृष्णो नारायणानुजः ॥
अधिनिर्णयसिन्ध्वाह संशयध्वान्तनाशिनीम् ॥ २ ॥

विघ्नध्वंसार्थं कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति–कारुण्ये ति । अन्ववायो वंशः । व्रततिर्लता, प्रतानत्वात् । उभयतोलताद्वययुक्तशाखिरूपकं चेदं समस्तदेशविवर्त्ति । यद्यप्यत्र सीतालतायुक्तो रामशाखी स्वकुललतासमालम्ब इति न लभ्यते इत्यभवन्मतयोगः, तथाऽपि नमस्कार्यताप्रयोजकरूपानन्तःपातिनस्तादृशसमालम्बस्य वन्द्यत्वोपपादकतया ऽभिधानात्तद्विधेयतायामतात्पर्यान्न दोषः ॥ १ ॥

विघ्नबाहुल्यादिसम्भावनाया अवर्जनीयतया तद्विधूननाय मङ्गलान्तरमाह–लक्ष्मीति । तलम्–स्वरूपम् । 'अधःस्वरूप-

बर्हापीडं घनश्यामं महः किञ्चिदुपास्महे ॥ २ ॥
*वेदार्थधर्मरक्षार्थै मायामानुषरूपिणम् ॥
पितामहं हरिं वन्दे भट्टनारायणाह्वयम् ॥ ३ ॥
यत्पादसंस्मृतिः सर्व*मङ्गलप्रतिभूर्मता ॥
तान् भट्टरामकृष्णाख्यान् *श्रीतातचरणान्नुमः ॥ ४ ॥
सर्वकल्याणसन्दोहनिदानं यत्पदद्वयम् ॥
द्युनदीसोदरीमम्बामुमाख्यां नौमि सादरम् ॥ ५ ॥

द्योस्तलम्' इति कोशात् । कल्पद्रुत्वाभिधानं चाचिन्त्यमहिमव्यञ्जकम् । कल्पद्रुस्तलमधो यस्येति वा । मुक्तेरपि दातृत्वात् । रञ्जितगोकुलमिति सुगमम् । 'तलरञ्जितगोकुलम्' इति पाठे कल्पवृक्षै रञ्जितं गोकुलं येनेति । तत्र कल्पवृक्षा गोकुले वर्त्तन्ते । श्रीभगवानेव कल्पवृक्ष इति तु वस्तुगतिः । 'कल्पद्रुतरलं जितगोकुलम्' इति पाठे कल्पद्रुस्तरलो येनेति उक्तहेतोर्जितमायत्तं गोकुलं यस्येति बोध्यम् ।

स्वस्य धर्मज्ञत्वमवगमयितुं धार्मिकपरम्परितत्वमाह—वेदार्थेति । मायामानुषरूपिणं हरिमिति न्यूनाभेदरूपकम् ।

मङ्गलेति । यद्यपि नमस्क्रियाया एव मङ्गलत्वं न तु स्तुतेः, विघ्नध्वंसार्थविहितसुवर्णदानादिवत्, तथाऽपि तत्तुल्यत्वमक्षतमित्येवमर्थं प्रतिभूपदम् । पितृपादस्तुतिश्च तदन्तर्गतनतिरूपेति मङ्गलरूपत्वम् । सर्वोत्कृष्टत्वज्ञापको व्यापारः स्तुतिः, स्वोत्कर्षज्ञापकः स नतिरिति भेदः । श्रीतातेति । यद्यपि चरणशब्दस्य राजपुङ्गवादिशब्दवन्न पूर्वपदार्थगतश्रैष्ठ्यमर्थः ।

'स्युरुत्तरपदे व्याघ्रपुंगवर्षभकुञ्जराः ।
सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः ॥'

इत्यनुशासने तदनुक्तेः, साजात्यासम्भवात्, तथा समासाननुशासनाच्च । नापि 'गुरुचरणा आहुः' इतिवत्क्रियाकारकत्वारोपः । तद्वत् क्रियान्वयाभावात् । तथाऽपीह चरणः

चिन्तुमाधवपादाब्जरोलम्बीकृतविग्रहम् ॥
ज्यायांसं भ्रातरं भट्टदिवाकरमुपास्महे ॥ ६ ॥
*हेमाद्रिमाधवमते प्रविचार्य सम्य-
गालोच्य तत्त्वमथ *तीर्थकृतां परेषाम् ॥
श्रीरामकृष्णतनयः कमलाकराख्यः
काले* यथामति विनिर्णयमातनोति ॥ ७ ॥
सन्ति यद्यपि निबन्धसमुच्चयाश्च कोटिशः ॥

शाखाध्येता बोध्यः । अथैवं कर्मधारये तातपदस्वातन्त्र्याभावाद्विक्लिष्टमति-कृत्त्वं दुर्वारम् । मैवम् । कादम्बरीप्रेमामात्सर्यमात्रमेव तथा मतिः, न तु वैदर्भीप्रेमार्पितमतीनाम् । तेषां पुनर्गौरवस्यैव चरणशब्दप्र-योगेन लाभात् । यद्वा 'नागाद्याः' इत्याद्यपदेन 'पादपद्मचन्द्राद्याः' इति क्षीरस्वामिवचनात्पादचरणादिशब्दानामपि श्रेष्ठवाचकत्वम् । तदु-त्कटताविशेषस्फोरकं च बहुवचनम् । केचित्तु चरणयोरेव तद्रा-शयामारोप्य द्विधा इतिवद्भेदैकत्वाविवक्षया बहुवचनम्, यत्पादेति कर्मधारय इत्यप्याहुः । 'तं भट्टरामकृष्णाख्यं श्रीतातं सादरं नुमः' इति तु रमणीयम् ।

उन्मत्तप्रलपिततुल्यशङ्कां निरस्यन्नेव प्राचीनग्रन्थैरन्यथासि-द्धिशङ्कां परिहरति—हेमाद्रीति । तीर्थम्—शास्त्रम् । तथा च हे-माद्र्यादिमतस्यैव प्रामादिकांशं परिहृत्योपादानान्नान्यथासिद्धिरिति भावः । कालानङ्गीकर्तृसांख्यनिरासार्थं काले इति । वैषयिक आधारः । ज्योतिःशास्त्रादौ स्वरूपतो निर्णीतस्यापि 'सायं जुहो-ति' इतिवत् 'चतुर्थ्यां पूजयेद्देवम्' इत्यादिनाऽधिकरणसप्तमीवशाद्गुण-स्य विनायकपूजाद्यङ्गत्वस्य चतुर्थ्या दिनद्वयसत्त्वे संशयः स्यादिति तस्याः पूर्वत्वादिनाऽप्यङ्गत्वं निर्णीयत इत्यर्थः । तादृशनिश्चयश्च क्वचि-देकतरकोटेः साधकस्य, क्वचित्तु बाधकस्योपन्यासेन । तत्र साधकं बाधकं च द्विविधम्, न्यायवचनभेदादिति तत्सर्वं प्रदर्श्यत इति यावत् ।

तथाऽप्यमुष्य *वैदग्धीं केचिद्विज्ञातुमीशते ॥ ८ ॥

तत्र *संक्षेपतः कालः षोढा—अब्दो, ऽयनम्, ऋतु, मासः, पक्षो, दिवस इति।

तत्राब्दो *माधवमते पञ्चधा*— सावनः, सौरः, चान्द्रो, नाक्षत्रो, बार्हस्पत्य इति । गुरोर्मध्यमरा

वैदग्धीमिति । निर्णयकमलाकरतया निर्णया उन्मज्जन्त्येव । विषयसंशयजनकतदप्रामाण्यसन्देहभञ्जकानि विशेषदर्शनानि तु संख्यावतामेव प्रतिभासन्ते इति व्यञ्जनाय । तत्र—न्यायवचनाभ्यां निश्चतव्येऽङ्गत्वे । **संक्षेपत इति** । यद्यपि साक्षाद्व्याप्येन विभागे सम्भवति परम्परासाधारण्येन सोऽसङ्गतः, कलाकाष्ठादिनाऽपि तत्प्राप्तेरिति प्रथमतो जन्यत्वानित्यत्वाभ्यामेव विभागो वाच्यः, तथाऽपि नित्यस्य तस्य कर्मानङ्गत्वात्त्यागः । कर्मादौ तत्स्मरणस्यैवाङ्गत्वात् स्मृतिद्वाराऽपि तस्याङ्गत्वे मानाभावात् ।

माधवमते इति । एवमादिप्राचीनग्रन्थतत्कर्तृनामलेखनं च प्रायशः स्वोत्प्रेक्षामूलकत्वशङ्कानिराकरणाय । स्वानभिमते तु अरुचिं दर्शयामः । पञ्चधेति । तथा चोक्तं माधवेनैव—

'सौरबृहस्पतिसावनशशधरनाक्षत्रिकाः क्रमेण स्युः । मतल(३६५)—पतला(३६१)—ऽतल(३६०)—वमल(३५४)—वरगाश्च(३२४)वत्सराः पञ्च'इति । मतलपाऽवरगाः क्रमेण पञ्चषट्त्र्येकशून्यचतुर्द्वित्र्यर्थकाः । अङ्कानां च वामतो गतिः । अत्रारुचिं दर्शयन्नेवाऽऽह—हेमाद्रिस्त्विति* । अत्र सावनादीनामनियमेन ग्रहणं तु न शङ्क्यम् । यतो यत्र तिथिविशेषरूपं स्पष्टं लिङ्गम्, यथा—

'वसन्ते किंशुकाशोकशोभिते प्रतिपत्तिथिः ।
शुक्ला तस्यां प्रकुर्वीत स्नानं नियममास्थितः' ॥

इत्यादौ शुक्लप्रतिपत् । तत्र—

'ललाटपट्टे तिलकं कुर्याच्चन्दनपङ्कजम् ।

शिभोगेन बार्हस्पत्यः । स च ज्योतिःशास्त्रे प्रसिद्धः । *हेमाद्रिस्त्वन्त्ययोर्धर्म*शास्त्रेऽनुपयोगात्तिस्र एव

ततः प्रभृत्यनुदिनं तिलकालङ्कृतं मुखम् ॥
धार्यं संवत्सरं यावच्छशिनेव नभस्तलम्' ।

इत्यादितिलकव्रतादौ । यथा वा 'शुक्लपक्षे चतुर्दश्याम्'इत्यादि'नव वर्षाणि पञ्च च'इतिसंवत्सरावृत्तिसाध्येऽनन्तादिव्रते शुक्लचतुर्दश्यादि । तत्रोभयत्रापि चान्द्र एव संवत्सरः ।

यत्र वा मेषसंक्रमणे 'सोपवासो नरोत्तम'इत्यादौ संक्रमरूपं तत् तत्र 'कृत्वा व्रतं वत्सरमेतदिष्टं म्लेच्छेषु तिर्यक्षु न चापि जन्म'इतिसंवत्सरसाध्ये सुजन्मावाप्तिव्रते, यत्र वा 'अयने विषुवे चैव त्रिरात्रोपोषितो नरः'इत्यादि अयनादिरूपं तत् तत्र 'एवं संवत्सरे पूर्णे कुर्यादुद्यापनक्रियाम्'इतितादृशधान्यदानादिव्रते, तत्र संवत्सरः सौर एव ।

यत्र तु "गोसत्रं वै संवत्सरो, य एवं विद्वांसः संवत्सरमुपयान्ति"इत्यादौ गवामयनस्य संवत्सरशब्देन व्यवहारात्संवत्सरकालस्य तदङ्गत्वप्रतीतौ अभिप्लवषडहचतुष्टयैकपृष्ठ्यषडहयोः सावनैकमाससाध्ययोः सांवत्सरिकीणां द्वादशावृत्तीनां चान्द्रसौराभ्यामनिर्वर्त्तनम्, तत्र पारिशेष्यात्सावन एवाब्दः । एवम्—

"त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम् ।
त्र्यहं परं च नाश्नीयात्प्राजापत्यं चरन् द्विजः" ॥

इति द्वादशाहोरात्रसाध्यानां प्राजापत्यानां षष्ट्युत्तरशतत्रयरूपं द्वादशाब्दं तस्य चान्द्रसौराभ्यामनुष्ठानासम्भवात्सावन एवाब्दः । एवं द्वादशाब्दादिस्थाने नवाब्दादावपि । यथा पराकादिमिश्रप्राजापत्यादौ पराकषडब्दे त्र्यब्दं प्राजापत्यं षडब्दं चेति, तत्र द्वादशाब्दानपेक्षायामपि सावन एव तत्राब्दः । अत एव

विधा आह। तत्र वक्ष्यमाणैः *सावनादिद्वादशमासै
स्तत्तदब्दम्। मलमासे तु सति षष्टिदिनात्मक एको
मास इति द्वादशमासत्वमविरुद्धम्। तथाच व्यासः
'षष्ट्या तु दिवसैर्मासः कथितो बादरायणैः' इति॥

तत्र चान्द्रोऽब्दः षष्टिभेदः। तदाह गार्ग्यः—
'प्रभवो विभवः शुक्लः प्रमोदोऽथ प्रजापतिः।
अङ्गिराः श्रीमुखो भावो युवा धाता तथैव च॥

मर्त्तुकामस्यैव दक्षिणा मुख्या, नान्यस्येति सिद्धान्तः। तस्या
अब्दानङ्गत्वात्। एवं यत्र "सावनेनैव कर्त्तव्या शत्रूणां चाप्युपा-
सना"इतिसमयपालनादौ विशेषवचनम्, तत्रापि सावन एव।

एवं च यत्र विशेषतो न लिङ्गादि तत्रेच्छया विक-
ल्पः। यथा 'एताः संहिता नानन्तेवासिने प्रब्रूयान्नासंवत्सर-
वासिने' इतिव्यतिरेकमुखेनाम्नातगुरुकुलवासादौ। *धर्मेति।
अथ नाक्षत्रस्यायुर्दाये एवोपयोगाद् माऽस्तु धर्मशास्त्रे तत्प्र-
पञ्चः, 'गौतम्यां सिंहगे गुरौ'इत्यादौ अपेक्षणात्तु बार्हस्पत्यस्य
तं को वारयिता? इति चेत्। तिलकव्रतादौ हि चान्द्रादेर्वत्सरत्व-
ज्ञानमपेक्षितम्, न तु क्वापि कर्मणि बार्हस्पत्यस्य तत्। 'सिंहगे
गुरौ'इत्येव श्रवणात्। यदपि—

"गुरोर्मध्यमसंक्रान्तिहीनो यश्चान्द्रवत्सरः।
अधिसंवत्सरस्तस्मिन्कारयेन्न सवत्रयम्॥
वर्जनीयाः प्रयत्नेन प्रतिष्ठाः सर्वनाकिनाम्।
स्फुटसंक्रान्तिहीनश्चेत्केऽप्याहुरधिमासवत्"॥

इत्युत्तरसौरं, तदपि बार्हस्पत्यस्य संवत्सरत्वाज्ञानेऽपि मध्यमगण-
नया गुरुसंक्रमशून्ये चान्द्राब्दे बृहस्पतिसत्त्वादिस्फुटगणनया तादृशो
तत्राधिमासवत् कामादि च न कार्यमित्यर्थकमिति न कश्चिद्विरोधः।
*सावनादीति। तिथिबद्धद्वादशादिमासैरब्दमपि द्रष्टव्यम्।

ईश्वरो बहुधान्यश्च प्रमाथी विक्रमो वृषः ।
चित्रभानुः सुभानुश्च तारणः पार्थिवोऽव्ययः ॥
सर्वजित्सर्वधारी च विरोधी विकृतिः खरः ।
नन्दनो विजयश्चैव जयो मन्मथदुर्मुखौ ॥
हेमलम्बो विलम्बोऽथ विकारी शार्वरी प्लवः ।
शुभकृच्छोभनः क्रोधी विश्वावसुपराभवौ ॥
प्लवङ्गः कीलकः सौम्यः साधारण(१)विरोधकृत् ।
परिधावी प्रमादी च आनन्दो राक्षसोऽनलः ॥
पिङ्गलः कालयुक्तश्च सिद्धार्थी रौद्रदुर्मती ।
दुन्दुभी रुधिरोद्गारी रक्ताक्षी क्रोधनः क्षयः' ॥ इति ।

यद्यपि ज्यौतिषे गुरोर्मध्यमराशिभोगेन प्रभवादीनां माघादौ प्रवृत्तिरुक्ता, तथाऽपि प्रभवादीनां चान्द्रत्वमप्यस्ति । 'चान्द्राणां प्रभवादीनां पञ्चके पञ्च-

---

अन्यथा "मृताहनि तु कर्तव्यं प्रतिमासं तु वत्सरम्"इतिवत्सरत्वज्ञानसापेक्षे आब्दिकादौ अनियमेन वत्सरापत्तेः । लिङ्गाभावेन चान्द्रसौरयोरसम्भवादन्यवत्सरकर्त्तव्यताकगोसत्राद्यन्यतया सावनस्य च नियमासम्भवात् । प्रभवादीनां चान्द्रत्वमप्रामाणिकमित्याशङ्कते—*यद्यपीति । मध्यमगणना गुरोः शराः ५ खमिति । प्रत्यहं पञ्चकला गुरोर्गतिरित्यर्थः । *भोगेनेति प्रभवान्वयि, न तु प्रवृत्तौ असम्भवात् । माघादौप्रभवादीनामित्यादिपदे विभवादेः फाल्गुनादिप्रवृत्तिसूचके ।

"तपसि खलु यदाऽसावुद्गमं याति मासि
प्रथमलवगतः सन् वासवे वासवेज्यः ॥
निखिलजनहितार्थं वर्षवृन्दे वरिष्ठः

---

(१) इदं लुप्तविभक्तिकम्, साधारणसहितो विरोधकृदिति उत्तरपदलोपी वा ।

के युगे'* इति माधवोक्तेः । तेन चान्द्रः प्रभवादिश्चैत्रसिते प्रवर्तते । बार्हस्पत्यस्तु माघादौ । तयोर्विनियोगो ज्योतिर्निबन्धे ब्रह्मसिद्धान्ते—

'व्यावहारिकसंज्ञोऽयं कालः स्मृत्यादिकर्मसु ।
योज्यः सर्वत्र तत्रापि जैवो वा नर्मदान्तरे' ॥

आर्ष्टिषेणः—

*'स्मरेत्सर्वत्र कर्मादौ चान्द्रं संवत्सरं सदा ।
नान्यं *यस्माद्वत्सरादौ प्रवृत्तिस्तस्य कीर्तिता' ॥ इति ।

अयननिर्णयः । अयनं तु *सौरर्तुत्रयात्मकम् । 'सौरर्तुत्रितयं प्रदिष्टमयनम्' इति दीपिकोक्तेः । तद्द्विविधम्—दक्षिणमुत्तरं चेति । कर्कसंक्रान्तिर्दक्षिणायनम्, मकरेऽन्यम् ।

अनयोर्विनियोगमाह मदनरत्ने सत्यव्रतः—

'देवताऽऽरामवाप्यादिप्रतिष्ठोदङ्मुखे रवौ ।

प्रभव इति स नाम्ना जायतेऽब्दस्तदानीम्" ॥

इत्युपक्रम्य

"इयं हि षष्टिः परिवत्सराणां बृहस्पतेर्मध्यमराशिभोगात् ।
उदाहृता पूर्वमुनिप्रवर्यैर्नियोजनीया गणना क्रमेण" ॥

इत्युपसंहारात् । *युग इति ।

संवत्सरस्तु प्रथमो द्वितीयः परिवत्सरः ।
इदा वत्सरस्तृतीयस्तु चतुर्थश्चानुवत्सरः ॥
इद्वत्सरः पञ्चमस्तु तत्सङ्घो युगसंज्ञकः" ॥ इत्युक्तेः ।

'जैवो वा' इति वाकारोऽस्वरससूचनाय । को व्यावहारिकसंज्ञकः काल इत्यत आह—*स्मरेदिति । *यस्मादिति च शुक्लादिर्मुख्य इत्येतदर्थम्, न तु कृष्णादेः कर्मानर्हत्वार्थम् । अनेकवचनविरोधात् । *सौरेति मासातिदेशप्राप्तचान्द्र-

दक्षिणाशामुखे कुर्वन्न तत्फलमवाप्नुयात्' ॥

वैखानसः—

*'मातृभैरववाराहनरसिंहत्रिविक्रमाः ॥

महिषासुरहन्त्र्यश्च स्थाप्या वै दक्षिणायने' ॥

वैशब्दोऽप्यर्थे, न तु दक्षिणायन एवेति नियमः ।

पूर्ववचने दक्षिणायने निषिद्धाया देवप्रतिष्ठाया देवविशेषे प्रतिप्रसवमात्रात् ।

रत्नमालायाम्—

'*गृहप्रवेशत्रिदशप्रतिष्ठाविवाहचौलव्रतबन्धपूर्वम् ।

सौम्यायने कर्म शुभं विधेयं

यद्गर्हितं तत्खलु दक्षिणे च' ॥ इति ।

अस्यापवादः काशीखण्डे—

*'सदा कृतयुगं चास्तु सदा चास्तूत्तरायणम् ।

सदा महोदयश्चास्तु काश्यां निवसतां सताम्'* ॥

इत्ययनम् ॥

ऋतुनिर्णयः । ऋतुर्मासद्वयात्मा । मलमासे तु मासत्रयात्मक एको मासः, तेन मासद्वयात्मकत्वमविरुद्धम् । स द्वेधा चान्द्रः सौरश्च । 'चैत्रारम्भो वसन्तादिश्चान्द्रः । मीनारम्भो, मेषारम्भो वा सौरः । *'मी-

---

त्वादित्युदासार्थम् । *मातृ इति उग्रकर्मोपलक्षणम् ।

"उग्रे कर्मणि सौम्ये च स्तोऽयने दक्षिणोत्तरे"

इति माधवोक्तेः । तदेवाह—*गृहेति । *सदा कृतेत्यपि अपवादत्वाभ्युपगमवादः । अस्त्विवत्याशीर्लोटः कृतयुगादि-कार्यमापकत्वात् । *सतामिति निगृहदुर्दैवानां भासमान-साधुभावानां व्यावृत्तिः ।

*मीनेति । एतदनुसारेणोत्तरे ग्रीष्मादयो विकल्प्यन्ते ।

नमेषयोर्मेषवृषयोर्वा वसन्तः' इति बौधायनोक्तेः । अनयोर्विनियोगमाह त्रिकाण्डमण्डनः—

'श्रौतस्मार्तक्रियाः सर्वाः कुर्याच्चान्द्रमसर्तुषु ।
*तदभावे तु सौरर्तुष्विति ज्योतिर्विदां मतम्' ॥

स द्विविधोऽपि षोढा । वसन्तो, ग्रीष्मो, वर्षाः, शरद्, हेमन्तः, शिशिरः । इत्यृतुः ॥

मासनिर्णयः । मासश्चतुर्धा । सावनः, सौरः, चा-

तदभावे तु इति सौरर्तुगौणत्वार्थम् । एवं कृष्णादिमासानां गौणत्वात्तद्घटितमासद्वयात्मकर्तूनामपि गौणत्वं द्रष्टव्यम् । एवं च "वसन्ते ब्राह्मणोऽग्निमादधीत" इत्यादौ नानेव वाक्यार्थः । अन्यथा मुख्यत्व-गौणत्वविवेचनवैयर्थ्यात् । तत्र मुख्यवाक्यार्थे शुक्लादिचान्द्रमासद्वय-घटितो मुख्य एव वसन्तः । कृष्णादिचान्द्रमासद्वयघटितस्य वसन्त-पदार्थस्य गौणत्वात्, सौरमासद्वयघटितस्य तस्य गौणतरत्वात् । मुख्यासम्भवे गौणवाक्यार्थो ऽवलम्बनीयः ।

"प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्तते ।
न साम्परायिकं तस्य दुर्मतेर्विद्यते फलम्" ॥

इतिमनुवचनात् । एवं च 'श्रौतस्मार्तक्रियाः' इत्यत्र श्रौतपदं सङ्गच्छते । "चान्द्रमासर्तुषु" इत्यत्र चान्द्रमुख्यगौणर्तुष्वा गौ-णमुख्यभावोऽपि विवक्षितः । अन्यथा सौरर्तुना गौणभाव-प्रदर्शनासङ्गतेः । एवं शरदादिपदेऽपि । एवं च—

"मुख्यं श्राद्धं मासि मासि अपर्याप्तावृतुं प्रति" ।

"नवमिश्रं तु षड्तून्" इत्यादौ ऋतुषट्कत्वेन मुख्यचान्द्रमा-सग्रहणे मृताहे श्राद्धं न स्यादिति मृततिथेर्मृततिथिं याव-च्चान्द्रो मासः, तद्युग्मं च ऋतुरिति तत्र मासानां गौणत्वेन ऋतुपदं गौणमेव । अस्तु वा तत्र ऋतुपदं मुख्यचान्द्रमासारब्धर्तु-परतया मुख्यमेव । मृताहकर्तव्यत्वं च—

'पूर्वतोऽपि परतोऽपि संक्रमात्
पुण्यकालघटिकास्तु षोडश'*—
इति सामान्यतः पुण्यकालः सर्वैरुक्तः । विशेषस्तू-
च्यते । अत्र मामकाः संग्रहश्लोकाः—
'प्रागूर्ध्वा दश, पूर्वतः षडबनि, स्तस्तत्पराः, पूर्वत-
स्त्रिंशत्, षोडश पूर्वतोऽथ परतः, पूर्वाः पराः स्युर्दश।
पूर्वाः षोडश, चोत्तरा ऋतुभुवः, पश्चात् स्ववेदाः, पुनः
पूर्वाः षोडश, चोत्तराः पुनरथो पुण्यास्तु मेषा-
दितः'इति ॥

अस्यार्थः—मेषे प्रागूर्ध्वं च दश घटिकाः
पुण्यकालः । वृषे पूर्वाः षोडश । मिथुने पराः षो-
डश । कर्के पूर्वास्त्रिंशत् । सिंहे पूर्वाः षोडश ।
कन्यायां पराः षोडश । तुलायां प्रागूर्ध्वा दश । वृश्चि-
के पूर्वाः षोडश । धनुषि पराः षोडश । मकरे चत्वा-
रिंशत्पराः । इदं च हेमाद्रिमतेनोक्तम् । माधवमते त्वत्र
परा विंशतिः पुण्याः । कुम्भे पूर्वाः षोडश । मीने पराः
षोडशेति ।

'याऽप्युत्तरा पुण्यतमा मयोक्ता
*सायं भवेत्सा यदि साऽपि पूर्वा ।
पूर्वा तु योक्ता यदि सा विभाते*

तद्योगादप्यधश्चोर्ध्वं त्रिंशन्नाड्यः पवित्रिताः' ॥
इतिवचनस्य पूर्वं त्रिंशत् परं च त्रिंशदिति व्याख्यानमनादेयम् ।
पूर्वापरं मिलित्वा त्रिंशदित्यस्यैव युक्तत्वात् । यदि कदाचित्तात्का-
लिकरविमण्डलवशात् प्रवेश एकघट्याधिक्यमपेक्षते तदाभिप्रायेणा-
ह—*षोडशेति । *सायं—सूर्यास्तात् प्राक् । वक्ष्यति माघे 'यदा तु
सूर्यास्तात्प्राक्'इति । *विभाते—उदयोत्तरम् । वक्ष्यति च श्रावणे

साऽप्युत्तरा रात्रिनिषेधतः स्यात् ॥
अर्वाङ् निशीथाद्यदि संक्रमः स्यात्
पूर्वेऽह्नि पुण्यं परतः परेऽह्नि ।
आसन्नयामद्वयमेव पुण्यं
निशीथमध्ये तु दिनद्वयं स्यात् ॥
कर्के ह्ययेऽप्येवमिति ब्रुवाणः
हेमाद्रिसूरिश्च तथाऽपरार्कः ।
रवेः प्रदोषे यदि वाऽर्धरात्रे
परेऽह्नि पुण्यं त्वथ कर्कटस्य ॥
प्रभातकाले यदि वा निशीथे
पूर्वेऽह्नि पुण्यं निगदन्ति माधवार्याः' ॥

अत्र मूलवचनानि माधवापरार्कहेमाद्र्यादिषु द्रष्टव्यानि ।

सर्वासु संक्रान्तिषु दानविशेषो हेमाद्रौ दानकाण्डे उक्तः ।

विश्वामित्रः

'मेषसंक्रमणे भानोर्मेषदानं महाफलम् ।
वृषसंक्रमणे दानं गवां प्रोक्तं तथैव च ॥
वस्त्रान्नपानदानानि मिथुने विहितानि तु ।
घृतधेनुप्रदानं च कर्कटेऽपि विधीयते ॥
ससुवर्णं छत्रदानं सिंहेऽपि विहितं सदा ।
कन्याप्रवेशे वस्त्राणां वेश्मनां दानमेव च ॥
तुलाप्रवेशे तिलानां(धान्यानां)गोरसानामपीष्टदम् ।
अलकीचलिते भानौ दीपदानं महाफलम् ॥
(अलकी वृश्चिकः) ।
धनुष्प्रवेशे वस्त्राणां यानानां च महाफलम् ।

झषप्रवेशे दारूणां दानमग्नेस्तथैव च ॥
कुम्भप्रवेशे दानं तु गवामम्बुतृणस्य च ।
मीनप्रवेशे स्थानानां माल्यानामपि चोत्तमम्' ॥इति।
अत्रापवादमाह हेमाद्रावाऽपस्तम्बः—

'सूर्योदयोत्तरं संक्रमेतु'इति । मूलवचनानि—

'मध्ये तु विषुवे पुण्यं प्राग्विष्णौ दक्षिणायने ।
षडशीतिमुखेऽतीते ह्यतीते चोत्तरायणे' ॥

इत्यादीनि, 'अह्नि संक्रमणे पुण्यम्'इत्याद्यग्रिमाणि च । अत्रो-भयतः प्रसक्तस्य षोडशत्वादेः—

'वर्त्तमाने तुलामेषे नाड्यस्तूभयतो दश' ।

इति विषुवयोरपवादः, विष्णुपदीषु पूर्वत एव, षडशीत्यास्येषु परत एवेति च नियम इति केचित् ।

वस्तुतस्तु सर्वसंक्रान्तिषु भोगमात्रेण व्यवस्थायां मानाभावाद्विशेषतो दशत्वादीनि पुण्यतमत्वार्थानि ।

'या याः सन्निहिता नाड्यस्तास्ताः पुण्यतमाः स्मृताः'—

इत्युक्तेः । अत एव—

'धनुर्मीनावतिक्रम्य कन्यां च मिथुनं तथा ।
पूर्वापरविभागेन रात्रौ संक्रमते रविः ॥
दिनान्ते पञ्च नाड्यस्तु तदा पुण्यतमाः स्मृताः ।
उदयेऽपि तथा पञ्च दैवे पित्र्ये च कर्मणि' ॥

इतिस्कान्दे तमनुपात्तः । उभयत्वपूर्वत्वादीनि चोभयभोगिनीत्वपूर्वभोगिनीत्वादिव्यवहारार्थानि । एतेन—

'पुण्यकालो विष्णुपद्याः प्राक् पश्चादपि षोडश' ।

इति वचनादुभयतः षोडशत्वस्य विष्णुपद्यामुपसंहार इत्यपास्तम् । तत्र विष्णुपदीग्रहणस्योपलक्षणत्वात् । एवं च—

*'अयने विषुवे चैव त्रिरात्रोपोषितो नरः ।
स्नात्वा यस्त्वर्चयेद्भानुं सर्वकामफलं लभेत्' ॥
अशक्तौ तु वृद्धवसिष्ठः—
'अयने संक्रमे चैव ग्रहणे चन्द्रसूर्ययोः ।
अहोरात्रोषितः स्नात्वा सर्वपापैः प्रमुच्यते' ॥

अत्रोपवासः संक्रमदिने, दानादि तु पुण्यकालदिन इत्याचार्यचूडामणिः । विशिष्टोपवासपुण्यकालदिन एवोपवासमिति वृद्धाः ।

'षडशीत्यां व्यतीतायां षष्टिरुक्तास्तु नाडिकाः' ।
इति कृत्यदिवसाद्यनुज्ञानं प्रत्युक्तम् । षडशीत्या चारस्य चतसृणां प्रत्येकं पञ्चदशत्वकथनात् ।
'षडशीतिमुखेऽतीते नाड्यः पञ्चदश स्मृताः' ।
इत्युक्तेः ।

*अयने इति । अत्रायनविषुवपदम्
'अयने कोटिपुण्यं च लक्षं विष्णुपदीफलम् ।
षडशीतिसहस्रं तु षडशीत्यां स्मृतं बुधैः ॥
शतमिन्दुक्षये दानमनन्तं तु दिनक्षये ।
विषुवे शतसाहस्रं व्यतीपाते त्वनन्तकम्' ॥
इति वृद्धवसिष्ठोक्तायनोपपदमुख्येन तदुक्तसर्वसंक्रान्तिपरम् ।
'नित्यं द्वयोरयनयोर्नित्यं विषुवतोर्द्वयोः ।
चन्द्रार्कयोर्ग्रहणयोर्व्यतीपातेषु पर्वसु ॥
अहोरात्रोषितः स्नानं श्राद्धं दानं तथा जपम् ।
यः करोति प्रसन्नात्मा तस्य स्यादक्षयं च तत्' ॥
इति तत्प्राधान्याभिप्रायं वा । तेन सर्वसंक्रान्तिष्वभावात्र तत्पदासङ्गतिः । एवं संक्रान्तिसामान्ये ह्युपवासप्राप्तेस्त्रिरात्राशक्तस्याप्येकोपवासोक्तेरपि । अहोरात्रोषित इति क्तप्रत्ययार्थो (भूतकालः)

इदं च पुत्रिगृहस्थातिरिक्तविषयम् ।
*'आदित्येऽहनि संक्रान्तौ ग्रहणे चन्द्रसूर्ययोः ।
उपवासो न कर्तव्यः पुत्रिणा गृहिणा तथा' ॥
इति जैमिनिवचनात् ।
अत्र श्राद्धमुक्तं हेमाद्रौ विष्णुधर्मे—
'श्राद्धं *संक्रमणे भानोः प्रशस्तं पृथिवीपते' ।
अपरार्केऽपि विष्णुः—

न विवक्षितः ।
'अमावास्या द्वादशी च संक्रान्तिश्च विशेषतः ।
एताः प्रशस्तास्तिथयो भानुवारस्तथैव च ॥
अत्र स्नानं जपो होमो देवतानां च पूजनम् ।
उपवासस्तथा दानमेकैकं पावनं स्मृतम्' ॥

इतिसांवर्तैकवाक्यत्वात् । वस्तुतस्तु त्रिरात्रोपोषित इति पूर्ववाक्ये प्रत्ययार्थो विवक्षितः । 'अगृहिभिः पुत्रीनरैः सङ्क्रमे प्राच्यहां त्रितयेऽथवोपवसनं कार्यम्'इति दीपिकायां 'प्राचि' इतिविशेषणात् । तद्वदहोरात्रोषित इत्यत्रापि स विवक्षित एव । सांवर्त्ते तु संक्रान्त्यधिकरणकोपवासविध्यन्तरमिति ।

*आदित्ये इति ।
'रविवारार्कसंक्रान्तावेकादश्यां सितेतरे ।
पारणं चोपवासं च न कुर्यात्पुत्रवान्गृही' ॥

इति पारणनिषेधात्तदङ्गिनः पूर्वस्य त्र्यहस्य एकाहस्य वा उपवासस्य निषेधोऽपि द्रष्टव्यः । इत्यमेव—
'सप्तवारानुपोष्यैव सप्तधा संयतेन्द्रियः ।
सप्तजन्मकृतात्पापात्तत्क्षणादेव हीयते' ॥
इति रविशन्युपवासयोः साक्षात्, पारणानिषेधमुखेन वा 'आदित्येऽहनि'इति 'रविवार'इति च निषेधः । परं तु संक्रान्तावित्यस्य

आदित्यसंक्रमश्चैव (१)विशेषेणायनद्वयम् ।
व्यतीपातो ऽथ जन्मर्क्षं चन्द्रसूर्यग्रहस्तथा ॥
(जन्मर्क्षमभ्युदयश्च) ।
एतांस्तु श्राद्धकालान्वै *काम्यानाह(२) प्रजापतिः ।
इति ।

द्वादशादिदिनैरयनांशप्रवृत्तावपि पुण्यं चक्र-मयनग्रहणम् । अन्यथा संक्रमेण सिद्धेरयनग्रहणं व्यर्थं स्यादित्यपरार्कः ।

हेमाद्रावपि गालवः

*अयनांशकनुम्येन कालेनैव स्फुटं भवेत् ।

तन्निमित्तकमर्थः, न तु तदधिकरणकमिति । संक्रान्तिनिमित्त-कोपवासपारणयोरविरुद्धत्वात् । 'तत्पुत्रोपवासश्च' इत्यादिन्या-यसाम्यात् । एवं च–

भृगुभानुदिनोपेता सूर्यसंक्रान्तिसंयुता ।
एकादशी सदोपोष्या पुत्रपौत्रप्रवर्द्धिनी ॥

इति विष्णुधर्मादि संग्रहोक्ते । *संक्रमणे इति पुण्यका-लीनत्वार्थम् । *विशेषेणेति मेषायनादौ श्राद्धसूचकम् । *नित्यानीति ।

रविसंक्रमणं प्राप्ते न स्नायाद्यस्तु मानवः ।
सप्तजन्मानि रोगी स्याद्दरिद्रश्चापि जायते ॥

इति स्नानवत् श्राद्धस्यापि नित्यत्वं नैमित्तिकत्वादिष्यपि द्र-ष्टव्यम् । सर्वसंक्रान्तावयनांशमध्ये किं मानमित्यपेक्षायामाह–*अय-

(१) यद्यपि लिखितपुस्तकेषु "विषुवं चायन" इति पाठस्तथाऽपि टीकायां 'विशेषेण' इति प्रतीकस्वरसादयमेव युक्त इति ।

(२) अत्र 'नित्यानाह' इति पाठः साधुः । नैमित्तिकत्वेन तेषां काम्यत्वाभावात् । टीकायां 'नित्यान्' इति प्रतीकाच्च ।

मृगकर्कादिगे सूर्ये याम्योदगयने सति ॥

तदा संक्रान्तिकाले स्युरुक्ता विष्णुपदादयः । इति ॥

अयनांशकच्युतिरूपे संक्रान्तिकालेऽपि विष्णुपदादयः प्रवर्तन्ते । तेन *तत्प्रयुक्तं पुण्यकालादि तत्रापि ज्ञेयमिति स एव व्याचख्यौ । तच्च मेषायनं वृषायनमित्यादि सर्वत्र ज्ञेयम् । माधवीयेऽपि जाबालिः

*संक्रान्तिषु यथा कालस्तद्वदेवाऽयने तथा ।

अयने विंशतिः पूर्वा मकरे विंशतिः पराः ॥ इति ।

मकरायने पूर्वा विंशतिघटिकाः पुण्याः । मकरसंक्रान्तौ तु पश्चाद्विंशतिः । अन्यत्रायनं तत्संक्रान्तिवदित्यर्थः ।

विष्णुपदादिस्वरूपं च दीपिकायामुक्तम्—

हर्यङ्घ्रिवृषसिंहवृश्चिकघटेष्वर्कस्य यः संक्रमः,

कन्यामीनधनुर्नृयुक्षु षडशीत्याख्य, तुलामेषयोः ।

प्रोक्तं तद्विषुवं, झषेऽयनमुदक्, कर्कटके दाक्षिणम् । इति ।

हर्यङ्घ्रिः—विष्णुपदम् । नृयुक्—मिथुनम् । अत्र च *पिण्डरहितं श्राद्धं कुर्यात् । तथा चापरार्के मात्स्ये—

नांशेति । मकरादिगे सूर्ये सति यदुदगयनादि, तत्र सति योऽयनांशकालस्तत्तुल्यकालेनैव कुम्भादौ सिंहादौ चायनं पुण्यकालः स्फुटं भवेत् । तत्र यः संक्रमकालः, सोऽपि च पुण्यकाल इत्यर्थः ।

सर्वं विष्णुपदाद्युक्तं तिथ्यादिह यथाऽन्यथा ।

इतिप्रथमश्लोकोत्तरार्द्धपक्षे अयनांश एव विष्णुपदादि । अन्यथा—तत्र तदकरणे इत्यर्थः । *तत्प्रयुक्तम्—अयनांशप्रयुक्तम् । विष्णुपदाद्ययनांशे पूर्वादिभोगिनीत्यं सापवादमाह—*संक्रान्तिष्विति । *पिण्डरहितमिति तत्सहचरितधर्मोपलक्षणम् । 'पिण्डनिर्वापरहितम्' 'पिण्डो यत्र निवर्त्तेत'इत्याद्यग्रे सत्त्वात् ।

भानोः संक्रान्तिभोगश्च *कुलिकश्चार्धयामकः ।
इति ज्योतिःशास्त्रे वर्ज्येषु परिगणनात् ।

अयनद्वयातिरिक्तासु दशसु संक्रान्तिषु रात्रौ (१)स्नानश्राद्धादि न कार्यम् ।

अह्नि संक्रमणे कृत्स्नमहः पुण्यं प्रकीर्तितम् ।
रात्रौ संक्रमणे भानोर्दिनार्धं स्नानदानयोः ॥
*अर्धरात्रादधस्तस्मिन्मध्याह्नस्योपरि क्रिया ।
ऊर्ध्वं संक्रमणे चोर्ध्वमुदयात्प्रहरद्वयम् ॥
पूर्णे चेदर्धरात्रे तु यदा संक्रमते रविः ।
प्राहुर्दिनद्वयं* पुण्यं मुक्त्वा मकरकर्कटौ ॥
इतिवृद्धवसिष्ठादिवचनैरहःपुण्यत्वोक्त्या,

जः प्रचरन्ति" इत्यत्रोष्णीषमुद्दिश्य लोहितत्वविधिर्न स्यादिति वाच्यम् । तत्रोद्देश्यस्यान्यतः सिद्धत्वात् । इहतु भक्षणस्य पिण्डस्य च विधानादन्यतः सिद्धं पार्वणमनूद्यते इत्येव युक्तमित्यर्थः ।
*कुलिक इति ।

कुलिकः कालवेला च यमघण्टश्च कण्टकः ।
वाराद् द्विघ्ने क्रमान्मन्दे बुधे जीवे कुजे क्षणः ॥ इति ।
वाराद् द्विघ्ने क्रमान्मन्दे घटयूनः कुलिको निशि । इति च ।
भौमभार्गवसूर्येज्ञसौरीन्द्वाङ्गिरसक्रमात् ।
वासरेषु द्वितीयाद्या अर्द्धयामा बुधैः स्मृताः ॥
इति चार्द्धयामः । किं तद्दिनार्धमित्यत्राऽऽह *अर्धरात्रादिति । *दिनद्वयमिति अर्धावच्छिन्नं बोध्यम् । दिनार्धमित्युपक्रमात् ।

(१) मनुरप्याह—"रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्तिता हि सा । सन्ध्ययोरुभयोश्चैव सूर्ये चैवाचिरोदिते" इति । (अ०३श्लो०२८०)

इति वसिष्ठवचनादर्थाद्रात्रौ स्नानादिनिषेध-प्रतीतेः । यानि तु—

विवाहव्रतसंक्रान्तिप्रतिष्ठा*ऋतु(१)जन्मसु ।
तथोपरागपातादौ स्नानं दानं निशा शुभा ॥ इति-
राहुदर्शनसंक्रान्तिविवाहात्ययवृद्धिषु ।
स्नानदानादिकं कुर्युर्निशि काम्यव्रतेषु च ॥

इत्यादीनि विष्णुगार्ग्यादिवचनानि, *तानि म-करकर्कसंक्रान्तिविषयाणि । 'मुक्त्वा मकरकर्कटौ' इति तयोर्दिवानुष्ठानस्य पर्युदस्तत्वादिति हेमाद्रि-

---

*अर्थादिति । अहःसंक्रमे तत्पुण्यत्वसिद्धेरहन्येवेति नियमः । येषां त्वेकान्वये इतरानन्वयेन समुच्चयासम्भवादितरव्युदासे शक्तः तात्पर्य-कल्पनयैव नियमः यथा 'याजनाध्यापनप्रतिग्रहैर्ब्राह्मणो धनमर्जयेत्' इत्यादौ, अत्रार्जने उपायत्रयान्वये कृष्यादेर्नान्वयः प्रकृते च संक्रमे पूर्वोत्तरभागत्वेन रात्रिभागस्यापि समुच्चित्यान्वयः सम्भवतीति न नियम इति मतम्, तेषां मते परिसंख्यैव । एवं चैकतरभागिनीनां संध्योपजातानामपि न पुण्यं, किं कथा रात्र्यनुगमानानामिति स्थिते तत्र कथन्तायां रात्रावित्याद्युक्तम् ।

*ऋत्विति । 'ऋतौ तु गर्भशङ्कित्वात्' इत्यादि ऋतुगमन-निमित्तं स्नानं वक्ष्यति । *तानीति । मुक्त्वेत्यस्यार्द्धरात्रमा-त्रनिर्णयशेषत्वं कृत्स्नरात्रिनिर्णयशेषत्वं वा उपेत्य कर्कमकरौ विवाहेत्यादेर्विषयो वाच्यः । इत्थं च 'मिथुनात्कर्कसंक्रान्तिः' 'कार्मुकं तु परित्यज्य' इत्येवमादीनां रात्रिमपरिहृत्यार्थवत्त्वा-य विकल्प उपपद्यते इति भावः । वक्ष्यमाणस्वरसादाह—

---

(१) 'सूतिजन्मसु' इति क्वचित्पुस्तके पाठः ।

माधवादयः । *वस्तुतस्तु प्रागुक्तवचनेन रात्रौ दि-
नद्वयपुण्यत्वादेशेन पर्युदासात् मकरकर्कटयोरपि *स्ना-
नं दानं परेऽह्नि च इत्यादिविरहात् पुण्यत्वोक्तेरह्नः पु-
ण्यत्वानुपपत्त्या कल्प्यरात्रिनिषेधस्य च प्रत्यक्षरा-
त्रिविधिना बाधात् सर्वसंक्रान्तिषु रात्रावनुष्ठानविक-
ल्पः । स च देशाचाराद्व्यवस्थित इति युक्तः पन्थाः ।
अयनयोस्तु वक्ष्यमाणविशेषः श्रावणे माघे च व-
क्ष्यते । ज्योतिर्निबन्धे गर्गः—

यस्य जन्मर्क्षमासाद्य रविसंक्रमणं भवेत् ।
तन्मासाभ्यन्तरे तस्य वैरक्लेशधनक्षयाः ॥
तगरस्वराकृतपथ्ये रजनीसिद्धार्थलोध्रसंयुक्तैः ।
स्नानं जन्मर्क्षगते रविसंक्रमणे नृणां शुभदम् ॥
हेमाद्रौ—
आद्यं चैत्रादियुग्मं स्याद्राशौ चैवायनद्वयम् ।
संक्रान्तिः पक्षिणी ज्ञेया *दानाध्ययनकर्मसु ॥
अत्र गौडाः
संक्रान्त्यां पक्षयोरन्ते द्वादश्यां श्राद्धवासरे ।
सायंसन्ध्यां न कुर्वीत कुर्वंश्च पितृहा भवेत् ॥
इति कर्मोपदेशिन्यां स्मार्तोक्तेः सायं पुण्यकाले

---

*वस्तुतस्त्विति । नन्वेवं पर्युदासेनैव रात्रिपुण्यत्वं स्यादत
आह—*स्नानमिति । तथा चान्यथापि कथंचनाशक्तेन रात्रिपुण्य-
त्वापत्तिरिति भावः । *दानं वेदस्य । अध्ययनवद्धर्मिकरूपात् । अ-
ध्यापनमिति यावत् । एतच्चायनविषुवमात्रानध्यायविषयम् ।

निशाद्वयं दिवा, रात्रौ संक्रमे वासरद्वयम् ।
अनध्यायं प्रकुर्वीत अयने विषुवे तथा ॥

संध्यानिषेधमातुस्तन्निर्मूलम् । अन्यच्च *बहु वक्तव्यं विस्तरभीतेर्नोच्यते ॥ इति संक्रान्तिनिर्णयः ॥

इति नक्षत्रवचनात् । *बाह्निति ।

सूर्ये घोरा, विधौ ध्वांक्षी, पापवारे महोदरी ।
बुधे मन्दाकिनी नाम, मन्दा सुरपुरोहिते ॥
मिश्रिता शुक्रवारे स्यात्, राक्षसी च शनैश्चरे ।
मन्दा ध्रुवेषु विज्ञेया, मृदौ मन्दाकिनी तथा ॥
क्षिप्रे ध्वांक्षीं विजानीयात्, उग्रे घोरा प्रकीर्तिता ।
चरे महोदरी ज्ञेया, क्रूरर्क्षेस्तु राक्षसी ॥
मिश्रिता चैव विज्ञेया मिश्रर्क्षेस्तु संक्रमे ।
द्विचतुःपञ्चसप्ताष्टनवद्वादश तासु तु ॥
क्रमेण घटिका ज्ञेयास्तत्पुण्यं पारमार्थिकम् ।

पारमार्थिकं सूक्ष्मतमे संक्रमकाले यत्पुण्यं धर्मानुष्ठानात् तद् तासु तत्तद्वारे तत्तन्नक्षत्रे तत्तत्फलं पूर्णम् । वारर्क्षयोर्विपर्यासे ध्वा- मिश्रमिति बोध्यम् ।

मन्दा निमज्जने शस्ता, मन्दाकिन्यस्तु राजनि ।
ध्वांक्षी वैश्येषु विज्ञेया, घोरा शूद्रे सुखप्रदा ॥
महोदरी तु चौरेषु, शौण्डिकेषु तु राक्षसी ।
चण्डालपुल्कसानां च ये चान्ये क्रूरकर्मिणः ॥
सर्वेषां दारुणानां च मिश्रिता वृद्धिकारिणी ।

एवं—

पूर्वाह्णकाले नृपतीन्, द्विजेन्द्रान्मध्यन्दिने, चाथ विशो ऽपराह्णे ।
शूद्रान् रवावस्तमिते, प्रदोषे पिशाचकान्, रात्रिचरान्निशीथे ॥
नटादिकांश्चापररात्रिकाले, प्रत्यूषकाले पशुपालकांश्च ।
संक्रान्तिरर्कस्य समस्तलिङ्गितं च सन्ध्यासमये निहन्ति ॥

इति वेलाफलम् । अत्र यस्य या शुभा संक्रान्तिः, तेन तस्यां

चक्रवत् परिवर्तेत सूर्यः कालवशात्मनः ।
अतः सांवत्सरं श्राद्धं कर्तव्यं मासचिह्नितम् ॥
मासचिह्नं तु कर्तव्यं पौषमासात्ययेन हि ।
यतस्तत्र विधानेन स मासः परिकीर्तितः ॥

इति लघुहारीतेन सांवत्सरश्राद्धं पूर्वोक्तमासचिह्नितं कार्यं, यच्च मासचिह्नं तत्पौषमासाद्यमित्युक्तेः दर्शान्तकरणाभावेऽपौ-षादिलाभाच्च सौरयोस्तयोः पुष्यमघायोगासम्भवात् । अथैवमपि "तपस्तपस्यौ शैशिरावृतू" "मधुश्च माधवश्च वासन्तिकावृतू" "शुक्रश्च शुचिश्च ग्रैष्मावृतू" अथैतदुत्तरायणं देवानां दिनम् । "नभश्च नभस्यश्च वार्षिकावृतू" "इषश्चोर्जश्च शारदावृतू" "सहश्च सहस्यश्च हैमन्तिकावृतू" अथैतद्दक्षिणायनं देवानां रात्रिः" इति श्रुतावुक्तयोः सौरत्वात्तदन्तर्गतर्तुप्रविष्टा मासास्तपआदयोऽपि सौरा एव वाच्याः । ततश्च तत्पर्यायतया माघादीनामपि सौरत्वमुचितम् । पर्यायत्वं च —

माघमासस्तपाः प्रोक्तः, तपस्यः फाल्गुनः स्मृतः ।
चैत्रो मासो मधुः प्रोक्तो, वैशाखो माधवो भवेत् ॥
ज्येष्ठमासस्तु शुक्रः स्यात्, आषाढः शुचिरुच्यते ।
नभो मासः श्रावणः स्यात्, नभस्यो भाद्र उच्यते ॥
इषश्चाश्वयुजो मासः, कार्त्तिकश्चोर्जसंज्ञकः ।
सहो मासो मार्गशिराः, सहस्यः पौषनामकः ॥

इति स्मरणादवगम्यते । तथा च श्रौतवैशाखीयस्य चान्द्रस्यैव गौणत्वं स्यादिति चेन्न । सन्ति हि 'या वैशाखस्यामावास्या रोहिण्या सम्पद्यते' इत्यादीनि वचनानि, तत्र वैशाखो न सौरः । मेषस्थसूर्येऽमावास्या रोहिण्यृक्षीयवृषस्थचन्द्रत्वासम्भवात् । तस्यां सूर्याचन्द्रमसोरेकराशिस्थत्वनियमात् । किं तु दर्शान्तचान्द्रः । तत्रामायां चन्द्रसूर्ययोरेकराशिस्थत्वसम्भवात् । उभयोः श्रौतत्वाविशेषेऽपि अनेकार्थत्वभयेनैकत्र गौणत्वे आवश्यके अर्थवादगतेष्वेव तपआदिशब्देषु

नक्षत्रयुक्तत्वव्यक्तिवचनाः । चैत्रादिशब्दास्तु चान्द्रे योगरूढाः । संज्ञायामिति पाणिन्युक्तेः । तत्र चैत्रे योगः चित्राद्यापार्ध्याद्-द्ध्यादिभिर्योगवचनतया ।

अन्त्योपान्त्यौ त्रिभौ ज्ञेयौ फाल्गुनश्च त्रिभो मतः ।
शेषा मासा द्विभा ज्ञेयाः कृत्तिकादिक्रमतस्तथा ॥

इति वचनात् । मासानां च पौर्णमासीयोगात्मकं द्विभत्वादि ।

द्वे द्वे चित्रादिताराणां परिपूर्णेन्दुसंगमे ।
शेषा मासा द्विभा ज्ञेयाः कृत्तिकादिक्रमतस्तथा ॥

इति संकर्षणकाण्डवचनात् । ननु चैत्रादिशब्दो न चित्रापौर्णमा-दियोगनिमित्तको, ऽपि तु चित्रास्वात्यन्यतरादियोगनिमित्तः । चैत्र्यादिप्रकृतिचित्रादिपदे च चित्रास्वात्यन्यतरत्वादिनाऽजहत्स्वार्थ-लक्षणा, मनोतास्थाग्निपदे इव सोमयागादिनाम्नः । न च चित्राशब्दस्य चित्रायां शक्तिः, स्वात्यां लक्षणेति वाच्यम् । युगपद्वृत्तिद्वयापत्तेः । दृश्यते चायःशूलिको दाण्डाजिनिक इत्यादौ प्रकृतेरपि साहसदम्भयोर्लक्षणा । साहसिको दाम्भिक इत्येव प्रतीतेः । [illegible] हस्तादिपाते तून्पातः । 'प्रकृतेरन्यत्वमुत्पातः' इति लक्षणात् । एवं तिथिवृद्धचान्द्रोऽपि सौरादिना मुख्य एव । चान्द्रत्वात् । दर्शान्त-चान्द्रस्य सर्वतो मुख्यत्वेऽपि वार्षिकादावेतस्य विनियोगः परम्, वचनात् । यथा गौणस्यापि कृष्णादेर्नियतः पाक्षिको वा विनियोगः, सौरादेश्च गौणत्वस्य वचनादेव । नन्वेवं मासत्वातु-विध्यानुपपत्तिः । गौणमुख्ययोरसमन्वयात् । न च त्रिंशद्गुणितादि-नावच्छिन्नत्वमनुगतमासत्वमिति वाच्यम् । नाक्षत्रमासेऽव्याप्तेः ।

माने मासस्तु नाक्षत्रे सप्तविंशतिभिर्दिनैः ।
परिशेषेषु मानेषु मासस्त्रिंशद्दिनः स्मृतः ॥

इति विष्णुधर्मोक्तेः । न च तावद्दिनेष्वेव भागकल्पनया त्रिंशत्त्वं वाच्यम् ।

नित्यप्राप्तत्वादिति चेत् । न, यतो न्यायप्रवृत्तेः प्राक् सर्वमासानां प्राप्तिर्वाच्या। अन्यथा तस्यापि नियामकत्वं न स्यात् । तथा च तस्या अवश्यवाच्यत्वे तद्दशायां मन्थरान्न्यायात् प्राक् प्रवृत्तस्य शास्त्रस्यैव नियामकत्वमुपेयते ।

इत्थमेव (१)मुख्यद्रव्योपादानाशक्तिनिर्णये न्यायेन सुसदृश नियमात्प्रागेव प्रधानविधिबोधितप्रधानकर्त्तव्यताक्षेपात् सर्वद्रव्याणां पाक्षिकप्राप्तिसमये प्रवृत्तः पूतीकानां विधिर्नियमविधिरेवेत्युच्यते ।

एवम् "ऐन्द्र्या गार्हपत्यमुपतिष्ठते" इत्यादिरुपस्थाने करणभूताया ऐन्द्र्या विधिस्तस्या नियमाय पाक्षिकप्राप्त्या वाच्यः । तत्र न्यायेन मुख्यसामर्थ्यवत्या आग्नेय्या एव कस्याश्चिन्नियमः स्यात, समीपे स्थित्वाऽभिधानात्मकमुपस्थानं मन्त्रैककरणकमित्यव्यभिचारात् लिङ्गमात्रेणापि मन्त्रस्य विनियोगसम्भवात्, देहादिभिन्नात्मज्ञानस्येव पारलौकिकफलककर्मानुष्ठाने। तथा च यावन्न्यायः मुख्यसामर्थ्यवर्तीं कां चनाऽऽग्नेयीं नियन्तुमुपक्रमेत, तावच्छीघ्रप्रवृत्तेन प्रत्यक्षविधिनैवैन्द्री नियम्यते इति ।

एवमेव "तिलमाषैश्च सर्षपैः"इत्यादिषु माषनिषेधप्रवृत्तिपूर्वकालीनां निषेध्यप्रसक्तिरूपां पाक्षिकप्राप्तिमपेक्ष्यैव तन्नियमविधित्वमिति दिक् ।

एवं च 'सौरो मासो विवाहादौ' इत्यादेः—एतेषु कार्येष्वेते एव मासा ग्राह्या इत्यर्थे, शेषेषु मुख्यचांद्र एवेतिव्यवस्थार्थं दर्शान्तचान्द्रवचनान्यप्यावश्यकानि । अन्यथा

१ मुख्यस्य द्रव्यस्य सोमस्योपादाने ऽशक्तौ लाभाभावादिभिर्ग्रहणाशक्तौ निर्णये कस्य ग्रहणं कर्तव्यमिति सन्देहे तत्करणे प्राप्ते न्यायेनेत्यर्थः ।

यावद्व्यवस्थाप्यविषयानुपादानात्तदसङ्गतेः। दर्शान्तचान्द्रवचने केषांचित्कार्याणामुपादानं चोदाहरणमात्रम्। एवं कृष्णादिसौरादिमासानां गौणत्वेऽपि मासशब्दवत्सु शास्त्रेषु, सङ्कल्पाद्युल्लेखे वा क्वचित्तेषामपि ग्रहणं मासत्वाभिधानात्। 'नापुत्रस्य लोकोऽस्ति' 'पितुः पुत्रेण कर्त्तव्या' इत्यादौ क्षेत्रजादीनामिव पुत्रत्वाभिधानादिति।

अथ "कृष्णपक्षादिकं मासम्" इत्यादित्रिकाण्डमण्डनस्थदेशविशेषव्यवस्थावाक्यमाचारमूलकम्। इच्छन्ति इष्ट इत्युक्तेः। तच्च विन्ध्यदक्षिणे न कृष्णादिः, विन्ध्यतदुत्तरयोश्च न शुक्लादिरित्यर्थकम्। क्वापि शिष्टाचारे तत्र शुक्लाद्युल्लेखादेरदर्शनात्। विन्ध्यदक्षिणतः शुक्लादिरेवेष्टः, अन्यत्र कृष्णादिरेवेति चाऽऽर्थिक एवार्थः। एवं च कर्मवर्णविशेषव्यवस्थावचनैर्विरोधे आचारस्य बाध्यत्वात्तद्वचनमशुद्धमेव; इति चेत्—न हि तद्वचनस्य कर्मादिव्यवस्थावचनैर्विरोधः। तथा हि—कर्मवर्णव्यवस्था ऽङ्गभूतमासविषया, न तु विन्ध्यदक्षिणतः शुक्लादिरेव, ततोऽन्यत्र कृष्णादिरेवेति व्यवस्थाऽपि। तस्या अङ्गानङ्गसाधारणसङ्कल्पाद्युल्लेख्यलौकिकाधिकरणमात्रमासविषयत्वात्। कर्मसत्तावच्छेदकतया सूक्ष्मकालवन्मासादिस्थूलकालस्यापि अस्मिन्वर्षे ऽस्मिन् मासे कृतमिति प्रतीत्या तादृशाधिकरणत्वात्। स्मर्यते च—

मासपक्षतिथीनां च निमित्तानां च सर्वशः।
उल्लेखनमकुर्वाणो न तस्य फलभाग्भवेत्॥—

इति सङ्कल्पादौ मासाद्युल्लेखः। निमित्तानामिति। देशक्षेत्रादीनां नक्षत्रयोगकरणादीनां च। अत एव व्यतीपातादिकमनुल्लिख्य स्नातस्य तदुल्लिख्य पुनः स्नानमिच्छन्ति।

ननु मासादिविधिबोध्यो मासाद्युल्लेखो ऽङ्गभूतमासादिविषय एवास्तु, तदुल्लेखविधेस्तदनुसन्धानार्थत्वात्। अङ्गभूतस्यैव चानुसन्धानं प्रयोगविधिरपेक्षते। तस्य मनसा सम्भवेऽपि विधिवशादेवोल्लेखेनैव कर्त्तव्यत्वम्। यद्य-

प्यहरहःस्नानादौ विध्यभावान्मासादेर्नाङ्गत्वं, तथापि यत्र यस्य मासादेरङ्गत्वं तत्रैव तस्योल्लेखविधिरस्तु । यत्रापि च निमित्तस्यानङ्गत्वाद् दृष्टानुसन्धानार्थं तदुल्लेखविधिर्न घटते, तथापि निमित्तत्वमनुष्ठानप्रयोजकं, तच्चाज्ञातस्य नोपपद्यत इत्यनङ्गस्यापि तस्यानुसन्धानं प्रयोगविधिरपेक्षत एवेति तदुल्लेखविधिरपि निष्प्रत्यूहः । तथा च सङ्कल्पवाक्यगतोल्लेखोऽङ्गभूतमासविषय इति कर्मवर्णव्यवस्थावाक्यविरोधो दुर्वारः; इति चेन्न । उल्लेखस्यादृष्टार्थत्वमेव । अनुसन्धानार्थत्वे च सर्वशब्देन च प्रतीयमानस्य सर्वेषां सर्वत्रोल्लेखस्य बाधापत्तेः ।

वस्तुतस्तु अवच्छेद्यकालस्याधिकरणत्वेन सर्वत्र प्राप्तत्वात् कालविधयः सर्वे तदवच्छेदककालोपाधिपराः । ते च कालोपाधयः कर्मप्रयोगाधिकरणकालपरिच्छेदमुखेन कर्मप्रयोगाङ्गाः । परिच्छेदश्चाऽत्र कालविषयकर्तृव्यापारे ऽपेक्षितः । स च व्यापारः कर्मप्रयोगारम्भार्थं प्रति ईक्षा । प्रयोगारम्भश्च सङ्कल्प एव । तथा च प्रयोगाङ्गकालस्य सङ्कल्पे उल्लेखार्थं ततः पूर्वमनुसन्धानमपेक्षितम् । ततश्च पूर्वमनुसन्धानेनोल्लेखे जाते ततो जायमानमप्यनुसन्धानमग्रे ऽनुपयोगान्नोल्लेखप्रयोजनं भवितुमर्हति, यद्वशेन तस्याङ्गभूतमासविषयकत्वं, वचनसङ्कोचो वा स्यात् । एवं निमित्तस्य ज्ञातस्यानुष्ठानप्रयोजकत्वात्सङ्कल्पात्पूर्वमेव तदनुसन्धानमपेक्षितं, न तूल्लेखकृतेन तदनुसन्धानेन कश्चिदर्थः । तत् इत्थं सङ्कल्पादिगतो मासाद्युल्लेखो ऽङ्गानङ्गसाधारणमासविषयो ऽदृष्टार्थः ।

यथा चाहुः—'असङ्कल्पिताग्निपिद्धादिव तादृशाद्विहितादप्यदृष्टं जायते । आद्यं पापम्, उत्तरं पुण्यमित्यन्यदेतत् । मासाद्युल्लेखश्चाभ्युदयविशेषहेतुरित्यत्र व्यतिरेकप्रदर्शनार्थम् 'उल्लेखनमकुर्वाण' इत्यादि, न तु तस्य विहितस्य कर्मणः मासाद्यनुल्लेखे

फलं न जायते इति । तद्विषयं च देशव्यवस्थावचनं नाङ्गभूतमासविषयकर्मादिव्यवस्थावचनैर्बाधितुं शक्यम् । भिन्नविषयत्वात् । एवं चाधानादौ वर्णविशेषव्यवस्थावचनेन दर्शान्तादेर्विवाहादौ कर्मविशेषव्यवस्थावचनेन सौरादेर्मासस्याङ्गत्वेऽपि सङ्कल्पे विन्ध्यदक्षिणे शुक्लादेरेव, विन्ध्यतदुत्तरयोश्च कृष्णादेरेवाधिकरणत्वेनोल्लेखो वचननिबद्धाच्छिष्टाचारादिति—

अथोषःकालीनाहरहःस्नानादावौदयिकयास्तिथेर्वारस्य चामत्त्वे सङ्कल्पे कस्योल्लेखः ? । अत्र केचित्—उदयस्य कर्मकालत्वाभावेऽप्युषःकाले स्नानादिसङ्कल्पे औदयिकयोरेव तिथिवारयोरुल्लेखः ।

सप्ताहं प्रातरस्नायी द्विजः शूद्रत्वमाप्नुयात् ।

इतिनिन्दास्मरणादाचाराच तत्रावश्यकसन्ध्यादिविधिना स्नानलोपो मा प्रसाङ्क्षीदिति अल्पद्वादश्यां माध्याह्निकापकर्षवदुषसि स्नानापकर्षोपगमात् साकल्यवचनज्ञापिताहार्यतिथ्युल्लेखवदुषःस्नाने प्रातःस्नानत्वव्यवहारादुन्नीताहार्यप्रातस्त्वसत्त्वाच्चेत्याहुः ।

वस्तुतस्त्वहरहःस्नानादौ तिथिवारयोर्न विधिः । तिथिवाराङ्गकस्य च प्रतिपदादिभानुवारादिस्नानादेरुदयोत्तरमेवानुष्ठानं हेमाद्र्यादिसम्मतम् । सप्ताहमितिवचनं गौणकालातिक्रमे दोषाधिक्यार्थं, न तु तिथ्यादेरङ्गत्वार्थम् । तथा च सङ्कल्पे ऽधिकरणतयोपागततिथिवारयोरेवोल्लेखः । तथाविधस्नानजनितशुचित्वं तु वचनात्सकलकर्मोपयोगि । आचारस्तु स्मृतिविरोधाद्विगीत एवेति । मासपक्षेत्यादिवचनाबोधितत्वात्तु नोषस उल्लेखः ।

इदं तु बोध्यम् । नैत्यके स्नान–देवपूजादौ, नैमित्तिके ग्रहण–संक्रान्ति–स्नानश्राद्धादौ,काम्ये च–सर्वत्र प्रधाने गौणकालकर्त्तव्येऽपि मुख्यचान्द्रवत्सरवत्,तादृश एव ऋतुः सङ्कल्पे उल्लेख्यः। स च गौणवसन्तादिरूपो ग्रीष्मादिः । अङ्गे तत्र मुख्यस्य तस्याबाधादा-

*अत्र ब्राह्मणादीनां यत्र कर्मविशेषे वचनान्तरेण *'वसन्ते ब्राह्मणोऽग्निमादधीत' इत्यादिवत् मास उक्तः । तत्र दर्शान्तत्वमात्रं नियम्यते, न तु सर्वकर्मसु दर्शान्त

चाराच्च, प्रधानविधिस्थवसन्तादिपदवृत्तिसजातीयवृत्तिलभ्यार्थकत्वे मानाभावाच्च । मासस्तु विन्ध्यदक्षिणे शुक्लादिः, विन्ध्यतदुत्तरयोः कृष्णादिः प्रागुक्त एवेति ।

अथ 'अमावास्यापरिच्छिन्न' इत्यादिवर्णव्यवस्थावचनाद्दे-र्दर्शान्तमासविधायकत्वेन सर्वकर्मविषयता स्यात् न तु मासो-पबद्धकर्मविषयतेत्यत आह *अत्रेति ।

वसन्ते इति । ब्राह्मणादीनामाधानोपनयनादिकालवस-न्तादिप्रविष्टत्वेन मासे प्राप्ते विशेषमात्रं विधीयते, ब्राह्मणादेर्यो मासः स दर्शान्त एवेति । अङ्गत्वेन मासविशेषविधाने मा-सपदस्यापि विधेयार्थकत्वेन गौरवादित्यर्थः । इदमुपलक्षणं, विवाहादिषु विधिनिषेधमुखेन शुभाशुभफलसूचकतया, तदुत्तर-पिण्डदानादिनिषेधविषयत्वेन च यज्ञेषु मासाग्निहोत्रादिषु सत्रा-दिषु चाङ्गत्वेन, अहीनगर्भाधानादिषु चाङ्गभूताहोरात्रघटनार्थं मासे प्राप्ते "सौरो मास" इत्यादिर्विशेषविधिः । यो विवाहा-दिषु मास उपादेयः, स सौरादिरिति तदर्थः ।

ननु कर्मव्यवस्थावाक्ये मासस्योद्देश्यत्वे शुद्धतदुद्देशासम्भवात् कर्मविशेषीयमासो वाच्यस्तदपेक्षया शुद्धं कर्मानूद्यैव मासविशेष-विधिः । वर्णव्यवस्थावाक्ये च कर्मणीत्यध्याहारेण कर्तृषष्ठ्यङ्गी-कारेण च ब्राह्मणकर्तृककर्मोद्देशेनैव दर्शान्तादिविधिः । उभयत्रापि मासपदं विशेषाविनाभावादेव प्राप्तत्वादनुवाद एव । यद्वा षष्ठ्यन्तै-कपदार्थब्राह्मणसम्बन्धाद्युद्देशेनैव दर्शान्तादिविधिः । किं तद्ब्राह्मण-सम्बन्धीत्याकाङ्क्षायां च विधीयमानविशेषोपस्थापितस्य मासस्यैव तत्त्वावगमात्तद्वर्णविशिष्टमासोद्देशस्यार्थात्सिद्धेर्मासपदं नित्यानुवाद

त्रैवर्णिकानां सर्वकर्मसु मासविशेषनियमः स्नान-नादीनां शूद्रानुलोमादिपरत्वापत्तेश्चेति गुरुचरणाः । ज्योतिर्गर्गः—

सौरो मासो विवाहादौ, यज्ञादौ सावनः स्मृतः ।
आब्दिके पितृकार्ये च चान्द्रो मासः प्रशस्यते ॥

ऋष्यशृङ्गः—

व्यवस्थावचनेन वर्णांश इव कर्मांशेऽपि विशेषकल्पनया स्वविषये वर्णांशे सामान्यरूपस्य कर्मव्यवस्थावचनस्य बाधादुपनयनादौ वर्णव्यवस्थैवाऽऽश्रयणीया । न च विवाहादावित्यादिपदेनोपनयनं ग्राह्यं श्रीकरेणोक्तमिति वाच्यम् । उपनयने सौरमासविधायकानां मूर्द्धावसिक्तादिविषयकत्वस्य तेनोक्तत्वादित्याखण्डनार्थः । नन्वेतादृशायामपेक्ष्य वर्णव्यवस्थावचनस्य कर्मव्यवस्थावचनेन बाधात्तदविषयस्नानादिविषयत्वमस्तु इति चेत्तर्हि कर्मव्यवस्थावचनस्य वर्णव्यवस्थावचनेन बाधात्तदविषयमूर्द्धावसिक्तादिविषयत्वं स्यादिति ।

वर्णव्यवस्थावचने कर्मविशेषानालोचनं बाधकान्तरमाह — त्रैवर्णिकानामिति । विवाहादाविति । ननु श्रीकरादिभिस्तावद्विवाहादावित्यादिपदेनोपनयन-चूडा-व्रत-नियम-प्रतिष्ठा-गृहकरण-क्षौर-यात्रा-महाषष्ठी-महासप्तमी-विजयद्वादशी-दशहरा-युगाद्यादीनां ग्रह इत्यभिहितम् । तत्र सामान्यस्य बाधकानां का गतिः ? । तथा हि विवाहोपनयनादौ उदगयनादिविधिः सौरस्य, शुक्लपक्षतिथिविधिस्तु चान्द्रस्य, तत्रैव "गर्भाष्टमेऽष्टमे वाऽब्दे" तृतीये वर्षे चौलं, गोदानं षोडशे वर्षे "अष्टवर्षा भवेद्गौरी" इत्यादौ गर्भग्रहणसम्बन्धिनमहोरात्रं तिथिं वाऽऽरभ्य वर्षमासादिगणनेन सावनस्य, तिथिबद्धचान्द्रस्य वा, तथा यज्ञेषु "या वैशाख्यममावास्या तस्यामादधीत" इति चान्द्रस्य, "विवाहव्रतयज्ञेषु सौरं मानम्" इति

"विवाहश्चैकजातानां षण्मासाभ्यन्तरे यदि"।

"विवाहव्रतचूडासु वर्षमर्द्धं तदर्द्धकम्"।

इत्यादौ सौरा एव मासाः। तेषां विवाहाद्यनङ्गत्वे-ऽपि विवाहादिसम्बन्धस्याविशिष्टतया विवाहाधिकरणमासस्य सौरत्वेन तदवधिकानां तेषामपि तादृशानामेवोपस्थितेः। परं तु यस्मिन्सौरे माघादौ यत्पक्षगतायां यस्यां तिथौ विवाहादि जातं, तदवधिकाः सौरा एव फाल्गुनादयस्तत्पक्षगततत्तिथि-पर्यन्ताः षडादयो मासा एषु बोध्याः। यज्ञादिवतिपाठान्तरम्। वृ-द्धोपनयनाधिकारे वृद्धगार्ग्यः—

"माघादिपञ्चमासेषु मेखलाबन्धनं मतम्।

चूडाकरणमप्यत्र"

इत्यादि। नारदः—

दृश्यमाने गुरौ, शुक्रे, शाखेशे चोत्तरायणे।

शरद्ग्रीष्मवसन्तेषु व्युत्क्रमात्तु द्विजन्मनाम्॥

मुख्यं, साधारणं तेषां तपोमासादिपञ्चकम्।

गर्गः—

ज्येष्ठे मासि विशेषेण सर्वज्येष्ठस्य चैव हि।

उपनीतस्य पुत्रस्य जडत्वं मृत्युरेव वा॥

व्यासः—"या चैत्रवैशाखसिता तृतीया" इत्यादि। व्रतानि निय-माश्च संक्रान्त्यादिसामान्यविशेषप्रयुक्ता एव। विवाहव्रतयज्ञादिवानि व्रतशब्देऽप्येते एव। मूर्तिप्रतिष्ठाधिकारे मात्स्ये—"चैत्रे वा फाल्गु-ने वाऽपि" इत्यादि। जलाशयोत्सर्गाधिकारे भविष्ये—"तस्मिन् स-लिलसम्पूर्णे कार्त्तिके च" इत्यादि। गृहारम्भाधिकारे—"वैशाखे फा-ल्गुने पौषे" इत्यादि। क्षौराधिकारे—

न भाद्रमासे न च चैत्रमासे क्षौरं विवाहो न च कर्णवेधः।

इत्यादि। यात्राधिकारे मनुः—

मार्गशीर्षे शुभे मासि यायाद्यात्रां महीपतिः।

*विवाहव्रतयज्ञेषु सौरं मानं प्रशस्यते ।

फाल्गुनं वाऽथ चैत्रं वा मासं प्रति यथाबलम् ॥
अन्येष्वपि च कालेषु यदा पश्येद् ध्रुवं जयम् ।
तदा यायाद्विगृह्यैव व्यसने चोत्थिते रिपोः ॥ इति ।
मन्त्रदीक्षाधिकारेऽगस्त्यसंहितायाम्—
मधुमासे भवेद् दुःखं, माधवे धनसञ्चयः ।
मरणं भवति ज्येष्ठे, आषाढे बन्धुनाशनम् ॥
समृद्धिः श्रावणे नूनं, भवेद्भाद्रे धनक्षयः ।
प्रजानामाश्विने मासि सर्वतः शुभमेव हि ॥
ज्ञानं स्यात्कार्त्तिके मासि, मार्गशीर्षे भवत्यरिः ।
पौषे ज्ञानक्षयो, माघे भवेन्मेधाविवर्द्धनम् ।
फाल्गुनेऽपि च शुद्धिः स्यान्मलमासं विवर्जयेत् ॥ इति ।

महालयश्राद्धादीनां योगानां तत्तद्राशिस्थसूर्यं पुरस्कृत्यैवाभिधानात्, महापुण्यदशहरायुगादीनां च

दशहरासु नोत्कर्षश्चतुर्ष्वपि युगादिषु ।
उपाकर्ममहापुण्यांशिनादिष्टं वृषादिनः ॥

इति तत्तन्मासेऽधिके सति तत्रैव कर्त्तव्यत्ववचनेन तद्वृत्तिवाक्यगतज्येष्ठवैशाखादिशब्दानां सौरपरत्वावगमात्तन्मासाः सौरा एव ।

*विवाहव्रतयज्ञेष्विति । यज्ञो निरूढपशुबन्धादिः । तत्र "पशुःषडयनं तथा" इत्ययनषट्कर्तुपर्वविष्णुमासः सौर एव । विवाहोत्सवव्रतयज्ञेष्विति पाठान्तरम् । एवम्—"उदगयन आपूर्यमाणपक्षे पुण्याहे" इत्यादिवचनादुत्सर्गतो दैवकर्मणि सौर एव मासः । एवमन्येऽपि तत्तत्कर्मसु तत्तन्मासविशेषनामभिस्तत्तद्विषया बोध्याः । एवञ्च श्रीकराद्युक्तादिपदग्रहणम् । यज्ञादावित्यादिपदेन लौकिकानां शास्त्रीयाणां च सावनं विना कर्तुमशक्यानामहोरात्रसाध्यानां ग्रहः ।

पार्वणे त्वष्टकाश्राद्धे चान्द्रमिष्टं तथाऽऽब्दिके* ॥

स्मृत्यन्तरे–

तत्र लौकिकानि भृतिवृद्धिग्रहणादीनि । धार्मिकी भृतिर्वृद्धिर्वा कायिका । कायनिर्वाहार्थं दिनविभागेन भृतिदानात् । तदुक्तं–

कायाविरोधिनी शश्वत् पणपादादिकायिका इति ।

कायनिर्वाहश्चाहोरात्रकृत्यं, न तु नित्यकृत्यम् । शास्त्रीयाणि च श्रीकरादिभिरुक्तानि । यथा दान होम—गर्भाधान—सीमन्तोन्नयन जातकर्म- ऋण कर्यानिकव्यवहारादीनि । तत्र होमा मासाग्निहोत्रहोमादिः । दानमपि तादृशमेव किञ्चित् प्राक्, ग्रहादिसाध्यानि महादानव्यतिरिक्तनियतदानादीनि च, अद्- न्तजननादौ विहितानि सप्ताहब्राह्मणभोजनादीनि च । गर्भा- धाने च रजोदर्शनदिवसात् षोडशदिनसाध्यक ऋतुः सा- वन एव । सावनस्य तत्प्रथमदिनस्य द्वेधा त्रेधा विभागा- दिना व्यवस्थादर्शनात् । सीमन्तोन्नयनपरिगणनं तु प्रामादिकम् । योपिद्व्यवहारानुरोधेन तत्र तिथिनक्षत्रादिनामाश्रयणात् । जा- तकर्म तु कालातिपन्नम् । अन्यथा तस्य निमित्तानन्तरकाल्कर्तव्यता- नियतकालत्वात्सावननियमविषयेषु गणनानुपपत्तेः । ऋणं तु सौ- रेण विकल्पः । "ऋणादौ सौरसावनौ" इत्युक्तेः । कर्षानिकशा व- होरात्रसाध्यौ । आदिपदाद्द्वादशाहादिसाध्यानि कृच्छ्रानिकृच्छ्रपरा- कादीनि, "यथा कथञ्चित्पिण्डानां तिस्रोऽशीतीः समाहितः । मा- सेनाश्नन्" इत्यादिविहितचान्द्रायणं च । "तिथिवृद्ध्या चरेत्पिण्डान्" इत्याद्युक्तचान्द्रे तु शुक्लादिः, कृष्णादिर्वा चान्द्र एव, न तु सा- वनः । एवं दशाहाद्याशौचमासाशौचादीनि पञ्चाहिकचातुर्मास्या- दीनि ऐकादशाहिकानि नामकरणकालविहितानि । एकोद्दिष्टे सौर- विधानं तु कन्यासंक्रान्त्यादिनिमित्तकतत्परम् ।

*आब्दिके इति । आब्दिकम्—अब्दसापेक्षम् । चौलो-

द्धपक्षे सौरमासस्थानामेव तासां ग्रहणम् । कन्यादावाश्विमासगते तु तत्स्थानामेव, न तूक्तरूप इति । कन्यागते सवितरीति च न सौरमासविधायकं, किं तु तन्मासकालबोधकमिति तन्न न सौ-रनियामकम् । *व्रतेति । व्रतपदं च न हरिशयनाद्युत्सवपरम् । तस्य तिथिबद्धचान्द्रकर्तव्यत्वात् । एवं च 'तत्र —

> मिथुनस्थे सहस्रांशौ स्थापयेन्मधुसूदनम् ।
> तुलाराशिगते तत्र पुनरुत्थापयेच्च तम् ॥
> कर्किण्यर्के हरौ सुप्ते शक्रध्वजक्रियाऽऽश्विने ।
> तुलायां बोधयेद्देवं वृश्चिके तु जनार्दनम् ॥

इति वचनात्सौर एव मासो युक्तो, न तु चान्द्रः । हरि-शयनप्रबोधयोश्चान्द्रमासकर्तव्यत्वे चातुर्मास्यव्रते सौरबाधापत्तेः, तस्य हरिशयनोत्थानोपक्रमावसानत्वात्' इति प्रत्युक्तम् । शक्रध्वजो-त्थापनादेश्चातुर्मास्यव्रतस्य च चान्द्रकर्तव्यत्वात् । नापि मासोपवा-सादिपरं तत् । तस्याश्विनशुक्लैकादशीमारभ्य कार्तिकशुक्लैकादशी-पर्यन्ततिथिबद्धचान्द्रकर्तव्यत्वात् । नापि मासिकधर्मव्रतादिपरम् । तस्य तिथिबद्धचान्द्रकर्तव्यत्वात् । 'तिथिवृद्ध्या चरेत्पिण्डदान' इति मुख्यचान्द्रं तु अमान्तेन पूर्णिमान्तेन वा मासेन कार्यम् । कार्ति-कवैशाखस्नानादिनियमाश्च पौर्णमास्यन्ततिथिबद्ध चान्द्रान्यतरं, सौरं वा मासमाश्रित्य कार्याः । सर्वत्र वचनसत्त्वात् । तथाहि— आश्विनशुक्लैकादशीपौर्णमासीषु तदुपक्रमाभिधानात् ।

> कार्त्तिकस्य तु यत्स्नानं माघे मासि विशेषतः ।
> कृच्छ्रादिनियमानां च चान्द्रमानं प्रमाणकम् ॥

इति पितामहोक्तेश्च । 'तुलामकरमेषेषु' इति वचनात् । उपा-कर्माणि सामगानां सौरः । 'उपाकर्ममहाषष्ठ्यां' इति वचनात् । अन्येषां चान्द्रः । 'श्रावण्यां प्रौष्ठपद्यां वा' इति तिथिकर्तव्यत्वात् । एवं च यत्र न विशेषतो वचनं, नियामकं वा; तत्र विकल्पः । 'ना एताः संहिता नानन्तेवासिने प्रब्रूयान्नासंवत्सरवासिने' इतिवत् ।

*एकोद्दिष्टविवाहादौ ऋणादौ सौरसावनौ ।

ज्योतिर्गर्गः

आयुर्दायविभागश्च प्रायश्चित्तक्रिया तथा ।

'अपर्याप्तावृतं मासि' इत्यत्र तिथिबद्धत्वाच्चान्द्रसावनयोरन्यतरो गौण एव ऋतुः । एवम्—

एकाहेन तु षण्मासा यदा स्युरपि वा त्रिभिः ।
न्यूनाः संवत्सरश्चैव, स्यातां षाण्मासिके तदा ॥

इत्यत्रापि तिथिबद्धत्वाच्चान्द्र एव । यद्वा—

षाण्मासिकाब्दिके श्राद्धे स्यातां पूर्वेद्युरेव ते ।
मासिकानि स्वकीये तु दिवसे द्वादशेऽपि वा ॥

इत्येतदेकवाक्यतया गौणचान्द्रः । मुख्यचान्द्रग्रहणे दर्शे चतुर्दश्यां वा ऊनषाण्मासिकद्वयापत्तेः । मासिके तु मुख्यचान्द्रः । पितृकार्ये चेत्युक्तेः । मृताहकर्त्तव्यत्वस्य च

मृतेऽहनि कर्त्तव्यं प्रतिमासं तु वत्सरम् ।

इति वचनसिद्धत्वात् । एवं च 'मुख्यं श्राद्धं मासि मासि' इत्यस्य वत्सरं यावत् प्रतिशुक्लप्रतिपदादिदर्शान्तं मासं मृततिथौ श्राद्धमित्यर्थः ।

यत्तु 'प्रतिसंवत्सरं चैव' इत्यादौ 'न्यूनाः संवत्सरश्चैव' इत्यादौ च संवत्सरः स मृततिथिमारभ्य यावद्द्वादशमृततिथिं पञ्चाधिकत्रिशततिथिसमुदायरूपो गौण एवेति दिक् ।

अष्टकेति हेमन्तशिशिरमासौ सौरत्वावच्छेदाय । अन्यथा तदीयांशद्वयरूपाष्टम्यन्तरस्य कदाचित् नवम्यामपि सत्त्वेन तत्राष्टकाकरणापत्तेः ।

*एकोद्दिष्टेति । पार्वणस्थाने एकोद्दिष्टमनुष्ठातॄणां मलमासमृतविषयम् ।

सावनेनैव कर्तव्या शत्रूणां चाप्युपासना* ॥

विष्णुधर्मे—

"*नक्षत्रसत्राण्ययनानि चेन्दो-

र्मासेन कुर्याद्ग्रहणात्मकेन" । इति ।

ब्राह्मे—

तिथिकृत्ये च कृष्णादिं, व्रते *शुक्लादिमेव च ।

विवाहादौ च सौरादिं मासं कृत्ये विनिर्दिशेत् ॥

अथ मलमासः । *तत्रै*कमात्रसंक्रान्तिरहितः

एकोद्दिष्टं तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते ।

तत्कार्यं पूर्वकाले च कालाधिक्ये न धर्मतः ॥

इति गभस्तिवचनात् । *उपासना—सपर्यापूजा । यत्तु "सत्राण्युपास्यान्यथ सावनेन" इति निर्द्धारितं सावनत्वं तदपवादमाह—*नक्षत्रेति । *व्रते इति । व्रतकाण्डोक्तेषु व्रतेषु प्रायः शुक्लादेरेव ग्रह इत्यर्थः ।

॥ इति मासग्रन्थटिप्पणी ॥

अथ मलमासस्य कथं मासत्वम् ? । न च मीनस्थादित्यावच्छिन्नकालत्वं तत्, तच्च सौर एवेति स एव मुख्य इति वाच्यम् । तस्य चान्द्रत्वबाधापत्तेः । मैवम् । मीनस्थादित्यारब्ध-शुक्लप्रतिपत्कत्वादिकं चैत्रादित्वम् ।

मीनादिस्थो रविर्येषामारम्भप्रथमक्षणे ॥

भवेत्, तेऽब्दे चान्द्रमासाश्चैत्राद्या द्वादश स्मृताः ॥

इत्युक्तेः । एतच्च दर्शान्तचैत्रादावेव, न तु पूर्णिमान्ते । कृष्णप्रतिपत्क्षणस्य मीनस्थादित्यवत्त्वानियमात् । द्वादशेति च मलस्य शुद्धशेषत्वमालम्ब्य । *तत्रेति । मासेष्वित्यर्थः । मीनस्थादित्यारब्ध-शुक्लप्रतिपत्कससंक्रान्तत्रिंशत्तिथिकत्वं शुद्धत्वम् । तादृशासंक्रान्तत्रिंश-त्तिथिकत्वं च मलत्वम् । असंक्रान्तत्वं चैकसंक्रान्तिशून्यत्वविवक्षया-शयेनाह—एकेति । न च यत्रामायां तुलासंक्रान्तिः ततो मासमति-

क्रम्य प्रतिपदि वृश्चिकसंक्रान्तिः, ततोऽव्यवहितामायां धनुःसंक्रान्तिः। तत्रासंक्रान्तः कार्त्तिकः, तुलास्थरव्यारब्धशुक्लप्रतिपत्कत्वात्। तदुत्तरक्षयमासो मार्गशीर्षः पौषात्पूर्वः, धनुस्थरव्यारब्धशुक्लप्रतिपत्को हि पौषः, तत्रा(१)व्याप्तिः। वृश्चिकस्थरव्यारब्धत्वाभावादिति वाच्यम्। तत्र वृश्चिकोपधानाभावेऽपि तत्स्वरूपयोग्यताघटितलक्षणसम्भवात्।

यां तिथिं समनुप्राप्य तुलां गच्छति भास्करः।
तथैव सर्वसंक्रान्तिर्यावन्मेषं न गच्छति॥

इति वचनादसंक्रान्तायामेव स्वभावतो वृश्चिकसंक्रान्तिस्थानं, गतिमान्द्यात्तु तस्याः प्रतिपदि भवनम्।

यदा वक्रातिचाराभ्यां सूर्यसंक्रमणं भवेत्।
क्षत्रियाणामसृग्धारां तदा पिबति मेदिनी॥

इत्युक्तेः। वक्रातिचाराविह शीघ्रमन्दगती।

ननु यत्र दर्शे कन्यासंक्रान्तिः, ततो दर्शमतिक्रम्य प्रतिपदि तुलासंक्रान्त्या कन्यायामसंक्रान्तः। ततो वृश्चिकधनुषी शुक्लप्रतिपदोरेव। तदनन्तरदर्श एव मकरसंक्रान्तिरिति धनुषि क्षयः। ततः कुम्भमीनौ दर्शयोरेव। ततोऽनन्तरदर्शमतीत्य मेषसंक्रान्तिरिति मीने पुनरसंक्रान्तः। तत्र क्षयस्य वृश्चिकस्थरव्यारब्धत्वान्मार्गशीर्षत्वं स्यात्। न चेष्टापत्तिः। पौषमासविलोपापत्तेः। यतस्तदुत्तरो न पौषः, धनुस्थरव्यनारब्धत्वात्। न च धनुर्योग्यकालस्थरव्यारब्धत्वं तत्र पौषत्वमिति वाच्यम्। प्रतिपदस्तुलाकालत्वेन तस्या एव स्वाभाविकधनुःस्थानत्वादमायाश्चातथात्वात्। किं तु मकरस्थरव्युपक्रान्तत्वान्माघः। तदुत्तरश्च न माघः, मकरस्थरव्यनारब्धत्वात्, किन्तु फाल्गुनः। कुम्भस्थरव्युपक्रान्तत्वात्। तदुत्तरो न फाल्गुनः, कुम्भस्थरव्यनारब्धत्वात्,

(१) तत्र-मार्गशीर्षे इत्यर्थः।

किन्तु चैत्रः । मीनस्थरव्युपक्रान्तत्वात् । प्रतिपत्सानमेषसंक्रान्ति-स्तु द्वितीयश्चैत्रः, मीनस्थरविमत्त्वात् । तदुत्तरं तु वैशाख्यादय एवेति । सत्यम् । मकरकुम्भमीनानां दर्शमानानामपि स्वाभाविकतदुत्तरप्रतिपत्स्थानत्वमेव । 'यां तिथिं समनुप्राप्य' इत्युक्तेः । एवं च तत्र मकरादिसंक्रान्तिमद्दर्शाया धनुरादियोग्यकालत्वादेव धनुरादिस्थरव्यारब्धत्वप्रयुक्तं पौषत्वादिकं क्रमेणासंक्रान्तानधिकमासत्रयस्योपपद्यम् । धनुरादिस्वरूपयोग्यकालोत्तरस्वीयप्रथमक्षणत्वमारब्धत्वार्थ इति न तत्राव्याप्तिः ।

ननु तथापि यत्र दर्शे कन्यासंक्रान्तिः, ततो ऽसंक्रान्तः, ततः प्रतिपदि तुलासंक्रान्तिः, तदनन्तरदर्श एव वृश्चिकसंक्रान्त्या कार्त्तिकक्षयः । ततो ऽमास्वेव मेषान्ताः संक्रान्तयः, ततो दर्शमतीत्य प्रतिपदि वृषसंक्रान्त्या वैशाखोऽसंक्रान्तः । तत्र क्षयस्य कथं कार्तिकत्वम् ? । तुलापूर्वतनामायास्तुलायोग्यत्वासम्भवात् । 'यां तिथिं समनुप्राप्य' इतिवचनविरोधात् । तेन हि तुलासंक्रान्तिमत्तिथिसमानीयतिथेरेव वृश्चिकादिमत्त्वं बोध्यते, न तु तुलाप्राक्तनामायास्तुलादियोग्यत्वम् । मैवम् । एकवर्षे जातयोर्द्वयोरसंक्रान्तयोरन्यतरस्य त्रिंशन्मात्रतिथिकत्वात्प्राकृतत्वं वाच्ये—

एकस्मिन्नपि वर्षे चेद् द्वौ मासावधिमासकौ ।
पूर्वो मासः प्राकृतः स्यादुत्तरस्त्वधिमासकः ॥

इत्यादिवचनात् तुलापूर्वतनामावास्यायास्तुलायोग्यत्वमवसीयते । अन्यथा प्राकृतत्वस्यैवैयर्थ्यात् । एकशक्तिमत्त्वेन चापापक्षत्योस्तद्योग्यता । ततश्च तदुत्तरस्य कार्तिकत्वम् । आश्विनस्य योग्यतया तुलासम्बन्धात्कृष्णत्वं च । एवं च विद्यमानस्यैव कार्तिकादेः क्षयः नाममात्रतया । सङ्कलने क्षयमासस्य तत्तन्मासत्वेनैवोल्लेख इति नवीनानुसारी पन्थाः ।

माधवानुसारिणस्तु मेषादिस्थरविसमाप्यत्वं तत्तन्मासत्वम् । "मेषादिस्थे सवितरि यो यो मासः प्रपूर्यते चान्द्रः ।

सितादिश्चान्द्रो मासो मलमासः।एकमात्रसंक्रान्तिरहि-त्यमसंक्रान्तत्वेन संक्रान्तिद्वयसत्त्वेन च भवतीति म-लमासो द्वेधा । अधिमासः, क्षयमासश्चेति । तदुक्तं काठकगृह्ये—

*यस्मिन्मासे न संक्रान्तिः, संक्रान्तिद्वयमेव वा ।
मलमासः स विज्ञेयो मासः स्यात्तु त्रयोदशः* ॥ इति

चैत्रादिः स ज्ञेयः पूर्तिद्वित्वे ऽधिमासोऽन्त्यः" ॥ इतिवचनात् । यत्र पूर्वोक्तरीत्या धनुषि क्षयः, तत्र धनुःस्थरविमदन्त्यदर्शकामान्तत्रिंशत्तिथिकत्वं मार्गशीर्षत्वं लुप्यते । क्षयसंज्ञाया लोपनिबन्धन-त्वात् । किन्तु तत्र मकरस्थरविमप्राप्त्यत्वं पौषत्वमेवेति सं-कल्पे पौष एवोल्लेख्य इति वदन्ति । तदसत् । प्रागुक्तकार्तिक-क्षये कार्तिकत्वलोपस्य दुरुपपादत्वात्, वृश्चिकस्थरविमप्राप्त्यत्व-सत्त्वात् । अथ—तत्र तुलासंक्रान्तिकालस्य तातीयत्वयोग्यतया प्र-तिपद एव वृश्चिकसंक्रान्तिकालत्वात् तत्पूर्वदर्शस्य तुलास्थत्व-योग्यता नान्यथा । तथा च तुलास्थरविमप्राप्त्यत्वरूपाश्विनत्वस-त्त्वात् कार्तिकत्वलोपः । सङ्कल्पे चाश्विन एवोल्लेख्य इति चेत्—तर्हि तदुत्तरस्य धनुःस्थरविमप्राप्त्यत्वरूपमार्गशीर्षत्वसम्भवात् क्षीण-कार्तिकत्वविशिष्टमार्गशीर्षत्वानुपपत्तिरिति कृतमतिविस्तरेण ।

*यस्मिन्निति । न चात्र क्षयस्य तत्पूर्वभाविनश्च संसर्पस्यैक-संक्रान्तान्यत्वेऽपि अनधिककालत्वात्कथं मलत्वम् ? ।

मलं वदन्ति कालस्य मासं कालविदोऽधिकम् ।

इतिवचनादधिकस्यैव मलत्वात्; इतिवाच्यम् । तयोस्तादृ-शमलत्वाभावेऽपि

यस्मिन्मासे न संक्रान्तिः, संक्रान्तिद्वयमेव वा ।
संसर्पांहस्पती मासावधिमासश्च निन्दिताः ॥

इतिवर्ज्यत्वरूपमलत्वोक्तेः । *त्रयोदश इति । अधिक-

सत्यव्रतोऽपि–

राशिद्वयं यत्र मासे संक्रमेत दिवाकरः ।
नाधिमासो भवेदेष मलमासस्तु केवलः* ॥ इति ।

अधिकमासस्य कालनियममाह वसिष्ठः–

द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा ।
घटिकानां चतुष्केण पतत्यधिकमासकः ॥ इति ।

एतच्च *सावनादिमानेन संभवार्थं, न तु नियमार्थम् । *अन्यथा षोडशदिनाधिकद्वात्रिंशन्मासानन्तरं कृष्णपक्षनियमेन शुक्लादित्वभङ्गापत्तेः । *नेन न्यूनाधिककाले मलमासपातेऽपि न दोषः । अत एवोक्तं

मासो, न तु द्विसंक्रान्तः । तस्य तत्त्वासम्भवात् । *केवल इति चतुर्दशत्ववारणार्थम् । *सावनादीनि । आदिना सौरग्रहः । तदुक्तं विष्णुधर्मे–

सौरेणाब्दस्तु मानेन यदा भवति भार्गव ।
सावने तु तदा माने दिनषट्कं पवर्द्धते ॥
ऊनरात्राश्च ते राम प्रोक्ताः संवत्सरेण षट् ।
सौरसंवत्सरस्यान्ते मानेन शशिजेन तु ॥
एकादशातिरिच्यन्ते दिनानि भृगुनन्दन ।
समाद्वये साष्टमासे तस्मान्मासोऽतिरिच्यते ॥ इति ।

अत्र चान्द्रसमाद्वयात्सौरसमाद्वयं द्वाविंशतिदिनैराधिकं, चान्द्रमासाष्टकाच्च सौरमासाष्टकं सार्द्धसप्तदिनैरिति मिलित्वा दिनार्द्धन्यूनो मासः स्यादित्याशङ्कायां दिनार्द्धपूरणाय दिनैः षोडशभिर्घटिकानां चतुष्केणेत्युक्तं, तत्र सावनमात्रान्वयीति सूचनाय सावनपदोपादानम् । चान्द्रमासं निरस्यति–*अन्य-

माधवीये 'मासे त्रिंशत्तमे* भवेत्' इति । क्षयस्यापि ज्योतिःशास्त्रे—

अमंक्रान्तिमासोऽधिमासः *स्फुटं स्यात्
द्विसंक्रान्तिमासः क्षयाख्यः कदाचित् ।

थेति । नियमाङ्गीकारे बाधकमाह *नेनेति ॥ *त्रिंशत्तमे इति* । तदुक्तं विष्णुधर्मोत्तरे—

दिवसस्य हरत्यर्कः षष्टिभागमृतौ ततः ।
करोत्येकमहश्छेदं तथैवैकं च चन्द्रमाः ॥
एवमर्द्धतृतीयानामब्दानामधिमासकम् ॥
ग्रीष्मे जनयतः पूर्वं पञ्चाब्दान्ते तु पश्चिमम् ॥ इति ।

दिवसाहःशब्दौ चान्द्रतिथिपरौ । मलमासस्य चान्द्रत्वात्तदपेक्षणात् । सूर्येण चन्द्रेण च प्रतितिथि तिथिषष्टिभागस्य दण्डस्य च्छेदनाकर्षणेन ऋतौ मासद्वये प्रत्येकं साभ्यामेकैकतिथ्याकर्षणात् तिथिद्वयस्याकर्षणादृतुतीये वर्षे त्रिंशत्तिथयो लभ्यन्ते । एवं पञ्चाब्दमध्ये द्विः सम्भवेऽपि पूर्वो ग्रीष्मे एव वैशाखादिमासषट्के एव । "यां तिथिं समनुप्राप्य" इतिवचनात् । तुल्यादौ तिथेरह्न्याऽसंक्रान्तत्वाभावादिति । अयं च माधवेन शकवर्षाणामष्टपञ्चाशदुत्तरशतद्वयाधिके सहस्रे गते योऽनन्तरभावीश्वरसंवत्सरः, तत्र श्रावणमासोऽधिकः । ततः पूर्वे भावसंवत्सरे फाल्गुनोऽधिकः । तन्मध्यगौ युवधातृवत्सरावित्युदाहृतः । तत्रैव च तेनैव यथोक्तेश्वरसंवत्सरोत्तरचित्रभानुसंवत्सरे वैशाखोऽधिकः । तदुत्तरभाविनि तारणसंवत्सरे भाद्रोऽधिक इत्येकोत्तरत्रिंशत्तमत्वेन दुर्मुखसंवत्सरे श्रावणोऽधिकः । विकारिसंवत्सरे ज्येष्ठोऽधिक इति पञ्चत्रिंशत्तमत्वेन च न्यूनाधिकत्वात उदाहृतः । *स्फुटं स्फुटमानेन । *कार्त्तिकादीति । यत्र कन्यायां संसर्पः, ततः क्रमेण तुलाद्यधिकसंक्रान्ती, ततो धनुषि क्षयः । तत्र संसर्पमासाया एव तुलायोगस्थानस्था-

क्षयः *कार्तिकादित्रये, नान्यतः* स्यात्
तदा वर्षमध्ये ऽधिमासद्वयं च ॥
एकः क्षयात्पूर्वं, परतश्चैक इत्यधिमासद्वयं भ-
वतीत्यर्थः ।

अत्र विशेषमाह जाबालिः-

मासद्वयेऽब्दमध्ये तु संक्रान्तिर्न यदा भवेत् ।
*प्राकृतस्तत्र पूर्वः स्यादधि*मासस्तथोत्तरः ॥ इति ।

त्संसर्पपरयोः क्रमेण कार्तिकादिकृत्यं बोध्यम् । *नान्यतः नै-
कतः । क्षयोभयपार्श्वयोरिति यावत् ।

*प्राकृत इति । प्रकृतिः स्वभावः त्रिंशद्दिनात्मकत्वरूपः,
अनधिकः, शुद्धः, कर्मार्ह इति यावत् । *अधिः अधिको मासः ।
नन्वस्तु संसर्पोऽपि षष्टिदिनो मासः । एकराशिस्थरव्यारब्धत्वात्,
'षष्ट्या तु दिवसैः'' इति वचनाच्च । तत्र च पूर्वार्द्धस्य निन्द्यत्वबाधार्थं
प्राकृत इत्युक्तम् । ततश्चाश्विने संसर्पे द्वितीयाश्विनोत्तरमेव कार्तिको
मासः । तुलास्थरव्यारब्धत्वात् तत्र प्रथमाश्विने यथायथं शु-
क्लकृष्णपक्षकर्म कार्यमेव, महालयादिकादि च । तस्य शुद्धत्वेन प्रथ-
मातिक्रमे कारणाभावात् । द्वितीयाश्विने च न पुनस्तत्करणम् ।
'सकृत्करणेन कृतः शास्त्रार्थः' इति न्यायादङ्गभूतकालानुरोधेन
प्रधानीभूतकर्मावृत्तेरयुक्तत्वात् । काम्यारम्भाश्च द्वितीयाश्विन एव ।
आद्यस्य तस्य "न कुर्याद्भानुलङ्घिते" इत्यनेन निषेधात् । एवं दी-
पावल्यादिकमपि परत्रैव, न पूर्वत्र । आश्विनस्य कथमपि कार्ति-
कसम्बन्धाभावात् । एवं च संसर्पोऽपि उत्तरमाससंज्ञोऽस्त्विति चेन्न ।
पूर्वोक्तकार्तिकरूपक्षयाव्यवधानेन जातस्य संसर्पस्य षष्टिदिना-
त्मकत्वासम्भवात् । तस्य षष्टिदिनात्मकत्वोपगमे त्वेकमासत्वेन
क्षयस्य कार्तिकत्वानुपपत्तेः । द्वितीयाश्विनस्य क्षयत्वे च "क्षयः
कार्तिकादित्रये" इतिनियमभङ्गापत्तेः । अत्र त्रिंशत्तिथिकमसंस-

यत्तु ब्रह्मसिद्धान्ते—

*चैत्रादर्वाङ् नाधिमासः, परतस्त्वधिको भवेत्।

इति। तत्र चैत्रात्पूर्वमसंक्रान्तद्वये पूर्वो नाधिकः,* किंतु *पर इत्यर्थः। यच्च ज्योतिःसिद्धान्ते—

*घटकन्यागते सूर्ये *वृश्चिके वाऽथ धन्विनि।

मकरे वाऽथ कुम्भे वा नाधिमासो विधीयते॥ इति।

तिथिसञ्चयकालात्पौर्वापर्याभिप्रायेणेदमिति तु न सत्। चैत्रात्पूर्वमसंक्रान्तद्वये पूर्वो नाधिक इत्यनेन विरोधात्। तेन चैत्रात्पूर्वस्य तिथिसञ्चयक्रमकालोत्तरस्याप्युत्तरचैत्रादिषट्कपातेऽनाधिकत्वाभिधानात्। *चैत्रादर्वागिति। मासस्यैवार्वाग्भवत्वं सर्वस्याप्युत्तरस्य तथात्वाच्चैत्रादर्वाङ् नाधिमास इत्यस्यासङ्गतिः। त्रिंशत्तिथिसञ्चयक्रमकालस्यावधित्वे तु आश्विनादिषट्कपातिनोऽप्युत्तरासंक्रान्तस्यैव नियतमाधिक्यम्। प्राथमिकासंक्रान्तस्यापि कदाचित्तथात्वात्। चैत्रादिषट्कपातिनस्तु तस्य नियतं तदित्यर्थ इत्यभिमानः।

*नाधिक इति कालतःपदगर्भम्। *पर इति। कालतोऽधिक इत्यनुवर्तते। अत्र यद्यपि ऋजुगत्या चैत्रात् परतो मेषादिष्वेवाधिकमास इति क्षयरहिताधिमासपर्यवसितं सम्भवति। तदुक्तम्—

मध्ये विषुवतोर्भानुर्वर्द्धयेत्स्वान्यहानि तु।

तैः सम्भूयाधिको मासः पतत्येव त्रयोदशः॥ इति,

तथापि ब्रह्मसिद्धान्तः क्षयमासप्रकरणस्थ इति तथा नोक्तम्।

*घटेति। क्षयोत्तरस्याधिकत्वाद्विरोधः। *वृश्चिके वेति। अत्र मीनमपि प्रवेश्य वृश्चिकादिपञ्चके इति(१) विवक्षितम्। यत्रामायां कन्यासंक्रान्तिः, ततोऽमोत्तरप्रतिपदि तुलासंक्रान्तिः, तदनन्तरदर्शे एव वृश्चिकसंक्रान्तिः, ततोऽसंक्रान्तोत्तरप्रतिपदि धनुःप्रवे-

---

(१) तेन 'चैत्रादर्वाग्' इत्यनेन न वैषम्यमिति बोध्यम्।

क्षयस्याऽऽगमनकाल उक्तः सिद्धान्तशिरोमणौ—

गतोऽब्ध्यद्रिनन्दैर्मिते शाककाले
तिथीशैर्भविष्यत्यथाङ्गाक्षसूर्यैः।
गजाद्र्यग्निभूभिस्तथा प्रायशोऽयं
*कुवेदेन्दुवर्षैः क्वचिद् गोकुभिश्च॥ इति।

अब्धयः—चत्वारः, अद्रयः—सप्त, नन्दाः—नव, एषां प्रातिलोम्येन पाते ९७४। तैर्मिते वर्षे शाके क्षयमासः पूर्वं जात इत्यर्थः। तिथयः-पञ्चदश, ईशाः-एकादश, १११५। एवंमिते शाके क्षयो भविष्यतीत्यर्थः। अङ्ग ६, अक्ष ५, सूर्याः १२, एकत्र १२५६। गजाः ८, अद्रयः ७, अग्नयः ३, भूः १, एकत्र १३७८। कुः १, वेदाः ४, इन्दुः १, एकत्र १४१। गावः ९, कुः १, एकत्र १९। एतैर्मिते वर्षे शाके क्षयो भविष्यतीत्यर्थः॥

अथ *मलमासे कार्याकार्यं निरूप्यते। तत्र जाबालिः—

न्तार्थम्—व्यतिरेकदृष्टान्तार्थम्। वृश्चिकादित्रये क्षयमासे सति यथा मकरादेरधिकमासत्वं कालाधिक्यात्, तथा कुम्भादेर्नास्तीत्यर्थः। एवं च वृश्चिकादिचतुष्टये मलमासे सतीत्येव सम्यक्।

*कुवेदेन्दुवर्षैरिति। अब्ध्यद्रिनन्देषु (९७४) कुवेदेन्दु-(१४१)योजने तिथीशाः(१११५)। तत्र तद्योजने अङ्गाक्षसूर्याः (१२५६)। तत्र गोकु(१९)न्यूनतद्(१२२)योजने (१३७८) गजाद्र्यग्निभूमयः। तथा च गोकुभिश्चेति पूर्वोक्तक्षेपके तावन्न्यूनाधिकपातेऽपि सम्भवार्थम्। *मलमासे—

"अमावास्याद्वयं यत्र मासि मासि प्रवर्त्तते।
उत्तरश्चोत्तमो ज्ञेयः पूर्वस्तत्र मलिम्लुचः"॥

*नित्यनैमित्तिके कुर्यात्कृत्यं कुर्यान्मलिम्लुचे ।
तिथिनक्षत्रवारोक्तं काम्यं नैव कदाचन ॥

अयं च काम्यनिषेध आरम्भसमाप्तिविषयः ।

*असूर्या नाम ये मासा न तेषु मम संमतः ।
व्रतानां चैव यज्ञानामारम्भश्च समापनम् ॥

इति तेनैवोक्तत्वात् । असूर्या अधिकमासा इत्य-

"तं(१)मतिक्रम्य तु रविर्यदि गच्छेत्कथं च न ।
आद्यो मलिम्लुचो ज्ञेयो द्वितीयः प्राकृतः स्मृतः" ॥

इत्याद्युक्तेः ।

*नित्येति । मलमासे अनन्यगतीनि नित्यनैमित्तिकानि, आवश्यकानि काम्यानि च आरम्भणीयानि । सावनमानसाध्यानि तु प्रागारब्धानि तत्र समाप्यानि । तत्र तादृशानामारम्भः, समाप्तिश्च न; किं त्वनुष्ठानमात्रमित्य[illegible]र्थः ।

सिनीवालीमतिक्रम्य यदा संक्रमते रविः ।
रविणा लङ्घितो मासोऽनर्हः सर्वकर्मसु ॥

इत्यादिसामान्यतोनिषेधानां विशेषप्रतिप्रसवविधानादितरकाम्यादिपरत्वमेव ।

*असूर्या इति ।

प्रवृत्तं मलमासात्प्राक् काम्यं कर्मासमापितम् ।
आगते मलमासेऽपि तत्समाप्यमसंशयम् ॥

इति तु सावनमानप्रवृत्तकृच्छ्रादिसमाप्तिपरम् । एतेनैतत्समाप्त्यनुज्ञानात्तद्दर्शनवचनं [illegible] प्रक्रान्तकाम्यसमाप्तिपरमित्यपास्तम् । अनियतकालानां तथानुष्ठानेन प्रयोगप्राशुभावाभङ्गे प्रतिपन्नस्य तत्साधारण्यायोगात् । ननु कारीरीराजसोमाभिचारप्रत्यभिचाररोगग्रहदौःस्वप्न्यादिनिमित्तकस्य शान्त्यादेः काम्यत्वा-

(१) तं—मासमित्यर्थः ।

र्थः । तत्र 'मण्डलं तपने रवेः' इति वचनात् । *कारीर्यादेः काम्यस्य त्वारम्भसमाप्ती भवत एवेत्यादिरन्यत्र विस्तरः । काठकगृह्येऽपि—

मले*ऽनन्यगतिं कुर्यान्नित्यां* नैमित्तिकीं क्रियाम् ।

इति ।

तानि नैमित्तिकानि दीपिकायामुक्तानि

यन्नैमित्तिक*मग्निनष्ट्यनुगताग्न्याधानमष्टासु वा

न्मलमासे कथमनुष्ठानमत आह—*कारीर्यादेरिति । विलम्बासहत्वादिति शेषः ।

नैमित्तिकानि काम्यानि निपतन्ति यथा यथा ।
तथा तथैव कार्याणि न कालस्तु विधीयते ॥

इति दक्षोक्तेः ।

नेहेतात्र विशेषज्यामन्यत्राऽऽवश्यकाद्विधेः ।

इति गृह्यपरिशिष्टाच्च ।

नित्यनैमित्तिकान्यपि विशिनष्टि—*मले इति । *अनन्यगतिम्—यस्या मासान्तरेऽनुष्ठाने कालातिक्रमनिमित्तकप्रायश्चित्तपातो, विहितकालालाभेन लोपो वा, ताम् । *नित्यामिति ।

अवषट्कारहोमाश्च पर्व चाग्रयणं तथा ।
मलमासे तु कर्त्तव्यं काम्या इष्टीश्च वर्जयेत् ॥

इति तु दिङ्मात्रम् । अवषट्कारहोमाः—अग्निहोत्रोपासनहोमवैश्वदेवादयः । पर्व—दर्शपूर्णमासेष्टी, पार्वणस्थालीपाकश्च ।

*अग्नीति । अग्नेर्नष्टौ सत्यामनुगताग्न्याधानम् । तद्विलम्बे प्रायश्चित्तापत्तेः ।

अग्न्याधेयं प्रतिष्ठां च यज्ञदानव्रतानि च ।
वेदव्रतवृषोत्सर्गचूडाकरणमेखलाः ॥

*अब्दोदकुम्भमन्नादि मलमासयुगादिषु ।
श्राद्धं दर्शेऽप्यहरहःश्राद्ध*मूनादिमासिकम् ॥
मलिम्लुचाख्यमासेषु मृतानां श्राद्धमाब्दिकम् ।
श्राद्धं तु पूर्ववद्दृष्टेषु तीर्थेष्वेवं युगादिषु ॥
मन्वादिषु च यद्दानं दानं दैनन्दिनं च यत् ।
तिलगोभूहिरण्यानां *सन्ध्योपासनयोः क्रिया ॥

अधिमासे न कर्तव्यं श्राद्धमभ्युदयं तथा ।
तथैव काम्यं यत्कर्म वत्सरात्प्रथमादृते ॥

इति वचनं, तत्र श्राद्धं द्वादशाहसपिण्डनान्त ग्रहणाऽभ्युदययोग—गर्भसंस्काराऽऽभ्युदयिका-ऽधिकमासिक प्रथमसांवत्सरिक-मलमासमृतसांवत्सरिकाभिन्नं ग्राह्यम् । सपिण्डनान्तोपादानात्तदुत्तरं न कार्यमिति लभ्यते ।

सपिण्डीकरणादूर्ध्वं यत्किञ्चिच्छ्राद्धिकं भवेत् ।
इष्टं वाऽप्यथ वा पूर्त्तं तन्न कुर्यान्मलिम्लुचे ॥

इत्यादिवचनात् । ग्रहणजन्मनोः श्राद्धं तन्निमित्तकदानादेरुपलक्षणम् । वृद्धिश्राद्धस्य जातकर्माङ्गत्वात् पृथगुक्तिः ।

*अब्देति ।

अब्दमम्बुघटं दद्यादन्नं चापि सुसाधितम् ।
संवत्सरे विवृद्धेऽपि प्रतिमासं च मासिकम् ॥

इति कौथुमिवचनात् त्रिंशत्सोदकुम्भान्नदानानि, अधिकमासिकं चेत्यर्थः । *ऊनादीति । अनन्यगतिकत्वात् ।

*सन्ध्येति ।

कुर्यात्प्रात्यहिकं कर्म प्रयत्नेन मलिम्लुचे ।
नैमित्तिकं च कुर्वीत सावकाशं न यद्भवेत् ॥

इति वचनात् । "कामं तु व्रीहियवतिलैः" इति चोपासनपरम् । नैमित्तिकं-विधिनिषेधातिक्रमनिमित्तककृच्छ्रचान्द्रायणादि, उप-

'गर्भाधानमुखं च चौलविधिना प्राग्जातयागं(१) विना
कृच्छ्रं त्वाग्रयणं *गजेन्द्रपुरतश्छाया मघानङ्गयोः।
तीर्थेन्दुक्षययोश्च पित्र्यमभिषेकं मास्येवमाद्याचरेत्'
इति। अलभ्ययोगेऽर्धोदयपद्मकादौ* काम्यान्यपि व्रतादीनि कार्याणीत्यर्थः। पूर्वे परत्र-मले शुद्धे चेत्यर्थः।

अस्तगे च गुरौ शुक्रे बाले वृद्धे मलिम्लुचे।
उद्यापनमुपारम्भं व्रतानां नैव कारयेत्॥

इति तु अतिपन्नजातकर्मनामकर्मान्नप्राशननिष्क्रमणपरम्। "जातकर्म च पुंसूतिः" इत्यत्र चकारेण नामकर्मादिग्रहः। एतेषां पुंसूत्यादेरिव मलमासादिव्यतिरेकेण विहितदिनालाभे तद्विधान सूचनाय 'निमित्तं यदि' इत्यादि। किन्तु जातकर्मनामकर्मणोः प्रतिपदोक्तप्रसववशात्तथात्वेऽपि निष्क्रमान्नप्राशनयोर्नातिपन्नानियतत्वमिति नित्यनिषेधमाहुः। जातकर्मादेः प्रतिपन्नत्वेनाऽभ्युदयिकस्यापि तदङ्गत्वेन प्रतिप्रसवो बोध्यः। वार्द्धुषिक—तत्कृत्यं वृद्धिग्रहणे। भृत्ये तत्कृत्यं भृतिग्रहणं। मासिकम्—अमावास्याश्राद्धम्। नित्यम्—अहरहर्दानादि, सन्ध्योपासनादि चेति।

*गजेन्द्रेति। इयं च—

परमान्नं च यो दद्यात् पितृणां मधुना सह।
छायायां तु गजेन्द्रस्य पूर्वस्यां दक्षिणामुखम्॥

इति यौगिकी ग्राह्या। "यदेन्दुः" इति पारिभाषिक्यास्तस्या मलेऽसम्भवात्। अमावास्यामत्यासन्नायां कृष्णपक्षत्रयोदश्यां मघायोगे रवेरवस्थानं चेत्तर्हि तत्सम्बन्धिशुक्लादिचान्द्रकन्यासंक्रान्तेरवश्यंभावेन तस्य मलत्वासम्भवात्। *पद्मकादाविति। आदिना कपिलाषष्ठ्यादिग्रहः। "महालयाष्टकाश्राद्ध"

---

(१) जातयागं-जातेष्टिमित्यर्थः।

*महालयशब्देन मघात्रयोदश्युच्यते इति माधवः। दर्श-
श्राद्धं मलेऽपि कार्यम्। यत्तु — ऋष्यशृङ्गः

संवत्सरातिरेकेण मासो यः स्यान्मलिम्लुचः।
तस्मिंस्त्रयोदशी श्राद्धं न कुर्यादिन्दुसंक्षये॥

इति, तत् *काम्यदर्शश्राद्धविषयम्। 'काम्यं नैव कदाचन' इति वचनात्। दर्शे च काम्यं श्राद्धं 'कन्यां कन्यावेदिनश्च' इत्यादिना याज्ञवल्क्येनोक्तम्। नित्यं तु मलेऽपि भवत्येव।

दर्शेऽप्यहरहःश्राद्धं, दानं च प्रतिमासकम्।
गोभूतिलहिरण्यानां मासेऽपि स्यान्मलिम्लुचे॥

इति मात्स्योक्तेरिति हेमाद्र्यः। दिवोदासीयेऽपि-

इत्यादिपूर्वोक्तनिषेधादाह— *महालयेति।

मघात्रयोदशीश्राद्धं मन्यूपर्वस्थितिहेतुकम्।
अनन्यगतिकत्वेन कर्तव्यं स्यान्मलिम्लुचे॥

इत्युक्तेः। अत्रेदमर्वाचीनम्। महालयशब्दस्य मघात्रयोदश्यां लक्षणा व्यर्था।

वृद्धिश्राद्धं तथा सोमयज्ञयागेषु महालयम्।
राजाभिषेकं काम्यं च न कुर्याद्भानुलङ्घिते।

इति भृगूक्तनिषेधस्य स्वकालातिपन्नमहालयविषयकत्वात्। यतः संसर्पे आश्विनादिपक्षे एवेति पतञ्जलिना महालयकृत्य-प्राप्तोऽपि न कार्यः, किं तु तदुत्तरगौणकाल एवेति। यदि तु भाद्रपदोऽपि संसर्प इति मतं, तदा पञ्चम्यादिदर्शान्तकालप्राप्तो महालयो भवत्येव। एवमेव "तथाऽधिमाससंसर्पमलमासादिषु द्विज। प्रथमोपाकृतिर्न स्यात्" इतिसंसर्पपदोपादानसंगतिः। आश्विनस्यैव संसर्पत्वे तत्रोपाकर्मप्राप्त्यभावेन निषेधानुपपत्तेरिति। *काम्येति। एतेनामावास्यामृतस्य मासिकं मासवृद्धौ न वर्धनीयमित्येवमर्थ-मित्यपास्तम्। मासिकपदासत्त्वेन तथा व्याख्याने मानाभावात्।

अनिन्दुरिन्दुपूर्णा च हरिवारो बुधाष्टमी ।
नाधिमासे परित्याज्याः सीमन्ताम्राशने शिशोः ॥

इति । अनिन्दुः—दर्शः ।

द्विविधमप्यमाश्राद्धं न कार्यमित्यपरार्कः ।

तत्र यद्विहितं कर्म उत्तरे मासि कारयेत् ।

इत्युक्तेः 'षष्ट्या तु दिवसैर्मासः' इति शुद्धमासकरणेऽपि शास्त्रार्थोपपत्तेर्दर्शश्राद्धं मले न कार्यमिति प्राचीनगौडाः, शूलपाणिश्च । संवत्सरप्रदीपेऽपि

एकराशिस्थिते सूर्ये यदा दर्शद्वयं भवेत् ।
दर्शश्राद्धं तदाऽऽदौ स्यात् *न परत्र मलिम्लुचे ॥

*अत्रापि *प्राग्वद्व्यवस्था । यद्यपि कालादर्शे सर्वं* वार्षिकं मासद्वये कार्यमित्युक्तं, *तथापि हेमाद्रिमाधवापरार्कादिमतात् प्रथमवार्षिकं मलमासे, द्वितीयाद्याब्दिकं तु शुद्धमास एव कार्यम् ।

असंक्रान्तेऽपि कर्तव्यमाब्दिकं प्रथमं* द्विजैः ।
तथैव मासिकं श्राद्धं सपिण्डीकरणं तथा ॥

इति हारीतोक्तेः ।

आब्दिकं प्रथमं यत्स्यात्तत्कुर्वीत मलिम्लुचे ।
*न परत्रेति ।

मेषादिस्थे सवितरि यो यो मासः प्रपूर्यते चान्द्रः ।
चैत्राद्यः स ज्ञेयः पूर्तिद्वित्वे ऽधिमासोऽन्त्यः ॥

इति मेषाद्यधिकरणकदर्शान्तत्वरूपचैत्रादिलक्षणाभिप्रायकम् ।

अपरार्कादिमतं निरस्यति—*अत्रापीति ।अपिना "तत्र यद्विहितम्" इत्यस्य समुच्चयः ।*प्राग्वत्—नित्यकाम्यभेदेन । तथा च मले निर्मूल एव नित्यामावास्याश्राद्धनिषेध इति भावः । *सर्वमिति । उभयत्र चेति शेषात् । अभिमानं निराकरोति—*तथापीत्यादि । *प्रथममिति । अब्दादौ क्रियमाणमाब्दिकमिति समाख्यया तस्य द्विती-

(१)त्रयोदशे तु संप्राप्ते कुर्वीत पुनराब्दिकम् ॥
इति स्मृत्यन्तरोक्तेश्च । *पुनराब्दिकं *द्वितीयादिवा-
र्षिकं त्रयोदशे मासेऽतीते चतुर्दशादिदिने कुर्यादि-
त्यर्थः । यत्तु सत्यव्रतः-

वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेऽहनि ।
मलमासे न तत्कार्यं व्याघ्रस्य वचनं यथा ॥

इति, तद् द्वितीयादिवार्षिकविषयम् ।

*आब्दिकं प्रथमं यत्स्यात्तत्कुर्वीत मलिम्लुचे ।

इति पूर्वोक्तवचनात् । तेन यत्र द्वादशं मासिकं शु-

याब्दिकान्तेऽपि षोडशश्राद्धान्तराब्दिकानां मध्ये प्राथम्यमभि-
प्रेत्य तस्य तत्त्वम् । मासादौ क्रियमाणं मासिकम् । तच्च मल-
मासमृतस्य एकादशेऽह्नि मले, शुद्धे वा मासे । 'आद्यमेकादशेऽहनि'
इत्यस्याऽऽदौ क्रियमाणमाद्यमित्यर्थात् । तेनैव 'अधिकं स्वाधिकं
भवेत्' इतिवचनानुग्रहात् । ऊनषाण्मासिकान्तरं शुद्धतन्मासीयमृततिथौ
च, 'तत्र यद्विहितं कर्म' इत्यादिवचनात् । एवं क्रमेण मासिकद्वयं
मिलितमाद्यमासिकं, तदुत्तरं द्वितीयमासिकादि । अधिकमत्र
वक्ष्यामः । मलमासे इत्यस्य मासद्वये इत्यर्थमभिप्रेत्याऽऽह—*पुन-
रिति । *द्वितीयाद्वार्षिकमिति ।

अधिमासे न कर्तव्यं श्राद्धं सांवत्सरादिकम् ।

इतिकौथुमिनिषेधश्च उक्तरीत्या प्रथमाब्दिकाविषयकत्वासम-
म्भवात् द्वितीयाब्दिकविषयक इति भावः ।

*आब्दिकमिति । आद्याब्दिकं द्वादशे मासे पूर्णे सति मलि-
म्लुचे त्रयोदशे एव कुर्वीतेति तदर्थः । "एतच्च शुद्धमासमृते ।
मलमासमृते तु सौरम् । अधिकमृतस्य"इत्यादिपाठान्तराभिप्रायं
चोपरिष्टाद्वक्ष्यामः ।

(१) चतुर्दशे इत्यपि क्वचित् पुस्तके पाठः ।

द्धमासे भवति, तत्र त्रयोदशेऽधिके एवाऽऽब्दिकं कार्यम्। यत्र त्वधिकमध्ये द्वादशं मासिकं, तत्र तस्य द्विरावृत्तिं कृत्वा चतुर्दशे शुद्धे एव प्रथमाब्दिकमिति निष्कर्षः। तेन द्वितीयादि शुद्धमासे एव। पृथ्वीचन्द्रोदये दिवोदासीये मदनपारिजाते चैवम्।

मलमासमृतानां तु यदा स एवाधिकः स्यात्तदा तत्रैव प्रतिसांवत्सरिकं कार्यम्। यथाऽऽह पैठीनसिः—

मलमासे मृतानां तु श्राद्धं यत्प्रतिवत्सरम्।
मलमासेऽपि कर्तव्यं नान्येषां तु कथं चन॥ इति।

हेमाद्रौ व्यासोऽपि—

मलमासमृतानां तु सौरं मानं समाश्रयेत्।
स एव दिवसस्तस्य श्राद्धपिण्डोदकादिषु(१)॥

---

(१) "अत्राधिकमृतस्य न द्वितीयाब्दादिष्वपि सौरविधिः। द्वितीयादावन्याधिके वाऽपूर्वनियमविधित्वकल्पनात्। किन्तु प्रथमाब्दिकस्य मलमासे नियमात्, सत्यव्रतेन तद्भिन्नस्य सर्वस्याधिके निषेधे प्राप्ते प्रतिप्रसवमात्रं, लाघवात्। अतो न द्वितीयादौ सौरमासप्रसङ्गः। 'चान्द्रं मध्यं तथाऽऽब्दिके' 'मासपक्षतिथिस्पृष्टे' इत्यादिविरोधाच्च" इति क्वचित् पुस्तकेऽधिकः पाठः।।

अस्यार्थः। वैशाखादावधिके मृतस्य यदा पुनः परिवर्तनक्रमेणाधिको वैशाखो भवेत् तदाऽऽब्दिकश्राद्धार्थं सौरं मानं समाश्रयेत्। मेषादिस्थे सवितरि अधिके एव तस्याब्दिकश्राद्धादि कुर्यात्, न तु वृषादिस्थे सवितरि शुद्धवैशाखादौ इति यावत्।

वैशाखाद्यधिके मृतस्य (संवत्सरे पूर्णे) द्वितीयवर्षादौ, वैशाखाद्यधिकपाते तत्र च आब्दिकश्राद्धार्थं सौरं मानं समाश्रयेत् इत्यनेन सौरविधिर्नास्ति। तथा सति द्वितीयवर्षादौ आब्दिकश्राद्धार्थं सौरमानस्य केनापि वचनेनाप्राप्तस्य विधानेऽपूर्वविधित्वम्, वैशाखाद्यधिकपाते तत्र आब्दिकश्राद्धार्थं सौरमानस्य "मलमासे मृतानां तु श्राद्धं यत्प्रतिवत्सरम्। मलमासेऽपि कर्तव्यम्" इति वचनेन मलमासे कर्तव्यताबोधनेन प्राप्तस्य "सौरं मानमेवाश्रयेत्" इत्येवं नियमेन 'मलमासेऽपि' इति अपिशब्दस्वारस्येन प्राप्तस्य शुद्धमासस्य निवृत्तिः

यत्तु वृद्धवसिष्ठः—

श्राद्धीयाहनि संप्राप्ते अधिमासो भवेद्यदि ।

मासद्वयेऽपि कुर्वीत श्राद्धमेवं न मुह्यति ॥

यच्च व्यासः–

*उत्तरे देवकार्याणि पितृकार्याणि चोभयोः ॥ इति,

तन्मासिकादिविषयम् ।

यौगादिकं मासिकं च श्राद्धं चा*परपक्षिकम् ।

मन्वादिकं तैर्थिकं च कुर्यान्मासद्वयेऽपि च ॥

इति स्मृतिचन्द्रिकोक्तेः ; तैर्थिकं *तीर्थश्राद्धम् ।

*तच्च दैवात्तीर्थप्राप्तौ मासद्वयेऽपि कार्यमिति त्रिस्थली-सेतौ भट्टाः ।

केचित्तु—

प्रतिमासं मृताहे च श्राद्धं यत्प्रतिवत्सरम् ।

मन्वादौ च युगादौ च तन्मासोरुभयोरपि ॥

इति मरीचिवचनात्,

वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेऽहनि ।

---

*उत्तरे इति ।

द्वौ मासावेकनामानावेकस्मिन् वत्सरे यदि ।

इति पूर्वार्द्धम् ।

*आपरपाक्षिकं–कृष्णपक्षप्रयुक्तं, दर्शश्राद्धं, वा ।

*तीर्थश्राद्धमिति । अपूर्वे एव गयादिरूपे तीर्थे । तत्प्रयुक्तस्य स्नानश्राद्धपिण्डदानापूर्वदेवतादर्शनजपयात्रादेरुपलक्षणमिदम् । "पूर्वदृष्टेषु तीर्थेष्वेव" इति कालादर्शस्तु अपूर्वतीर्थमुद्दिश्य गमननिषेध-पर इति व्यक्तमग्रे । *तच्चेति । निमित्तस्य नित्यत्वादिति भावः ।

न वैशाखकृष्णे सांवत्सरिकश्राद्धं प्रतिवर्षमनुष्ठेयमेवेत गौडदाक्षि-णात्योभयनिबन्धकाराणां संमतम् । कृष्णादिमानमाश्रित्य तदनुष्ठा-नं तु भ्रान्तिमूलकान्धपरम्पराप्राप्तमेवेति दिक् ॥

मासक्षयेऽपि तत्कुर्याद्व्याघ्रस्य वचनं यथा ॥

इति गालवोक्तेश्च प्रथमाब्दिकं मासक्षये कार्यमित्याहुः । तत्तुच्छम् * । *"प्रतिमासं मृताहे क्रियमाणं मासिकम्, प्रतिवत्सरं क्रियमाणं कल्पादिश्राद्धम्" इति मरीचिवचसो मदनरत्ने व्याख्यानात् । गालवीयस्य च मासक्षयात्मके क्षयमासे इति माधवेन* व्याख्यानात् ।

यत्तु केश्चिदुक्तं प्रथमाब्दिकं मासक्षये कार्यम्

*आब्दिकं प्रथमं यत्स्यात्तत्कुर्वीत मलिम्लुचे ।
त्रयोदशे च संप्राप्ते कुर्वीत पुनराब्दिकम् ॥

इति यमोक्तेरिति । तदपि चिन्त्यम्(१) । पुनराब्दिकं द्विती-

---

*तत्तुच्छमिति । प्रत्याब्दिकादृतौ पाताभावादिति हेतुरुक्तः ।
वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेऽहनि ।
मलमासे न तत्कार्यं व्याघ्रस्य वचनं यथा ॥

इति सत्यव्रतेन मलमासे द्वितीयाब्दिकादिनिषेधात्, प्रथमाब्दिकस्य च हारीतादिभिर्मलमास एव विधानादिति भावः । एवं सति उक्तवाक्यादेराद्याब्दिकविधायकत्वप्रसङ्गं वारयितुं प्रकारान्तरेण योजनामाह—*प्रतिमासमिति । कल्पादयश्च । *माधवेनेति । वस्तुतस्तु प्रथमाब्दिकं मलमासमृताब्दिकं च मलमासे एव, अन्यत् शुद्धमासे एवेति रीत्योभयथाऽऽब्दिकं कार्यमिति गालवार्थः । तेन स्वाभाविकगतिमाश्रित्य यत्संक्रान्तः क्षयस्तन्मासीयाब्दिकस्य तत्रैव सिद्धावपि न क्षतिः ।

*आब्दिकं—वार्षिकश्राद्धम् । कर्मयोगापहारित्वात् ।

---

(१) एवं सति यत् केषाञ्चित् शिष्टम्मन्यानां वार्षिकश्राद्धस्य मलमासेऽपि सङ्क्षेपेण स्वयमनुष्ठानम्, अज्ञान् प्रति तथोपदेशेन तथाऽऽचारप्रवर्तनं च, तदतिसाहसमिति कालतत्त्वविवेचने स्पष्टम् ।

याद्द्विवार्षिकं त्रयोदशेऽतीते चतुर्दशे कुर्यात् । अन्यथा -

सांवत्सरं न वर्धेत* श्राद्धं तत्र मृतेऽहनि ।

इति पैठीनसिविरोधः स्यादिति हेमाद्रौ पृथ्वीचन्द्रोदये च । एतेन 'न वर्धेत न क्षीयेत, शुद्धेऽपि कुर्यादेव' इत्यनन्तभट्टव्याख्या मानाभावादपास्ता । पूर्वव्याख्यायां तु हारीतीये प्रथमग्रहणमेव मानम् ।

यदपि निर्णयामृते *पूर्वोक्तकालादर्शवचनात् मलमासे श्राद्धदिनस्य वन्ध्यत्वनिरासार्थं पित्रुद्देशेन *ब्राह्मणान् भोजयित्वा शुद्धमासे सपिण्डकं श्राद्धं कुर्यात् ।

पिण्डवर्जमसंक्रान्ते संक्रान्तौ पिण्डसंयुतम् ।
प्रतिसंवत्सरं श्राद्धमेवं मासद्वयेऽपि च ॥

इति वृद्धपराशरोक्तेरिति । तदपि चिन्त्यम्* ।

---

*न वर्द्धेत—नातिवर्त्तेत । "असंक्रान्तेऽपि कर्त्तव्यमाब्दिकं प्रथमम्" इतिहारीतवाक्ये वत्सरान्तरीयवार्षिकश्राद्धस्य शुद्धभागमात्रकर्त्तव्यत्वे एवाऽऽब्दिकस्य प्रथमत्वविशेषणं युज्यते । न च 'असंक्रान्तेऽपि'इत्यपिना शुद्धभागसमुच्चयः सुवचः । तस्य शुद्धभागरूपस्वाभाविकस्थानिकत्वलाभद्वारा तत्र कर्त्तव्यतानिवर्त्तकत्वात् । यथा "भ्रस्जो रोपधयो रमन्यतरस्याम्" इत्यत्र स्थानषष्ठीनिर्दिष्टाद्रोपधयोर्निवृत्तिस्तद्वत् । एवं च ससंक्रान्तस्य प्रथमाब्दिकमसंक्रान्ते कार्यमित्यर्थ इति, द्विःकर्त्तव्यतायां न साधकमिति भावः ।

*पूर्वोक्तेति । निमित्तानित्यतानिबन्धनं द्विःकर्त्तव्यत्वं स्वारसिकतदर्थः । यदाब्दिकं तन्मलिम्लुचे प्रथममाद्यं कुर्वीत । त्रयोदशे संप्राप्ते सम्पूर्णे ऽतीते सति पुनश्चतुर्दशे मासि पुनर्द्वितीयं कुर्वीतेति हारीतवाक्यार्थोऽङ्गीकार्य इत्यभिमानः । *ब्राह्मणानिति । मलमासे श्राद्धनिषेधानां सपिण्डकश्राद्धपरत्वमित्याशयः ।

पूर्वोक्तवचनस्य क्षयपूर्वभाव्यधिकमासविषयत्वात् । तत्र हि मासद्वये श्राद्धमुक्तम् । तदाह सत्यतपाः—

एक एव यदा मासः संक्रान्तिद्वयसंयुतः ।
मासद्वयगतं श्राद्धं मलमासेऽपि शस्यते ॥ इति ।

मासद्वयगतं—पूर्वासंक्रान्तगतं, क्षयगतं च । मल-मासे—क्षयमासे, अपिशब्दात् तत्पूर्वाधिमासे चेति हेमाद्रिः । दीपिकाऽपि

*तत्प्राक्सङ्गाधिमासको यदि संसर्पाख्यमासोऽन्तरं
तस्मिन् शुद्धतया क्षये च वचनात्कुर्याद्द्वयोः कोविदः ।

इति । *कालादर्शोऽप्येतद्विषय* एतेनालं बहुना ।
मलमासे वर्ज्यान्युक्तानि कालादर्शे—

अनित्यमनिमित्तं च *दानं च महदादिकम् ।

मलमासमृतानां मृतिमासेऽधिके श्राद्धद्वयं प्राप्तं "वर्षे वर्षे तु यच्छ्रा-द्धम्" इति शातातपवाक्यं शुद्धपरिसंख्यार्थम् । तेन तत्र तस्य सापि-ण्डकत्वमिति बोध्यम् ।

*अनित्यमिति । तद्धीनं च यदाब्दिकं तन्मले प्रथमं कुर्वीतेति नार्थः । "संक्रान्तिद्वयसंयुतः" इत्यत्र विशेषाभि-धानविरोधात् । अन्यासंक्रान्तसाधारण्येन तत्रापि द्विःकर्तव्य-तासिद्धेरिति । एवं च शुद्धपराशरवचनार्थमाह *पूर्वोक्तेति ।

क्षयगतस्य संसर्पमासमात्रकर्तव्यताभ्रमं निरस्यति *तत्प्रा-क्सङ्गेति । क्षयसमनन्तरपूर्वः संसर्प इत्यर्थः । "नास्ति वचनस्यातिभारः" इति न्यायादिति भावः । एतावता नित्यनिमित्तकतया सर्वं वार्षिकं मासद्वये कार्यमिति यथाश्रुतकालादर्शः प्रथमाब्दिकं मलमासे, द्वितीयाद्याब्दिकं शुद्धे इति योजितः । परं तु निमित्तस्य नित्यत्वादुभय-त्रेत्यत्र न स्वरस इत्यत आह—*कालादर्शोऽपीति । *एतद्विषय इति । क्षयमासे उभयत्रेत्यस्य स्वारस्यादिति भावः ।

*दानं चेति । काम्यत्वेन वर्ज्यत्वेऽपि—

न कुर्यान्मलमासे तु महादानव्रतानि च ।

इति पुनर्निषेधः प्रत्यवायाधिक्यार्थः । अन्ये तु—

तुला, हिरण्यगर्भश्च, ब्रह्माण्डं, कल्पपादपः ।

गोसहस्रं, हिरण्याश्वो, हिरण्याश्वरथो, धरा(१) ॥

हिरण्यकामधेनुश्च, हेमहस्तिरथस्तथा ।

पञ्चलाङ्गलकं(२), विश्वचक्रं(३), कल्पलता तथा ॥

सप्ताब्धी, रत्नधेनुश्च, महाकलश एव च ।

इति षोडशमहादानानि मुख्यानि । कुण्डमण्डपादीतिकर्तव्यताकलापनियमेन तत्र महादानत्वस्य मुख्यत्वात् तेषामेवायं

(१) धरा चात्र हैमी बोध्या ।

कारयेत् पृथिवीं हैमीं जम्बुद्वीपानुकारिणीम् ।
मर्यादापर्वतवतीं मध्ये मेरुसमन्विताम् ॥
लोकपालाष्टकोपेतां नववर्षसमन्विताम् ।
नदीनदशतोपेतामन्ते सागरवेष्टिताम् ॥

इति हेमाद्रौ मात्स्योक्तेः ।

(२) पञ्चलाङ्गलकदानं च-

पुण्यां तिथिमथासाद्य युगाद्यग्रहणादिकाम् ।
भूमिदानं नरो दद्यात् पञ्चलाङ्गलकान्वितम् ॥
इत्यादिना हेमाद्रौ स्पष्टम् ।

(३) विश्वचक्रं च-

तपनीयस्य शुद्धस्य विषुवादिषु कारयेत् ।
ज्येष्ठं पलसहस्रेण, तदर्धेन तु मध्यमम् ॥
तस्यार्धेन कनिष्ठं स्याद्विश्वचक्रमुदाहृतम् ।
अन्यद्विंशपलादूर्ध्वमशक्तोऽपि निवेदयेत् ॥
षोडशारं ततश्चक्रं भ्रमन्नेम्यष्टकावृतम् ।
नाभिमध्ये स्थितं विष्णुं योगारूढं चतुर्भुजम् ॥
शङ्खचक्रेऽस्य पार्श्वे तु देव्यष्टकसमावृतम् ।

इति । अरो—नाभ्यन्तोपक्रमान्तगामी शलाकाकृतिरवयवविशेषः । योगारूढं—हृद्देशावस्थापितहस्तद्वयमित्यादिना हेमाद्रौ मत्स्यपुराणे च स्पष्टम् ।

व्रतारम्भसमाप्ती च कर्म *काम्ये च पाप्मनाम् ॥
प्रायश्चित्तं तु *सर्वस्य मलमासे विवर्जयेत् ।
उपाकर्मोत्सर्जनं च पवित्रदमनार्पणम् ॥
अवरोहश्च हेमन्तः सर्पाणां बलिरष्टकाः ।
ईशानस्य बलिर्विष्णोः शयनं परिवर्तनम् ॥
दुर्गेन्द्रस्थापनोत्थाने ध्वजोत्थानं च वज्रिणः ।
पूर्वत्र प्रतिषिद्धानि परत्रान्यच्च दैविकम् ॥ इति ।

अत्र मूलवचनानि हेमाद्रिमाधवादिभ्यो ज्ञेयानि । दिवोदासीयेऽपि-

यात्रोत्सवं च देवादिशपथं दिव्यमेव च ।
मलमासे न कुर्वीत व्यासस्य वचनं यथा ॥ इति ।

अयं निर्णयः क्षयमासेऽपि ज्ञेयः ।

*रविसंक्रमहीने यो वर्ज्यो वर्ज्यविधिः स्मृतः ।
स एव तु द्विसंक्रान्ते मलमासेऽप्युदीरितः ॥

इति काठकगृह्योक्तेः । क्षयमासमृतानां प्रत्याब्दिके विशेषो हेमाद्रौ-

---

वे यत्र सौरमासस्यैव वृद्धिवशाद्विंशत्तिथित आधिक्यं, तत्रोपाकर्मादितिथिद्वैधेन परतिथिपरमिति, तदसत् । रामजन्मदिनोत्सवस्यातिरिक्तस्यासत्त्वेनैतादृशार्थस्याशुद्धत्वात् । रामतदितरकर्तृकत्वरूपविशेषस्य कल्पितत्वात् । "आरभ्य जन्मदिवसम्" इत्यादिनोक्तस्य जन्ममासस्य चान्द्रत्वात्तन्मासकर्तव्यजन्मदिनोत्सवस्य वर्षान्तरेणापि पूर्वकर्तव्यताया अत्यन्तायुक्तत्वाच्च ।

*काम्ये इति-द्विवचनान्तं पूर्वान्वयि । *सर्वस्य-पाप्मनामित्यन्वयः । आसन्नमृत्युकस्य तु मलमासेऽपि सर्वप्रायश्चित्तं भवत्येव शुद्धमासासम्भवेन निषेद्धुमशक्यत्वात् ।

*रवीति । रविसंक्रमहीनत्वेन संसर्पाधिमासयोरनुगमः ।

तिथ्यर्धे प्रथमे पूर्वो द्वितीयेऽर्धे तदन्तरः ।
मासाविति बुधैश्चिन्त्यौ क्षयमासस्य मध्यगौ ॥

यस्मिन्मासे न संक्रान्तिः संक्रान्तिद्वयमेव वा ।
संसर्पाहस्पती मासावधिमासश्च निन्दितौ ॥

इत्युक्तेः । तत्र क्षयसंसर्पयोर्निन्द्यत्वं विवाहव्रतोत्सवमङ्गलेष्वेव ।

एकत्र वर्षे ऽधिकमासयुग्मं यत्कार्तिकादित्रितये क्षयाख्यः ।
तद्वर्जनीयं त्रितयं प्रयत्नात् विवाहयज्ञोत्सवमङ्गलेषु ॥

इति वचनात् । तत्र मङ्गलम् —

चूडां मौञ्जीबन्धनं च अग्न्याधेयं महालयम् ।
राजाभिषेकं काम्यं च न कुर्याद्भानुलङ्घिते ॥

इति वचनोक्तं चूडादि । भानुलङ्घितः संसर्पः ।

चूडां मौञ्जीबन्धनं च अग्न्याधेयं महालयम् ।
राजाभिषेकं काम्यं च मलमासे विवर्जयेत् ॥

इत्यधिकमासे पुनर्वचनात् मौञ्जीनिषेधो वेदव्रतपरः । संसर्पे दक्षिणायनान्तःपातेन विप्रक्षत्रयोरुपनयनमुक्तः । महालयनिषेधश्च स्वकालातिपन्नविषय इत्युक्तम् । एवं च

कार्तिकादिषु मासेषु यदि स्यातां मलिम्लुचौ ।
सर्वकर्महरः प्रोक्तः पूर्वस्तत्र मलिम्लुचः ॥

इति संसर्पस्य सर्वहरत्वस्मृतिर्व्याख्याता । यानि मासविशेषसापेक्षाणि चौलोपनयनविवाहमन्त्रदीक्षादीनि, यानि च नक्षत्र-पेक्षाणि ऋत्वयनमात्रापेक्षाणि संसर्पाहस्पत्यतिक्रमेण कृतान्यपि स्वकालकृतान्येव, यानि चानावश्यकत्वाद्वत्सरान्तरीयतन्मासे सुकराणि व्रतविशेषतदुद्यापनादीनि तेषामधिमास इव संसर्पेऽप्यकर्तव्यत्वात्, तयोश्च न काम्यस्य प्रथमारम्भः । वत्सरान्तरे सुकरत्वात् । अत एव मासविशेषसापेक्षाणां मत्स्याब्दिकादीनां शुद्धमासे सम्भवत्कर्तव्यताकतया ऽधिमासे ऽकरणेऽपि न संसर्पांहस्पत्योरकरणं तद्वत् भागद्वयाभावात् । एवं चाऽऽश्विनस्य संसर्पत्वे

मलमासे दर्शनानि* वर्जयेद्देवदर्शनम् ॥ इति ।

अनादिदेवतां दृष्ट्वा शुभः स्युर्नष्टभार्गवे ।
मलमासेऽप्यनावृत्ततीर्थयात्रां विवर्जयेत् ॥

आवृत्ततीर्थे दोषाभावमात्रं, न तु फलमिति वाचस्पतिमिश्राः । तन्न । अमाने वाचके फलहेतुत्वाश्रुतेः । लल्लोऽपि

*नीचस्थे वक्रसंस्थेऽप्यतिचरणगते बालवृद्धास्तगे वा
[illegible] यदि [illegible] ॥

इति [illegible] । [illegible]

ननु मासान्तरे कथं देवदर्शननिषेधः ।
अनादिदेवतानां तु कालदोषो न विद्यते ।
[illegible] ॥

इति ज्योतिःशास्त्रविरोधादित्यत आह—अनादीति । अत्र निन्दापितृकर्मविरोधित्वप्रसङ्गस्य न्यायेन विवर्जयेदित्यनुषङ्गः । एवं च 'अरुणयैकहायन्या' इत्यादौ अरुणयत्वस्य कारकद्रव्यान्वयं क्रीणातिनाऽन्वयः, पश्चादेकहायन्याऽन्वय इतिवत् अनावृत्तपदस्य द्वितीयान्तत्वात्तदन्वितस्य वर्जनेऽन्वयादेवतादर्शनेऽप्यनावृत्तत्वं लभ्यते । यदि च दातृपदाद्यादिपदवदनावृत्तपदस्य यौगिकत्वात्प्रथमतो विशेष्यपदार्थान्वयात् पश्चाद्वर्जने ऽन्वयो वाच्यः । स च न सम्भवति । तदन्वययोग्यदर्शनपदाभावादित्युच्यते; तदा अपिना अनावृत्तदेवतादर्शनं समुच्चित्य निन्दोपपाद्या । अनावृत्तेति समस्तपाठेऽपि तत्समुच्चय इति न ज्योतिःशास्त्रविरोधः । *नष्टभार्गवे इति । नष्टेति बाल्यादेः, भार्गवे इति गुरोश्चोपलक्षणम् ।

सर्वेषामेकधर्माणामेकस्यापि यदुच्यते ।
सर्वेषां तद्भवेत् कार्यमेकरूपा हि ते स्मृताः ॥

इति न्यायात् । तदेतदाह—*नीचस्थे इति । नीचो—मकरः,

संन्यासो देवयात्राव्रतनियमविधिः कर्णवेधस्तु दीक्षा ।
मौञ्जीबन्धोऽङ्गनानां प्रतिगमनविधिर्वास्तुदेवप्रतिष्ठा
वर्ज्याः सद्भिः प्रयत्नात्त्रिदशपतिगुरौ सिंहराशिस्थिते च ॥

इति । दीक्षा—यागदीक्षा, *न त्वागमदीक्षा । तथा—

उद्यानचूडाव्रतबन्धदीक्षा-
विवाहयात्राश्च वधूप्रवेशम् ।
तडागकूपत्रिदशप्रतिष्ठा
बृहस्पतौ सिंहगते न कुर्यात् ॥

दिवोदासीये—

गुर्वादित्ये गुरौ सिंहे नष्टे शुक्रे मलिम्लुचे ।
गृहकर्म व्रतं यात्रां मनसाऽपि न चिन्तयेत् ॥

अस्यापवादस्तत्रैव ब्राह्मे—

मुण्डनं चोपवासश्च गौतम्यां सिंहगे गुरौ ।
कन्यागते तु कृष्णायां न तु तत्तीरवासिनाम् ॥

तथा—

आद्या सा गौतमी गङ्गा, द्वितीया जाह्नवी स्मृता ।
सर्वतीर्थफलं स्नानाद् गौतम्यां सिंहगे गुरौ ॥

संहिताप्रदीपे—

स्यात्सप्तरात्रं गुरुशुक्रयोश्च
बालत्वमह्नां दशकं च वार्ध्यम् ।
वृद्धौ सितेज्यावशुभौ शिशुत्वे
शस्तौ यतस्तावुपचीयमानौ ॥

वसिष्ठः—

अतिचारगते जीवे वर्जयेत्तदनन्तरम् ।
व्रतोद्वाहादिकार्येषु अष्टाविंशतिवासरान् ॥

बाल्यादिलक्षणमुक्तं ब्रह्मसिद्धान्ते—

---

*न त्वागमदीक्षा । तस्याः श्रौतस्मार्तकर्मान्तःप्रवेशायोगात् । तत्र

रविणाऽऽसन्निरन्येषां ग्रहाणामस्त उच्यते ।
ततोऽर्वाग्वार्धकं प्रोक्तमूर्ध्वं बाल्यं प्रकीर्तितम् ॥

इति ।

बाल्यादिपरिमाणं च रत्नमाले—

बालः शुक्रो दिवसदशकं, पञ्चकं चैव वृद्धः,
पश्चाद् अह्नां त्रितयमुदितः, पक्षसप्ताहं क्रमेण ।
जीवो वृद्धः शिशुरपि तथा, पक्षमन्यैः शिशू तौ,
वृद्धौ प्रोक्तौ दिवसदशकं, चापरैः सप्तरात्रम् ॥

पश्चिमत उदये दशदिनानि बालः, अस्ते पञ्चदिनानि वृद्धः, पूर्वतो दिनत्रयं बालः, पक्षं च वृद्ध इत्यर्थः । जीवो—गुरुः । अन्यत्र त्वन्यथोक्तम्—

प्राक्पश्चादुदितः शुक्रः पञ्चसप्तदिनं शिशुः ।
विपरीतं तु वृद्धत्वं, तद्वदेव गुरोरपि ॥ इति ।

एषां च पक्षाणां व्यवस्थामाह मिहिरः—

बहवो दर्शिताः काला ये बाल्ये वार्धकेऽपि वा ।
ग्राह्यास्तत्राधिकाः, शेषा देशभेदादनापदि ॥ इति ।

देशभेदश्च मदनरत्ने गार्ग्यः—

शुक्रो गुरुः प्राक् च पराक् च बालो
विन्ध्ये दशावन्तिषु सप्तरात्रम् ।
वङ्गेषु हूणेषु च षट् च पञ्च

कालान्तरस्य वक्तव्यत्वात् । गुर्वादित्यादि विवाहे वक्ष्यामः ।
केचित्तु—

सिंहस्थौ गुरुशुक्रौ च सर्वारम्भेषु वर्जयेत् ।

इति पठन्ति ।

सिंहस्थेऽपि मघासंस्थं गुरुं यत्नेन वर्जयेत् ।
अन्यत्र सिंहभागे तु सिंहस्थोऽपि न दुष्यति ॥

इति केचित् ।

शेषे च देशे त्रिदिनं वदन्ति ॥ इति ।

अस्तादेरपवादः काशीखण्डे—

*न ग्रहास्तोदयकृतो दोषो विश्वेश्वरालये ।

त्रिस्थलीसेतौ वायवीये-

गोदावर्यां गयायां च श्रीशैले ग्रहणत्रये ।

सुरासुरगुरूणां च मौढ्यदोषो न विद्यते ॥

ग्रहणत्रये—तन्निमित्तककुरुक्षेत्रयात्रा-दानादाविसर्थः । तदाह त्रिस्थलीसेतौ लल्लः—

उपप्लवे शीतलभानुभान्वो-

रर्धोदये वै कपिलाषष्ठ्याम् ।

(१)सुरासुरेज्यास्तमयेऽपि तीर्थे

यात्राविधिः संक्रमणे च शस्तः ॥

इत्यलं बहुना ।

मलमासे च व्रतविशेष उक्तो हेमाद्रौ पाद्मे—

अधिमासे तु संप्राप्ते गुडसर्पिर्युतानि च ।

त्रयस्त्रिंशदपूपानि दातव्यानि दिने दिने ॥

साज्यानि गुडमिश्राणि अधिमासे नृपोत्तम ।

अधिमासे तु संप्राप्ते (२)त्रयस्त्रिंशत्तु देवताः ॥

उद्दिश्यापूपदानेन पृथ्वीदानफलं लभेत् ।

त्रयस्त्रिंशदपूपान्नं कांस्यपात्रे निधाय च ॥

---

*न ग्रहेति । काशीस्तुतिरिति केचित् ॥ इति मलमासटिप्पणी ॥

---

(१) न मूढदोषो न च राशिदोषो न चाधिमासे न मृतिर्न सूतिः । एवमुत्तरार्धं केचित् पठन्ति ।

(२) "अष्टौ वसव एकादश रुद्रा द्वादशादित्याः प्रजापतिश्च वषट्कारश्च" इति श्रुत्युक्तास्त्रयस्त्रिंशत् ।

सघृतं सहिरण्यं च ब्राह्मणाय निवेदयेत्।
विष्णुरूपी सहस्रांशुः सर्वपापप्रणाशनः॥
अपूपान्नप्रदानेन मम पापं व्यपोहतु।
नारायण जगद्बीज भास्करप्रतिरूपक॥
व्रतेनानेन पुत्रांश्च संपदं चाभिवर्धय।
यस्य हस्ते गदाचक्रं गरुडो यस्य वाहनम्॥
शङ्खः करतले यस्य स मे विष्णुः प्रसीदतु।
कलाकाष्ठादिरूपेण निमेषघटिकादिना॥
यो वञ्चयति भूतानि, तस्मै कालात्मने नमः।
कुरुक्षेत्रसमं देशः, कालः पर्व, द्विजो हरिः॥
पृथ्वीसममिदं दानं गृहाण पुरुषोत्तम।
मलानां च विशुद्ध्यर्थं पापप्रशमनाय च॥
पुत्रपौत्राभिवृद्ध्यर्थं तव दास्यामि भास्कर।
मन्त्रेणानेन यो दद्यात् त्रयस्त्रिंशदपूपकान्॥
प्राप्नोति विपुलां लक्ष्मीं पुत्रपौत्रादिसंपदः॥ इति।
इति निर्णयसिन्धौ मलमासनिर्णयः॥

पक्षनिर्णयस्तु—
दैवे मुख्यः शुक्लपक्षः, कृष्णः पित्र्ये विशिष्यते।
इति माधवेनोक्तः।

अथ तिथिनिर्णयः। तत्र *तिथिर्द्वेधा। शुद्धा वि-

*तिथिरिति।
अमा षोडशभागेन देवि प्रोक्ता महाकला।
संस्थिता परमा माया देहिनां देहधारिणी॥
अमादिपौर्णमास्यन्ता या एव शशिनः कलाः।
तिथयस्ताः समाख्याताः षोडशैव वरानने॥
इति प्रभासखण्डे। अमानाम्नी सर्वानुस्यूता नित्यकला। तदन्याः प्रतिपदादयः पञ्चदशकलाः। तत्रैकैकस्याः कलायाः चन्द्रमण्डलस्य

द्धा च। *दिने तिथ्यन्तरसम्बन्धरहिता शुद्धा। तत्स-
हिता विद्धा॥ तत्र शुद्धायामसन्देहात् *विद्धा निर्णीयते।
सूर्यमण्डलेन सह परमसन्निकर्षानन्तरं विप्रकर्षः, परमविप्र-
कर्षानन्तरं सन्निकर्षो वा यावता कालेन भवति, तावान्समयो
लक्षणया शुक्लकृष्णपक्षयोः प्रतिपदादितिथिपदार्थः।

तत्र पक्षावुभौ मासे शुक्लकृष्णौ सदैव हि।
चन्द्रवृद्धिकरः शुक्लः, कृष्णश्चन्द्रक्षयात्मकः॥
पक्षत्यायास्तु तिथयः क्रमात्पञ्चदश स्मृताः।
दर्शान्ताः कृष्णपक्षे ताः, पूर्णिमान्ताश्च शुक्लके॥

इति षट्त्रिंशन्मतात्। *दिने—दिवसे, न त्वहोरात्रे।
तेन यथा—

प्रतिपत्प्रभृतिः सर्वा उदयादोदयाद्रवेः।
संपूर्णा इति विख्याता हरिवासरवर्जिता॥

इत्युक्तसंपूर्णाया ग्रहः, तथा अहोरात्रसाध्यमात्रान्यतरसाध्या-
न्यकर्मसु उदयास्तमयव्यापिन्या अपि।

अहःसु तिथयः पुण्याः कर्मानुष्ठानतो दिवा।
नक्तादिव्रतयोगे तु रात्रियोगो विशिष्यते॥

इति वाक्यात्—अहःसु यास्तिथयस्ताः पुण्याः। दिवैव
कर्मणामनुष्ठानमित्युत्सर्गात्। "पूर्वाह्णो वै देवानां, मध्यं दिनो
मनुष्याणाम्, अपराह्णः पितॄणाम्" इत्यहर्भागेष्वेव देवादिकर्मवि-
धानात् सूर्योदयं विना नैव स्नानादिकक्रम इति।

स्नानं दानं जपः श्राद्धमनन्तं राहुदर्शने।
आसुरी रात्रिरन्यत्र, तस्मात्तां परिवर्जयेत्॥

इति सामान्यतो रात्रिनिषेधाच्च।

प्रातः संध्यां बुधः कृत्वा संकल्पं तत आचरेत्।

इति सामान्यतो दिनारम्भे एव संकल्पविधानाच्च। *असं-
देहादिति। अयं भावः—विधिष्वनुष्ठीयमानस्य विधेयस्याभ्युद-

तत्र सामान्यतो वेधमाह माधवीये पैठीनसिः—

यद्धेतुत्वं प्रमेयं तिथिद्वैधे कः?, सकृत्करणेनैव शास्त्रार्थसिद्धेर्गुणानुरोधेन प्रधानावृत्तेरन्याय्यत्वादिति सन्देहः । न चैष पूर्णायां तिथौ । तस्या एकत्वादिति । निषेधेषु तु कालविशेषे कर्मकरणस्यानर्थहेतुत्वं प्रमेयम् । यदा कदापि तत्काले कर्मकरणेऽनर्थप्रसङ्गानपायेन सर्वदैव तत्काले तद्वर्ज्यत्वाच्चार्थात्तिथिनिर्णीतिसिद्धेः । तदुक्तम्—

निमित्तं कालमादाय वर्तते विधिनिषेधयोः ।
विधिः पूज्यतिथौ तत्र, निषेधः कालमात्रकः ॥
तिथीनां पूज्यता नाम कर्मानुष्ठानयोग्यता ।
निषेधस्तु निवृत्त्यात्मा कालमात्रमपेक्षते ॥ इति ।

नन्वेवमपि विधौ कथं सन्देहः ? । कालस्य निमित्ततया प्रकृतानुपयोगात् । यदा कदाचित्तत्काले निमित्ते कर्मणोऽनुष्ठातुं शक्यत्वात् । सत्यम् । तस्याङ्गतया तत्प्रतीक्षया सन्देहः । तिथीनां विधिनिषेधाङ्गत्वं च तत्र तत्र सप्तम्यैव । न च सा निमित्तसप्तमी । उपपदविभक्तितः कारकविभक्तेर्बलीयस्त्वात् । "वसन्ते वसन्ते" इत्यादौ तु प्रतिनिमित्तं नैमित्तिकावृत्तिसिद्ध्यर्थं निमित्तसप्तमी । अन्यथा वसन्तादेः केवलाङ्गत्वे सकृदेव तत्कर्मकरणं स्यादिति वीप्सावैयर्थ्यात् । तत्र च न केवलनिमित्तत्वम् । तस्मिन्काले निमित्ते विहिते कालाकाङ्क्षाया विशेषासत्त्वादुपस्थितत्वाच्च तस्यैवाङ्गत्वस्यापि उपपन्नत्वात् । संक्रान्त्यादिकालस्य तु केवलनिमित्तत्वम् । तस्य सूक्ष्मत्वात् दीर्घकालव्यापिश्राद्धादिकर्माङ्गत्वासम्भवेन तत्पूर्वोत्तरकालस्यैवाङ्गत्वात् । एवं रविवारादिनिमित्तकस्नानादौ निमित्तभूतसूर्योदयपूर्वकालस्य, करणनिमित्तोपवासप्रतिनिध्येकभक्ते निमित्तोत्तरकालस्य च वचनादङ्गत्वं बोध्यम् । नन्वेवं वचनान्न्यायतश्च सर्वनिषेधानां तात्कालिकत्वे

अभ्यङ्गे चोदधिस्नाने दन्तधावनमैथुने ।
जाते च मरणे चैव तत्कालव्यापिनी तिथिः ॥

*पक्षद्वयेऽपि तिथयस्तिथिं पूर्वां तथोत्तराम् ।
त्रिभिर्मुहूर्तैर्विध्यन्ति सामान्योऽयं विधिः स्मृतः ॥

इति । हेमाद्रिमदनरत्नादौ तु त्रिमुहूर्तोऽप्युक्तः—

*उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ ।
द्विमुहूर्तं त्रिरह्नश्च सा तिथिर्हव्यकव्ययोः ॥

मन्वादौ च युगादौ च ग्रहणे चन्द्रसूर्ययोः ।
व्यतीपाते वैधृतौ च तत्कालव्यापिनी क्रिया ॥

इत्यभ्यङ्गमैथुनदन्तधावननिषेधेषु तात्कालिकत्वं व्यर्थम् । न च साकल्यवचनात्तत्तिथिरुदयास्तमयवर्तिनीति तद्भिन्नतिथिस्पृष्टेतरतिथावपि तत्तिथिनिषिद्धानां तेषामननुष्ठानं स्यादिति तथोक्तमिति वाच्यम् । यतस्तत्तत्कर्मकालभूताहर्भागविशेषे तत्तिथ्यभावेऽपि तत्तत्कर्मानुष्ठानार्थं साकल्यवचनम् । न च तस्य निषेधेषु प्रवृत्तिरिति । तादृशेतरतिथौ निषेधाप्रसक्तेः । सत्यम् । साकल्यवचने हि "स्नानदानजपादिषु" इति आदिशब्देन "दानाध्ययनकर्मसु" इति बहुवचनेन चानुष्ठेयानामेव कर्मणां ग्रहणम् । एवं च तदपवादे एतद्वचने अभ्यङ्गादित्रयस्योपादानं सकलनिषेध्यानामुपलक्षणम् । जननमरणयोस्तु तद् दृष्टान्तविधया । न ह्यननुष्ठेययोस्तयोः साकल्यवचनं प्रवर्तते । न च जननमरणाभ्यां तन्निमित्तकं कर्म गृह्यताम् । तथाविधे साकल्यस्येष्टत्वात् । जननादिग्रहणं च तत्तत्तिथिविशेषाधिकरणकोत्पादनादेरुपलक्षणम् । तन्निमित्तककर्मणः साकल्यस्येष्टत्वात् ।

*पक्षद्वयेऽपीति । अत्र पूर्वया तिथ्योदयादुत्तरम्, उत्तरया चोदयात्पूर्वं त्रिमुहूर्तया वेध इति नार्थः । वेधस्य दिनमात्रसाध्यत्वभङ्गापत्तेः । तस्य तादृशासाध्यत्वे मानम्—"उदिते दैवतं भानौ" इत्येव ।

*उदिते इति । उदिते भानौ यद् द्विमुहूर्तं तद्दैवतं—देवकर्मार्हम् । अस्तमिते—अस्तं गन्तुमारब्धे यदह्नस्त्रिमुहूर्तं तत् पित्र्यं—पितृकर्मार्हमित्यर्थः । अह्न इत्यन्वयादस्तमिते इति आदि-

इति विष्णुधर्मोक्तेः । *त्रिमुहूर्तत्वं चानुकल्पः* ।

*त्रिमुहूर्ताऽपि कर्तव्या या तिथिर्वृद्धिगामिनी ।

कर्मणि क्तः । "पक्षद्वयेऽपि" इति वेधिकात्रिमुहूर्तसंबन्धेन वेधोक्तेस्तस्यास्त्रिमुहूर्तत्वं वाचनिकम् । वेध्यायास्तु तदार्थिकं न्यायसाम्यादिति । द्विमुहूर्तत्वस्य कथं निवेश इत्यत आह—*त्रिमुहूर्तत्वं चेति । *अनुकल्पः—स्नानदानादिविषय इति तदर्थः । न च वेध्यायास्त्रिमुहूर्तत्वस्यार्थिकत्वे मानाभावात् द्विमुहूर्तत्वं नानुकल्प इति वाच्यम् ।

पौर्वाह्णिकास्तु तिथयो दैवे कार्ये फलप्रदाः ।

इति वृद्धयाज्ञवल्क्यवचनात् पञ्चभागेष्वाद्यभागरूपपूर्वाह्णव्यवस्थोक्तेः । "प्रातः संकल्पयेद्विद्वान्" इति त्रिमुहूर्तात्मकोपक्रमकालावच्छिन्नायास्तिथेरेव "यो यस्य विहितः कालः" इत्यनेनाङ्गत्वोक्तेश्च । माधवाचार्यो अपि पञ्चधा विभागो बहुस्मृतिषूक्तत्वात्सर्वत्र ग्राह्य इति बहुसमयकर्तव्यस्नानदानादौ त्रिमुहूर्ता तदनुकल्पतया पौर्वाह्णिकत्वाभिनवपक्षोपसंग्रहार्थमिति रीत्या त्रिमुहूर्तत्वं मुख्यं वदति ।

वस्तुतस्तु पक्षद्वयेऽपीति यदि पूर्वां तिथिमुत्तरास्तिथयस्त्रिभिर्मुहूर्तैर्युक्ता एव सत्यः (१)स्पृष्टाश्चेद्विद्धा इति व्यवहार्याः, तदोत्तरां तिथिं पूर्वा अपि मुहूर्तत्रयावच्छिन्ना एव स्पृशन्त्य इत्यर्थः । तथा सत्येव युग्मवर्षाकल्पादिशास्त्रप्रवृत्त्युपयोगितया त्रिमुहूर्तत्वविशिष्टतिथिद्वयसम्बन्धस्य वेधत्वसिद्धेः त्रिमुहूर्तोनवेधिकासम्बन्धस्य त्रिमुहूर्तोनवेध्यासम्बन्धस्य च किंचिन्न्यूनतिथिद्वयसम्बन्धतया प्रकृतानुपयोगात् ।

*त्रिमुहूर्ताऽपीति ।

---

(१) स्पृष्टा इत्यस्य विध्यन्ति इत्यनेनाऽन्वयः । स्पृष्टाः सत्यः पूर्वां तिथिं विध्यन्ति चेद् विद्धाः । एवमुत्तरापि मुहूर्तत्रयावच्छिन्ना एव स्पृशन्त्यः सत्य उत्तरां तिथिं विध्यन्ति चेद् विद्धा इति व्यवहार्या इत्यर्थः ।

इति दक्षेणापि*शब्दोक्तेः। अयं वेधः प्रातरेव। सायं तु त्रिमुहूर्तो वेध एव

*यां तिथिं समनुप्राप्य यात्यस्तं पद्मिनीपतिः।
सा तिथिस्तद्दिने प्रोक्ता त्रिमुहूर्तैव या भवेत्॥

इति स्कान्दोक्तेः। दीपिकापि—'त्रिमुहूर्तगा तु सकला सायम्'' इति। यानि तु—

व्रतोपवासस्नानादौ घटिकैकापि या भवेत्।
उदये सा तिथिर्ग्राह्या विपरीता तु पैतृके॥

इत्यादीनि स्कान्दादिवचनानि *तानि वैश्वानरादि-

त्रिमुहूर्ता न कर्तव्या या तिथिः क्षयगामिनी।

इति पूर्वार्धम्। *अपिशब्देति। तथा च पूर्वार्धेऽप्यपिशब्दान्वयात् त्रिमुहूर्तत्यागे द्विमुहूर्तग्रहणे न तात्पर्यं, किन्तु द्विमुहूर्तत्वस्यानुकल्पत्वे इति। अयं निषेधो न त्रिमुहूर्तव्याप्तिबाधनाय, किन्तु चतुर्थमुहूर्तस्पर्शित्वाविधित्सयेति त्रिमुहूर्तव्याप्तेर्मुख्यत्वमित्यन्ये। क्षयिण्यां त्रिमुहूर्तग्राह्यतानिषेधस्तदन्यस्यां तद्ग्राह्यतासाधकः, निषेधस्य प्राप्तिपूर्वकत्वादिति तस्यामुख्यत्वमितीतरे।

ननूदितवाक्ये यथासंख्यान्वयस्यानिर्णीतत्वात् सायमपि द्विमुहूर्तत्वमनुकल्पोऽस्तु इत्यत्राह—*यामिति। त्रिमुहूर्तत्वस्य-वकारात्,

यां प्राप्यास्तमुदेत्यर्कः सा चेत् स्यात्त्रिमुहूर्तगा।
धर्मकृत्येषु सर्वेषु सम्पूर्णां तां विदुर्बुधाः॥

इति विष्णुरहस्ये उद्देश्यविधेयभावेन त्रिमुहूर्तवत्त्वयैव पूर्णत्वोक्तेर्द्विमुहूर्तत्वनिवेशासम्भवाच्च।

*वैश्वानरेति। "वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते" इत्याम्नाय "यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति, यन्नवकपालो भवति त्रिवृतैवास्मिंस्तेजो दधाति"इत्यादिना

करणत्यागेनावयव*स्तुत्या त्रिमुहूर्तप्रशंसापराणि ।

तिथिविशेषे वेधविशेषः स्कान्दे—

नागो द्वादशनाडीभिर्दिक् पञ्चदशभिस्तथा ।
*भूतोऽष्टादशनाडीभिर्दूषयत्युत्तरां तिथिम् ॥ इति ।

अयं चो*पवासातिरिक्तविषय इति वक्ष्यते ॥ इति वेधः ॥

तत्र सर्वा तिथिर्यदहः कर्मकाल*व्यापिनी, सैव ग्राह्या ।

कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः ।
*तया कर्माणि कुर्वीत, ह्रासवृद्धी न कारणम् ॥

फलवदष्टाकपालानुक्तम् । तत्रोत्पत्तिशिष्टद्वादशकपालावरुद्धे उत्पन्न-शिष्टानामष्टाकपालादीनां निवेशे वाक्यभेदः स्यादतोऽवयवद्वारा-ऽवयविभूतद्वादशकपालस्तुतिपराण्येवं तद्वदित्यर्थः । *अवयवः-एकघटिका । *नागः पञ्चमी । *दिक्-दशमी । *भूतः चतुर्दशी । *उपवासातिरिक्तेति । "सर्वप्रकारवेधोऽयम्" इति वाक्यात् ।

*कर्मकालेति । कर्म षड्विधम् । उपवास-एकभक्त नक्त—अया-चित-व्रत—दानभेदात् । अत्रोपवासे अहोरात्रस्तत्कालः । तस्याहो-रात्राभोजनसङ्कल्परूपत्वात् । तदहोरात्रावच्छिन्नद्वितीयभोजना-भावविशिष्टं मध्याह्नभोजनमेकभक्तम् । तादृशं प्रदोषभोजनं नक्तम् । अयाचितलब्धस्य तादृशं सकृद्भोजनमयाचितम् । तेष्वपि विशेष्यांशे मध्याह्नादिः, विशेषणांशे चाहोरात्र एव कालः । एवं दानव्रतयो-रपि प्रातरादिः । तत्तत्कर्मणि तत्तद्व्यापिनीत्यर्थः ।

*तया कर्माणीति । तत्र कालस्यानुपादेयत्वाद् यथा तत्त-त्तिथिपरित्यागेन कर्म दुष्करं, तथा तत्तदहर्भागपरित्यागेना-पि । अन्यथा "यावज्जीवमग्निहोत्रं जुहोति" इति यावज्जीवका-लात् प्रातरादिभागं विहायापि अग्निहोत्रं हूयतेति भावः । कर्मकाल-व्याप्तिर्द्वेधा । साकल्येन एकदेशेन वा । सापि पुनर्द्वेधा । पूर्वेद्युरेव, परेद्युरेवेति । एषु पक्षेषु सैव ग्राह्या । दिनद्वये तद्व्याप्त्यादौ त्वाह-

इति विष्णुधर्मोक्तेः। *दिनद्वये तद्व्याप्तावतद्व्याप्तावेकदेशव्याप्तौ वा *युग्मवाक्यान्निर्णयः। *तस्य पूर्वोऽक्तन्यायेनोपपत्तेः। कर्मकालस्य प्रधानाङ्गत्वाच्च। युग्मवाक्यं तु निगमः।

---

*दिनद्वये इति। *युग्मवाक्यात्, खर्वादिवाक्यात्, शुक्लादिवाक्याच्च। नन्वस्तु कर्मकालशास्त्राद् ह्रासवृद्धिशास्त्रं(१) दुर्बलम्। एकदिन एव तत्सत्त्वेनासन्देहात्, 'ह्रासवृद्धी न कारणम्' इत्युक्तेः। न तु युग्मशास्त्रम्। तथा च तेन कर्मकालशास्त्रबाधो दुर्वार इत्यत आह— *तस्येति। अयं भावः तत्तत्कर्मसु विहितायां तत्तत्तिथौ खण्डायां संदेहे सति निर्णयार्थं युग्मवाक्यादीनां प्रवृत्तिः। निष्पादिविधिप्रवृत्तिसमकालमेव च प्रातरादिभागादिप्रवृत्तिः। प्रयोगविधिना कालस्योपादेयत्वात्। एवं च तेषां प्रत्यासन्नत्वात् तत्तत्कालीनातिथिलाभे तस्यां तत्तत्कर्मणि न संदेहः। एतदेव कर्मकालशास्त्रेण बाधो भङ्ग्या बोध्यते। ततश्च कर्मकाल एव प्रवर्तको, न तु ह्रासवृद्ध्यादि। दानव्रतयोरपि "पौर्वाह्णिकास्तु तिथयः" इति कालविशेषवचनेन स एव कर्मकालः प्रवर्तकः। 'ह्रासवृद्धी न कारणम्' इत्यत्र ह्रासवृद्धिपदस्य युग्माद्युपलक्षणतया युग्मादिशास्त्रं खर्वादिशास्त्रं च न कुत्रापि पुरस्तात्प्रवृत्तिप्रयोजकम् असंदेहादिति। यत्र कर्मकालानुरोधेन निर्णयो दुष्करः दिनद्वये कर्मकालव्याप्तौ, साम्येनैकदेशव्याप्तौ च प्रवर्तितेऽपि कर्मकालशास्त्रे सन्देहानपायात्, दिनद्वये तदव्याप्तौ कर्मकालशास्त्रौदासीन्येन संदेहतादवस्थ्यात्; तत्रैव विषये इतरशास्त्राणि निर्णायकानीति युग्मशास्त्रादेरुपरिष्टादेव प्रवृत्तिः। वैषम्येणैकदेशव्याप्तौ तु आधिक्यानुगृहीतकर्मकालशास्त्रादेव संशयनिरास इति। एवं च

---

(१) "खर्वो दर्पः" इति मूले वक्ष्यमाणं शास्त्रम्।

युग्माग्नियुगभूतानां षण्मुन्योर्वसुरन्ध्रयोः।
रुद्रेण द्वादशी युक्ता चतुर्दश्या च पूर्णिमा॥
प्रतिपद्यप्यमावास्या तिथ्योर्युग्मं महाफलम्*।
एतद्व्यस्तं* महादोषं, हन्ति पुण्यं पुराकृतम्॥ इति।

अत्र रन्ध्रान्ताः शब्दा द्वितीयादिनवम्यन्ततिथिवाचकाः। रुद्रः—एकादशी। द्वितीया तृतीयायुता, सा च द्वितीयायुतेति *समग्रयुग्मानामित्यर्थः। इदं च शुक्लपक्षे *अमाप्रतिपद्युग्मस्य पूर्णिमायाश्च तत्रैव सत्त्वादिति के-

दिवारात्रिव्रतं यत्र एकस्यैव तिथौ गतम्।
तस्यामुभययोगिन्यामारभेतद् व्रतं व्रती॥ इति।
त्रिसन्ध्यव्यापिनी या स्यात्सैव पूज्या सदा तिथिः।

इत्यादिकं कर्मकालशास्त्रसिद्धार्थकमेव। यदा तिथिरेकत्र दिने अहोरात्रयोगिनी, अन्यस्मिन्नहर्मात्रयोगिनी, रात्रिमात्रयोगिनी वा; तदाऽहोरात्रसाध्ये उपवासादौ अन्यतरमात्रयोगिनीं त्यक्त्वोभययोगिन्या एव(१) न्यायतः कर्मकालशास्त्राच्च प्राप्तेः। *महाफलं—तत्तत्तिथिकृततत्तत्कर्मफलदात्। *व्यस्तम् अन्यथा कृतम्। म-हादोषम्-कर्मवैगुण्यकारि।

*समेति। युग्मगता पूर्वा तिथिरुत्तरविद्धा उदयव्यापिनी, उत्तरा च पूर्वविद्धा अस्तमयव्यापिनी ग्राह्येत्यत्र ता-त्पर्यम्। *अमेति। द्वितीयादिकयुग्मस्य पक्षद्वयवर्तित्वात् त्यागः। अत्र साहचर्यस्य नियामकत्वमयुक्तम्। तस्य स-न्निधिरूपतया स्थानावान्तरभेदत्वान्मुख्यश्रुत्या पक्षद्वयवर्तिति-थिवाचिद्वितीयादिपदश्रुत्या बाधात्। तदुक्तं—"श्रुतिलिङ्गवाक्य-प्रकरणस्थानसमाख्यानां पारदौर्बल्यम्" इति। (अ० ३ पा० ३ सू. १४ जै०) अत एव ताण्ड्यशाखायां "ओमित्येतदक्षरमुद्गीथमुपासीत" इत्यने-

(१) ग्रहणम् इति शेषः।

चित्। *नचैवं त्वमा*प्रतिपद्युग्मात् कृष्णपक्षालिङ्गात् पक्षद्वयपरमिदं *तत्तद्विशेषवाक्यैः *कृष्णे तिथिविशेषेऽपोद्यते इति। दशमी तूक्ता पुराणसमुच्चये—

*संपूर्णे दशमी कार्या मिश्रिता, पूर्वयाऽथवा। इति।

संपूर्णे—शुक्लपक्षे। त्रयोदशी तु सुमन्तुनोक्ता—

कतच्छाखोक्तगुणैरुद्दीथाख्यभक्त्युपासनं, सन्निधिविशेषात्स्वशाखोद्गीथस्य वेति पूर्वपक्षो मुख्यत्वया सामान्यवाचकोद्गीथपदश्रुत्या तत्सामान्योपस्थितेस्तागिडशादृल्लादिसर्वशाखोद्गीथोपासनमुपेत्य निरस्तो ब्रह्ममीमांसायामित्यभिप्रायवानाह—*नचैवं त्विति। *अमेति। पूर्णिमामात्रं च शुक्लपक्षालिङ्गं द्रष्टव्यम्। *तत्तद्विशेषेति। "प्रतिपत्सद्वितीया स्यात्"इत्यादिभिरित्यर्थः। यदि च तेषामपि सामान्यवाक्यत्वमुच्यते, तदा तत्तत्कर्मकालशास्त्रानरमर्शितकैनैतद्वाक्येन संकष्टचतुर्थ्यादेर्दिनद्वयसत्त्वे प्राप्तं परविद्धत्वं "चतुर्थी गणनाथस्य"इत्यादिनाऽपोद्यत इत्यर्थः। *कृष्णे इति शुक्लोपलक्षणम्।

*संपूर्णे इति। अत्र हेमाद्रिः संपूर्णेति पाठः। संपूर्णे इति, संपूर्णे शुक्लपक्षे इति च प्रमादात्। अन्यथा कृष्णपक्षे विशेषालाभापत्तेः। न च शुक्लपक्षे इत्युक्तमप्यनन्वम्।

युक्ता न दूषिता यस्मादिति सा सर्वतो मुखी।

इतिवाक्यशेषात्। यतः सा सर्वतोमुखी अतोऽविशेषेण पूर्वा, परा वेत्यर्थादिति वाच्यम्। "शूर्पेण जुहोति, तेन ह्यन्नं क्रियते" इत्यत्र हेतुवाचिहिशब्दाद् यस्मादन्नसाधनमतः शूर्पेण होतव्यमिति शूर्पत्वाद्यविवक्षया पिठरादेः प्राप्तमपि होमसाधनत्वमानुमानिकमिति विभक्तिश्रुत्यवगतशूर्पसाधनत्वाद् दुर्बलत्वादुज्झितं, तद्वत् प्रकृतेऽपि सप्तमीविभक्तिश्रुत्या शुक्लपक्षावच्छिन्नदशम्या एव पूर्वापरविद्धात्वं स्यात्। तस्मात्संपूर्णेति पाठः। तत्र मूलाग्रयोरुभयोरपि मुख्यत्वोक्तेरविशेषबोधनद्वारा व्रीहियववद्विकल्प इति। वस्तुतस्तु

त्रयोदशी तु कर्तव्या द्वादशीसहिता मुने । इति ।

कृष्णपक्षे त्वापस्तम्बः—

*प्रतिपत्सद्वितीया स्यात्, द्वितीया प्रतिपद्युता ।

चतुर्थीसंयुता या च सा तृतीया फलप्रदा ॥

पञ्चमी च प्रकर्तव्या षष्ठ्या युक्ता तु नारद ।

कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी ॥

शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः ।

कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः ॥

इतिशुक्लकृष्णवाक्यमेव तत्र व्यवस्थापकं न तु तुल्यवाद्विकल्पः ।

उदासीने तु शास्त्रार्थे पुरुषेच्छा नियामिका ।

इति पुमिच्छाश्रयणानौचित्यात् । एवं च संपूर्णे इति पाठोऽपि सुयोज्यः । शुक्लपक्षे दशमी परविद्धा, अथ वा—पक्षान्तरे कृष्णपक्षे सा पूर्वविद्धेत्यर्थात् इति ।

*प्रतिपदादीन । इदं च सामान्यवचने तत्तद्विशेषैरपोद्यम् । एवं च यत्र परस्परविरुद्धं युग्मवाक्यद्वयं प्राप्नोति, यथा तृतीयायाम् । तत्र "रम्भाख्यां वर्जयित्वा तु" इत्यादिकं वचनं व्यवस्थापकम् । यत्र च तादृशं न व्यवस्थापकं किञ्चिदस्ति, तत्र पूर्वोक्तं शुक्लकृष्णवाक्यं व्यवस्थापकम् । विरुद्धयुग्मवाक्यद्वयाविषय इव तद्विषयेऽपि तस्य निष्प्रत्यूहं प्रवृत्तेः । न च शुक्लकृष्णवाक्यं युग्मवाक्यप्रवृत्तिसमये तत्तद्विशेषवाक्यप्रवृत्तिसमये वा कुतो न प्रवर्तते ? । (१)युग्माग्नियुगादौ पूर्वस्या उत्तरविद्धाग्राह्यत्वेन (२)परस्य, उत्तरस्याः पूर्वविद्धाग्राह्यत्वेन पूर्वस्य च विरोधात् । एवं "प्रतिपत्सद्वितीया" इत्येतत्प्रवृत्तिसमयेऽपि । अत एव

---

(१) 'युग्माग्नियुगभूतानाम्' इत्यस्येत्यर्थः ।

(२) 'कृष्णपक्षे तिथिर्ग्राह्या, इत्यस्येत्यर्थः । एवं पूर्वस्येत्यस्य 'शुक्लपक्षे तिथिर्ग्राह्या' इत्यस्येत्यर्थो बोध्यः ।

पूर्वविद्धा प्रकर्तव्या, परविद्धा न कुत्रचित् ।
दशमी च प्रकर्तव्या सदुर्गा द्विजसत्तम ॥
षष्ठ्यष्टमी अमावास्या कृष्णपक्षे त्रयोदशी ।
एताः परयुताः पूज्याः, पराः पूर्वेण संयुताः ॥ इति ।

*यत्तु व्याघ्रः—

खर्वो दर्पस्तथा हिंसा त्रिविधं तिथिलक्षणम् ।
खर्वदर्पौ परौ पूज्यौ, हिंसा स्यात् पूर्वकालिकी ॥

इति । खर्वः—साम्यं, दर्पो—वृद्धिः, तयोः परा । हिंसा—क्षयस्तत्र पूर्वेत्यर्थः । एतच्छ्राद्धादिकर्मविषयम् ।

दैवपित्र्यसाधारण्येन प्राप्तमौदयिकत्वं

दैवे कर्मणि संप्राप्ते यस्यामभ्युदितो रविः ।
सा तिथिः सकला ज्ञेया पित्र्यर्थे चापराह्णिकी ॥

इतिपरिसंख्यातमिति कथं दैवेऽस्तमयतिथिग्रह इत्यपाकृतम् । उक्तरीत्या दैवेऽप्यस्तमयतिथिग्राह्यत्वे शुक्लकृष्णसामान्येन पित्र्ये आपराह्णिकत्वं तेन विधीयते, तत्स्तुत्यर्थं न दैवौदयिकत्वोक्तिरित्युपगमात् । त्रिदोषपरिसंख्याऽनुपगमात् । "उत्तरेऽहन्द्विरात्रस्य गृह्णन्" इत्यौत्तराहिकस्य षोडशिग्रहस्य अङ्गिरसां द्विरात्रे "वैखानसं पूर्वेऽहन् साम भवति, षोडश्युत्तरे" इति परिसंख्यानात्सर्वद्विरात्रे षोडशिग्रह इति प्राप्तस्य त्रैदोष्यादेव वैखानसस्य विध्यर्थवादत्वमुपेत्य निरासात् । न च 'कृष्णपक्षे तु' इत्यसङ्गतं युग्माग्निवाक्यवत् 'प्रतिपत्सद्वितीया' इत्यादेरपि शुक्लकृष्णपक्षसाधारण्यादिति वाच्यम् । पारिशेष्यात्तस्य कृष्णपक्षविषयत्वात् । एतच्चाग्रे वक्ष्यते ।

*यत्त्विति । यदा युग्मवाक्यं प्रवर्तते, तदैवास्य प्रवृत्तेः सन्देहो दुर्वार इत्याशयः । *श्राद्धादीति । कर्म द्विविधं—दैवं, पित्र्यं च । तत्र खर्वादिवाक्यं पित्र्यविषयमित्यर्थः । एतेन

*त्रितीयादिकयुग्मानां पूज्यता *नियमादिषु ।
एकोद्दिष्टादिवृद्ध्यादौ ह्रासवृद्ध्यादिचोदना ॥
इति व्यासोक्तेः । नियमादिषु व्रतदानादिदैव*कर्मसु ।
*एकोद्दिष्टादितिथिवृद्ध्यादावित्यर्थः ।

युग्मादिवाक्यस्य दैवविषयकत्वं ध्वनितम् । तदाह — *त्रितीयादिकेति । नियमो व्रतम् । आदिपदं माऽऽद्यान्सर्वदैवकर्मपरमित्याह—*दैवेति । ह्रासवृद्ध्यादिचोदना—खर्वादिवाक्यम् । ननु वृद्ध्यादाविति वृद्धिपदस्योक्तं वृद्धिश्राद्धस्य निरूपयितुमुक्तत्वादत आह *एकोद्दिष्टादीति । अथ ह्रासवृद्धी तत्र ह्रासवृद्धिपूर्वकाभिमतकृष्णशुक्लपक्षौ तच्चोदना—शुक्लकृष्णवाक्यार्थानि: शुक्लपक्षतिथिः (१)उत्तरा, कृष्णपक्षतिथिः पूर्वेति निर्णयः तत्र एकोद्दिष्टादिमाध्याह्निकं पित्र्यं, वृद्ध्यादि पौर्वाह्णिकं पित्र्यं विषय इत्यर्थोऽस्तु; आपराह्णिकपित्र्ये तु पक्षद्वयेऽप्यस्तमयव्यापिनी तिथिर्ग्राह्या ।

यथाऽस्तं सविता याति पितरस्तामुपासते ।
तिथिं, तेभ्योऽपराह्णो हि स्वयं दत्तः स्वयंभुवा ।

इतिहेतुमन्निगदरूपवाक्यशेषादिति चेन्न । यतो दैवेषु युग्मवाक्यमेव निर्णायकमिति नार्थः । तदविषयं शुक्लकृष्णवाक्यप्रवृत्तेः, किन्तु युग्मवाक्यं दैवविषयमेवेति । अत एव पक्षार्द्धेऽपि शुक्लकृष्णवाक्यमेव पित्र्ये एव निर्णायकमिति नार्थः, तस्य दैवेऽपि प्रवृत्तेरिति । ह्रासवृद्ध्यादिचोदनाशब्दे लक्षणापत्तेश्च ।

वस्तुतस्तु अव्यवस्थापत्तौ पूर्वोत्तरतिथिव्यवस्थापकं शुक्लकृष्णपक्षवाक्यम् । तच्च पित्र्ये न प्रवर्तते । एकैकदिने कर्मकालव्याप्तौ तथैव, वैषम्येण तद्व्याप्त्याधिक्येन, साम्येन तद्व्याप्तौ—उभयत्र तद्व्याप्तौ—तदस्पर्शे वा अस्तमयापराह्णव्याप्तिभ्यां खर्वादि-

(१) उत्तरतिथिविद्धेत्यर्थः । एवं पूर्वेत्यत्रापि बोध्यम् ।

*कर्मकालव्याप्त्यभावे तु कर्मोपक्रमकालगैव ग्राह्या ।

कर्मोपक्रमकालगा तु कृतिभिर्ग्राह्या, न युग्मादरः ।

इति दीपिकोक्तेः । यानि तु—

वाक्यवशेन व्यवस्थासत्त्वात् । नापि "यथाऽस्तं सविता याति" इत्यादेरापराह्णिकपित्र्यविषयत्वात् माध्याह्निकादिपित्र्येऽव्यवस्थापत्तिः । "उदिते दैवम्" इत्यादिसामान्यवाक्यवशादपराह्णोऽह्नोऽपरभाग इति कुतपपूर्वार्द्धोपक्रमिण एकोद्दिष्टस्यापि नाहशापराह्णे समाप्यत्वेन सङ्ग्रहात् । अन्यथा शुक्लपक्षे कुतपपूर्वार्द्धोपक्रमिणः पार्वणस्याप्यसङ्ग्रहात् ।

शुक्लपक्षस्य पूर्वाह्णे श्राद्धं कुर्याद्विचक्षणः ।

कृष्णपक्षापराह्णे तु रौहिणं तु न लङ्घयेत् ॥

इत्युक्तेः । उपक्रमे रौहिणलङ्घनं निषेधता नानेनोपक्रमकाल एवोच्यते, न तु रौहिणे समाप्यत्वम् । येन

आरभ्य कुतपे श्राद्धं कुर्यादारौहिणं बुधः ।

इतिवदेकोद्दिष्टमात्रविषयकत्वं स्यात् । अत एव वृद्ध्यादौ—वृद्ध्यादिप्रयुक्ते संशये ह्रासवृद्ध्यादिनोदना शुक्लकृष्णवाक्याभ्यामपि नार्थः । तिथिखण्डत्वाभिन्नस्य वृद्ध्यादेः सन्देहाव्यापकतया अनैकान्तिकत्वाच्च । वृद्ध्यादीत्यादिना क्षयसाम्ययोर्ग्रहः । एतच्च कर्मकालशास्त्राबाधेन खर्वादिशास्त्रप्रवृत्तिः युग्मादिशास्त्रस्यापि बाधनाय । एकोद्दिष्टादीत्यादिना पार्वणस्य यज्ञोपवीतित्वादिदैवधर्मकस्य दैवश्राद्धादेश्च पित्र्यस्य ग्रहः । एतेन वृद्धिः—लक्षणया पुत्रोत्पत्तिनिमित्तकश्राद्धं तदादिः प्रकृतिर्यस्येत्यतद्गुणसंविज्ञानबहुव्रीहिणा दैवश्राद्धग्रह इत्यपाकृतं, लक्षणापत्तेः । *कर्मकालेति । एवकारेण कर्मकालेनानिर्णये एव युग्मशास्त्रस्य निर्णायकत्वमुक्तं, तत् तदुपक्रमस्य निर्णायकत्वासंभवे एव, नान्यथा । तस्य कर्मकालसमत्वात् ।

अनङ्गत्वात् । अनेकदिनसाध्ये कर्मणि तु अत्र प्रभृत्येतावद्दिनपर्यन्तमित्येव । मध्यवर्तितिथेः शास्त्रेणाङ्गत्वाभावेऽपि अनायत्याङ्गत्वोपगमात् । साकल्यवचनात्तत्काल एव तिथ्यभावेऽपि यत्कर्मानुष्ठानं, तत् मन्वादिकर्तव्यस्नानश्राद्धादिक्रियानिमित्तविषयम् ।

अभ्यङ्गे चोदधिस्नाने दन्तधावनमैथुने ।
जाते च मरणे चैव तत्कालव्यापिनी तिथिः ॥
मन्वादौ च युगादौ च ग्रहणे चन्द्रसूर्ययोः ।
व्यतीपाते वैधृतौ च तत्कालव्यापिनी क्रिया ॥

इति स्कान्दात् । तस्माद् यानि

आदित्योदयवेलायां या स्वल्पापि न तिथिर्भवेत् ।
पूर्णा इत्येव मन्तव्या प्रभूता नोदयं विना ॥
व्रतोपवासस्नानादौ घटिकैका यदा भवेत् ।

इत्यादीनि मुहूर्तत्रयन्यूनाया अपि सम्पूर्णत्वप्रतिपादकानि, तानि कैमुतिकन्यायेन त्रिमुहूर्तस्तुतिपराणि दिक् । केचित्तु युग्मवाक्यमुपवासमात्रपरम् । यतः त्रिमुहूर्तया पूर्वतिथ्या विद्धा सती या उत्तरदिने त्रिमुहूर्ता तदधिका वा स्यात्तदैव युग्मा, तदा युग्मवाक्यमेव निर्णायकम् । तद्वशादहोरात्रमभ्युपगम्यापि पूर्वाह्ने या उदयवाक्यं चोत्तरस्या अङ्गत्वयोग्यतापादनार्थमौपचारिकं साकल्यं बोधयति तत् यदि एकभक्तादौ मध्याह्नादिमात्रकर्तव्ये तत्कालस्पर्शिन्या अपि तिथेः साकल्यं प्रतिपादयेत्, तदोपवासेऽपि तद् द्रढयेत् । "प्रातः सङ्कल्पयेत्" इति वचनेनाहोरात्रस्य कर्मकालत्वलाभात् । अत एव न प्रातः कालो नाकालः येनाकाले प्रक्रान्तस्य समाप्तिरङ्गीक्रियेत । नापि शिष्टकालोऽत्र गौणः, येन गौणकाले समाप्तिरुपगन्तव्या स्यात् । एवं यदि सा तिथिः पूर्वैव युग्मा तदाऽपि युग्मवाक्यमेव निर्णायकम् । उक्तं चेहाप्यस्तमयवाक्यस्य सङ्कल्पकाले तत्तिथेरभावेऽपि साकल्य-

अथैकभक्तम् । तत्कालः पाद्मे

मध्याह्नव्यापिनी ग्राह्या एकभक्ते सदा तिथिः । इति ।

मध्याह्नश्च *पञ्चधाविभक्तदिनतृतीयांशः । तेन यद्यपि द्वादशदण्डानन्तरं प्राप्यते, तथाऽपि—

प्रापकत्वम् । इत्थं च या शुद्धा सती परेऽहनि त्रिमुहूर्ताऽपि, तत्र पूर्वा । कर्मकालशास्त्रस्य भागेन प्रवृत्तेः । या च विद्धा सती क्षयेण परेद्युर्नास्ति, त्रिमुहूर्तन्यूना वा, साऽपि पूर्वैव । युग्मशास्त्राप्रवृत्तेः । तत्प्रवृत्तेस्त्रिमुहूर्तसत्ताया आवश्यकत्वात् । नाप्यौदयिकशास्त्रं तत्र प्रवर्त्तते । तत्प्रवृत्तेरपि तथात्वात् । अथ

उदये तूपवासस्य, नक्तस्यास्तमये तिथिः ।

इत्यादिवाक्यात् परा स्यात् । न स्यात् । तेषां कैमुत्यन्यायेन त्रिमुहूर्तस्तावकत्वात् । न च या त्रिमुहूर्तन्यूनतया पूर्वया युक्ता सती परदिने किञ्चिद्वर्त्तते, सा परैव स्यात् ।

द्वितीया पञ्चमीविद्धा दशमी च त्रयोदशी ।

चतुर्दशी चोपवासं हन्युः पूर्वोत्तरे तिथी ।

इति निषेधवचनादिति वाच्यम् । उपवासविषये त्रिमुहूर्तयोगे दोषः, उपवासे त्वल्पयोगे स इति वैरूप्यवारणायास्तमयवर्तिन्यास्त्रिमुहूर्ताया एव पूर्वतिथिदूषकत्वम्, उदयवर्तिन्यास्तादृश्या पूर्वोत्तरतिथिदूषकत्वमित्यर्थोपगमादित्याहुः ।

अत्रेदं वक्तव्यम् । अस्त्वीदृश उपोष्यतिथिनिर्णयः । परं तु युग्मवाक्यं सकलदैवकर्मविषयमेव । "एतद्व्यस्तं महादोषम्" इति निन्दाश्रवणात् । अधिकमन्यतोऽवगन्तव्यम् ॥

*पञ्चधेति ।

मुहूर्त्तत्रितयं प्रातस्तावानेव तु सङ्गवः ।

मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णोऽपि तादृशः ॥

*दिनार्धसमयेऽतीते भुज्यते नियमेन यत् ।
एकभक्तमिति प्रोक्तमतस्तत्स्याद्दिवैव हि ॥

सायाह्नस्त्रिमुहूर्तः स्यात्सर्वधर्मबहिष्कृतः ।

इति व्यासेन

लेखाप्रभृत्यथादित्ये त्रिमुहूर्तगते रवौ ।
प्रातस्तु स स्मृतः कालो भागश्चाह्नः स पञ्चमः ॥
सङ्गवस्त्रिमुहूर्तस्तु मध्याह्नस्तत्समः स्मृतः ।
ततस्त्रयो मुहूर्तास्तु अपराह्णो विधीयते ॥
पञ्चमो दिनभागो यः स सायाह्न इति स्मृतः ।

इति पराशरेण चोक्तेः । *दिनार्द्धेति । भुज्यते भावे लकाराद् भोजनं तदर्थः । यदिति क्रियाविशेषणं, न तु कर्म । तथा च यद् भोजनं तदेकभक्तमित्यर्थः । एकं द्वितीयभोजनाभावविशिष्टं भोजनं व्रतस्वरूपं भक्तपदे तद्भोजने लक्षणोपगमात् । द्वितीयभोजनाभावश्च न नियमपदार्थः । तस्यैककत्वलाभार्थत्वात् । नापि ब्रह्मचर्यादिः साधारणविधिनैव तल्लाभात् । किंतु ग्रासत्रयन्यूनत्वम् । नैयत्ये भोजने

अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशारण्यवासिनः ।
द्वात्रिंशत्तु गृहस्थस्य अमितं ब्रह्मचारिणः ।
अक्षप्रमाणपिण्डांस्तु ग्रसेदेकैकशः पुमान् ॥

इत्यास्यप्रमाणसंख्यायां

दिनार्द्धसमयेऽतीते भुज्यते नियमेन यत् ।
एकभुक्तं तु तत्प्रोक्तं न्यूनं ग्रासत्रयेण तु ।

इति देवलेन तदुक्तेः । एकभक्तपर्याय एकभुक्तम् । एकं भुक्तं भोजनमिति व्युत्पत्तेः । तत्र नियमो ब्रह्मचर्यादिः सामान्यविशेषविधिलभ्यः । वस्तुतस्तु अयाचितवत् पाक्षिकोपवासैकभावनया भोजनोपवासान्यतरस्यैतद्व्रतस्वरूपता स्यादतो नियमपदम् । उपवासादिवृत्तिधर्मवत्त्वं तदर्थः । तादृशभोजनस्याटव्यादिफलादिभिरपि

इति स्कान्दोक्तेः *षोडशसप्तदशादिदण्डा मुख्यः कालः। दीपिकायां तु—*'मध्याह्नात्परतो दले त्रिभागादिरयं स्यादेकभक्तम्' इति। ततः सूर्यास्तपर्यन्तं गौणः। 'मध्या-ह्नि' इत्यस्य *वैयर्थ्यापत्तेस्तत्परत्वात्। अत्र पूर्वेद्युर्व्या-प्तिः*, परेद्युः, उभयेद्युर्व्याप्तिः, *तदभावः, अंशव्याप्तिः। तत्रापि साम्यं वैषम्यं चेति षट् पक्षाः। तत्राद्ययोरसंदेह एव, तृतीये तु पूर्वेद्युः गौणमुख्यव्याप्तेः सत्त्वात् पूर्वा इति माधवः। *युग्मवाक्यादिनापि इति हेमाद्रिः।

सम्भवेन न प्रतिग्रहानुग्रहः। प्रथमपक्षनिर्णयोऽपि सामान्याभि-धित एव सिद्धेः। *षोडशसप्तदशादिदण्डा इति। सप्तदशाष्टा-दशदण्डादिरिति तात्पर्यः। मध्याह्नभोजनानन्तरमेव भोजनाभावेन परतयेहाप्रवृत्तेः। *मध्याह्नेति। "पूर्वाह्णो वै देवानां, मध्यन्दिनो मनुष्याणाम्, अपराह्णः पितृणाम्" इत्युक्तत्रेधा विभागो ग्राह्यो न तूक्तः पञ्चधा। नापि

पूर्वाह्णः प्रहरं सार्धं मध्याह्नः प्रहरं तथा।
आतृतीयादपराह्णः सायाह्नश्च ततः परम्।

इति गोभिलोक्तश्चतुर्धा। अह्नो मध्यं मध्याह्न इति व्युत्पत्ति-विरोधात्। तुना च एवं सति पञ्चधा पक्षस्य वैयर्थ्यं स्यादिति तस्य-ात्रैव बहुस्मृत्युक्तत्वेनेहापि स एव ग्राह्यो नान्य इत्याकूतिः।

*वैयर्थ्येति। न चानेन नक्तं व्यावर्त्यम्। तस्य व्यवच्छे-दान्तरेणैव व्यावर्तितत्वात्, तत एव च दिवाभोजनसिद्धेः। कथंचिन्मुख्यकालात्यये प्रधानस्य लोपवारणाय गौणकालो विधीयते "अङ्गगुणविरोधे च तादर्थ्यात्" इति सूत्रात् प्रधाना-नुसारेण गुणस्य नेतव्यत्वादिति तदर्थः। *व्याप्तिः मध्याह्नो-त्तरदलव्याप्तिः, न तु मध्याह्नव्याप्तिः। तत्पूर्वदलस्य एकभक्तकाल-त्वाभावात्। *तदभावः उभयेद्युस्तदस्पर्शः। *युग्मेति। अत्र

चतुर्थपक्षे पूर्वैव* । गौणकालव्याप्तेः सत्त्वात् । वैषम्ये-णांशव्याप्तौ याऽधिका, सा ग्राह्या । साम्ये पूर्वा । अयं च *स्वतन्त्रैकभक्तनिर्णयः । *अन्याङ्गे *उपवासप्रति-

---

स्वकालादुत्तरः कालो गौणः सर्वस्य कर्मणः ।

इति मध्याह्नोत्तरकाले प्राप्ते "दिवैव हि" इति पुनर्विधिवैयर्थ्य-मतः सायाह्नस्यापि संग्राहकतया निर्णायकं न युग्मवाक्यमित्यरु-चिः । *पूर्वैवेति । मुख्यकाले तत्तिथ्यभावेऽपि तत्रैवैकभक्तं कार्यम् ।

तिथ्यादौ च भवेद्यावान् ह्रासो वृद्धिः परेऽहनि ।
तावान् ग्राह्यः स पूर्वेद्युरदृष्टोऽपि स्वकर्मणि ॥

इति कृत्स्नह्रासप्रक्षेपोक्तेः । यत्तु

तिथेः परस्या घटिकास्तु याः स्युर्न्यूनास्तथैवाभ्यधिकाश्च तासाम् ।
अर्द्धं वियोज्यं च तथा प्रयोज्यं ह्रासे च वृद्धौ प्रथमे दिने तत् ॥

इत्यर्द्धप्रक्षेपवाक्यं, तदुपसंहारेणोद्यव्रतस्नानादिनिर्णयपरम् । सङ्कल्प-श्च सर्वेषु पक्षेषु प्रातः ।

प्रातः संकल्पयेद्विद्वानुपवासव्रतादिकम् ।

इत्युक्तेः, तत्र साकल्यवचनापादिततिथिसत्त्वाच्च । *स्वतन्त्रेति ।

प्रतिपद्येकभक्ताशी समाप्ते कपिलाप्रद ।

इत्यादि । स्वातन्त्र्यं च हेतुगर्भम् । कर्मणः प्रधानत्वात्तदेव निर्णया-र्थमनुसर्त्तव्यं न त्वङ्गं तिथ्यादीत्यर्थः । एतेन "पौर्वाह्णिकास्तु तिथयः" इति कर्मांशे सामान्यं यथा 'उपोष्याः परसंयुताः' इति तदंशे विशेषेण तिथ्यंशे सामान्यमिदं 'प्रतिपत्संमुखी कार्या' इति तदंशे विशेषेण बा-ध्यते, तथा मध्याह्नःप्रतिपद्वचनादिना कुतो न बाध्यत इत्यपास्तम् । *अन्याङ्गे—दशम्यादौ प्रधाने निर्णीतायां तिथौ तत्पूर्वदिनादौ तदुचितत्वात् । *उपवासेति । तच्च

एकभक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन दानेन न निर्द्वादशिको भवेत् ॥

तिथौ च *तदनुसारेण निर्णयः ॥

अथ नक्तम् । *तच्च दिनानशनपूर्वं रात्रिभोजनम् । तत्र प्रदोषव्यापिनी ग्राह्या ।

प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा ।

इति वत्सोक्तेः । प्रदोषस्तु

त्रिमुहूर्तं प्रदोषः स्याद्भानावस्तं गते सति ।
नक्तं तत्र तु कर्तव्यमिति शास्त्रविनिश्चयः ॥

इति मदनरत्न व्यासोक्तेः । तत्रापि त्रिदण्डोत्तरं कार्यम् ।

इत्यादिनोक्तम् । *तदनुसारेणेति ।

तिथिर्यथोपवासे स्यादेकभक्तेऽपि सा तथा ।

इति सोमन्तवचनमपि उपवासवदेकभक्तेऽपि ... एकभक्तकालम् । तेनाष्टौ तानीति गुर्वाज्ञा कर्तैकभक्तमुपोष्यादेव एव ।

"नक्तं निशायां कुर्वीत" इत्यादौ नक्तपदं न कालार्थकं, विधातुमशक्यत्वापत्तेरित्यत्राह—*तच्चेति । न च नक्तं नक्तसाध्यमित्येवार्थः, तावता कथं भोजनलाभ इति वाच्यम् । प्राजापत्यादिषु भूयस एकभक्तायाचितोपवासादिभिः साहचर्यात् प्रायिकप्रतीतिकस्य भोजनस्य सिद्धेः । अत एव "नक्ताशी" इत्यादौ भोजनार्थकपदप्रयोगो न व्यर्थः । तावन्मात्रेणो दिनाभोजनं विशेषणं लभ्यते । एवं च

मार्गशीर्षे सिते पक्षे प्रतिपद्या तिथिर्भवेत् ।
तस्यां नक्तं प्रकुर्वीत रात्रौ विष्णुं च पूजयेत् ॥

इत्यादौ पृथक् क्रियानिर्देशादेव प्रायिकप्रतीतिकं भोजनं रात्रौ लभ्यते । तदनुरोधेन चाङ्गभूतपूजादेर्दिवानुष्ठानमेव । अत एव नवरात्रस्य नक्तव्रतत्वं माधवाचार्योक्तं संगच्छते । भोजनस्य प्रायिकप्रतीतिकतया तदप्रत्ययेऽप्यक्षतेः ।

सायंसन्ध्या त्रिघटिका अस्तादुपरि भास्वतः ।
इति स्कान्दोक्तेर्दण्डत्रयस्य संध्यात्वात् । तत्र
चत्वारीमानि कर्माणि सन्ध्यायां परिवर्जयेत् ।
आहारं, मैथुनं, निद्रां, स्वाध्यायं च चतुर्थकम् ॥

इति मार्कण्डेयेन भोजननिषेधात् ।

*मुहूर्तोनं दिनं नक्तं प्रवदन्ति मनीषिणः ।
*नक्षत्रदर्शनान्नक्तमहं मन्ये गणाधिप ॥

इति माधवीये भविष्योक्तेश्च । गौडास्तु—

प्रदोषो *ऽस्तमयादूर्ध्वं घटिकाद्वयमिष्यते ॥

इति वत्सोक्तः प्रदोषः । सन्ध्या च दिनरात्र्योः सन्धौ मुहूर्तः ।

इति स्कान्दाच्च । यत्यादीनामपि सायाह्न-

ननु निषेधो वास्तविकसन्ध्यापर एवास्त्वित्यत आह *मुहूर्तोनमिति । नक्षत्रदर्शनादिति पूर्वत्राप्यन्वेति, काकाक्षिन्यायात् । नक्षत्रदर्शनावधिकं मुहूर्तोनं वास्तविकसन्ध्यारूपं नक्तं वदन्तीत्यभिधानेन तस्य नक्तत्वव्युदासः नक्षत्रदर्शनपर्यायाहं मन्य इत्यभिमानेन तस्य पारिभाषिकसन्ध्यारूपस्य नक्तव्युदासः । वस्तुतस्तु ननूक्तप्रदोषः कुतो मुख्यः कालः "न नक्तं निशि भोजनम्"इति निषेधोपबृंहितस्यात्मनो द्विगुणच्छायेत्युक्तदिनस्य मुख्यकालत्वेन तस्य "स्वकालादुत्तरः कालो गौण"इति वाक्येन गौणत्वस्यैव सम्भवादित्यत्राह—*मुहूर्तोनमिति । शिवनाहं मन्य इति स्वाभिमतेनाभिधानात् । प्रवदन्तीत्यनेनान्येषां निषेधस्याप्रसक्तस्यायोगाच्च । प्रदोषमुपजीव्य तत्प्रवृत्तेस्तस्य मुख्यत्वमिति भावः । *नक्षत्रेति । ल्यब्लोपे पञ्चमी । नक्षत्रदर्शनं प्राप्येत्यर्थः । *अस्तमयादिति । तारकोदयादिति यावत् । सन्ध्याप्रदोषयोर्भेदात् ।

प्रदोषोऽस्तमयादूर्ध्वं घटिकात्रयमुच्यते ।

इत्युक्तेः । त्रिमुहूर्त्तं मध्यमः । "त्रिमुहूर्त्तं प्रदोषः स्यात्" इत्युक्तेः । निशीथान्तमधमः । "नक्तं निशायां कुर्वीत" इत्युक्तेः । एवं "चत्वारीमानि" इति वाक्ये सन्ध्या न पारिभाषिकी । मानाभावात् । परिभाषायाश्च अनध्यायप्रयोजकसंध्यागर्जितादौ चारितार्थ्यात् । प्रदनस्त्वोऽपि सम्यगेव । तथा हि-मैथुनादिसमभिव्याहारान्निषेधो रागप्राप्तभोजनपर एव न तु वैधतत्परः । विधितो यदर्थतया यत्प्राप्तं तदर्थतयैव तन्निषेधे विकल्पापत्तेः। न च निषेधो विशेषविषयत्वेन बलीयान् । तस्य सामान्यविषयत्वादिना दुर्बलेनापि विधिनोपजीवितत्वादेव तुल्यबलत्वात् ।

यदपि कपिञ्जलत्रित्वेन विधिचारितार्थ्याच्च चतुर्थादीनां निषेधविषयत्वादालम्भनं, तदपि न । यतोऽग्नीषोमीयवत् फलार्थतया विहिताया हिंसाया एव न निषेधस्पर्श इतीहापि न तत्कार्याः, परं तु स्वव्याप्यत्रित्वाद्यन्यतरद् बहुवचनार्थः । तत्र लाघवेन त्रित्वमेव विधिविषयो न चतुष्ट्वादि । द्रव्यगतसंख्याया अपि विधेयतायाः सिद्धान्तितत्वादिति नातिप्रसङ्गः । अत एव पर्वरविवारादौ प्राप्तं नक्तभोजनं रात्रौ भवत्येवेति वक्ष्यति । न च

ये त्वादित्यादिने ब्राह्मनक्तं कुर्वन्ति मानवाः ।
दिनान्ते तेऽपि भुञ्जीरन्निषेधाद्रात्रिभोजने ॥

इतिवचनाद्गौणकाल एव तत्कर्त्तव्यमिति वाच्यम् । निषेधादितिहेतूपन्यासवशान्निषेधस्य वैधेऽप्रवृत्तेः। वैधेऽपि तत्प्रवृत्तावन्याङ्गनक्तेऽपि प्रवर्त्तेत । तत्र प्रवर्त्तयितुमशक्यत्वात् । अन्यथा तद्द्वारा तदङ्गत्वसिद्धौ भानुसप्तम्यादिविहितनक्तादौ प्रवृत्तेः पुरुषार्थत्वमादाय निषेधस्यापि क्रत्वर्थत्वपुरुषार्थत्ववैरूप्यं स्यात् । तस्मादेतद्वाक्यं भानुसप्तम्यादिविहितनक्तव्रतपरमेवेति ।

ननु प्रदोषमात्रस्य कर्मकालत्वमसंगतम् ।

प्रदोषव्यापिनी यत्र त्रिमुहूर्त्ता यदा दिवा ।

त्रिभागोऽधिकानां हि मतं स्यात् । *सायंकाले नक्तं तु दिनक्षये प्रदोषास्पर्शी ज्ञेयम् ।

अतथात्वे परत्र स्यादस्मादर्वाग्गतो हि सा ।

इति जाबालिवचनात् ।

*प्रदोषव्यापिनी न स्याद्दिवा नक्तं विधीयते ।
आत्मनो द्विगुणा छाया मन्दीभवति भास्करे ॥
तन्नक्तं नक्तमित्याहुर्न नक्तं निशि भोजनम् ।

इति स्कान्दाच्च । *यत्यादीनामपि सायाह्ने नक्तम् ।

नक्तं निशायां कुर्वीत गृहस्थो विधिसंयुतः ।
यतिश्च विधवा चैव कुर्यात्तत्सदिवाकरम्* ॥

इति तत्रैव स्मृत्यन्तरात् । इदमपुत्रविधुरोपलक्षणम् । पुत्रवतस्तु रात्रावेव ।

अनाश्रमोऽन्याश्रमी स्यादपत्नीकोऽपि पुत्रवान् ।

इति संग्रहोक्तेः । सौरनक्तं तु दिवैव ।

*त्रिमुहूर्तस्पृगेवाह्नि निशि चैतावती तिथिः ।
तस्यां सौरं भवेन्नक्तमहन्येव तु भोजनम् ॥

तत्र नक्तव्रतं कुर्यात्स्वाध्यायस्य निषेधवत् ॥

इति वाक्येन सायमोऽपि लाभादित्यत्राह—*सायमिति "यतो हि" इति सायमो गौणत्वार्थम् । अन्यथा पौनरुक्त्यात् । सायंकाल एव नक्तानुष्ठानविधानपूर्वककालवचनमप्याह-*प्रदोषेति । *य-त्यादीनामपीति । यद्यपि सायंकालो गौणः "नक्तादिव्रतयोगेषु" इति वाक्यात्, तथापि यत्यादिषु स मुख्यः । *सदिवाकरमिति ।

सदिवाकरं तु तत्प्रोक्तमन्तिमं घटिकाद्वयम् ।

इति वचनं तु तस्य मुख्यतरत्वबोधकम् । पूजादिकं तु प्रधाना-विरोधेन तत्रैव प्रागेव वा कार्यम् । *त्रिमुहूर्त्तेति । सायंप्रदोषव्या-प्त्योः प्राक्पश्चान्निर्देशाभ्यां सायंव्याप्तेर्मुख्यत्वमत्यन्तेन दिवैवेति ला-

इति सुमन्तूक्तेः। हरिनक्ते *विशेषः कालादर्शे स्कान्दे

उदयस्था सदा पूज्या हरिनक्तव्रते तिथिः ।

इति । अन्यनक्तं तु संक्रान्त्यादावपि रात्रावेव *निषेधस्य रागप्राप्तभोजनगोचरत्वेन नैधाबाधकत्वात्। *दिनद्वयव्याप्तौ परा* ।

उभयोर्यदि वा तिथ्योः प्रदोषव्यापिनी तिथिः ।
तत्रोत्तरत्र नक्तं स्यादुभयत्रापि सा यतः ॥

इति कालादर्शे जाबालिवचनात् । अन्यपक्षेषु *एकभक्तवन्निर्णयः । अत्र विशेषो मदनरत्ने गारुडे

भः । एतेन सायाह्नमुख्यकालिकनक्ते एकैकदिन एव कार्त्स्न्येन एकदेशेन वा व्याप्तौ सैव ग्राह्या। दिनद्वयव्याप्तौ पूर्वा । गौणमुख्यव्याप्त्योः सत्त्वात् । दिनद्वयास्पर्शे साम्येन वैषम्येण वा दिनद्वयस्पर्शे च पूर्वैव गौणव्याप्तेः सत्त्वादित्युक्तं भवति। *विशेषः — सायाह्नप्रदोषव्याप्त्योरपवादः । *निषेधस्य

अर्के पर्वद्वये रात्रौ चतुर्दश्यष्टमीदिवा ।
एकादश्यामहोरात्रं भुक्त्वा चान्द्रायणं चरेत् ॥

इत्यादिलभ्यस्य । प्रदोषमुख्यकालिकनक्ते त्वाह—*दिनद्वयेति । *परेति । तिथ्यादिषु भवेद्यावान्''इति वाक्येन कर्मतिथेः पूर्वदिने कर्मकालासत्त्वेनाबोध्यपि द्रष्टव्यम् । *एकभक्तवदिति । यथा एकभक्ते गौणमुख्यव्याप्ती निर्णायिके, तथा नक्ते ऽपीत्यर्थः । तेन एकैकदिने एव व्याप्तौ मुख्यकालव्याप्तिरेव । दिनद्वयास्पर्शे गौणकालव्याप्तिरेव । तदुक्तवान् सायंकाले नक्तं त्वित्यादि। साम्येन वैषम्येण वांशतो व्याप्तौ परैव । गौणकालव्याप्तेराधिक्यात्। यत्र वैषम्येणांशतो व्याप्तौ पूर्वेद्युराधिका तत्र पूर्वैव, आधिक्यात्। आधिक्यस्यापि निर्णायकत्वात्। आधिक्यं च देवपूजा-भोजनपर्याप्तं विवक्षितमिति संप्रदायः। अयं

च निर्णयो भोजनरूपे नक्त इव पूजादिरूपे नक्तेऽपीति मत्वा
त्रयोदशीप्रदोषगोचरमस्मादृशादौ न पृथक् निर्णयमभिप्रयन्ति ग्रा-
म्यवाद्यः। "प्रदोषे शिवपूजनम्"इत्यादिना प्रदोषस्य मुख्यकाल-
त्वावगमे सायाह्नस्य तत्र गौणकालत्वं लभ्यते। अन्यथा 'प्रदो-
षव्यापिनी न स्यात्'इत्यादिना तत्र नक्तविधानानुपपत्तेरिति त-
दभिप्रायः। उक्तदूषणत्वाच्च त्रयोदशीप्रदोषे शिवपूजाया एव
प्राधान्याच्च त्रिमुहूर्तं प्रदोषः। 'त्रिमुहूर्तं प्रदोषः' इत्यस्य भोजन-
रूपनक्तपरत्वात्। 'नक्तं निशायां कुर्वीत'इत्युक्तेः।

अथास्तु तत्र सार्द्धसप्तनाडीरूपः प्रदोषः।
अस्तमानं समारभ्य सार्द्धाः सप्त च नाडिकाः।
प्रदोष इति विख्यातस्त्वर्द्धयामयतः शृणु॥

इति वचनादिति, तन्न। एतस्य प्रकरणेन नैमित्तिकपूजापर-
त्वादत्र प्रवृत्त्यसम्भवात्। किं तु नाडीचतुष्टयमेव।

यजनं प्रति प्रातं तु उत्तमं परिकीर्तितम्।
उदये चैव मध्याह्ने प्रदोषे चार्द्धयामिकम्॥

इत्यनारभ्याधीतवचनात्। यत्तु

प्रदोषो ऽस्तमयादूर्ध्वं घटिकाद्वयमुच्यते।

इति माधवः, तत्र प्रशस्तमित्यध्याहार्यम्। यच्च

प्रदोषोऽस्तमयादूर्ध्वं घटिकात्रयमुच्यते॥

इति तिथितत्त्वं, तत्र प्रशस्ततरमित्यध्याहार्यम्। तत्र एकत्र दिने
साकल्येन एकदेशेन वा प्रदोषव्याप्तौ न सन्देहः। दिनद्वये प्रदोष-
व्याप्तौ प्रदोषद्वयास्पर्शे साम्येनैकदेशव्याप्तौ च परा। संकल्पकाले
ऽपि भावात्। यत्र पूर्वप्रदोषेऽधिका उत्तरप्रदोषे स्वल्पा तत्राप्युत्त-
रैव 'दिवारात्रिव्रतं च'इति स्कान्दात्। पठन्ति च

अस्तात्परं यत्र मुहूर्तयुग्मं त्रयोदशी चेत् खलु स प्रदोषः।
दिनद्वयेऽप्यस्ति न वा समैकदेशेऽथवा तत्र परैव कार्या॥
व्याप्तिर्यदा स्याद्विषमांशिका तु तदा बहुत्वेन विनिर्णयः स्यात्।

द्वयोरभावेऽप्यथ गौणकालव्याप्त्या तु पूर्वामपि केचिदाहुः ॥

इति । पूजा च त्रयोदश्युपलक्षितप्रदोषे कार्या ।

ये नार्चयन्ति गिरिशं महिते प्रदोषे
येऽभ्यर्चितं शिवपदं प्रणमन्ति नान्ये ।
ये तत्कथां श्रुतिपुटैर्न पिबन्ति मूढा-
स्ते जन्मजन्मसु भवन्ति नरा दरिद्राः ॥

इत्यनिष्टस्मरणात् । आरम्भश्च शनिप्रदोषे कार्यः ।

यदा त्रयोदशी शुक्ला मन्दवारेण संयुता ।
आरभेत्तद्व्रतं तत्र सन्तानफलसिद्धये ॥

इति तत्रैवोक्तेरित्याहुः । तन्न । माधवादिभिरकृतग्रन्थार्द्धनाम-प्रदोषस्य धार्मिकैरनादृतत्वात् । एवमन्यान्ये उपवासप्रतिनिधौ च नक्ते तादृशैकभक्तन्याय एवैकभक्तवदित्यनेन लभ्यते ।

इदं तु बोध्यम् । यथैकभक्तं कुर्वीतेत्यादौ एकभक्तं न रात्रि-भोजननिवृत्तिमात्रं निवृत्तेरव्रतत्वात् ।

नियमो व्रतमस्त्री तच्चोपवासादि पुण्यकम् ।

इति कोशात् । पुण्यं सुकृतं पुरुषार्थसाधनादृष्टहेतुः क्रिया, ता-दृशं द्रव्यं चेति तत्पर्यायव्रतपदस्यातदर्थकत्वात् । न हि नि-वृत्तेर्भावनावाक्यार्थवादिनोऽदृष्टजनकत्वमुपयन्ति । नन्कुत इति चे-त्कालान्तरभाविफलाभावात् । नापि कार्यवाक्यार्थवादिनः । ते-स्तत्राऽदृष्टोपगमेऽपि तस्य पुरुषार्थसाधनत्वोपगमात् । कथं च "ने-क्षेतोद्यन्तमादित्यम्"इत्यादौ सङ्कल्पविधित्वसिद्धान्तः । निवृत्तेर्व्रतत्वे भावोपक्रमाबाधेन निषेधत्वस्यैव ज्यायस्त्वात् । तस्य व्रतत्वनिर्वा-हाय रात्रिभोजनाभावसङ्कल्पे लक्षणा वा स्यात् ।

अथैवं मासव्यापिचतुर्थकालिकत्वाद्यनुष्ठाने एकादश्यादौ उपवासानापत्तिः । तद्विधिषु मत्वर्थीयठन्प्रत्ययान्तचतुर्थका-लिकादिपदानां चतुर्थकालाहार इत्याद्येकवाक्यतया भोजनो-त्तरचतुर्थकालसम्बन्धपरत्वात् । अब्भक्षो वायुभक्ष इत्यादावि-

'हविष्यभोजनं *स्नानं सत्यमाहार*लाघवम् ।

वैकपदेऽप्यवधारणगर्भार्थदर्शनेन इत्यादिकालगतभोजननिवृत्तेश्चतुर्थ-
कालगतनियमस्य च प्रतीतिः । नैवम् । चतुर्थकालाहारा-
दिपदानां तादृशनिवृत्तावेव तात्पर्यात्, न तु नियमेऽपि । तत्पदस्य
कालांशे परिसंख्यात्वेन भोजनांशे नियमत्वे विरूपत्वापा-
तात् । व्रतत्वनिर्वाहश्च 'चतुर्थकालाहारो ब्राह्मणान् भोजयेत्' इत्या-
दिविशेष्यभूतब्राह्मणभोजनादिनैव । चान्द्रायणादौ च चन्द्रगत्य-
नुवर्तनाद्यन्यथानुपपत्त्या इतरकालभोजननिवृत्तिविशिष्टचन्द्रोदय-
कालभोजनस्य व्रतत्वम् । तथा 'नक्तं कुर्वीत' इत्यादौ न दिनभोजन-
निवृत्तिमात्रमित्यभिप्रेत्यैकभक्तवदिति, पूर्वं रात्रिभोजनापत्ति चोक्तम् ।
अत एव 'एकभक्तं कुर्वीत' 'नक्तं कुर्वीत' इत्यादौ 'चान्द्रायणं कुर्वीत'
इत्यादौ च न उपवासेन तत्सिद्धिः, नापि सङ्कल्पलक्षणापत्तिः ।
*स्नानमिति । पूजादेः प्राक् कर्माङ्गं प्रधानकालम् । *आहा-
रेति । यद्यप्यत्र 'न्यूनं ग्रासत्रयेण तु' इत्येकभक्तवद्विशेषवचनं न
दृश्यते, तथापि इह प्राजापत्यप्रकरणगता नक्तभोजनविषया
ग्राससंख्या ग्राह्या । साम्यात् । एवमेव

अयाचिताशी मितभुक् परां सिद्धिमवाप्नुयात् ।

इत्यादौ मितभुक्त्वमपि तद्वदेव अयाचितभोजनविषयग्रास-
संख्ययोपपाद्यम् । सा चापस्तम्बेन

सायं द्वाविंशतिर्ग्रासाः प्रातः षड्विंशतिः स्मृताः ।
चतुर्विंशतिरायाच्याः परे निरशनास्त्रयः ॥

इति नक्ते द्वाविंशतिरुक्ता । तद्विरुद्धा च नक्ते पराशरेण

सायं तु द्वादश ग्रासाः प्रातः पञ्चदश स्मृताः ।
चतुर्विंशतिरायाच्याः परे निरशनास्त्रयः ॥ इति ।

तद्विरुद्धा च नक्तायाचितयोश्चतुर्विंशतिमिते

प्रातस्तु द्वादश ग्रासा नक्तं पञ्चदशैव तु ।

*अग्निकार्यमधःशय्यां नक्तभोजी समाचरेत् ॥
अग्निकार्यं व्याहृतिहोमः* । इति नक्तम् ॥

अयाचिते तु *विशेषवचनाभावात्पूर्वोक्त* उपवासे प्राप्त उपवासवन्निर्णयः ॥

अथ नक्षत्रव्रतकालः । विष्णुधर्मे—
उपोषितव्यं नक्षत्रं यस्मिन्नस्तमियाद्रविः ।

अयाचिते तु द्वौ नाड्यौ प्राजापत्यो विधिः स्मृतः ॥ इति ।
अत्र शक्ताशक्तभेदेन व्यवस्था ।

*अग्निकार्यमिति । यदुक्तं विशेषतस्तत्रोक्तं, तत्राह *व्याहृतिहोम इति । विशेषतो यदुक्तं नक्तोपसंहारे [illegible] । व्यस्तसमस्तव्याहृतिः । समस्तव्याहृतिरेवेति केचित् ।

*अयाचिते त्विति । अयाचितान्नभोजने यदैव लाभस्तदैव दिने वा रात्रौ वा निषिद्धकालं विहाय इति तत्तु अहोरात्रसाध्यमेव, न तु कालविशेषापेक्षापि । पराधीनत्वात् । तत्र च 'दिवारात्रिव्रते यच्च' इति सामान्यमेव प्रवर्तते । यदा तु तिथिरेकदिने दिने एव, परदिने रात्रावेव, तदाऽहर्व्यापिनी ग्राह्या । 'अहःसु तिथयः' इति सामान्यवचनात् । तदुक्तं *विशेषवचनाभावादिति । वस्तुतस्तु

एकभक्तायाचितयोर्या त्रिंशद्घटिका तिथिः ।
सा तिथिः सर्वदा ज्ञेया नक्ते सायाह्नसंगता ॥

इति शार्ङ्गधरीये नारदोक्तेर्निर्णयः । सम्भावितपक्षान्तरं त्वाह—*पक्ष इति ।

अथायाचितव्रतम् । अथापरं त्र्यहं न कंचन याचेतेत्यादौ । अत्र नञो याचितमदनीयं न भोक्ष्ये इति सङ्कल्पे लक्षणा । भावोपक्रमेण 'नेक्षेतोद्यन्तम्' इतिवन्निषेधरूपत्वाभावात् । तत्रोपवासेन सिद्धावपि 'त्र्यहमद्यादयाचितम्' 'अयाचिताशी मितभुक्' इत्यादौ समस्त-

*तत्रैवोपवसेदृक्षे यान्नर्शाथादथो भवेत् ।
उपवासे यदृक्षं स्यात्तद्धि नक्तैकभक्तयोः ॥

अथ व्रतपरिभाषा ॥ तत्राधिकारिणो मदनरत्ने भविष्ये

*अनग्नयस्तु ये विप्रास्तेषां श्रेयो विधीयते ।
व्रतोपवासनियमैर्नानादानैस्तथा नृप ॥

अनग्निग्रहणमुपवासविषयम् । अत एव देवलः

*आहिताग्निरनड्वांश्च ब्रह्मचारी च ते त्रयः ।
अश्नन्त एव सिध्यन्ति नैषां सिद्धिरनश्नताम् ॥

प्रतिपदोक्तत्वान्नक्षत्रस्य तद्व्याप्तिरेवाऽऽदर्तव्या । कर्मकालशास्त्रे तिथिपदस्य नक्षत्रोपलक्षणत्वात् ।

नक्षत्रे खण्डिते येन व्याप्तः कालस्तु कर्मणः ।
नक्षत्रकार्याण्यत्रैव तिथिकर्म तथैव तु ॥

इति माधवोक्तेश्च । नक्तैकभक्तयोरुक्तरीत्या प्रतिपदोक्तत्व-त्काले प्राप्तेऽपवादमाह—*तत्रैवेति । उत्तरार्द्धेनोपवासन्यायाति-देशादस्तमयव्याप्तिलाभेऽपि दिनद्वये तदभावे तिथिवत्पदोषमध्या-ह्नयोः प्राप्तौ तदपवादार्थं निर्णीतोपवासकालानुवादकं पूर्वार्द्धम् ।

फलभोक्तृत्वे सति कर्मकर्तृत्वमधिकारः । तद्वन्तः सर्वे वर्णा अधिकारिणः । सामान्यतो

निजवर्णाश्रमाचारनिरतः शुद्धमानसः ।

इत्यादिस्कान्दाद्युक्तेः । तत्र शूद्रादेरध्ययनाभावाद्वेदमन्त्राद्यज्ञा-सम्भवेन तद्वाराऽग्निन्यप्यनधिकारे प्राप्ते वक्ष्यति—शूद्रस्यापीत्यादि । *अनग्नय इति । विप्रत्वमविवक्षितमुद्देश्यगतत्वात्, नापि "राजा राजसूयेन यजेत"इत्यादिवदधिकारसंकोचकम् । अन्येषामप्यधि-कारात् । *आहिताग्निरिति । यत्तु "अश्नन्त एव सिध्यन्ति" इत्युक्तावपि पश्चाहुतिमात्रमेवोपवासदिने कार्यम् ।

एकादश्यादौ तु *वचनाद्व्रतानि वक्ष्यामः। शूद्र-
स्याप्यधिकारः।

शूद्रो वर्णश्चतुर्थोऽपि वर्णत्वाद्धर्ममर्हति।
वेदमन्त्रस्वधास्वाहावषट्कारादिभिर्विना॥

श्रौताधिकारिण एव। मासोपवासादिविधीनां निरवकाशतापत्त्या सर्वेषु
प्रवृत्त्यसम्भवात्।

मासपक्षोपवासेन मन्यन्ते यत्तपो जनाः।
आत्मतन्त्रोपघातस्तु न तपस्तत्सतां मतम्॥

इति वाक्याच्च। प्रधानकर्मार्थकतन्त्रपदेन वक्ष्यमाणश्रौतग्रहणात्
मासपक्षेत्युपलक्षणम्। स्वल्पोपवासत्रये तात्पर्यम्। तेन ब्रह्मचारि-
श्रौताधिकारिणोः प्राजापत्यादावपि दण्डकाष्ठवत्पक्ष एव, न
तु स्वस्थानवृद्धिमत्पक्षः स्वल्पोपवासस्य गापानादिति बोध्यम्। के
चित्तु प्राणलोपेनाग्निहोत्रलोपेन चेत्यर्थः। अयं च पूर्वाश्रमिणोरेव
मरणान्तिकानशनरूपतपसि दोषो नोत्तराश्रमिणः कर्माशक्ति-
विरक्त्यादिना तदनुत्थानादिति व्याचख्युः।

*वचनादिति। नित्यस्य काम्यस्य वा स्मार्तपौ-
राणिकान्यतरस्योपवासस्यानुष्ठाने ब्रह्मचारिगृहिणोरशक्त्या-
ऽध्ययनाग्निहोत्रादिस्वकर्मलोपस्तस्य प्रतिनिषिद्धाचरणत्वं वा स्या-
दतोऽयं तन्निषेधो देवलेनोक्तः। स च न सर्वथा नि-
त्यस्य (१)गौणपक्षसम्भवात्, किं तु काम्यस्यैव तदभावात्।
न च काम्यस्य प्राबल्यम्। विरोधाभावेन श्रौतात् दुर्बलत्वात्।
निषेधपालनं तु तत्र द्वयोरपि 'गृहस्थो ब्रह्मचारी च आहिताग्निश्च"

(१) नित्योपवासस्य—

उपवासनिषेधे तु भक्ष्यं किञ्चित् प्रकल्पयेत्।
न दुष्यत्युपवासेन उपवासफलं लभेत्॥

इतिवायवीयवचनेन विहितानुकल्पफलादिभिरपि सिद्धबोधनेन नि-
षेधाविरोधादिति भावः।

इति व्यासोक्तेः। प्राक्त्वास्तु वैश्यशूद्रयोः *त्रिरात्रा-धिकोपवासनिषेधः।

वैश्याः शूद्राश्च ये मोहादुपवासं प्रकुर्वते।
त्रिरात्रं *पञ्चरात्रं वा तेषां *व्युष्टिर्न विद्यते॥
चतुर्थभक्तक्षपणं वैश्ये शूद्रे विधीयते।
त्रिरात्रं तु न धर्मज्ञैर्विहितं ब्रह्मवादिभिः॥

इति हेमाद्रौ वचनादित्याहुः। *यावदुक्तनिषेध इत्यन्ये। प्रकरणात् *महापातकिविषय इति युक्तम्।

एवं स्त्रीणामपि*। तत्र—स्कान्दे

नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम्।
भर्तृशुश्रूषयैवैता लोकानिष्टान् व्रजन्ति हि॥

गृहेभ्यो यच्च पित्रादिकेभ्यः
कुर्याद्व्रतोऽभ्यर्चनं सात्त्विकं च।
तस्यार्धं वै सा फलं नान्यचित्ता
नारी भुङ्क्ते भर्तृशुश्रूषयैव॥

आदित्यपुराणे—

इत्यग्निपतनादित्यर्थः। *त्रिरात्रेति। द्विरात्राधिककालव्यापिन उपवासस्य निषेध इत्यर्थः। *पञ्चरात्रमिति तु कैमुतिकन्यायेन त्रिरात्रनिषेधस्तुतिः। *व्युष्टिः—फलम्। *यावदुक्तेति। यावदंशे निषेधवाक्यं, तावदंशे निषेध इत्यर्थः। एतन्मते

चतुर्थभक्तक्षपणं वैश्ये शूद्रे विधीयते।
त्रिरात्रं तु न धर्मज्ञैर्विहितं ब्रह्मवादिभिः।

इत्येतन्नास्ति। नन्वेवं पञ्चरात्रनिषेधो व्यर्थः कैमुतिकन्याया-वलम्बस्यागतिकगतित्वादत आह *महापातक इति। त्रिरात्राद्य-ङ्गनिषेधोऽङ्गिनिषेधार्थ इत्याशयः। *स्त्रीणामपीति। अधिकार इति वर्त्तते। 'निजवर्णाश्रमाचारनिरत' इत्यादौ पुंस्त्वमतन्त्रमिति भावः।

नारी खल्वननुज्ञाता भर्त्रा पित्रा सुतेन वा ।
विफलं तद्भवेत्तस्या यत्करोत्यौर्ध्वदैहिकम् ॥
इति । और्ध्वदैहिकं—पारलौकिकम् । तत्र भर्त्रनुज्ञाविषयम् ।
*भार्या पत्युर्मतेनैव *व्रतादीनाचरेत्सदा ।
इति कात्यायनोक्तेः । अत्र विशेषो हरिवंशे—

*भार्येति । "नास्ति स्त्रीणाम्" इति निषिद्धोऽधिकारोऽनेन प्रति प्रसूयत इति भावः ।

नन्वेवं विधवायाः कुतोऽधिकारः ? । भर्तुरभावेन तदनुज्ञाया अप्यभावात् । न च 'सुतेन वा' इति सुतानुज्ञयाऽधिकारः । 'यत्करोत्यौर्ध्वदैहिकम्' इत्यस्य लेट्रूपत्वकल्पने मानाभावादिति चेन्न । 'नास्ति स्त्रीणाम्' इत्यादेर्न व्रतादिनिषेधे तात्पर्यं, किन्त्वनुज्ञामात्रे यतः । स्त्री व्रतादिकमनुज्ञया कुर्यादिति कात्यायनवाक्यार्थः । *पत्युरिति पितृपुत्रादेरुपलक्षणं, 'न स्वातन्त्र्यं क्वचित्स्त्रियः' इत्युक्तेः । क्वचिदिति प्रशस्त ब्राह्मणादिसङ्ग्रहार्थम् । अत एव प्रशस्ता विधवा ब्राह्मणाद्यभावे दासीदासादि अनुज्ञाप्य व्रतमारभन्ते । 'सुतेन वा' इति तु तत्सापेक्षतदीयधनाद्यभिप्रायकं, पित्रादेरुपलक्षणं च । अननुज्ञायां तु याज्ञवल्क्यः

प्रातिकूल्यं गुरोः कृत्वा प्रसाद्यैव विशुद्ध्यति । इति ।

स्मृत्यन्तरे च

अथ वा यद्गुरुर्ब्रूयात्तत्कार्यमविशङ्कया ।
निग्रहेऽनुग्रहे वापि गुरुः सर्वत्र कारणम् ॥ इति ।

अवमाने त्वधिकम् । 'भर्तृव्यतिक्रमे कृच्छ्रम्' इत्यापस्तम्बोक्तेः । *व्रतादीनिति । आदिना पुष्पालङ्कारधारणादिस्वधर्मपरिग्रहः । अनुज्ञातायामपि श्रौते नाधिकारः । वेदाध्ययनाद्यभावात् ।

*स्नानं चेति

*स्नानं च कार्यं शिरसस्ततः *फलमवाप्नुयात् ।
*स्नात्वा स्त्री प्रातरुत्थाय पतिं विज्ञापयेत्सती ॥

*तथा—

गृहीत्वौदुम्बरं पात्रं सकुशं साक्षतं तथा ।
गोशृङ्गं दक्षिणं सिक्त्वा(१) प्रगृह्यैवाथ तज्जलम् ॥

औदुम्बरं—ताम्रमयम* ।

ततो भर्तुः सती दद्यात्स्नानस्य प्रयतस्य च ।
आत्मनश्चाभिषेकार्थं ततः शिरसि तज्जलम् ॥

आशिरस्कं भवेत्स्नानं स्नानाशक्तौ तु कर्मिणाम् ।

इत्यादिस्नानान्तरवारणाय । किं च

नित्यमभ्युदयार्थं स्नानकर्म शुद्धिमिच्छता ॥
एष साधारणो धर्मश्चातुर्वर्ण्यस्य निश्चयः ।
स्त्रीभिः शूद्रैश्च कर्तव्यं मन्त्रवर्जं विगाहनम् ॥

इति स्नाने प्राप्ते पुनर्विधाने ज्ञापयति — सुवासिनीनामाशिरस्कमेव प्रातः स्नानमिति । तत्र व्रताङ्गमाशिरस्कताविधानार्थमेतत् । *फलं—व्रतवैगुण्यराहित्यम् । तेन नित्यव्रतसङ्ग्रहः । नियमान्तरमाह—*स्नात्वेति । *सतीति ।

उपवासार्थमथवा व्रतकार्थं धृतव्रता ।
स्पृष्ट्वा कराभ्यां चरणौ सततं सक्तकस्य च ॥

इत्युत्तरश्लोकः । सक्तम् अनुरक्तम् । चकारात् विज्ञापना व्रतवैगुण्यहान्यर्थवत् स्वब्रह्मचर्यादिसंरक्षणार्थम्(२) । सङ्कल्पप्रकारमाह—

(१) सिक्त्वा इति पाठः सर्वपुस्तके ।

(२) प्रातरुत्थाय स्नात्वा धृतव्रता सती—पतिव्रता स्त्री भर्तुः चरणौ कराभ्यां स्पृष्ट्वा उपवासार्थं व्रतार्थं विज्ञापयेत्, सततं—निरन्तरं सक्तम—अनुरक्तं पतिं तु स्वब्रह्मचर्यादिसंरक्षणार्थं च विज्ञापयेदित्यर्थः ।

उपवासेषु कर्तव्यमेतद्धि व्रतकेषु* च । इति ।

सर्वव्रतेषु संकल्पविधिश्च भारते—

गृहीत्वौदुम्बरं पात्रं वारिपूर्णमुदङ्मुखः ।
उपवासं तु गृह्णीयाद्यद्वा *संकल्पयेद्बुधः ॥

हस्तेनैवेत्यर्थः(१) ।

अथ व्रतारम्भकालः । मदनरत्ने गार्ग्यः

अस्तगे च गुरौ शुक्रे बाले वृद्धे मलिम्लुचे ।
उद्यापनमुपारम्भं व्रतानां नैव कारयेत् ॥

रत्नमालायाम्—

*सोमसौम्यगुरुशुक्रवासराः
सर्वकर्मसु भवन्ति सिद्धिदाः ।
भानुभौमशनिवासरेषु च
प्रोक्तमेव खलु कर्म सिध्यति ॥

तथा

*विरुद्धसंज्ञा इह ये च योगा
स्तेषामनिष्टः खलु पाद आद्यः ।

---

*तथेति । *ताम्रमयमिति । 'उदुम्बरं स्मृतं ताम्रम्' इति विश्वः । *व्रतकेष्विति गोबलीवर्दन्यायेन । ताम्राभावे त्वाह—*यद्वेति । *संकल्पयेत्—हस्तेन जलं संगृह्य संकल्पयेत् । यद्वा 'वार्येव धारयेत्' इति पाठेऽप्ययमेवार्थः । 'यथा संकल्पयेत्' इति पाठे यत्फलमिच्छेदित्यर्थः ।

*सोमेति । 'उदयादुदयं वार' इति वचनात् तत्र न निर्णयोऽपेक्षितः । *विरुद्धसंज्ञाः-विष्कम्भा-ऽतिगण्ड शूल-

(१) यद्यपि पुस्तकान्तरे एतदुत्तरं 'यथेति पाठे यत्फलमिच्छेदित्यर्थ' इत्यधिकः पाठो दृश्यते, तथापि स टीकायामपि सत्त्वादस्माभिर्मूले उपेक्षितः ।

श्रीपतिः-

न सिद्धिमायाति कृतं च विष्टयां
विषारिघातादिकमत्र सिद्धम् ॥

व्यवहारसमुच्चये-

*दशम्यामष्टम्यां प्रथमघटिका पञ्चमपरं
*हरिघौ सप्तम्यां द्विदशघटिकान्ते त्रिघटिकम् ।
तृतीयाराकायां स्वयम(२०)घटिकान्तः परभवं
शुभं विष्टेः पुच्छं शिवतिथिचतुर्थ्योस्तु विरमे ॥

तत्रैव

सर्पिणी तु सिते पक्षे कृष्णे चैव तु वृश्चिकी ।
सर्पिण्यास्तु मुखं त्याज्यं वृश्चिक्याः पुच्छमेव च ॥

माधवीये-

विष्टिर्यदाऽहनि तिथेरपरार्धजाता
पूर्वार्धजा निशि तदा शुभदा च पुच्छे ।

ब्रह्मयामले-

*दिनभद्रा यदा रात्रौ रात्रिभद्रा यदा दिवा ।
न त्याज्या शुभकार्येषु प्राहुरेवं पुरातनाः ॥

प्रहरस्येत्युदाहरणम् । उदयोत्तरं किञ्चित्काले गते विष्टिप्रवृत्तौ तात्पर्यम् । अत्र दिनरात्र्योः सत्त्वेनोपवासैकभक्तयोरेकतरस्य विनिगन्तुमशक्यत्वात्तदर्थमुक्तम् । ईदृशस्थले च भद्रापूजा तत्प्रवेशात्प्रागेव । तद्रहिते काले भोक्तुं शक्यत्वात् ।

प्रातः संपूज्य तामेव ब्राह्मणं च स्वशक्तितः ।
ततो भुञ्जीत राजेन्द्र यावद्भद्रा प्रवर्त्तते ॥

इति भविष्योत्तरात् । करणान्तरे च भद्रान्यायात्तस्य रात्रिमात्रव्याप्तित्वे दिनद्वये एकभक्तमित्यादि । *ऊर्ध्वम् उत्तरार्द्धे । *अधः-पूर्वार्द्धे। अथ यत्कर्म सर्वथा विष्टिं परित्यज्य दुष्करं तत्राह-*दशम्यामिति। *हरियुः-एकादशी । *दिनभद्रेति। दिन-

श्रीपतिः

षट् पौष्णतो द्वादश शाक्रतश्च
पौरन्दराद्यानि नव क्रमेण ।
पूर्वार्धमध्यापरभागयुञ्जि
चिरंतनज्योतिषिकैः स्मृतानि ॥

व्रतारम्भे विशेषो मदनरत्ने सत्यव्रतेनोक्तः

*उदयस्था तिथिर्या हि न भवेद्दिनमध्यभाक् ।
सा खण्डा न व्रतानां स्यादारम्भश्च समापनम् ॥

इति । देवलः—

भद्रा—तिथिः पूर्वाद्धभद्रा । रात्रिभद्रा उत्तराद्धभद्रा । अत्र केषांचित्पुस्तके श्रीपतिः—

षट् पौष्णतो द्वादश शाक्रतश्च पौरन्दराद्यानि नव क्रमेण ।
पूर्वार्द्धमध्यापरभागयुञ्जि चिरन्तनज्योतिषिकैः स्मृतानि ॥

इति लिख्यते । तत्र

पूर्वभागयुजि भे पतिः प्रियो योषितामपरभागयोगिनि ।
स्त्री नृणां भवति, मध्ययोगिनि प्रेम नूनमुभयोः परस्परम् ॥

इत्युत्तरश्लोको रत्नमालायामेव दृश्यते । तदुत्तरं च

स्त्रीग्रहैर्वल्लभा नारी, पुंग्रहैर्वल्लभो वरः ।
सबलैरुभयोः प्रीतिरुभयोः स्यात्करग्रहे ॥

इति क्षेपकं च । टीका च—अन्तःपुरस्त्रीणां वारवधूनां राजसङ्गमे येषु नक्षत्रेषु यत्फलं तदाह—षडिति । रेवत्यादीनि षट् पूर्वभागयोगीनि । आर्द्रादीनि द्वादश मध्ययोगीनि । ज्येष्ठादीनि नवापरभागयोगीनि । फलमाह पूर्वेति । वधूवरयोर्नवसङ्गमेऽपीदम् । शेषं स्पष्टम् । तत्र प्रकृतसङ्गत्यर्थं धार्मिकाः प्रष्टव्याः ॥

*उदयस्थेति । यथा विद्धकादशीं निषिध्य परेद्युर्व्रतस्य विधानेऽपि न तत्र तदुपक्रमः । एवंजातीयकेष्वन्येषु व्रतेष्वपि एवंव

*अभुक्त्वा प्रातराहारं स्नात्वाऽऽचम्य समाहितः।

रीतिः। *अभुक्त्वेति। पूर्वदिने प्रातराहारमभुक्त्वा एकभक्तं व्रतं कृत्वेत्यर्थः।

सायमाद्यन्तयोरह्नोः सायं प्रातश्च मध्यमे।
उपवासफलं प्रेप्सुर्जह्याद् भुक्तचतुष्टयम्॥

इत्यादौ तथा दर्शनात्। अत एव व्रतशब्दस्य श्राद्धोपलक्षणत्वात्तत्पूर्वदिने एकभक्तं वदन्ति। (१) प्रातरित्यादि तु परदिनाभिप्रायमित्येके। पूर्वदिने एव सायंसन्ध्योत्तरं व्रतं ग्राह्यं वारव्रतवत्। प्रातरित्यस्य स्नात्वेत्यनेनान्वय इत्यपरे। व्रतदिने प्रातराहारमभुक्त्वेत्यर्थः। न चैवम्—

स्नानसन्ध्यातर्पणादि जपहोमसुरार्चनम्।
उपवासवता कार्यं सायंसन्ध्याहुतीर्विना॥

इत्यनेन पौनरुक्त्यमिति वाच्यम्। यथा "नानृतं वदेत्" इति निषेधद्वयम्। तत्रैकस्य वैयर्थ्यवारणाय दृष्टादृष्टत्वमङ्गीकृत्य एकस्य पुरुषार्थविरोधित्वमपरस्य क्रतुविरोधित्वमित्युक्तं,(२) तथा प्रातरा-

(१) अत्र स्नात्वेत्यादि तु इति पाठः सम्यक्।

(२) "नानृतं वदेत्" इति श्रुतौ दर्शपूर्णमासप्रकरणेऽनृतप्रतिषेधः पुरुषार्थः। वदनस्य तदर्थत्वात्। तथा हि—आख्यातानां कर्ता प्रतीयते। "लः कर्मणि च" (पा० सू० ३-४-६९.) इति चकारात् कर्तरि तस्य स्मरणात्, 'देवदत्तः पचति' इति सामानाधिकरण्याच्च। ततश्च तस्य प्रत्ययार्थतया प्राधान्येन तद्विशेषणतया गम्यमानं वदनं तच्छेषः—तदभिलषितसाधनम्। प्रतिषेधोऽपि तद्विपरीतमर्थं बोधयंस्तस्यैव बलवदनिष्टसाधनतां बोधयतीति तत्प्रतिषेधस्य पुरुषार्थत्वमाशङ्क्य आख्यातानां भावनाभिधायकतया कर्तुश्चाक्षेपादेवावगमोपपत्तौ न तत्र शक्तिकल्पनम्। "लः कर्मणि" (पा० सू० ३-४-६९.) इति सूत्रं, "द्व्येकयोः" (पा० सू० १-४-२२) इति सूत्रैकवाक्यतया कर्तुरेकत्वे लकारैकवचनमित्याक्षेपलभ्यकर्तृसंख्याभिधानपरं, सामानाधिकरण्यं च गौः शुक्ल इतिवल्लाक्षणिककर्त्रभिप्रायमिति न कर्तुराख्यातवाच्यत्वं, येन वदन-

*देवपूजाग्निहवनं संतोषः स्तेयवर्जनम् ॥
सर्वव्रतेष्वयं धर्मः सामान्यो दशधा स्मृतः ॥

अग्निहोमस्तद्दैवत्यः, व्याहृतिहोमो वेति वर्धमानः ।

यत्तु तत्रोक्तम्

'सर्वपदमनन्तपुराणोक्तप्रकृतव्रतपरम् । *व्रतान्तरे तु विध्यन्तरसत्त्वे होमोऽन्यथा न । अत एवैकादश्यां शिष्टानां होमानाचरणम्' इति, तन्न । 'जपो होमश्च' इति *वक्ष्यमाणोक्तवाक्यस्यैतस्य काम्यव्रतसमाप्ति*परत्वात् । *तत्त्वं तु सामदर्श्यस्य पशुमित्रविन्दादिप्रकरणस्थस्येव तत्तद्व्रतविशेषहोमविधिभिर*स्योपसंहार इति । विष्णुधर्मे

श्यकत्वार्थम् । *देवपूजा—व्रतदेवतापूजनम् । व्याहृतिहोमो वेति वाकारादरुचिः । सर्वव्रताङ्गत्वेनापूर्वविधाने मानाभावात् । *व्रतान्तरे त्विति । तस्य पुराणान्तरोक्तत्वेनाप्रकृतत्वात् । *वक्ष्यमाणेति । तद्वचनं काम्यविषयम् । अतस्तत्र सर्वाङ्गोपसंहार आवश्यक इति भावः । *समाप्तीति दानान्तानामावश्यकत्वार्थम् । नन्वेतावता काम्यैकादश्यादौ होमापत्तिरित्यत आह *तत्त्वं त्विति । *अस्येति । अनारभ्याधीतत्वाविशेषादिति शेषः ।

भयत्वे संयोगपृथक्त्वम्" (जै० सू० ४-३-३-५) इति । एकस्य-यज्ञस्य, उभयत्वे-नित्यत्वकाम्यत्वयोरुभयत्व संयोगयोः प्रयोजकधर्मसम्बन्धयोः पृथक्त्वं भिन्नं प्रयोजकमिति । नित्याङ्गत्वप्रयोजकं यागं प्रति नियतपूर्वसत्त्वं, काम्याङ्गत्वप्रयोजकं (यस्याङ्गत्वप्रयोजिका कामना तस्य) यागं प्रति नियतपूर्वासत्त्वम्, एतदुभयसम्बन्धयोः पृथक्त्वमस्त्येव । अयम्भावः—यूपे पशुं निबध्याथ प्रोक्षेत्-आलभेत् । तत्र परिभाषया यूपे पशुनिबन्धनमावश्यकम् । ततः खादिरस्य यूपस्य नियतत्वमेव । नैव यूपे काम्यत्वं बोधितम् । अपितु नियतत्वं कर्तुं समर्थम् । अतोऽत्र न नित्यत्वकाम्यत्वयोर्विरोधः । तेन यस्य न कामना तेनापि खादिरः कर्तव्य एवेति ।

न स्पृशेन्नाभिभाषेत नेक्षेत व्रतवासरे ॥

पृथ्वीचन्द्रोदये अग्निपुराणे—

स्नात्वा व्रतवता सर्वव्रतेषु व्रतमूर्तयः ।
पूज्याः सुवर्णमय्याद्याः शक्त्या वै भूमिशायिना ॥
जपो होमश्च सामान्यं व्रतान्ते दानमेव च ।
चतुर्विंशद् द्वादश वा पञ्च वा त्रय एव वा ॥
विप्राः पूज्या* यथाशक्ति तेभ्यो दद्याच्च दक्षिणाम् ।

अत्र विप्रा इति पुंलिङ्गनिर्देशात् पुमांस एव *भोज्याः, न तु स्त्रियः । एवं सहस्रभोजनादावपि । *विरूपैकशेषस्य प्रमाणान्तरं विनाऽयुक्तत्वात् । अत एव 'द्वयोर्यजमानयोः *प्रतिपदं कुर्यात्, बहुभ्यो यजमानेभ्यः' इत्यादौ विरूपैकशेषाभावात् पत्न्यभिप्रायं द्वित्वं बहुत्वं वा न संभवति इत्युक्तमाचार्यैः, पार्थसा-

---

विहितस्याननुष्ठानमिन्द्रियाणामनिग्रहः ।
निषिद्धसेवनं नित्यं वर्जनीयं प्रयत्नतः ॥

पतितादिदर्शने विष्णुपुराणे—

तस्यावलोकनात्सूर्यं पश्येत मतिमान्नरः ।

स्पर्शादौ तु विष्णुधर्मे—

संस्पर्शे च नरः स्नात्वा शुचिरादित्यदर्शनात् ।
सम्भाष्य तैः शुचिपदं चिन्तयेदच्युतं बुधः ॥

'जपो होमश्च'इत्युक्तार्थमुपसंहारं लाघवात् । *पूज्या इति । पूजा भोजनान्तेत्यभिप्रेत्याह—*भोज्या इति । विप्रो विप्रा चेत्येकशेषात्कुतो न स्त्रियो भोज्या इत्यत आह—*विरूपेति । 'शिवौ नमस्कुर्यात्'इत्यत्र शिवाया ग्रहणे दुर्गापूजाप्रकरणमेव प्रमाणमित्यादि । *प्रतिपद्—ऋक्भेदः । ननु चतुर्विंशदित्यादीनां क्रियान्वयः संभवति, एवं 'सहस्रं ब्राह्मणान्भोजयेत्'इत्यादौ सहस्रादेरपीत्यत आह—

परास्तम् । बहुत्वस्यै*कपदश्रुत्या ब्राह्मणान्वितत्वेन भोजनान्वयाभावादित्यन्यत्र विस्तरः ।*'शूद्रस्य तु प्रतिष्ठादिवद्विप्रद्वारा व्याहृतिहोमः' इति वर्धमानः । व्रतमूर्तयो—व्रतदेवताप्रतिमाः । प्रतिमास्वरूपं च मदनरत्ने भविष्ये-

अनुक्तद्रव्यतत्संख्या* देवताप्रतिमा नृप ।
सौवर्णी राजती ताम्री वृक्षजा मार्तिकी तथा ॥
चित्रजा पिष्टलेख्योत्था निजवित्तानुरूपतः ।

भोजनेन सहस्रभोजनं सम्पाद्यमिति चेत् । मैवम् । ईदृशरीत्या "सहस्रं ब्राह्मणं भोजयेत्" इत्यत्रापि तत्सिद्धिः स्यादिति ब्राह्मणपदोत्तरबहुवचनवैयर्थ्यापत्तेः । तत्र बहुवचनार्थबहुत्वस्य क्रियान्वयभ्रमं निराचष्टे—*बहुत्वस्येति । *एकेति । सुब्विभक्तीनां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः । यद्वा पदं—विभक्त्यन्तं, ततः प्रकृत्यर्थोपस्थितिः, विभक्त्यर्थोपस्थितिश्च ; तावतैव तत्संभृतसामग्रीकं न धात्वर्थोपस्थितिमपेक्षते इत्यर्थः ।

*शूद्रस्येति । अत्रेदमरुचिबीजम् । सर्वत्र व्याहृतिहोमो नाङ्गमित्युक्तमेव । किं च तत्तद्धोमोऽपि न सर्वत्र । व्रतत्वेन ऋत्विजोऽनावश्यकत्वात् । नापि प्रतिनिधित्वेन विप्र आवश्यकः । विप्रे शूद्रप्रतिनिधित्वाभावस्य वक्ष्यमाणत्वादिति । *तत्संख्या—त-

---

तपुंस्का वाहाय च विक्रयाय च स्त्रिय एवावशिष्यन्ते" इति "त्यदादीनि सर्वैर्नित्यम्" (पा० सू० १-२-७२) इति सूत्रस्थं भाष्यं सङ्गच्छते । एवं च स्त्रीगवीणां विक्रयस्य प्रत्यवायजनकत्वेन तत्कल्पनया प्रकृतभाष्यलापनमत्यन्तमसङ्गतम् । "स्त्रीणां दानविक्रयातिसर्गा विद्यन्ते" (३-४-३) इति निरुक्तं शौनःशेपदृष्टान्तेन मनुष्यजातीयस्त्रीणामेव तत्प्रतिपादनपरं, "त्यदादीनि" इतिसूत्रभाष्यस्थविवरणे प्रायेणेति पदं च लोकव्यवहारपरमिति न तत्स्वारस्येन स्त्रीगवीविक्रयः प्रामाणिक इति दिक् ॥

*आमाषात्पलपर्यन्तं कर्तव्या शाठ्यवर्जितैः ॥

तत्रैव ब्राह्मे–

आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते ।
*मन्त्रस्य देवतायाश्च प्रजापतिरिति स्थितिः ॥

मन्त्रानुक्तौ समस्तव्याहृतिरूपो मन्त्रः, प्रजापतिश्च देवतेति कल्पतरुः । वर्धमानधृतदेवीपुराणे–

होमो ग्रहादिपूजायां शतमष्टाधिकं भवेत् ।
अष्टाविंशतिरष्टौ वा यथाप्राप्ति विधीयते ॥

मदनरत्ने–

*अनुक्तसंख्या यत्र स्याच्छतमष्टोत्तरं स्मृतम् ।

वर्धमानधृतवृद्धशातातपः

उपवासं द्विजः कृत्वा ततो ब्राह्मणभोजनम् ।
कुर्यात्तेनास्य सगुण उपवासोऽभिजायते ॥

व्रतोद्यापनानुक्तौ तु पृथ्वीचन्द्रोदये नन्दिपुराणे–

*कुर्यादुद्यापनं तस्य समाप्तौ यदुदीरितम् ।
उद्यापनं विना यत्तु तद् व्रतं निष्फलं भवेत् ॥
*यदि चोद्यापनं नोक्तं *व्रतानुगुणतश्चरेत् ।

द्गुरुत्वम्। *आमाषादिति। "अङ्गुष्ठपर्वादारभ्य" इति तु प्रतिष्ठापरम्। *मन्त्रेति। मन्त्रस्यानादेशे(१)प्रजापतिः–प्राजापत्यो मन्त्र इत्याद्यन्वयः। *अनुक्तेति। यत्रेत्यस्य जपे होमे चेत्यर्थः। *कुर्यादिति

आदौ मध्येऽथ वाऽप्यन्ते व्रतस्योद्यापनं भवेत् ॥

इत्यनेन विकल्पते । यद्वा—व्रतोद्यापनानुक्ताविलम्बतारिकादर्शनात्तस्य व्रतस्य समाप्तौ उद्यापनं कुर्यात् । कीदृशम् ?, कार्यतयोदीरितमिति । अनुक्तोद्यापने कालमभिधायेतिकर्त्तव्यतामाह–यदि चेतीति व्याख्येयम् ।

*व्रतेति। एतदुक्तं भवति–यत्र व्रते या देवता, तां–सर्वतो

---

(१) अनुक्तावित्यर्थः ।

वित्तानुसारतो दद्यादनुक्तोद्यापने व्रते ॥
गाश्चैव काञ्चनं दद्याद्व्रतस्य परिपूर्तये ॥

*अशक्तौ तु नारदीये

*सर्वेषामप्यलाभे तु यथोक्तकरणं विना ।
विप्रवाक्यं स्मृतं शुद्धं व्रतस्य परिपूर्तये ॥
वृथा विप्रवचो यस्तु गृह्णाति मनुजः शुभम् ।
अदत्त्वा दक्षिणां पापः स याति नरकं ध्रुवम् ॥

भारते—

वेदोपनिषदे चैव सर्वकर्मसु दक्षिणा ।
*सर्वत्र तु यथोद्दिष्टा भूमिर्गावोऽथ काञ्चनम् ॥

बैजवापः—

*शिवनेत्रोद्भवं यस्माद्रजतं पितृवल्लभम् ।
अमङ्गलं तद्यत्नेन देवकार्येषु वर्जयेत् ॥

टोडरानन्दे देवीपुराणे

व्रते च तीर्थेऽध्ययने श्राद्धेऽपि च विशेषतः ।

भद्रमण्डले(१)तद्देवतास्थापनं कृत्वा कुम्भे विधानस्थापिते अधिवास्य, तद्देवताको होमः कार्यः। रुद्रव्रते तु लिङ्गतोभद्रमण्डले इति विशेषः । तत्राद्यं नवरात्रे। द्वितीयं शिवरात्रौ । तदन्ते शय्यादि दद्यादित्यग्रे विस्तरः । *अशक्तौ—उद्यापनाकरणे । *सर्वेषाम् उद्यापनवस्तूनाम् । संपूर्णताविधिश्च भविष्योत्तरे जन्माष्टम्यां वक्ष्यते । *सर्वत्र–वेदोपनिषदे इत्यन्वयः। वेदान्तश्रवणेऽपि याज्ञवल्क्याय जनकेन दक्षिणादानोक्तेः । *शिवेति ।

सर्वेषामेव दानानां सुवर्णं दक्षिणेष्यते ।
सुवर्णे दीयमाने तु रजतं दक्षिणेष्यते ॥

इति रत्नाकरम्। दक्षिणायां तु न दक्षिणा। अनवस्थानात्(२)।

---

(१) सर्वतोभद्रमण्डलदेवतानां स्थापनं पूजनं च कृत्वेत्यर्थः।
(२) दक्षिणायां दीयमानदक्षिणाया अपि सदक्षिणात्वावश्यकतया

*परान्नभोजनादेर्वि यस्यान्नं तस्य तत्फलम् ॥

पृथ्वीचन्द्रोदयेऽग्निपुराणे—

नित्यस्नायी मिताहारो गुरुदेवद्विजार्चकः ।
क्षारं *क्षौद्रं च लवणं मधु* मांसानि वर्जयेत् ॥

*क्षारास्तु तत्रैवोक्ताः—

तिलमुद्गादृते शिम्बयं सस्यं गोधूमकोद्रवौ ।
धान्यकं देवधान्यं च शमीधान्यं तथेक्षवम् ॥
स्विन्नधान्यं तथा पण्यं मूलं क्षारगणः स्मृतः ॥

गोधूमानां तु तत्रैव प्रतिप्रसवः—

---

*परान्नेति ।

श्वशुरान्नं गुरोरन्नं मातुलान्नं तथैव च ।
पितृव्यभ्रातृपुत्राणां परान्नं नैव दोषकृत् ॥

इति तु निर्मूलम् । *क्षौद्रं मधु । *मध्विति दोषाधिक्यार्थम् । मद्यादिनिषेधस्य सर्वदा सिद्धत्वात् । उन्मादकसामान्यं वा तदर्थः । अनुज्ञातमद्यानामपि व्रताङ्गो निषेध इति वा । ननु 'क्षारं क्षौद्रं च लवणम्' इत्यत्र क्षारं लवणमिति नार्थः क्षौद्रं नेत्यनेन व्यवधानादतः क्षारानाह *क्षारास्त्विति । धान्यावरणं सूक्ष्मं, शमी-स्थूलं शिम्बा । धान्यकं कुस्तुम्बुरु । देवधान्यं—देवशालितण्डुलम् । ऐक्षवं गुडफाणितादि, न तु सितादि । 'अगुडमक्षवम्' इत्युक्तेः । स्विन्नं जलाग्न्यादिना धान्यं पृथुकादि । पण्यं तद्दिनक्रीतम् । सम्भवे तु दिनान्तरक्रीतमपि । मूलं—मूलकं प्रसिद्धम् । 'मूलकं केमुकेतरत्' इति तु केमुकस्य सर्वथैवाग्राह्यत्वार्थम् । यद्वा मूलं कन्दफलशाकादेरुपलक्षणम् । अग्रिमगौतमवचने फलादिसमभिव्याहारात् । तत्र पण्येतिविशेषणम् । 'मूलकं केमुकेतरत्' इत्यत्र च स्वा-

---

तत्रापि दक्षिणादानप्रसक्तेस्तस्या अपि दानरूपत्वेन दक्षिणान्तरप्रसक्तिरितिरीत्यानवस्थापत्तेरित्यर्थः ।

व्रीहिषष्टिकमुद्गाश्च* कलायाः सतिलं पयः।
श्यामाकाश्चैव नीवारा गोधूमाद्या व्रते हिताः॥
कूष्माण्डालाबुवार्ताकपालङ्कीज्योत्स्निकास्त्यजेत्।
*चरुभैक्षं सक्तुकणाः शाकं दधि घृतं मधु।
श्यामाकाः शालिनीवारा यावकं मूलतण्डुलम्॥
हविष्यव्रतनक्तादाव*ग्निकार्यादिके हितम्।
मधु मांसं विहायान्यद् व्रते च हितमीरितम्॥ इति।

शमीधान्यं माषादि। पालङ्की मध्यदेशे 'पोई' इति प्रसिद्धा। ज्योत्स्निका पटोलिका (कोशातकी)। मिताक्षरायां गौतमः-'चरु-भैक्ष-सक्तुकण-यावक-शाक-पयो-दधि-घृत-मूल-फलोदकानि हवींष्युत्तरोत्तरप्रशस्तानि। पयो

र्थे कप्रत्ययान्मूलमर्थः। तत्र च केमुकसंज्ञकमूलेतरत्वान्वयः। प्रसिद्ध-मूलकं शाक इति तत्र विहितत्वविशेषणाच्च तस्य ग्राह्यत्वप्रसङ्गः। *कलाया इति। शमीधान्यानां सामान्यतो निषेधान्निरवकाशतया हविष्यशाकैकवाक्यतया च हविष्यसंकल्पे सतीनका ग्राह्याः। नीवाराश्च देवधान्यभिन्नत्वात्। यत्र त्वकृष्टपच्यं स्मर्यते तत्र देवधान्यादि ग्राह्यं तथैवाकाङ्क्षाशान्तेः। अत एव च सामान्यविधि-निषेधौ तत्र न प्रवर्तेते। गोधूमानां तु विहितप्रतिषिद्धत्वाद्ग्रहणाग्रहणवद्विकल्पः। इयाँस्तु विशेषः-यत्र ग्रहणस्याभ्युदयार्थत्वादग्रहणे न क्रतुवैगुण्यम्, इह तु इतरासत्त्व एव गोधूमे व्रतसाद्गुण्यमितर-सत्त्वे च तद्वैगुण्यमिति। एतेन 'गोधूमादीनामिति वाच्यम्। कलाय-नीवारयोर्विहितप्रतिषिद्धत्वात्' इति प्रत्युक्तम्। मधु-मधुरं सितादि। क्षौद्रस्यापि निषिद्धत्वात्। चरुः-हुतशेषः पुरोडाशादेरुपलक्षणम्। मूलतण्डुलं-मूलोद्भवास्तण्डुलाः। भर्जितमूलविशेषात्तण्डुला इव निःसरन्तीति प्रसिद्धम्। *अग्निकार्यादिके इति। तेन तादृशव्रते आहिताग्नेराधिकारः सूचितः। मधु-क्षौद्रम्, औषधाद्यर्थं गुर्वनुज्ञा-

दधि घृतं च गव्यम्' इति । अन्ये च विशेषा एकादशी-
*चातुर्मास्यादिप्रकरणे वक्ष्यन्ते ।

गृहीतव्रतत्यागे तु मदनरत्ने छागलेयः

पूर्वं व्रतं गृहीत्वा यो नाचरेत् *काममोहितः ।
जीवन् भवति चण्डालो, मृतः श्वा चाभिजायते ॥

*तत्र प्रायश्चित्तमुक्तं पृथ्वीचन्द्रोदये अपि गरुड-
पुराणयोः—

क्रोधात्प्रमादाल्लोभाद्वा व्रतभङ्गो भवेद्यदि ।
दिनत्रयं न भुञ्जीत *मुण्डनं शिरसोऽथवा ॥

तमपि । *चातुर्मास्यादीति । आदिना व्रताङ्गतया विहितना-
न्दीमुखस्य सङ्ग्रहः ।

नानिष्ट्वा तु पितॄन् श्राद्धे कर्म किञ्चित्समारभेत् ।

इति शातातपोक्तेः श्राद्धं वक्ष्यमाणत्वात् । *कामेति ।
व्याध्यादिनाऽनाचरणं तु न दोषः । "सर्वभूतभयं व्याधिः" इत्येका-
दश्यां स्कान्दात् । व्रतभङ्गे त्वाह—*तत्र प्रायश्चित्तमित्या-
दि । *मुण्डनमिति । प्रायश्चित्ताङ्गं मुण्डनं गयायामपि कार्यम् ।

क्षौरं नैमित्तिकं कार्यं निषेधे सत्यपि ध्रुवम् ।
पित्रादिमृतिदीक्षासु प्रायश्चित्ते च तीर्थके ॥

इत्यग्रिमवचनात् । गयादिदेशे राहुपरागादिकाले च
निषेधः । मृतिनिमित्तं तु दिने एव । "[illegible] वपनक्रिया" इति
विशेषात् । दिनत्रयोपवासश्चार्धप्राजापत्यरूपः । एवं च मुण्डनपक्षे
दक्षिणा नास्ति ।

कृच्छ्राणां व्रतरूपाणां श्मश्रुकेशादि वापयेत् ॥

इति वासिष्ठे कृच्छ्रपदादर्धकृच्छ्रादौ न वपनमिति मुक्तावली-
लिखनेन वपनेऽर्धकृच्छ्रव्यतिरेकाभावात् । सधवानां तु न मुण्ड-
नम् । तत्राङ्गुलत्रयादिकेशकर्तनपक्षसम्भवात् ।

इति *प्रायश्चित्ताम्नानादतिक्रान्तव्रतानुष्ठानं नास्तीति गम्यते । यत्तु-

प्रायश्चित्तं ततः कृत्वा पुनरेव व्रती भवेत् ।

इति वचनादतिक्रान्तमपि* व्रतं कार्यमेवेति शूलपाणिः, तत् मध्ये व्रतलोपे व्रतशेषसत्त्वे ज्ञेयम् । *एतच्च शक्तविषयम् ॥

अशक्तौ तु कालहेमाद्रौ पुराणान्तरे-

उपवासासमर्थश्चेदेकं* विप्रं तु भोजयेत् ।
तावद्धनादि वा दद्याद् भुक्तश्चेद् द्विगुणं तथा ॥

भुक्तः कृतभोजनः । ब्राह्मणभोजनं विनेति शेषः ।

सहस्रसंमितां देवीं जपेद्वा प्राणसंयमान् ।
कुर्याद्द्वादशसंख्याकान् *यथाशक्त्यातुरो नरः ॥ इति ।

शुद्धितत्त्वे मात्स्ये-

विद्वद्विप्रनृपस्त्रीणां नेष्यते केशवापनम् ।
ऋते महापातकिनो गोहन्तुश्चावकीर्णिनः ॥

इति निषेधाच्च । *प्रायश्चित्ताम्नानादित्यादिरभ्युपगमवादः । व्रतभङ्गार्थस्य प्रायश्चित्तस्य तत्संपूर्णतार्थत्वासम्भवात् ।

प्रायश्चित्तमिदं कृत्वा पुनरेव व्रती भवेत् ।

इति स्कान्दाच्च । तदाह-*अतिक्रान्तमपीति । *एतच्च-दिनत्रयोपवासविधानं च । *एकमिति । दिनत्रयोपवासे ब्राह्मणत्रयभोजनम् । एवं क्रमेण तावदित्यादावपि द्रष्टव्यम् । तावदित्यत्र कियदित्यपेक्षिते आह-*भक्तस्येति । 'भुक्तश्चेद् द्विगुणम्' इति पाठे च ब्राह्मणभोजनमकृत्वा भुक्तश्चेदित्यर्थः । द्विगुणं-ब्राह्मणद्वयं, तावद्धनद्विगुणधनं वा । *यथाशक्तीति यथाशक्त्योक्तकल्पविकल्पार्थम् । आतुरो-व्रतभङ्गेन व्याकुलः । व्रतभङ्गेऽपि धृष्टस्य धार्ष्ट्यानुरोधेन द्विगुणत्रैगुण्यादि कल्प्यम् ।

अञ्जनं च सुताम्बूलं कुङ्कुमं रक्तवाससी* ।
धारयेत्सोपवासाऽपि अवैधव्यकरं यतः ॥
विधवा *यतिमार्गेण, कुमारी वा यदृच्छया ॥

इति तत्रैव भविष्योक्तेः। तथा विष्णुधर्मे

सर्वेषु तूपवासेषु पुमान्वाऽथ सुवासिनी ।
धारयेद्रक्तवस्त्राणि कुसुमानि सितानि च ॥
विधवा शुक्लवसनमेकमेव हि धारयेत् ॥

मनुरपि-

पुष्पालङ्कारवस्त्राणि गन्धधूपानुलेपनम् ।
उपवासे न दुष्यन्ति दन्तधावनमञ्जनम् ॥

मदनरत्ने व्यासः—

दन्तधावनपुष्पादि व्रतेऽप्यस्या न दुष्यति । इति ।

यद्यपीदं* सर्वोपवासविषयं प्रतीयते, तथापि शिष्टाचारात्सौभाग्याद्यर्थं क्रियमाणनवरात्रत्रिरात्राद्युपवासविषयमेव, न त्वेकादश्यादिविषयम् ।

नियमस्तु स, यत्कर्म नित्यमागन्तुसाधनम् ॥

इतियमनियमयोर्भेदादिह तादृशा वस्त्रग्रहणादयो नियमा ग्राह्याः। तेन स्थलत्रयमालम्ब्य व्रताङ्गानां नियमानां लिखनादन्ये तादृशास्ते क सन्ति?,इति परास्तम् । *रक्तवाससी—रञ्जितवाससी । द्विवचनं कञ्चुकाभिप्रायम् । दक्षः—

श्रुतिस्मृतिप्रमाणेन वस्त्रं ग्राह्यं च धारयेत् । इति ।

"अश्रीरा तनूर्भवति रुशती पापयाऽमुया । पतिर्यद्वध्वो वाससा स्वमङ्गमभिधित्सते" इति दाशतयीश्रुतिः । स्मृतयश्च तत्र तत्र प्रसिद्धाः । एवं यज्ञोपवीतोपवस्त्रादि बोध्यम् । *यतिमार्गेणेत्युपमानोपादानात्फलाद्यनुकल्पानां निवृत्तिः । एवं यतिचान्द्रायण एव विधवानामधिकारो न तु यवमध्यादौ इत्यादि बोध्यम् । *इदं-

*लोतके च समुत्पन्ने ज्वरकर्मणि मैथुने।
धूमोद्गारे तथा वान्तौ नित्यकर्माणि संत्यजेत्॥
द्रव्ये भुक्ते त्वजीर्णे च नैव भुक्त्वापि किञ्चन।
कर्म कुर्यान्नरो नित्यं सूतके मृतके तथा॥

इति कालिकापुराणात्। वस्तुतस्तु पूर्वं देवीपूजोपक्रमात्तन्मात्रविषयत्वमस्येति युक्तं प्रतीमः। तथा हेमाद्रौ पाद्मे—

गर्भिणी *सूतिकादिश्च कुमारी वाऽथ रोगिणी।
यदाऽशुद्धा तदाऽन्येन कारयेत्,*प्रयता स्वयम्॥ इति।

पुंसोऽप्येष विधिः। लिङ्गस्याविवक्षितत्वात्। तेन 'यस्मिन्व्रते यत्पूजाद्युक्तं तदन्येन कारयेत्, शारीरनियमान् स्वयं कुर्यात्' इति हेमाद्रिनिर्णयामृतौ। 'न व्रतिनां व्रते' इति विष्णूक्तेश्च। *आरम्भस्तु न भवत्येव।

तदाह शुद्धितत्त्वे विष्णुः

बहुकालिकसङ्कल्पो गृहीतश्च पुरा यदि।
सूतके मृतके चैव व्रतं तन्नैव दुष्यति॥

एतत्काम्यव्रतपरम्। नित्यं त्वनारब्धमपि कार्यमिति गौडाः। मदनरत्ने-

---

इत्युक्तेः। *लोतकं-(१)लूतासंपर्कजः स्फोटभेदः। *सूतिकादिरिति। आदिना रजस्वलाग्रहः। सूतिकापदं विंशत्यादिदिनपर्यन्तपरम्। *प्रयतेति। (२)प्रयता तु स्वयं कुर्यादित्यर्थः। *आरम्भस्त्विति। स्वस्याशुद्धेः, तत्र प्रातिनिध्यभावाच्च। अत्राधिकः पाठः- "तदाह-शुद्धितत्त्वे विष्णुः। 'बहुकालिकसङ्कल्पो गृहीतश्च पुरा

---

(१) लूता—तन्तुवायो जन्तुविशेषस्तन्मूत्रसंपर्कजन्यः स्फोटभेद इत्यर्थः।

पूर्वसङ्कल्पितं यच्च व्रतं सुनियतव्रतैः ।
तत्कर्तव्यं नरैः शुद्धं *दानार्चनविवर्जितम् ॥

माधवीये कौर्मे—

काम्योपवासे प्रक्रान्ते त्वन्तरा मृतसूतके ।
तत्र काम्यव्रतं कुर्याद्दानार्चनविवर्जितम् ॥ इति ।

एतेन स्वाङ्गेऽधिकारात् व्रताङ्गदेवपूजादि कार्यमिति वर्धमानोक्तिः परास्ता । *प्रारब्धं पूजादि कार्यमेव । नवरात्रे तु तत्रैव विशेषं वक्ष्यामः । *एवं रजस्वलाऽपि ।

यत्तु सत्यव्रतः—

यदि । सूतके मृतके चैव व्रतं तन्नैव दुष्यति' । एतत्काम्यव्रतपरम् । नित्यं त्वनारब्धमपि कार्यमिति गौडाः" इति । अथ कण्ठतो गौडमतमाह—एतदिति । अत्र नित्यं शिवरात्र्युपवासापत्तेरि-त्यरुचिः । दानेति । अनन्यसाध्यजपहोमाद्युपलक्षणम् । *प्रारब्धं पूजादीति । 'न व्रतिनां व्रते'इति विष्णूक्तेः 'पूजामन्येन कारयेत्' इति निषेधस्य प्रारब्धपूजाशेषपरत्वासम्भवात् । तत्र दानं सूतकान्ते कार्यमिति वक्ष्यति । अर्चनं त्वन्येनैव कारणीयम् ।

सूतके तु नरः स्नात्वा प्रणम्य शिरसा हरिम् ।

इति तु स्वयं पूजां विनाऽशनाकरणव्रतपरम् । "प्रणम्य मनसा हरिम्"इति पाठे कायिक्याः पूजाया अन्येनैव कर्त्तव्यत्वार्थम्(१) । पठन्ति च

सूतकात्प्राक् समारब्धमनेकाहं तु यद् व्रतम् ।
कायिकं तत्तु कुर्वीत, न तु दानार्चनं जपम् ॥
सूतकादे तु यत्किञ्चिद्दानाद्यन्तरितं भवेत् ।
सूतकानन्तरे त्वह्नि तत्कर्तव्यमतन्द्रितैः ॥ इति ।

न हीदं प्रारब्धपूजाद्यर्द्धत्यागं बोधयति, किं तु दानादेरप्रारम्भम् । 'दानाद्यन्तरितम्'इत्येवोक्तेः । यत्र पूजायामन्यः कर्त्ता न लभ्य-

---

(१) मनःपदमिति शेषः ।

प्रारब्धदीर्घतपसां नारीणां यद्रजो भवेत् ।
न तत्रापि व्रतस्य स्यादुपरोधः कदाचन ॥ इति,

तत् *प्रतिनिधिना कारयेदित्येतत्परम् । तदुक्तं मदनरत्ने मात्स्ये-

अन्तरा तु रजोयोगे पूजामन्येन कारयेत् । इति ।

प्रतिनिधयश्च निर्णयामृते पैठीनसिः—

भार्या पत्युर्व्रतं कुर्याद्भार्यायाश्च पतिर्व्रतम् ।
असामर्थ्ये परस्ताभ्यां व्रतभङ्गो न जायते ॥

स्कान्देऽपि—

पुत्रं वा विनयोपेतं भगिनीं भ्रातरं तथा ।
एषामभाव एवान्यं ब्राह्मणं वा नियोजयेत् ॥

कात्यायनः-

पितृमातृभ्रातृपतिगुर्वर्थे च विशेषतः ।
उपवासं प्रकुर्वाणः *पुण्यं शतगुणं लभेत् ॥
मातामहादीनुद्दिश्य एकादश्यामुपोषणे ।

ते, कर्त्रन्तरेण दुष्करश्च पूजाविशेषस्तत्र सूतकान्ते इत्यर्थः । *एवमिति । दानादिकमन्ते कुर्यात्, इतरत्स्वयं कारयेदित्यर्थः । *प्रतिनिधिनेति । यद्यपीदं दीर्घकालव्यापिमासोपवासादावेव एकविधिविषये प्रवर्त्तते इति प्रतीयते, तथापि वर्षादिपर्यन्तमभ्यासेन फलसाधनेष्वपि योजयितुं शक्यत्वात्तत्रापि प्रवर्त्तते इति भावः । *पुण्यमिति । अगृहीतव्रतः प्रतिनिधिरित्यादिः ।

कर्त्ता शतगुणं पुण्यं प्राप्नोत्यत्र न संशयः ।
यमुद्दिश्य कृतं सोऽपि सम्पूर्णं फलमाप्नुयात् ॥

इत्युक्तेः । गृहीतव्रतस्य तु तस्य स्वोपवासफलमपि ।

उपवासफलं ताभ्यां समग्रं समवाप्यते ।

इत्युक्तेः । अनयोश्च दक्षिणा न देया पुण्यप्राप्तेः सत्त्वात् । 'पितृमातृस्वसृ'इत्याद्युपक्रम्य—

कृते ते तु फलं विप्राः समग्रं समवाप्नुयुः ॥

मदनरत्ने प्रभासखण्डे—

भर्ता पुत्रः पुरोधाश्च भ्राता पत्नी सखाऽपि च ।
यात्रायां धर्मकार्येषु जायन्ते प्रतिहस्तकाः ॥
एभिः कृतं महादेवि स्वयमेव कृतं भवेत् ।

तत्रैव वायवीये—

स्वयं कर्तुमशक्तश्चेत्कारयीत पुरोधसा ।

इदं च सर्ववर्णसाधारणम् । अविशेषात् । यत्तु कश्चिन्महोक्ष आह 'शूद्रस्य ब्राह्मणादिरेव प्रतिनिधिरुक्तो न शूद्रः ।

जपस्तपस्तीर्थसेवा प्रव्रज्या मन्त्रसाधनम् ।
विप्रैः संपादितं यस्य संपन्नं तस्य तत्फलम् ॥

इति मरीचिवचनात्' इति, तत्तुच्छम् । प्रव्रज्यादीनां शूद्रेऽसंभवात्, 'विशये प्रायदर्शनात्' इति न्यायेनास्य ब्राह्मणादिगोचरत्वात् । यदपि

दक्षिणा नात्र दातव्या शुश्रूषा विहिता हि सा ।

इति वचनाच्च । अत्र कनिष्ठस्यादेः कन्यादेः पुत्रादेश्च ज्येष्ठभ्रात्रादिः प्रतिनिधिर्भवत्येव भार्यायाः पतिरिव । तत्र क्वापि न दक्षिणा । 'शुश्रूषा विहिता हि सा' इति हेतुनिगदात् । यत्तु 'स्वयं कर्तुमशक्तश्चेत्' इत्युपक्रम्य

हिरण्यं दक्षिणां दद्यात्स्वशक्त्या चानुरूपतः ।

इति पुरोधसे दक्षिणादानमुक्तं, तत् तदर्थिने द्रष्टव्यम् । *विशये इति । विशये संशये प्रायः पदान्तरसमभिव्याहारस्तस्य दर्शनान्नियामकत्वोपगमादित्यर्थः(१) । तथा च प्रव्रज्यासाहचर्येण ब्राह्म-

(१) अग्निहोत्रदोहाधिकारे "वत्समालभेत" इति श्रुतम् । तत्र किमनेन वाक्येनाग्निहोत्राङ्गतया पशुयागो विधीयते उत पशुस्पर्शमात्रमिति संशयः । अत्रोच्यते-वत्सालम्भो यजिकर्म प्राणिद्रव्य-

उपवासो व्रतं होमस्तीर्थस्नानजपादिकम् ।

णाधिकारिकप्रातिनिध्यमेव तद्विषय इति भावः । *होम इति ।

स्त्रीणां होमो न दातव्यः पञ्चगव्यं तथैव च ।

इति (१)ब्रह्मकूर्चहोमनिषेधोऽपि साक्षादेव । विप्रद्वारा स्त्रीशूद्रयोरेत-

---

कालम्भत्वात् वायव्यवदित्यनुमानेन यागत्वाध्यवसाये याग एव वत्सालम्भ इति । यदि च यागस्य द्रव्यदेवतास्वरूपत्वेन वायव्यादिवदत्र देवतासंयोगाभावान्न यागत्वाध्यवसायः । न च "आज्यं द्रव्यमनादेशे देवता मान्त्रवर्णिकी" इति "पूषासीति वत्समुपसृजति" इति वत्सालम्भे 'पूषासि' इति-मन्त्रविधानात्तत्रत्यपूषदेवतायाः प्रकृते संयोगोऽस्त्येवेति वाच्यम् । उपसृजतेः समीपधारणार्थकतयाऽऽलम्भार्थकत्वाभावेन तेन वाक्येनोक्तमन्त्रस्य वत्सालम्भे विनियोगस्य विधातुमशक्यत्वात् । असिशब्दसामानाधिकरण्येन पुंल्लिङ्गेन च पूषशब्दस्य वत्सपरतया देवतापरत्वाभावाच्च इत्युच्यते, तथापि "वायव्यं श्वेतमालभेत भूतिकामः" इत्यत्रालभतेर्यागार्थत्वावधारणे नात्रापि प्राणिकर्मतया प्रयुज्यमानस्याविशेषात्पूर्वं यागार्थे तस्यावधारिते चोदकेनाग्नीषोमीयस्य विध्यन्तातिदेशाद्देवतालाभात्सिद्धे यागत्वाध्यवसाय इति पूर्वपक्षे सिद्धान्तसूत्रम् "विशये प्रायदर्शनात्" (जै० सू० २-३-६-१६) । विशये-संशये, यागविधिः संस्कारविधिर्वेति संशये प्राये-दोहनादिसंस्कारप्रकरणे दर्शनात्-पाठात् संस्कारविधित्वमेवेत्यर्थः । अयं भावः "वायव्यमालभेत" इत्यत्र यागार्थतया "अध्वर्युमालभेत" इत्यत्र स्पर्शार्थतया च दृष्टस्य आलभतेः प्रकरणात् स्पर्शार्थकत्वमेव । न चोक्तानुमानेन यागार्थत्वाध्यवसायः । सामान्यतो दृष्टानुमानस्य वैदिकार्थे प्रवृत्त्यसम्भवात्, "अध्वर्युमालभेत" इत्यत्र व्यभिचाराच्च । न च स्पर्शो दोहनबलाद् "वत्समुपावसृजति" इत्युपावसर्जनबलाद्वा सिद्ध एवेति तद्विधानानर्थक्यमिति वाच्यम् । उक्तवाक्येन चाटुकरणात्मकस्पर्शविशेषलक्षणसंस्कारविधानात्तस्य चाप्राप्तेरिति वत्सालम्भस्तत्संस्कार एवेति सिद्धान्तः ।

(१) ब्रह्मकूर्चहोमः—पञ्चगव्यहोमः । स च "सप्तावरास्तु ये दर्भा अच्छिन्नाग्राः शुकत्विषः । एतैरुद्धृत्य होतव्यं पञ्चगव्यं यथाविधि" । तत इत्यादिनेतिकर्तव्यताविशिष्टः पराशरस्मृतावेकादशाध्याये स्पष्ट इति एवावगन्तव्यः । पञ्चगव्यद्रव्याण्यपि "गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् । निर्दिष्टं पञ्चगव्यं तु पवित्रं पापशोधनम्" इति तत्रैव स्पष्टानि ।

इति पूर्वार्धस्तदापि स एव दोषः ।

"*स्त्रीशूद्रपतनानि षट्"इति(१) मानवीये जपनिषेधात् ।

वचनेन होमोक्तेरिति केचित् । द्विजस्त्रीणां पञ्चगव्यविकल्पः ।

स्त्रीशूद्रस्य तु शुद्ध्यर्थं प्राजापत्यं समाचरेत् ।
पञ्चगव्यं न कुर्वीत स्नात्वा पीत्वा शुचिर्भवेत् ॥

इति पराशरोक्तेः । उत्तरार्द्धे च स्त्रीमात्रान्वयो न शूद्रस्य(२) ।

पञ्चगव्यं पिबेत् शूद्रो ब्राह्मणस्तु सुरां पिबेत् ।
उभौ तौ पापकर्माणौ पूयाख्ये नरके वसेत् ॥

इति निषेधात् ।

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
पञ्चगव्यं पिबेदेतत् श्वपाकमपि शोधयेत् ॥

इति तु यस्य पञ्चगव्येऽधिकारः तत्परं, न त्वपूर्वाधिकारं बोधयति । 'श्वपाकम्'इत्यर्थवादात्(३) । *स्त्रीशूद्रेति ।

जपस्तपस्तीर्थयात्रा प्रव्रज्या मन्त्रसाधनम् ।
देवताराधनं चेति स्त्रीशूद्रपतनानि षट् ॥ इति ।

---

(१) अत्र यद्यपि लिखितपुस्तकेषु समग्रः श्लोकोऽयमुपलभ्यते, तथापि टीकायां तस्योपलक्षणादस्माभिर्मूले उपेक्षितः ।

(२) वस्तुतस्तु उत्तरार्द्धे शूद्रस्याप्यन्वयो भवत्येव, तस्य प्रायश्चित्ताङ्गपञ्चगव्यप्राशनेऽधिकारादेतद्वचनेन तदङ्गभूतस्यैव पञ्चगव्यस्य बोधनात् । अत एव "शूद्राणां नोपवासः स्यात् शूद्रो दानेन शुद्ध्यति । ब्रह्मकूर्चमहोरात्रं श्वपाकमपि शोधयेत्" ॥ इति पराशरस्मृतौ—"मृतपञ्चनखात् कूपादत्यन्तोपहतञ्चोदकं पीत्वा ब्राह्मणस्त्रिरात्रमुपवसेत्, द्व्यहं राजन्यः, एकाहं वैश्यः, शूद्रो नक्तं, सर्वे चान्ते पञ्चगव्यं पिबेयुः"इति विष्णुस्मृतौ च शूद्रस्य पञ्चगव्यपानं सङ्गच्छते । अनुपदोक्तवचनं तु स्वतन्त्रपञ्चगव्यपानस्यैव निषेधकं विप्रस्य सुरापानवदिति न तद्विरोध इति बोध्यम् ।

(३) एतत्पञ्चगव्यपानं श्वपाकमपि शोधयेत् किं पुनरन्येषामित्यर्थात् ।

ब्राह्मणो हीनवर्णस्य यः कुर्यात् कर्म किं च न ।
स तां जातिमवाप्नोति इह लोके परत्र च ॥
इति कालहेमाद्रौ मरीचिनिषेधाच्च ।

यद्यपि स्त्रियाः शूद्रस्य च तीर्थयात्रा वर्तते, भारते पुष्करं प्रकृत्य
जन्मप्रभृति यत्पापं स्त्रिया वा पुरुषस्य वा ।
पुष्करे गतमात्रस्य सर्वमेव प्रणश्यति ॥ इति ।
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा राजसत्तम ।
न वियोनिं व्रजन्त्येते स्नात्वा तीर्थे महात्मनः ॥
इति च लिङ्गात्, तथापि सधवायाः स्त्रियः
नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम् ।
पतिं संसेवते या तु तेन स्वर्गे महीयते ॥
नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम् ।
भर्तृशुश्रूषयैवैता लोकानिष्टान् व्रजन्ति हि ॥
इत्यादौ यज्ञादीनामुपलक्षणत्वात्तीर्थयात्रादावपि भर्त्रा विना, पतिशुश्रूषात्यागे च नाधिकारः । विधवायास्तु
बाल्ययौवनवत्या वा वृद्धया वाऽपि योषिता ।
न स्वातन्त्र्येण कर्तव्यं किञ्चित्कार्यं गृहेष्वपि ॥
इति मनूक्तेः,
रक्षेत्कन्यां पिता, (१)विन्नां पतिः, पुत्रास्तु वार्द्धके ।
अभावे ज्ञातयस्तेषां न स्वातन्त्र्यं क्वचित् स्त्रियाः ॥(या० १-८५)
इति याज्ञवल्क्योक्तेश्च पुत्रज्ञात्याद्यनुमतिं विना नाधिकारः । एवं
शूद्रस्तु द्विजशुश्रूषाविरुद्धं धर्ममाचरन् ।
नरके पच्यते तद्वद्वेदश्रवणकीर्तनात् ॥
इति भारतोक्तेः,
निरन्तरं तीर्थसेवा संन्यासो मन्त्रसाधनम् ।
देवताराधनं ध्यानं तेषां पापावहं परम् ॥

(१) पाणिगृहीतीम् ।

*वस्तुनस्तु संपूर्णतापादनमात्रमत्रोच्यत इति प्रति-
निधेः का *वार्तेत्यलम् ।

अत्र विशेषमाह त्रिकाण्डमण्डनः—

*काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके च सः ।
*काम्येऽप्युपक्रमादूर्ध्वं केचित् प्रतिनिधिं विदुः ॥
न स्यात्प्रतिनिधिर्मन्त्रस्वामिदेवाग्निकर्मसु ।
स देशकालयोर्नास्ति नारणेरग्निरेव सा(१) ॥
नापि प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित् ॥

हिरण्यकेशिसूत्रेऽपि 'न स्वामित्वस्य भार्यायाः पुत्र-
इति शातातपोक्तेश्च विप्रसेवाविरोधेन निरन्तरं च तीर्थया-
त्रादौ शूद्रस्य नाधिकारः । एवं सति अनधिकारिस्त्रीशूद्रकृततीर्थ-
सेवायां पातित्यं मनुना बोध्यते । शातातपवाक्ये च "तेषाम्"
इतिशब्देन शूद्राः प्रतिलोमजाश्च परामृश्यन्ते । तेन प्रतिलोमा यथा
धर्महीनास्तथा निरन्तरं तीर्थयात्रापराः शूद्रा इत्यर्थः ।

ब्राह्मणो हीनवर्णस्य यः कुर्यात्कर्म किं च न ।
स तां जातिमवाप्नोति इह लोके परत्र च ॥

इति वाक्यस्य विमर्शात् क्षत्रियादेः प्रतिनिधित्वदा तस्य(२)
सम्पूर्णफलावाप्तिरस्त्येव, विप्रस्य तु दोष इत्यर्थः । एतेन 'शूद्र-
व्रते शूद्रस्य ब्राह्मणादेश्च नाधिकारः । होमानधिकारात् शूद्रस्य ।
दत्तके च नाधिकारः । दत्तकत्वप्रयोजकहोमानधिकारात्' इति
प्रत्युक्तम् । स्पष्टं चैतदग्रे । यत्र शूद्रप्रतिनिधिस्तत्र विप्रेण कथं
सम्पादनमित्यत्राह—*वस्तुनस्त्विति । *वार्तेति । तादृश-
सम्पादनरूपमङ्गमात्रमुपपन्नमेवेति बोध्यते न तु प्रतिनिधिरित्यर्थः ।
*काम्ये इति । सामर्थ्यं परीक्ष्यैव काम्यस्यारम्भादिति भावः । अ-

(१) सा—अरणिः अग्निरेव, तत्स्वरूपोत्पादकत्वात् । अग्नेश्च प्रतिनिधि-
निषेधादित्यर्थः ।

(२) हीनजातीयस्येत्यर्थः ।

स्य देशस्य कालस्याग्नेर्दैवतायाः कर्मणः *शब्दस्य च प्रतिनिधिर्विद्यते' इति(१) ॥

अथ व्रतादिसन्निपाते निर्णयः । तत्र तिथिद्वयसन्निपाते तत्रोक्तं दानहोमादि *कर्मेणानुष्ठेयम्, अविरोधात् । इदं पूर्वारब्धेष्वेव । एकमध्येऽन्यकाम्यकर्मारम्भस्तु न भवत्येव गुणफलादन्ते । "यस्य यज्ञे प्रतते ऽन्तरा यज्ञस्तायते तं यज्ञं निर्ऋतिर्गृह्णाति" इतिराणकधृतश्रुतेः । यज्ञः व्रतादिकर्ममात्रम् । अनेन व्यवधानदोषस्य सर्वत्र साम्यात् । शिष्टास्तु माघकार्त्तिकस्नानादिमध्ये लक्षहोम-तुला-भारतश्रवणाद्याचरन्ति, तन्नित्यमध्येऽस्तु, काम्यमध्ये तु चिन्त्यम् । यत्र तु नक्तैकभक्तादौ विरोधस्तत्र प्राथम्यादेकभक्तं कार्यम् । नक्तं तु परेद्युः, तरा सामर्थ्याभावे त्वाह *कार्येऽर्थाति *शब्दस्य-मन्त्रस्य । *क्रमेणेति । यत्रोपवासद्वयमेकभक्तादिद्वयं वा तत्राग्निस्तन्त्रम् । भिन्नदैवत्यत्वादिना विरुद्धं पृथगहोमायङ्ग सहैव कार्यम् ।

पाकयज्ञान् समासाद्य एकाज्यानेकबर्हिषः ।
एकस्विष्टकृतः कुर्यान्नानापि सति दैवते ॥

इति न्यायात् । इदं पूर्वारब्धेष्वेव । पूर्वारब्धकर्ममध्ये च कर्मारम्भो न भवति । "यस्य यज्ञे प्रतते ऽन्तरा यज्ञस्तायते तं यज्ञं निर्ऋतिर्गृह्णाति" इति श्रुतेः । यज्ञ इति व्रतादिकर्मोपलक्षणम् । अनेन व्यवधानरूपदोषस्य तुल्यत्वात् । तत्रापि गुणफलकमनङ्गमपि

(१) वस्तुतस्तु पिण्डादिकक्रियादौ पुत्रस्य प्रतिनिधिर्भवत्येव । "क्षेत्रजादीन् सुतानेतानेकादश यथोदितान् । पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः ॥" इत्यादिवचनात् । हिरण्यकेशिसूत्रीयनिषेधस्तु "तस्तन्तवे ज्योतिष्मतीं तामाशिषमाशास्ते" इत्याद्याशीराशासने, पितापुत्रीये सामनि "अमुकस्य पिता यजते" इतिवाचने च पुत्रप्रतिनिधिकरणस्य बोध्यः ।

भवत्येव । तत्र "गोदोहनेन पशुकामस्य प्रणयेत्" इत्यादौ पुरुषार्थस्यैव क्रत्वर्थत्वात्(१) ।

यत्तु शिष्टानां माघकार्त्तिकस्नानादिमध्ये लक्षहोम-तुलादान-भारतश्रवणाद्याचरणं, तन्नित्यमध्ये, न तु काम्यमध्ये । वस्तुतस्तु ययोः पुरुषार्थयोर्व्रतादिकर्मणोर्न विरोधस्तयोरेकमध्येऽपरानुष्ठानं युगपदारम्भो वा भवत्येव । यथा काम्यकार्त्तिकादिस्नान-काम्यतकु-व्रतयोः । तत्र सर्वाङ्गोपसंहारेण स्वयं नारम्भद्वयस्य सुकरत्वात् । अन्यत्र च प्रथमोपक्रान्तमेव कार्यं प्राथम्यात्—अनुपसञ्जातविरोधित्वात्(२) ।

(१) दर्शपूर्णमासयोः श्रूयते "चमसेनापः प्रणयेत्, गोदोहनेन पशुकामस्य" इति । अपां प्रणयने यद्यपि गोदोहनं—दोहनपात्रं तेनेत्यर्थः । तत्र गोदोहनस्य क्रतुप्रकरणाम्नातत्वादुत पुरुषार्थत्वमेवेति संशयः । अपांप्रणयनं [illegible] उभयार्थकतया त-त्कृत्या पुरुषार्थत्वावगतेः क्रतूपकारकतया क्रत्वर्थत्वावगतेश्चोभयार्थ-त्वमिति । न चोपकारकत्वकल्पनावकाशः तृतीये निराकृतत्वात् श्रुति-तश्च क्रत्वर्थत्वावगतेः कथं तद्गुणत्वमिति वाच्यम् । उपकारकत्वे सति सर्वपदार्थग्राहिणा प्रयोगविधिना गोदोहनस्य क्रतूपकाराया-व्यवस्थापनतया क्रत्वर्थत्वोपपत्तेः, इति पूर्वपक्षे सिद्धान्तसूत्रम्—"यस्मिन् प्रीतिः पुरुषस्य, तस्य लिप्सार्थलक्षणाऽविभक्तत्वात्" इति (जै० सू० ४-१-२) । यस्मिन्-स्वर्गादावनुभूयमाने पुरुषस्य तृप्तिर्भवति तस्य स्वर्गादिफलस्य लिप्सा अर्थलक्षणा-स्वाभाविकी, फलस्य प्रीत्याऽविभागादित्यर्थः । अयं भावः—यस्मिन् वाक्ये फलश्रुतिस्तस्य पुरुषार्थत्वबोधकत्वमेवेति श्रुत्या पुरुषार्थत्वमेव । न चोपकारकत्वेन प्रयोगविधिना क्रत्वर्थतयाऽप्यस्य विधानात् क्रत्वर्थत्वमपीति । क्रत्वर्थप्रयोगविधिना गोदोहनस्य क्रत्वर्थत्वाविधानात् । पुरुषार्थेनैव गोदोहनेन प्रसङ्गात् क्रतूपकारसिद्धेः । तस्मात् गोदोहनस्य पुरुषार्थत्वमेवेति । एवं च तस्य क्रत्वनङ्गत्वे फलप्रयुक्तैव मध्येऽनुष्ठानम् ।

(२) अयं च न्यायो लघुपूर्वमीमांसाधिकरणकौमुदीपरिशिष्टाधिकरणेषु विस्तरेण प्रतिपादितो मयेति तत एवावगन्तव्यः ।

स्ततिथौ *गौणकाले कार्यम्। *समकालीनविरुद्धव्रतादौ तु 'एकं स्वयं कृत्वाऽन्यद्भार्यादिना कारयेत्' इति माधवः। यत्र तु शिवरात्र्यादौ तिथिमध्ये पारणयाऽह्नि भोजनं प्राप्तम्,

भूताष्टम्योर्दिवा भुक्त्वा रात्रौ भुक्त्वा च पर्वणि।
एकादश्यामहोरात्रं भुक्त्वा चान्द्रायणं चरेत्॥

इति तन्निषेधश्च, तत्र पारणाया वैधत्वाद्दिवैव भोजनम्। निषेधस्तु रागप्राप्तभोजनविषयः। एवमष्टम्यादिनक्तव्रते संक्रान्त्यादौ रवौ संकष्टचतुर्थ्यां च रात्रौ भोजनम्। यत्र त्वष्टम्यादौ दिवा भुजिनिषेधः, संक्रमे च रात्राविति निषेधद्वयं तत्रोपवास एव कार्यः। यद्यपि पुत्रिण उपवासोऽपि निषिद्धस्तथापि-

उपवासनिषेधे तु भक्ष्यं किंचित्प्रकल्पयेत्।

इति वचनात्किंचिद्भक्षयित्वोपवासः कार्यः। चान्द्रायणमध्ये एकादश्यादौ तु ग्राससंख्यानियमेन भोजनं कार्यमेव। चान्द्रायणस्य काम्यत्वेन नित्यबाधकत्वात्। *अबाधेन गत्यसंभवाच्च। एकादश्यामेकान्तरोपवासादिपारणायां जलपारणां कृत्वोपवसेत्। "आ-

---

*गौणकाले-गौणकालसम्भवे। कालस्यात्यन्तबाधाभावादिति शेषः। तदसम्भवे त्वाह—*समेति। एतेन

तिथिद्वयोदितं कर्म तद् व्रतं पृथगारभेत्।
तिथ्योर्वेधे तु स्नानादि सकृदाह्निकमाचरेत्॥

इति मरीचिवाक्यं व्याख्यातम्। पृथगाचरेदिति पाठे एकं स्वयम्, अन्यद्भार्यादिनेत्यर्थः। नैमित्तिकं चान्द्रायणादि संभूयाऽऽह—*अबाधेनेति। चान्द्रायणादिविषयेषु चन्द्रोदयकाले ग्राससङ्ख्यावृद्धि-

पो वा अशितमनशितं च" इति श्रुतेः । एवं *प्रादृष्ट्यां मासोपवासश्राद्धप्रदोषादिषु ज्ञेयम् । एवं *काम्यनैमित्तिकनित्यत्वादिकृतं बलाबलं स्वयमूह्यमिति दिक् ॥ इति कमलाकरभट्टकृते निर्णयसिन्धौ व्रतपरिभाषा समाप्ता ॥

अथ प्रतिपदादिनिर्णयः । शुक्ला प्रतिपत् अपराह्णव्यापित्वे पूर्वा ग्राह्या । *युग्मवाक्यात् ।

*प्रतिपत्संमुखी कार्या या भवेदापराह्णिकी ।

ह्रासवच्छुक्लकृष्णपक्षोभयकाम्यविशिष्टभोजनविधेकत्वगमात् । *प्रादृष्ट्यामिति । प्रादृष्ट्यां प्रातः पारणा, मासोपवासे उपवासः, श्राद्धादौ सायाह्नभोजनादि, तत्र पारणाभावः कार्यः । *काम्येति । यत्र काम्ये कृते नित्यनैमित्तिकयोरर्थतः सिद्धिस्तत्र काम्यं बलीय इत्यर्थः ।

*युग्मेति । 'प्रतिपत्सम्मुखी कार्या' इत्यादि । नन्वेवं सायाह्नमात्रव्याप्ताऽपि पूर्वविद्धा भवतीति किमपराह्णव्याप्त्येत्यत आह *प्रतिपदिति । विवृतं च संमुखीत्वं

संमुखी नाम सायाह्नव्यापिनी दृश्यते यदा ।

इति पूर्वार्द्धेन । इदं च प्रतिपदः प्राप्ते पूर्वविद्धत्वरूपे सांमुख्ये आपराह्णिकत्वरूपं तद्विशेषं विधत्ते, प्रातःकालिके प्रधानाङ्गनिर्वापे प्रातःकालसामान्ये प्राप्ते "पुरा वाचः प्रवदितोर्निर्वपेत्"इति तद्विशेषविधिवत्, नत्वापराह्णिक्याः सांमुख्यं गौरवात् । यत्त्विदमापराह्णिकपित्र्यविषयमिति, तन्न ।

प्रतिपत्सैव विज्ञेया या भवेदापराह्णिकी ।
दैवकर्म तया ज्ञेयं पित्र्यं च मनुरब्रवीत् ॥

इति माधवीयवचने दैवकर्मपदस्य एकभक्त-नक्त-प्रतिपदिष्टीनां पृथङ्निर्णयसत्त्वेन उपवासपरत्वात् । पित्र्यं—मृताहश्राद्धम् । एको-

इति स्कान्दोक्तेः । *शुक्ला स्यात्प्रतिपत्तिथिः प्रथमतश्चेत्साऽपराह्णे भवेत्' इति दीपिकोक्तेश्च । अपराह्णश्च पञ्चधा भक्ते दिने चतुर्थो भागः । *तदभावे सायाह्नव्यापिनी ग्राह्या ।

तदभावे तु सायाह्नव्यापिनी परिगृह्यताम् ।

इति माधवोक्तेः । कृष्णा तु परा* । कृष्णा तूत्तरतोऽखिला' इति दीपिकोक्तेः । *कृष्णाऽपि पूर्वेत्यनन्तभट्टाः । सर्वतिथिषु वर्ज्यान्युक्तानि मुहूर्तदीपिकायाम्-

दिष्टादेः "आमश्राद्धं तु" इत्यादिना विशिष्यकालोक्तेः । *शुक्लेति । दिनान्तरवदेवापराह्णिकत्वे प्राप्ते पुनर्वचनं प्रतिपद्योक्तापराह्णस्पर्शेऽपि पूर्वदिनग्राह्यत्वार्थमित्यभिमानः । अत्रापराह्णव्याप्तेरनिर्णायकत्वापत्तिररुचिः । *तदभावे इति । कथंचित्पूर्वदिनान्तराये परेऽह्नि भवत्येव शैथिल्यापत्त्यान्याय्यत्वात् । *परेति । "प्रतिपत्सद्वितीया स्यात्" इत्यस्य कृष्णपक्षे प्रवृत्तेः । *कृष्णाऽपीति ।

प्रतिपत् पञ्चमी चैव उपोष्या पूर्वसंयुता ।

इतिजाबाल्युक्तेः,

पञ्चमी सप्तमी चैव दशमी च त्रयोदशी ।
प्रतिपन्नवमी चैव कर्तव्या संमुखी तिथिः ॥

इतिपैठीनस्युक्तेश्च,

प्रतिपत्पञ्चमी चैव सावित्रीभूतपूर्णिमा ।
नवमी दशमी चैव नोपोष्याः परसंयुताः ॥

इति ब्रह्मवैवर्त्ते उपवासे परविद्धानिषेधाच्च । 'उदये तूपवासस्य' इति सामान्यवचनं तु बाध्यते । 'प्रतिपत्सद्वितीया स्यात्' इत्यापस्तम्बवाक्यं तु उपवासेतरदैवकर्मविषयं सामान्यवाक्यस्यास्योपवासविषयैः पूर्ववाक्यैः संकोचात्, उपवासेऽप्यनापराह्णिकप्रतिपद्विषयं च । उपवासेतरदैवकर्मसु शुक्ला पूर्वविद्धा ग्राह्या । 'प्रतिपच्चाप्यमावास्या' इति युग्मवाक्यात् । सा तु पूर्ववदापराह्णिकी । तदभावे

सूत्रैव । 'प्रतिपन्सद्वितीया स्यात्'इत्युक्तेः । इदं च वचनं सामान्य-
विषयत्वाद् विशेषविषयेण युग्मवाक्येनापराह्णिकपूर्वविद्धशुक्लप्रति-
पद्विषये बाधितमपि युग्मवाक्यानिर्णयपक्षेषु प्रवर्तते । "बाधकाभावे
वाक्यस्य निरवकाशत्वात्" इति न्यायात् । अत एव तादृशदैवकर्म-
सु कृष्णोत्तरविद्धा ग्राह्या पूर्वोक्तसामान्यवचनादिति परिष्कुर्वन्ति ।
अत्रेदमकिंचित्करम्—अस्तु उपवासेतरदैवकर्मणि भवदुक्तमेव, उपवा-
से तु कथं पूर्वा ?, तद्विधायकानां शुक्लपक्षपरतया संकोचसम्भवात्,
'प्रतिपत्सद्वितीया' इत्यस्य सामान्यतः कृष्णपक्षपरत्वादिति । उपवा-
सश्च सर्वतिथिषु नारदेनोक्तः ।

शुक्लान् वा यदि वा कृष्णान् प्रतिपत्प्रमुखांस्तिथीन् ।
उपोष्यैव बलिं दत्त्वा विधिना चापरे दिने ॥
ब्राह्मणान्भोजयित्वा तु सर्वपापैः प्रमुच्यते । इति ।

उपवासोत्तरदिने च पारणं कार्यं, तच्च भोजनम् ।

उपवासेषु सर्वेषु पूर्वाह्णे पारणं भवेत् ।
अन्यथा तु फलस्यार्द्धं धर्ममेवोपसर्पति ॥

इतिदेवलोक्तेः । धर्मो—यमः । पारणं कर्मसमाप्तिः, अभोजना-
त्मकोपवाससमाप्तिश्च भोजनमेव । न च रागप्राप्तं भोजनमनूद्य पूर्वा-
ह्णमात्रं विधीयताम् । शास्त्रीयकर्मसमाप्तिरूपतयापनादिवच्छास्त्रीयत्वाव-
श्यंभावात् । "भोक्ष्येऽहं पुण्डरीकाक्ष" इति सङ्कल्पविषयत्वादुपवासान-
रूपप्रतिनिधिविधानाच्च । तच्च पारणं तद्दिने उपोष्य तिथ्यनुवृत्तौ
दिवा तिथ्यन्तप्रतीक्षया भोजनकालश्चेल्लभ्यते तदा तिथ्यन्ते कार्यम् ।

पूर्वविद्धासु तिथिषु भेषु च श्रवणं विना ।
उपोष्य विधिवत्कुर्यात्तत्तदन्ते च पारणम् ॥

इति निगमवचनात् । यदा दिवा तादृशः पारणकालो न
लभ्यते, तदा तिथ्यन्तो न प्रतीक्ष्यः, किं तु दिवैव पारणं कार्यम् ।

सर्वेष्वेवोपवासेषु दिवा पारणमिष्यते ।
अन्यथा पुण्यहानिः स्यादृते धारणपारणम् ॥

कूष्माण्डं (१)बृहतीफलानि लवणं वर्ज्यं तिलाम्लं तथा
तैलं चामलकं *दिवं प्रवसता शीर्षं कपालान्त्रकम्।
निष्पावांश्च मसूरिकान् फलमथो वृन्ताकसंज्ञं मधु
द्यूतं स्त्रीगमनं क्रमात्प्रतिपदादिष्वेवमा षोडश ॥

शीर्ष-नारिकेलम्। कपालम्-अलाबु। अन्त्रं-पटोलम्।
भूपालः-

कूष्माण्डं बृहतीं क्षारं *मूलकं पनसं फलम्।
धात्री शिरः कपालान्त्रं नखचर्मतिलानि* च ॥
क्षुरकर्माङ्गनासेवां प्रतिपत्प्रभृति त्यजेत् ॥

नखं-*शिम्बी। चर्म-मसूरिका ॥
'द्वितीया तु *कृष्णा पूर्वा, शुक्लोत्तरा' इति हेमाद्रिः।

इति ब्रह्मवैवर्त्तात्। धारणमाहारं विना शरीरस्य, तदुत्तरदिने च पारणं-तत् चतुर्थकालभोजनविधिना विहित, तद्विहायेत्यर्थः।

न रात्रौ पारणं कुर्यादृते वै रोहिणीव्रतात्।
तत्र निश्यपि कुर्वीत वर्जयित्वा महानिशाम् ॥

इति भविष्योत्तरे रात्रिपारणनिषेधाच्च।

यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणम्।

इति वाक्यं तु निर्मूलमिति निर्णयकृतः। *दिवं प्रवसता-स्वर्गेच्छुना। *मूलकं-गूलकमिति पाठे शाकभेदः। *तिलाः-जर्तिलाः, प्रसिद्धतिला वा। *शिम्बी-तदुद्भवा निष्पावादयः। *कृष्णेति। "द्वितीया प्रतिपद्युता" इत्यापस्तम्बवाक्यं "युग्माग्नि" इति युग्मवाक्यं चानयोः शुक्लकृष्णवाक्यं च व्यवस्थापकम्। नन्वेवं सर्वकर्मसु व्यवस्थासिद्धौ

तृतीयैकादशी षष्ठी तथा चैवाष्टमी तिथिः।
वेधादधस्ताद्धन्युक्ता उपवासे तिथीस्त्विमाः ॥

---

(१) 'रिङ्गणी' इति महाराष्ट्रभाषायां ख्यातानीत्यर्थः।

'कृष्णा द्वितीयाऽऽदिमा। पूर्वाह्णे यदि सा मिता तु परतः सर्वा' इति दीपिकोक्तेः। माधवानन्तभट्टमते तु* सर्वापि द्वितीया परा। तथा च माधवः-

पूर्वेद्युरस्तमी प्रातः परेद्युस्त्रिमुहूर्तगा।
सा द्वितीया परोपोष्या पूर्वविद्धा ततोऽन्यथा॥ इति।

इति उपवास एव तृतीयाविद्धद्वितीयानिषेधः,

एकादश्यष्टमी षष्ठी द्वितीया च चतुर्दशी।
त्रयोदशी अमावास्या उपोष्याः स्युः परान्विताः॥

इति तत्रैव तद्विधिश्च इत्यर्थः, तयोरपि शुक्लकृष्णपक्षयोर्व्यवस्थितत्वादिति चेन्न। सामान्यतः सर्वकर्मसु व्यवस्थाया उपवासे निषेधेन बाधो मा प्रसाङ्क्षीदिति रीत्याऽर्थवत्त्वात्। एतेन प्रतिपद्विद्धत्वं यमद्वितीयादिग्रन्थविषयमित्यपास्तं, मानाभावात्।

*मते स्थिवाति। तुनाऽरुचिः। सा च—

प्रतिपत्संमुखी कार्या या भवेदापराह्णिकी।
पौर्वाह्णिकी च कर्त्तव्या द्वितीया तादृशी विभो॥

इति स्कान्दे तादृशीति दृष्टान्तेन यथा प्रतिपत् शुक्ला पूर्वा, तथा द्वितीया शुक्लोत्तरेत्यस्य, यथा कृष्णा प्रतिपदुत्तरा तथा कृष्णा द्वितीया पूर्वेत्यस्यार्थस्य लाभात्, न तु प्रतिपत् शुक्लकृष्णभेदेन द्वितीया तु वेधभेदेनेति। वैषम्यात्। विवेकतत्त्वकृतस्तु या कृष्णद्वितीयोपवासेऽन्यत्र वा पूर्वविद्धोक्ता, सा-पूर्वदिने चेत्पूर्वाह्णव्याप्ता भवति, तदैव। नो चेत्परैव।

प्रतिपत्संमुखी कार्या या भवेदापराह्णिकी।
पौर्वाह्णिकी च कर्तव्या द्वितीयापि च तादृशी॥

इति स्कान्दात्। तादृशी—संमुखी पूर्वविद्धेत्यर्थः। पूर्वाह्णस्तु अह्नः पूर्वो भाग इति योगेऽपि न द्वेधाभक्तदिनाद्यभागः। तथा सति तत्रैवापरोऽह्न इति योगेनापराह्णो द्वेधाभक्तदिनान्त्यभाग एव स्यात्।

तृतीया तु सर्वमते. रम्भाव्यतिरिक्ता परैव । ते-
न युग्मवाक्यं रम्भाव्रतविषयम् ।

रम्भाख्यां वर्जयित्वा तु तृतीयां द्विजसत्तम ।
अन्येषु *सर्वकार्येषु गणयुक्ता प्रशस्यते ॥

इति ब्रह्मवैवर्तात् । *गौरीव्रते तु विशेषमाह माधवः-

*मुहूर्तमात्रसत्त्वेऽपि दिने गौरीव्रतं परे ।

न चेष्टापत्तिः । सायाह्नमात्रव्याप्त्या नापराह्णिकत्वानापत्तेः । अनन्तत्र पञ्चधा विभागेनापराह्णवत् पूर्वाह्णः पञ्चधा विभागेन प्रातरात्मकः । तत्र प्रतिष्ठा पूर्वा । इदं च वचनं कृष्णाद्वितीयाविषयमेव । तत्र प्राप्ते पूर्वविद्धत्वे पौर्वाह्णिकत्वरूपविशेषमात्रविधाने तात्पर्यात् । तेन या पूर्वेद्युः सर्वं प्रातःकालं परित्यज्य प्रवृत्ताऽपरेद्युस्त्रिमुहूर्ता तदधिका वा, सा कृष्णाऽपि परैव । पूर्वेद्युः पौर्वाह्णिकत्वाभावात्, त्रिमुहूर्तसत्त्वेन च परविधायकवचनानां प्रवृत्तेः । या तु पूर्वेद्युः सर्वं प्रातःकालं परित्यज्य प्रवृत्ताऽपि परदिने नास्त्येव, त्रिमुहूर्तन्यूना वा, सा पूर्वैव । एवं या शुक्ला द्वितीया परदिने नास्त्येव त्रिमुहूर्तन्यूना वा, साऽपि पूर्वैव, परेद्युस्त्रिमुहूर्तासत्त्वादिति हेमाद्रिमाधवयोर्मतमेकीचक्रुः ।

*सर्वकार्येष्विति ।

एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी ।
अमावास्या तृतीया च ता उपोष्याः परान्विताः ॥

इति चोपवासे(१)ऽवयुत्यानुवादः । गणो-गणेशः, तद्दैवत्या चतुर्थीत्यर्थः । रम्भाख्यां वर्जयित्वेति पर्युदासाद् रम्भासदृशीत्यपि लभ्यते । तत्सादृश्यं च त्रिमुहूर्तवेधवत्त्वमिति गौरीव्रतव्याप्तिः । तत्र कलादिवेधस्यापि परविद्धत्वप्रयोजकत्वादित्यभिप्रायेणाह-*गौरीव्रते त्विति । *मुहूर्तेति कलाकाष्ठादिपरं त्रिमुहूर्त-

---

(१) अवयुत्य-पृथक्कृत्य, तृतीयामित्यर्थः । एकदेशानुवाद इति यावत् ।

शुक्लाधिकायामप्येवं गणयोगप्रशंसनात् ॥ इति ।

चतुर्थ्यपि सर्वमते *गणेशव्रतातिरिक्ता परैव । *युग्मवाक्यात् ।

एकादशी तथा षष्ठी अमावास्या चतुर्थिका ।
उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुताः ॥

इति माधवीये वृद्धवसिष्ठोक्तेश्च । 'नागचतुर्थी तु मध्याह्नव्यापिनी पञ्चमीयुता च ग्राह्या' इति निर्णयामृते माधवीये चोक्तम् ।

युगं मध्यंदिने यत्र तत्रोपोष्य फणीश्वरान् ।
क्षीरेणाप्याय्य पञ्चम्यां पूजयेत्प्रयतो नरः ॥
विषाणि तस्य नश्यन्ति न तान् हिंसन्ति पन्नगाः ।

सद्भावानावश्यकत्वाभिप्रायम् ।

चतुर्थीसहिता या च सा तृतीया फलप्रदा ।
अवैधव्यकरी स्त्रीणां पुत्रपौत्रप्रवर्द्धिनी ॥

इति विधेः अवैधव्यार्थगौरीव्रते एव शेषरूपसाहित्यप्रतीतेः ।

द्वितीयाशेषसंयुक्तां या करोति विमोहिता ।
सा वैधव्यमवाप्नोति प्रवदन्ति मनीषिणः ॥

इति शेषनिषेधवत् । यदि किंचिदपि परेद्युर्न लभ्यते, तदा पूर्वैव ग्राह्या ।

एकादशी तृतीया च षष्ठी चैव त्रयोदशी ।
पूर्वविद्धापि कर्त्तव्या यदि न स्यात्परेऽहनि ॥

इतिवृद्धवसिष्ठात् । व्रतान्तरे च मुहूर्त्तायाश्चतुर्थीयुतायाः ग्रहणं, त्रिमुहूर्त्तद्वितीयाविद्धाया एव वर्जनम् । यदि परेद्युस्त्रिमुहूर्त्ता न लभ्यते तदा विद्धापि पूर्वैव कालानुरोधेन प्रधानत्यागायोगात् । *गणेशव्रतेति–गौरीव्रतोपलक्षणं तदन्यदेवताके उपवासे व्रतान्तरे चेत्यर्थः । *युग्मेति । "युग्मभूतानाम्" इत्यादि । गणेशव्रते

इति माधवीये देवलोक्तेः । युगं-चतुर्थी । पूर्वत्र म-
ध्याह्नव्यापी पूर्वा, अन्यपक्षेषु परैव; पञ्चम्यां पूजोक्तेः ।
*गणेशव्रते तु तृतीयायुतैव चतुर्थी ।

चतुर्थी तु तृतीयायां महापुण्यफलप्रदा ।
कर्तव्या व्रतिभिर्वत्स *गणनाथसुतोषिणी ॥

स्वाह*गणेशव्रते त्विति । *गणनाथेति । "संदिग्धेषु वाक्यशे-
षात्" इति(१) न्यायेनास्य गणेशव्रतपरता । न च तद्गणेशव्रतं

---

(१) "अक्ताः शर्करा उपदधाति" इति श्रूयते, "तेजो वै घृतम्" इति
च । शर्कराः-मृत्तिकामिश्राः क्षुद्रपाषाणाः । तेजः-तेजोजनकमित्य-
र्थः । तत्र तेजःशब्दस्य "आयुर्वै घृतम्" इतिवल्लक्षणास्वीकारात् ।
तत्रायं संशयः-किं विधिवाक्येऽक्तत्वमात्रश्रवणेनाक्तत्वस्य च द्रव-
द्रव्यमात्रसाध्यत्वात् तदाकाङ्क्षायां यस्य कस्यापि घृत-तैल-वसा-
दीनामन्यतमस्य ग्रहणं, किं वाऽर्थवादश्रुतघृतस्यैवेति ?। यद्यप्यञ्जनस्य विधिर्नास्तीति तदुपजीव्योक्तसंशयो नोपपद्यते, तथापि अ-
क्तत्वविशिष्टशर्करोपधानविधानादञ्जनं विना शर्कराणां तत्त्वासम्भवे-
नाञ्जनक्रियाक्षेपात्तद्विधिः कल्प्यते इति न दोषः ।

अत्रोच्यते-यद्यर्थवादानुसारेण तत्साधनघृतमात्रस्य ग्रहणं, तदा
"अक्ताः शर्कराः" इति विधिवाक्येऽक्तशब्दस्य घृताक्ते लक्षणा स्यादिति
विधेरर्थवादापेक्षया निरपेक्षत्वात्, उपक्रमस्थत्वेनाऽसञ्जातविरोधित्वा-
च्च प्राधान्येन गुणानुसारिप्रधानलक्षणाया अन्याय्यत्वाद्विध्यनुसारेण
द्रवद्रव्यमात्रसाध्याञ्जनक्रियाविधौ कल्पिते यस्य कस्यापि द्रवद्रव्यस्य
ग्रहणम् । ततश्च "तेजो वै घृतम्" इत्यत्र विध्यनुसारिणी घृतशब्दस्य
घृताघृतसाधारणाञ्जनसाधकद्रवद्रव्यमात्रे लक्षणेति पूर्वपक्षे—

सिद्धान्तसूत्रम्-"सन्दिग्धेषु वाक्यशेषात्" इति (जै० सू० १-४-२९)
अयमर्थः-विधिषु सन्दिग्धेषु सत्सु अर्थवादरूपवाक्यशेषान्निर्णयः क-
र्तव्य इति । अर्थवादसमर्पिते विशेषे नान्यग्रहणं प्रामाणिकमिति या-
वत् । एवं च विधिवाक्यश्रुताक्तत्वान्यथानुपपत्तिप्रतिपन्नाञ्जनसा-
धनद्रवद्रव्यसामान्यस्याननुष्ठेयतया तद्विशेषाकाङ्क्षायामर्थवादसमर्पि-
तघृतेनैव तस्याः शान्ततया घृतस्यैवोपादानम् । न चैवमुक्तरीत्या
लक्षणापत्तिः । घृतेऽपि द्रवद्रव्यत्वपर्याप्त्या लक्षणाऽनङ्गीकारात् ।
अत एव च न विरोधोऽपि, इति ।

इति हेमाद्रौ ब्रह्मवैवर्तात्। माधवीये तु गणेशव्रते मध्याह्नव्यापिनी मुख्या।

चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते।
मध्याह्नव्यापिनी चेत्स्यात्परतश्चेत्परेऽहनि॥

इति बृहस्पतिवचनात्।

*प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृप।

इति तत्कल्पेऽभिधानाच्च। तेन 'परदिने तद्व्ये परा, अन्यथा *पूर्वा' इत्युक्तम्। *वस्तुतस्तु यत्र भाद्रशुक्लचतुर्थ्यादौ गणेशव्रतविशेषे मध्याह्नपूजोक्ता तद्विषयाण्येव प्रागुक्तवचनानि, न तु सार्वत्रिकाणि। *संकष्टचतुर्थ्यादौ बहूनां कर्मकालानां बाधापत्तेः। तेन

नास्त्येव यत्र तृतीयायुक्ताया प्राशस्त्यं स्यादिति वाच्यम्। दूर्वागणपतिव्रतादेः सत्त्वात्। *चतुर्थीति। अत्र भाद्रशुक्लचतुर्थी वरदचतुर्थीत्युच्यते।

सुरासुरानाप्नुवती गणेशं भक्तिपूर्वकम्।
तस्यां मादाद्वरं यस्मात्तस्माद्वरचतुर्थिका॥

इतिवाक्यात्। तद्व्रत-सिद्धिविनायकव्रतयोर्भेदेऽपि निर्णयो न भिद्यते। अतश्च वरदचतुर्थीप्रकरणस्थप्रमाणमुक्त्वा सिद्धिविनायकव्रतस्थप्रमाणमाह—*प्रातरिति। *पूर्वेति। मातृविद्धा प्राशस्त्यादिति भावः। गणेशव्रतसामान्ये माधवोक्तं निर्णयं तद्विशेषे व्यवस्थापयति—*वस्तुतस्त्विति। *सङ्कष्टेति।

श्रावणे बहुले पक्षे चतुर्दश्यां विधूदये।
तस्मिन् दिने व्रतं कार्यं सङ्कष्टाख्यं सुरेश्वरि॥
गणेशं पूजयित्वा तु चन्द्रायार्घ्यं च दीयते।

इति विधूदयस्य कर्मकालत्वोक्तेः।

चन्द्रोदयव्रते चैव तिथिस्तात्कालिकी स्मृता।

सर्वत्र गणेशव्रते *पूर्वैवेति सिद्धम् । संकष्टचतुर्थी तु चन्द्रोदयव्यापिनी ग्राह्या । दिनद्वये तत्त्वे *मातृयोगस्य सत्त्वात्पूर्वेति केचित् । *अन्ये तु दिने मुहूर्तत्रयादिरूपस्य तृतीयायोगस्याभावात् परदिने माधवोक्तमध्याह्नव्यापिसत्त्वात्संपूर्णत्वाच्च परेत्याचक्षते । दिनद्वये तदभावे तु परैव । *गौरीव्रते तु पूर्वैव* ।

गणेशगौरीबहुलाव्यतिरिक्ताः प्रकीर्तिताः ।
चतुर्थ्यः पञ्चमीविद्धा देवतान्तरयोगतः ॥

इतिवाक्याच्च । अत्रामान्तो मासः । "व्रते शुक्लादिमेव च" इति वचनात् । *मातृयोगस्येति । न च "मातृविद्धा प्रशस्यते" इत्यस्य कथमिह प्रवृत्तिः ?, दिवा त्रिमुहूर्तवेधे हि तत्प्रवर्तते, न तु रात्राविति वाच्यम् ।

अहःसु तिथयः पुण्याः कर्मानुष्ठानतो दिवा ।
नक्तादिव्रतयोगेषु रात्रियोगो विशिष्यते ॥

इति वाक्याद्रात्रिवेधस्यापि रात्रिसाध्यकर्मसु हेमाद्रिमाधवादिभिरुक्तत्वात् । दिनद्वये तदभावे पूर्वैव मातृयुक्तत्वात् । "गणेशगौरीबहुला व्यतिरिक्ताः" इत्यग्रिमवचनेोपलक्षणमेतत् । *अन्ये त्विति । अत्रारुचिः । तथा हि—वेधवचांसि दिवावेधे एव प्रवर्तन्ते इत्यत्र मानाभावः । जन्माष्टम्यादौ रात्रिवेधस्यापि माधवादिभिरुक्तेः । महालक्ष्मीव्रतसमाप्तौ दिनद्वये चन्द्रोदयकालेऽष्टमीसत्त्वे "कृष्णपक्षेऽष्टमी चैव" इति पूर्वविद्धावाक्यस्य रात्रिवेधेऽपि प्रवृत्तेहेमाद्र्यादिभिरुक्तेरिति । *गौरीव्रते इति । तत्र—

माघशुक्लचतुर्थ्यां तु गौरीमाराधयेद्बुध ।

इत्यादिनोक्तम् । *पूर्वैवेति ।

जया च यदि सम्पूर्णा चतुर्थी ह्रसते पुनः ।
जया सैव हि कर्तव्या नागविद्धां न कारयेत् ॥

इति वाक्यस्य कैमुत्यन्यायेन तृतीयायुक्ताया प्राशस्त्यार्थत्वात् ।

इति मदनरत्ने ब्रह्मवैवर्तात् ।(१)

पञ्चमी तु माधवमते सर्वाऽपि पूर्वा ।

चतुर्थीसंयुता कार्या पञ्चमी परया न तु ।
*दैवे कर्मणि पित्र्ये च शुक्लपक्षे तथाऽसिते(२) ॥

इति हारीतोक्तेः । हेमाद्रिमते तु *कृष्णा पूर्वा, सिता परा । 'कृष्णा पूर्वयुता, सिता परयुता स्यात्पञ्चमी' इति दीपिकोक्तेः । *वस्तुतस्तु हारीतोक्तिरुपवासविषया ।

प्रतिपत्पञ्चमी चैव *सावित्री भूतपूर्णिमाः ।

---

*दैवे इति "पूर्वाह्णो वै देवानाम्" इत्यादेरपवादार्थम्, पित्र्य इति दृष्टान्तः । *कृष्णेति । "एकादशी तथा षष्ठी" इति पूर्वविद्धत्वं "पञ्चमी तु प्रकर्तव्या षष्ठ्या युक्ता" इत्युत्तरविद्धत्वं च शुक्लकृष्णवाक्येन(३) व्यवस्थाप्यम् । अथ "शुक्लपक्षे तथाऽसिते" इत्यनेन विरोध इत्यत आह *वस्तुतस्त्विति । *उपवासेति । न च—

प्रायः प्रातरुपोष्या हि तिथिर्दैवफलेप्सुभिः ॥

इत्यनेन विरोधः, तत्रोपवासे उत्तरविद्धाविधानादिति वाच्यम् । प्रायःपदोक्त्या तस्य विधायकत्वाभावात् । *सावित्री—वटसा ।

(१) संकष्टचतुर्थी तु उत्तरैव चन्द्रोदयकाले सत्त्वेऽसत्त्वे वा परैव । माहात्म्यस्य आवृत्त्या चतुर्थीपरत्वात् । माघीयस्य कृष्णाष्टमीचतुर्दश्योर्विधानाभावेन पूर्वविद्धत्वं न चन्द्रोदयात्पूर्वकाले तृतीयायोगेन नाशकत्वं चतुर्थ्या उपलक्षणत्वे प्रमाणाभावात् । अपि तु त्रिमुहूर्तात्मकतृतीयायोगे सत्यपि तृतीयाविद्धत्वम् । तस्मात्परैव चतुर्थी युक्तेति पुरुषार्थचिन्तामणिः ।

(२) असिते—कृष्णे इत्यर्थः ।

(३) शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः ।
कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः ॥
इत्यनेनेत्यर्थः ।

नवमी दशमी चैव नोपोष्याः परसंयुताः ॥

इति ब्रह्मवैवर्तात् । यत्तु-

पञ्चमी तु प्रकर्तव्या षष्ठ्या युक्ता तु नारद ।

इत्यापस्तम्बीयं, तत्स्कन्दव्रतपरम् ।

स्कन्दोपवासे स्वीकार्या पञ्चमी परसंयुता ।

इति वाक्यशेषादिति माधवः । नागपूजाविषय-मित्यनन्तभट्टनिर्णयामृतादयः । चमत्कारचिन्तामणौ—

पञ्चमी नागपूजायां कार्या षष्ठीसमन्विता ।

तस्यां तु तुषिता नागा इतरा सचतुर्थिका ॥ इति ।

*तेन नागपूजादौ परैव । यत्तु मदनरत्नादिषोदासीयोः श्रावणपञ्चम्यतिरिक्ता पूर्वेत्युक्तम् ।

श्रावणे पञ्चमी शुक्ला संप्रोक्ता नागपञ्चमी ।

तां परित्यज्य पञ्चम्यश्चतुर्थीसहिता हिताः ॥

इति संग्रहोक्तेः,—

गणेशस्कन्दयोगाभ्यां क्रमान्नागः शुभाशुभः ।

आरामित्रे तयोः पत्र नागानामाखुबर्हिणौ(१) ॥

इति षट्त्रिंशन्मताच्च श्रावणपञ्चम्यतिरिक्तायां नागपञ्चम्याश्चतुर्थीयुतत्वमुक्तं, तद् *उपवासादिविषयम् । पत्र—वाहने ॥

भूतं—चतुर्दशी । पूर्णिमा—वत्पूर्णिमा । उपवासातिरिक्तव्रते परेति लभ्यते; तदाह *तेनेति । *उपवासादीति । आदिपदं सम्पातायातम्, उपवासपूर्वकपूजाग्रहणार्थं वा । उपवासे प्रधाने निर्णीतायास्तिथेस्तत्सहचरपूजायां ग्राह्यत्वात् । अत्र स्कन्दोपवासे परा कार्या ।

---

(१) चतुर्थीयुक्ता पञ्चमी शुभफलप्रदा, षष्ठीयुक्ता चाशुभफलप्रदा । तयोश्चतुर्थीयुक्तपञ्चम्या नागस्य मित्रमाखुर्वाहनं, षष्ठीयुक्तपञ्चम्याः तच्छत्रुर्मयूरश्च वाहनमित्यर्थः ।

सप्तमी पूर्वैव *युग्मवाक्यात्.

*षष्ठ्या युता सप्तमी च कर्तव्या तात सर्वदा ।

इति स्कान्दाच्च ॥ निर्णयामृते-

षष्ठी च सप्तमी चैव वारश्चांशुमालिनः ।

योगोऽयं पद्मको नाम सूर्यकोटिग्रहैः समः ॥

(१)नागविद्धा न षष्ठी स्यात्पक्षयोरुभयोरपि ।

दैवे कर्मणि तां कुर्यात् पित्र्ये पूर्वेण संयुताम् ॥

इति स्पष्टमपि सौपन्तवं स्पर्यते ।

एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी ।

अमावास्या तृतीया च ता उपोष्याः परान्विताः ॥

इत्यादावुपोष्यग्रहणं व्रतमात्रोपलक्षणम् । "नागो द्वादशनाडीभिः"इति नागवेधः । तेन षण्मुहूर्तन्यूनपञ्चमीयोगे पूर्वैव । तिथिक्षये तु-

एकादशी तृतीया च षष्ठी चैव त्रयोदशी ।

पूर्वविद्धाऽपि कर्त्तव्या यदि न स्यात्परेऽहनि ॥

इति वासिष्ठं स्मर्त्तव्यम् । *युग्मेति"षण्मुन्योः"इत्यादि । *षष्ठ्या युतेति । या पूर्वेद्युः रात्रिमारभ्य परेद्युः तिथिक्षयादष्टमीविद्धा सा,सैव ग्राह्या । गुणानुरोधेन प्रधानलोपस्यान्याय्यत्वात् । अतश्च

नागविद्धा तु या षष्ठी रुद्रविद्धो दिवाकरः ।

कामविद्धो भवेद्विष्णुर्न ग्राह्यास्ते तु नारद ॥

इति निषेधोऽपि तत्र न प्रवर्त्तते । नागः—पञ्चमी । रुद्रः-अष्टमी । दिवाकरः-सप्तमी । कामः-त्रयोदशी । विष्णुः द्वादशी ।

ननु—

षष्ठ्या युता सप्तमी च कर्त्तव्या तात सर्वदा ।

षष्ठी च सप्तमी यत्र तत्र सन्निहितो रविः ॥

इति स्कान्दात्,

---

(१) नागः-पञ्चमी ।

दीपिकोक्तेश्च । *शिवशक्त्युत्सवे च कृष्णाऽप्युत्तरा ।
पक्षद्वयेऽप्युत्तरैव शिवशक्तिमहोत्सवे ।

इति माधवोक्तेः । दिवोदासीये भविष्ये

शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः ।
कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः ॥

इति, तत्तु नेह प्रवर्तते । सामान्यतः प्रसक्तपूर्वोक्तव्यवस्थापकं हि तत्, न चेह तथा प्रसक्तिरस्तीति । नन्वस्तु उपवासे कृष्णाऽप्युत्तरा ।

एकादश्यष्टमी षष्ठी अमावास्या चतुर्थिका ।
उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुताः ॥

इति स्मरणादिति चेन्न । कृष्णाष्टम्याः पूर्वविद्धत्वबोधकोक्तनिगमवाक्यान्ते

उपवासादिकार्येषु एष धर्मः सनातनः ।

इत्याहत्योपवासोक्तेः । न चेदं रुद्रोपवासपरम् ।

रुद्रव्रतेषु सर्वेषु कर्तव्या संमुखी तिथिः ।
अन्येषु व्रतकल्पेषु यथोद्दिष्टामुपावसेत् ॥

इति स्मरणादिति शङ्क्यम् । 'एष धर्मः सनातनः' इत्यनेन सर्वविषयकत्वस्य स्पष्टं प्रतीतेः । रुद्रव्रतादिवाक्ये च व्रतमात्रपरं, न तूपवासमात्रपरमिति समानविषयत्वाभावाच्च तेनोपसंहारसंभव इति भावः । *शिवशक्तीति मिलितशिवशक्तिद्वयस्य पूजोपवासादिः, उत्सवः–व्रतम् ।

अष्टम्या नवमी विद्धा नवम्या चाष्टमी युता ।
अर्द्धनारीश्वरप्राया उमामाहेश्वरी तिथिः ॥
अष्टमीनवमीयुग्मे महोत्साहे महोत्सवः ।
शिवशक्त्योः शिवक्षेत्रे पक्षयोरुभयोरपि ॥

इति पाद्मे विहितः । अत्र शिवस्य शक्तेश्च य उत्सवः पक्षद्वयगतायामष्टम्यां नवम्यां वा विहितः, स नवमीयुताष्टम्यां अष्टमीयुतनवम्यां च कार्य इत्येतावद्विवक्षितं, शिवक्षेत्रे इत्यनुवादः । शिवो-

*यदा यदा सिताष्टम्यां बुधवारो भवेत्क्वचित् ।
तदा तदा हि सा ग्राह्या एकभक्ताशने नृप ॥
*संध्याकाले तथा चैत्रे प्रसुप्ते च जनार्दने ।
बुधाष्टमी न कर्तव्या हन्ति पुण्यं पुराकृतम् ॥

अन्त्यं परं हेमाद्रौ न धृतम् ।
नवमी तु सर्वमते पूर्वा युग्मवाक्यात्,

न कुर्यान्नवमीं तात दशम्या तु कदाचन ।

इति स्कान्दाच्च ।
दशमी तु पूर्वा परा वेति हेमाद्रिः ।

कृष्णा पूर्वोत्तरा शुक्ला दशम्येवं व्यवस्थिता ।

इति माधवः । *वस्तुतस्तु सुकृष्णा नवमीयुतैव ग्राह्या ।

दशमी तु प्रकर्तव्या सदुर्गा द्विजसत्तम ।

इत्यापस्तम्बोक्तेः । यत्तु

तत्रस्य नैव करणात् । शेषोऽर्थवादः । एवं च

उपवासं सप्तम्यां तु यथाद्धन्त्युत्तरं दिनम् ।
पक्षयोरुभयोरेव उपवासविधिः स्मृतः ॥

इति वाक्यं शिवशक्त्युत्सवाभिप्रायम्, अन्योपवासाभिप्रायकत्वा-
सम्भवादिति द्रष्टव्यम् ।

*यदा यदेति । बुधयुक्तायां शुक्लाष्टम्यां बुधाष्टमीव्रतं विधी-
यते, तस्य तदुद्यापनस्य च निरन्तरं व्रतार्के द्रष्टव्यः । *सन्ध्या-
काले इति शुक्लाष्टमीत्वात्परा ग्राह्या । तत्र यदि परदिने बुधवारो
नास्ति पूर्वदिने च सायंकाले नास्ति किं तु सन्ध्याकाले वर्तते,
तत्र प्रधानं कार्यमिति प्राप्तावयं निषेधः पूजापर्याप्तसायंकाले सत्त्वे
बुधाष्टमी कार्या नान्यथेत्येतत्परम् ।

मतान्तरमाह — *वस्तुतस्त्विति । अत्रेदमेकं बीजम् —
युक्ता न दूषिता यस्मादतः सा सर्वतोमुखी ।

संपूर्णा दशमी कार्या पूर्वया परयाऽथ वा ।

इत्याङ्गिरसोक्तेः, तत्तद्वर्गायुक्तालाभे औदयिकी ग्राह्येत्येवं ज्ञेयम् ॥

अथैकादशी । *तत्रैकादश्युपवासो द्वेधा- *निषेधपरिपालनात्मको व्रतरूपश्च । तत्राऽऽद्यः-

न शङ्खेन पिबेत्तोयं न खादेत् *कूर्मसूकरौ ।

एकादश्यां *न भुञ्जीत पक्षयोरुभयोरपि ॥

इति कौर्मदेवलाद्युक्तेः । आग्निपुराणेऽपि-

इति सर्वेषामुक्तयोर्विरोधाभावात् साधनमनयोर्न सङ्गतम् । आपस्तम्बवाक्यं तु कृष्णपक्षपरम् ।

नन्दाविद्धा तु या पूर्णा द्वादशी मकरे स्थिता ।

भृगुणा नष्टचन्द्रा च एता वै निष्फलाः स्मृताः ॥ इति ।

नागविद्धा तु या षष्ठी शिवविद्धा तु सप्तमी ।

दशम्येकादशीविद्धा नोपोष्याः स्युः कथंचन ॥

इति निषेधश्च तथैव । उपवासपदं तूपलक्षणम् ।

उपवासे एकादशीं निर्णेतुमाह- *तत्रेति । *निषेधेति ।

विधेयस्याप्रधानत्वं प्रतिषेधे प्रधानता ।

प्रसज्यप्रतिषेधोऽयं क्रियया सह यत्र नञ् ॥ इति ।

निषेधस्वरूपं निरुक्तितः । *कूर्मसूकरौ—महाराष्ट्राणां 'काग-गे'इति प्रसिद्धः कन्दः कूर्मः । 'गोंडाळू'इति 'कोन'इति वा प्रसिद्धः कन्दः सूकरः । *न भुञ्जीतेति । न च भोजनमभ्यवहारविशेष इति फलादिभक्षणं दुर्वारमिति वाच्यम् । धातोः सकलादनीयार्थत्वात् । अन्यथा कृष्णायां विद्धायां चैकादश्यां व्रतरूपोपवासनिषेधे भोजननिषेधादेव फलादिभक्षणप्राप्तेः

उपवासनिषेधे तु भक्ष्यं किञ्चित्प्रकल्पयेत् ।

इति फलादिभक्षणविधिवैयर्थ्यात् । एवम् "अन्नमाश्रित्य पापानि"

*गृहस्थो ब्रह्मचारी च आहिताग्निस्तथैव च ।
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ॥ इति ।
*न चात्र *पर्युदासेन व्रतविधिः । *तत्तद्व्रतादि-
शब्दाभावात् । व्रतरूपस्तु ब्रह्मवैवर्ते
प्राप्ते हरिदिने सम्यग्विधाय नियमं निशि ।
*दशम्यामुपवासस्य प्रकुर्याद्वैष्णवव्रतम् ॥ इति ।
*इदं च शिवभक्तादीनामपि कार्यम् ।
वैष्णवो वाऽथ शैवो वा कुर्यादेकादशीव्रतम् ।
इति शिवधर्मोक्तेः ।
वैष्णवो वाऽथ शैवो वा सौरोऽप्येतत्समाचरेत् ।

इति निन्दादौ "न पर्वद्वयमाप्नुतः" इत्यादिवन्नञ्शब्दोऽदनीयपर इति । निषेधपालने सर्वेषामधिकारमाह *गृहस्थ इति *न चात्रेति । एकभुक्तकल्पनाल्लाघवादिति शेषः । *पर्युदासः—
विधेयस्य प्रधानत्वं प्रतिषेधेऽप्रधानता ।
पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् ॥
इति रीत्या नञः संकल्पलक्षणया । उत्तरपदेन—भोजनाद्य-धात्वर्थान्यतमार्थकतया । *तत्तदिति । यथा "नेक्षेतोद्यन्त-मादित्यम्" इत्यादौ "तस्य व्रतम्" इत्युपक्रमे व्रतशब्दोऽस्तीति संकल्पे लक्षणा, न चेह तथाऽस्तीत्यर्थः । ननु व्रतविधिमन्तरेण निषेधो नोपपद्यते, तद्व्रतस्यैकवाक्यतया लाघवादिति चेन्न । तथा सति संक्रान्तिरविवारादिषूपवासनिषेधे भोजनस्यैव सम्भवात् किञ्चिद्भक्षणविधानवैयर्थ्यात् । सति तु पृथङ्निषेधे तत्पालनाय प्र-वृत्तस्य निवृत्तेः संकल्पाविनाभावात् । संकल्पे चोपवासनिषेधाति-क्रमशङ्कानिवृत्तये किंचिद्भक्षणविधेरर्थवत्त्वात् ।

*दशम्यां निशि उपवासस्य नियमं विदध्यादित्यन्वयः । व्रते सर्वे-षामधिकारमाह—*इदं चेति । निषेधपालनस्य केवलनित्यत्वा-

इति सौरपुराणात्। *सोऽपि द्वेधा *नित्यः काम्यश्च।

उपोष्यैकादशी नित्यं पक्षयोरुभयोरपि।

इति गारुडोक्तेः,

पक्षे पक्षे च कर्तव्यमेकादश्यामुपोषणम्।

इति नारदोक्तेश्च नित्यता।

यदीच्छेद्विष्णुसायुज्यं श्रियं सन्ततिमात्मनः।

एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि॥

इति कौर्मादिषु फलश्रुतेश्च काम्यता। उभयैकादशीव्रतं गृहस्थातिरिक्तानामेव नित्यम्। गृहस्थस्य तु शुक्लायामेव व्रतं नित्यं, न कृष्णायाम्।

दीप०-*सोऽपीति। व्रतरूपोऽपीत्यर्थः। *नित्य इति। नित्यत्वसाधकानि सङ्ग्रहे—

नित्यं सदा यावदायुर्न कदाचिदतिक्रमेत्।

इत्युक्त्याऽकरणे(१)दोषश्रुतेस्त्यागचोदनात्॥

फलाश्रुतेर्वीप्सया च तन्नित्यमिति कीर्तितम्। इति।

तत्राद्यन्तद्वयं ग्रन्थकारेणोक्तम्(२)। सदाशब्द उक्तः सनत्कुमारसंहितायाम्—

एकादशी सदोपोष्या पक्षयोः शुक्लकृष्णयोः।

यावदायुःशब्दो विष्णुपुराणे—

द्वादशी न प्रमोक्तव्या यावदायुः सुव्रतिभिः।

अतिक्रमनिषेधः कण्वेनोक्तः—

एकादश्यामुपवसेन्न कदाचिदतिक्रमेत्।

विष्णुरपि—

---

(१) अत्र केषुचित्पुस्तकेषु 'इत्युक्त्याऽतिक्रमे' इति पाठः।

(२) नित्यंवीप्सेति द्वयम् 'उपोष्यैकादशी नित्यम्' 'पक्षे पक्षे च कर्तव्यम्' इति वचनद्वयेनोक्तमतः सदेत्यारभ्य फलाश्रुतिपर्यन्तमेव स्पष्टीक्रियते इति भावः।

एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ।
*वनस्थयतिधर्मोऽयं, शुक्लामेव सदा गृही ॥

इति देवलोक्तेः । न चानेन निषेधपालनमेव वनस्थयतिविषयं उपसंह्रियते, न तु व्रतमिति वाच्यम् । अस्य *पर्युदासेन व्रतविधिपरत्वात् । *अन्यथा पूर्वोक्ताग्निपुराणवचने निषेधपालने गृहस्थस्याधिकारोक्त्या विरोधः स्यात् । *निषेधस्य निवृत्तिमात्रफलत्वेन *विशेषा-

---

एकादश्यां न भुञ्जीत कदाचिदपि मानवः । इति ।

अकरणे दोषः सनत्कुमारेणोक्तः —

न करोति यदा मूढ एकादश्यामुपोषणम् ।
स नरो नरकं याति रौरवं तमसावृतम् ॥

अत्यागचोदना विष्णुरहस्ये —

परमापदमापन्नो हर्षे वा समुपस्थिते ।
सूतके मृतके चैव न त्यजेद्द्वादशीव्रतम् ॥

फलश्रुतिः कात्यायनादिवाक्ये —

एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि । इति ।

*वनस्थेति ब्रह्मचारिनिषेधपालनमित्यपि स्फुटम् ।

*पर्युदासः न भुञ्जीतेत्यत्र भोजनाभावसंकल्पार्थकत्वम्(१)।
*अन्यथा—पर्युदासाऽनुपगमे । नन्वग्निपुराणे एकादशीसामान्ये गृहस्थस्याधिकारः प्रतीयते, स च शुक्लायामुपसंह्रियते ।

सामान्यविधिरस्पष्टः संह्रियेत विशेषतः ।

इत्युक्तेः । तथा च वर्णिगृहिवनियतीनां रण्डायाश्च निषेधपालने शुक्ला, गृहिभिन्नानां तु तत्र कृष्णेत्यग्निदेवलवाक्ययोर्निष्टङ्कितार्थ इत्यत्राह—*निषेधस्येति । *विशेषः—अधिकारिविशेषो वनित्वादिः । नन्वेवमपि नञः प्रधानीभूताख्यातान्वये लाघवान्निषेध

---

(१) तेनेति शेषः ।

पुत्रवांश्च सभार्यश्च बन्धुयुक्तस्तथैव च ।
उभयोः पक्षयोः काम्यव्रतं कुर्यात्तु वैष्णवम् ॥
इति नारदोक्तेः । एतत् सर्वं कालादर्शे उक्तम् —
विधवाया वनस्थस्य यतेश्चैकादशीद्वये ।
उपवासो, गृहस्थस्य शुक्लायामेव पुत्रिणः ॥
भुजेर्निषेधः कृष्णायां, स्मार्त्तस्तस्य तनौ व्रते ॥ इति ।
*प्राच्यास्तु वैष्णवगृहस्थानां कृष्णाऽपि नित्या ।
नित्यं भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः ।
*पक्षे पक्षे च कर्त्तव्यमेकादश्यामुपोषणम् ॥
सपुत्रश्च सभार्यश्च स्वजनो भक्तिसंयुतः ।
एकादश्यामुपवसेत् *पक्षयोरुभयोरपि ॥

कृष्णोपोष्येति पूर्वोक्तार्थस्याक्षरारूढत्वं सूचितम् । निषेधपालने गृहिणामधिकारो 'गृहस्थो ब्रह्मचारी च' इत्यनेन दर्शितः । *ने—तव । पूर्वमतेऽरुचिं द्योतयन् स्वसिद्धान्तमाह *प्राच्यास्त्विति । *पक्षे पक्षे चेति व्रतस्य नित्यत्वार्थम् । सपुत्रश्चेत्यादि पुत्रादेरुपवासाधिकारार्थम् । बहुव्रीहिणा च पुत्रवदपुत्रगृहस्थयोर्निषेधोऽपि बाध्यते । अवैष्णवगृहस्थेषु पुत्रवद्गृहस्थनिषेधो दोषाधिक्यार्थः । *पक्षयोरुभयोरपीति कृष्णालाभः ।

यथा शुक्ला तथा कृष्णा यथा कृष्णा तथेतरा ।
तुल्ये ते मन्यते यस्तु स वै वैष्णव उच्यते ॥

इति वैष्णवलक्षणं भगवद्भक्तत्वमेवेत्याविष्कर्तुं विष्णुपरायणैरिति ।

रविवारेऽर्कसंक्रान्त्यामेकादश्यां सितेतरे ।
पारणं चोपवासं च न कुर्यात्पुत्रवान् गृही ॥

इति रविवारादौ पुत्रवद्गृहिण उपवासनिषेधस्तु नेह प्रवर्त्तते । तन्निमित्तोपवासस्येत्युक्तेः । व्यतीपातादावुपवासनिषेधस्तु काम्यो-

इति नारदोक्तेरित्याहुः । *पुत्रशब्दश्चापत्यमात्र-
वचनः । नारायणवृत्तौ—'पुमांस एव मे पुत्रा जायेरन्'
इत्यत्रापत्यमात्रवाचित्वोक्तेः(१) । 'जनयेद्बहुपुत्राणि' इति
लिङ्गात् । 'पौत्री मातामहस्तेन' इति मनूक्तेः । पुत्र्या
अपत्यमित्यर्थे तु "स्त्रीभ्यो ढक्" (पा०सू० ४-१-१२)
इति पौत्रेय इत्यापत्तेः । 'पुमान् पुत्रो जायते' इति च ॥
उपवासनिषेधे विशेषो नारायणेनोक्तः—

पत्रासपर इति । *पुत्रशब्दश्चेति । इत्यापाततः । नारायण-
वृत्त्यादौ विशिष्टवाचिशब्दानां पृथग्विशेषणसमर्पकत्वाद्यभावे विशेष्य-
मात्रपरत्वमिति न्यायादेव तदुक्तेः । अन्यथा 'न कुर्वीत पुत्रवान्
गृही' इत्यादौ पुत्रशब्दः कथमपत्यमात्रवचनः ? 'पौत्री मातामहः'
इत्यत्र च पौत्रो दौहित्रः । पुत्रपदस्य स्त्रीलिङ्गस्य दुहितृवाचित्वात् ।
तथा चामरः —

आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी ।
आहुर्दुहितरं सर्वेऽपत्यं तोकं तयोः समे ॥ इति ।

अत्रात्मजादिशब्दानां पुत्रदुहित्रादिः पृथगर्थो, ऽपत्यादेस्तूभय-
साधारणोऽर्थ इति स्पष्टम् । "जनयेद्बहुपुत्राणि" इत्यनेकान्यपत्या-
नीत्यर्थः । तत्र पुत्रापत्यानामेव पुत्रपदार्थत्वे अजातपुत्रापत्यकजा-
तकन्यकस्य नान्दीदौहित्रदौहित्रादिगामित्वानुशासनबाधापत्तेः । अत्र
चानेकापत्यानि न विधीयन्ते । एकपुत्रस्य दत्तकादिसंपादनाप-
त्तेः । किं तु सकृत् कृते कृतः शास्त्रार्थ इति न्यायो निवर्त्यते । एवं
च एकौरसस्यौरसान्तरवद्दत्तकादेरेकदत्तकस्य वा दत्तकान्तरस-
त्त्वे न शास्त्रविरोधः ।

अपुत्रो मृतपुत्रो वा पुत्रार्थं समुपोष्य च ।

(१) स्वग्रन्थव्याख्यावृत्त्यर्थतया 'पुमांस' इति विशेषणोपादानेन
पुत्रशब्दस्यापत्यमात्रवाचित्वोक्तिरित्यर्थः ।

*उपवासनिषेधे तु भक्ष्यं किंचित्प्रकल्पयेत्।
न दुष्यत्युपवासेन उपवासफलं लभेत्॥

भक्ष्यं च तत्रैवोक्तम्

नक्तं हविष्यान्नमनोदनं वा
फलं तिलाः क्षीरमथाम्बु चाज्यम्।
यत्पञ्चगव्यं यदि वापि वायुः
*प्रशस्तमत्रोत्तरमुत्तरं च॥ इत्यलम्।

तत्र दशमीवेधो द्विधा अरुणोदयवेधः सूर्योदयवेधश्चेति। आद्यो गारुडे

इत्यत्रापुत्रानुपादानं प्रायिकत्वार्थम्। 'एष्टव्या बहवः पुत्राः' इत्यत्राप्येवमेवेति। *उपवासनिषेधे इति। ननु सत्रायणे विश्वजिता सत्रफलमिव(१) किंचिद्भक्षणेनापि व्रतरूपोपवासफलं पापक्षयादिकं प्राप्नोतीत्यर्थः स्यात्। एवं च सत्यव्रतरूपोपवासाभिनिवृत्तिर्दुर्लभेति चेन्न। कृष्णनिद्रादौ भुक्तवतां तादृशोपवासस्यैवाप्राप्तेः, प्राप्तौ वा न दुष्यतीत्यनेन विरोधः, निषिद्धत्वे तदतिक्रमे दोषः स्यात्। किं तु सर्वपुरुषसाधारणः सकलैकादशीसाधारणो यो व्रतादिव्यतिरिक्तो नियमस्तं पालयितुकामस्य 'इति विज्ञाय कुर्वीत' इत्यादिवचनादनुषक्तो निशेषनियमरहितभोजनवर्जनसंकल्परूपव्रतप्राप्तिरूपोपवासनिषेधातिक्रमः शङ्कितोऽपि तन्निवृत्त्यर्थं किंचिद्भक्षणविधिः। तथा चोपवासेन निषेधेऽनुष्ठीयमाने आनुषङ्गिकानि-

(१) "यः सत्रायागुरेत स विश्वजिता यजेत" इति श्रुतौ सत्रसंकल्पपूर्वं तदनुष्ठानप्रवृत्ताप्रवृत्तयोरुभयोरपि विश्वजिद्यागानुष्ठानमावश्यकम्। संकल्पमात्रस्यैव विश्वजित्पूर्वकालिकतायाः क्त्वाप्रत्ययेन प्रतीतेः संकल्पस्य चोभयत्रापि विद्यमानत्वादिति पूर्वपक्षीकृत्य सत्रागोरणस्य निमित्तत्वेन श्रुतत्वात् संकल्पं कृत्वा तदनुष्ठानाभावे प्रायश्चित्तार्थं विश्वजिद्यागो विधीयते इति सिद्धान्तितं जैमिनिना "विश्वजित्त्वप्रवृत्ते भावः कर्मणि स्यात्" इति सूत्रेण (जै० सू० ६-४-३२)। एवं च विश्वजिद्यागेन सत्रसंकल्पजन्यफलस्य सिद्धिरिति स्पष्टम्।

दशमीशेषसंयुक्तो यदि स्यादरुणोदयः ।
नैवोपोष्यं वैष्णवेन तद्दिने नैकादशीव्रतम् ॥ इति ।
अरुणोदयस्वरूपं च माधवीये स्कान्दे—
*उदयात्प्राक् चतस्रस्तु घटिका अरुणोदयः । इति ।
यदपि
उदयात्प्राग्यदा विप्र मुहूर्तद्वयसंयुता ।
संपूर्णैकादशी नाम तत्रैवोपवसेद् गृही ॥
इतिगारुडसौरधर्मादिवचनम्, यच्च भविष्ये—
आदित्योदयवेलायाः प्राङ्मुहूर्तद्वयान्विता ।
एकादशी तु संपूर्णा विद्धाऽन्या परिकीर्तिता ॥
इति, तदप्युपसंहारन्यायेन दण्डचतुष्टयपरमेव ।
हेमाद्रावप्येवम् । *यत्तु ब्रह्मवैवर्ते—
चतस्रो घटिकाः प्रातररुणोदयनिश्चयः ।
चतुष्टयविभागोऽत्र वेधादीनां किलोदितः ॥
अरुणोदयवेधः स्यात्सार्धं तु घटिकात्रयम् ।
अतिवेधो द्विघटिकः प्रभासंदर्शनाद्रवेः ॥
महावेधोऽपि तत्रैव दृश्यतेऽर्को न दृश्यते ।

त्यव्रतात्मकोपवासानुष्ठानेन निषेधातिक्रमप्रसक्तं दोषं न प्राप्नोति । उपवासफलं भोजननिवृत्तिरूपं निषेधफलं च प्रत्यवायपरिहारं लभेदित्युत्तरार्धार्थः । कृष्णाविद्धादिनिषेधानां विद्धादिभिन्नां गृहस्थादिभिर्वोपवसेदिति पर्युदासत्वमते तु तुल्यफलत्वान्निषेधत्वोक्तिसङ्गतिरिति तु बोध्यम् । *प्रहरस्त्रिभिरिति नक्तादेः समुच्चयवारणाय । *उदयादिति । उदयात्प्राक् चतुर्दण्डत्वमरुणोदयशब्दप्रवृत्तिनिमित्तं घटिकाशब्दात् । मुहूर्तद्वयं कश्चिद्दण्डचतुष्टयात् न्यूनं, कश्चित्त्वधिकमिति विरोधः । नित्योपवासवर्ज्यवेधवचोविरोधं शङ्कते—*यत्त्विति । उदयात्प्राक्तनचतुर्दण्डान्तःपातिप्रथमदण्डत्वमरुणोदयत्वम् ।

तुरीयस्तत्र विहितो योगः सूर्योदये बुधैः ॥

इति, तदपि *अत्रयत्वद्वारा ऽरुणोदयवेधनिषेधपरमेवेति माधवीयं मदनरत्नं च । अन्त्यस्तूदयवेधः* ।

*तथान्येऽपि वेधा हेमाद्रौ माधवीये च गारुडे-

उदयात्प्राग् द्विदण्डान्तःपातिप्रथमदण्डान्तर्गतत्वमतिवेधत्वम् । उदयप्रत्यासन्नतत्पूर्वकालत्वं महावेधत्वम् । उदयवत्कालत्वं योगत्वमिति भेदः । *अत्रयत्वेति । अतिवेधादेररुणोदयवेधावयवत्वादरुणोदयवेधत्वमित्यर्थः । *उदयवेध इति ।

अतिवेधादयः सर्वे ये वेधास्तिथिषु स्मृताः ।
सर्वेऽप्यवेधा विज्ञेया वेधः सूर्योदये मतः ॥

इति वचनादुदयात्प्राक् चतुर्दण्डत्वमरुणोदयशब्दप्रवृत्तिनिमित्तम् । अत एव काम्योपवासवर्ज्यवेधवाक्ये घटिकाशब्दोपादानमित्युपोद्बलकं दर्शयति- *तथेति । एकादशी त्रेधा पूर्णा खण्डा विद्धा चेति भेदात् । तत्र या द्वात्रिंशन्मुहूर्तव्यापिनी, सा पूर्णा ।

प्रतिपत्प्रभृतिः सर्वा उदयादोदयाद्रवेः ।
सम्पूर्णा इति विख्याता हरिवासरवर्जिता ॥

इति स्कान्दे हरिवासरपर्युदासात् तत्र —

उदयात्प्राग्यदा विप्र मुहूर्तद्वयसंयुता ।
संपूर्णैकादशी नाम तत्रैवोपवसेद् गृही ॥

इति गारुडात् । अत्र विशेषापेक्षायाम् —

आदित्योदयवेलाया आरभ्य षष्टिनाडिकाः ।
सम्पूर्णैकादशी नाम कार्या धर्मफलेप्सुभिः ॥

इति गारुडं द्रष्टव्यम् । अरुणोदयव्यापिन्याः परदिने न्यूनत्वे खण्डा । अरुणोदयाव्यापिनी तु विद्धा ।

आदित्योदयवेलायाः प्राक् मुहूर्तद्वयान्विता ।
एकादशी तु सम्पूर्णा विद्धाऽन्या परिकीर्तिता ॥

इति भविष्यात् । विद्धाऽपि द्वेधा—सन्दिग्धा संयुक्ता च । तत्र—

*उदयात् प्राक् त्रिघटिका व्यापिन्येकादशी यदा ।
संदिग्धैकादशी नाम वर्ज्येयं धर्मकाङ्क्षिभिः ॥
*उदयात् प्राङ् मुहूर्तेन व्यापिन्येकादशी यदा ।
संयुक्तैकादशी नाम वर्ज्येयं धर्मवृद्धये ॥

*हेमाद्रौ रात्रेरन्त्योऽष्टमो भागोऽरुणोदय उक्तः—

निशः प्रान्ते तु यामार्धे देवतादिप्रबोधने ।
सारस्वतानध्ययने चारुणोदय उच्यते ॥

इति स्मृतेः । *अत्रैके—'एषां सर्वपक्षाणां मुहूर्तद्वयेन कोटीकारात्, 'निशः प्रान्ते' इति वचनाच्च रात्रिमानवशात्सार्धत्रिदण्डादर्वागप्यनेकेऽरुणोदयाः । तदाह हेमाद्रिः—सार्धघटिकात्रयात्मकस्त्वष्टांशो निकृष्टामितरात्रिविषया । महत्तरास्तु रात्रीरपेक्ष्य चतस्रो घटिका इत्युक्तमिति'

पुत्रराज्यप्रसिद्ध्यर्थं द्वादश्यामुपवासयेत् ।
तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणम् ।

इति विहितं काम्योपवासं सन्दिग्धां लक्षयित्वा तत्र निषेधति—*उदयादिति ।

पुत्रपौत्रप्रसिद्ध्यर्थं द्वादश्यामुपवासयेत् ।
तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणम् ॥

इति काम्योपवासं संयुक्तां लक्षयित्वा तत्र निषेधति-*उदयादिति । एतच्च वाक्यद्वयं वैष्णवेतरविषयम् । वैष्णवान् प्रति तन्निषेधवैयर्थ्यात् । "नैवोपोष्यं वैष्णवेन" इति सामान्यत एव नित्यसाधारण्येन निषेधसत्त्वात् । इदं च द्वादश्यां काम्योपवासविधानप्रक्रान्तसंवत्सरव्यापिकाम्यप्रयोगविषयं, न तूपक्रमविषयम् । तस्य तिथ्यन्तरकाम्यव्रतवत् संपूर्णायामेवौचित्यात् । प्रक्रान्तविषयत्वेनाप्येतादृशोपपत्तेः । रात्रेरष्टमभागत्वं तत्पक्षद्वित्वानिमित्तमिति हेमाद्रिमतमाह—*हेमाद्राविति इत्यादिना । एतन्मतं दूषयितुमुत्थापयति—

इत्याहुः । तन्न । अरुणोदयशब्दस्यानेकार्थत्वापत्तेः । *न च मुहूर्तद्वयमर्थः । दण्डद्वयैकमुहूर्तादिवेधानां तथाऽप्यनुपपत्तेः । न हि तेषां यामार्धत्वमरुणोदयत्वं चास्ति । मुहूर्तद्वयस्य यामार्धस्य च 'चतस्रो घटिकाः' इत्यनेनोपसंहाराच्च न तदर्थः* । न च 'सार्धं तु घटिकात्रयम्' इत्यनेनापि तदापत्तिः* शङ्क्या । तेन चतुर्दण्डवेधस्यैवोक्तेः । चतुर्दण्डेऽर्धघटीदशमीसत्त्वे हि वेधस्तदर्थः । त्रिघटिकादौ *तदयोगाच्च । यत्तु मतम् 'कियताऽरुणोदयवेध इत्यपेक्षायां सार्धघटिकात्रयनियमादरुणोदयेऽर्धघटिकातो न्यूनदशमीसत्त्वे न दोषः' इति । तत्तुच्छम् । *द्विदण्डादावपि तदापत्तेः* ।

*दशमीशेषसंयुक्तो यदि स्यादरुणोदयः ।
नैवोपोष्यं वैष्णवेन तद्दिनं नैकादशीव्रतम् ॥

इति गारुडे भविष्ये च योगमात्रनिषेधात् । नारदीयेऽपि—

लववेधेऽपि विप्रेन्द्र दशम्यैकादशीं त्यजेत् ।
सुराया बिन्दुना स्पृष्टं गङ्गाम्भ इव निर्मलम् ॥

स्कान्देऽपि—

कलाकाष्ठादिगत्यैव दृश्यते दशमी विभो ।

---

*अनेके इति । *न चेति प्रवृत्तिनिमित्तैक्याच्च नानार्थत्वापत्तिरिति भावः । *तदर्थो—मुहूर्तद्वयमर्थः । *तदापत्तिः मुहूर्तद्वयलाभः । अष्टाविंशतिघटीरात्र्यां मुहूर्तद्वयं सार्धघटीत्रयं तत्र दशमीप्रवेशमात्रेण विद्धत्वात् । *तदयोगात्—मुहूर्तद्वयालाभात् । इदमापाततः । चतुर्दण्डापत्त्यभावस्यापि सम्भवात् । सार्द्धघटिकात्रयस्य व्यापकत्वे दोषमाह—*द्विदण्डादावपीति *तदापत्तेः—निर्दुष्टत्वापत्तेः । तस्य व्याप्यत्वेऽर्द्धदण्डतो न्यूनदशमीसत्त्वेऽपि व्या-

एकादश्यां न कर्तव्यं व्रतं राजन्कदाचन ॥ इति ।

माधवोऽप्याह—'सोऽयं कलादिवेधोऽरुणोदयवेधे सूर्योदयवेधे च समानः' इति । निगमेऽपि—

सर्वप्रकारवेधोऽयमुपवासस्य दूषकः । इति ।

अत एव माधवेन 'अरुणोदयाद्यदण्डेऽल्पदशमीस्पर्शो संपृक्ता, कृत्स्नघटीयोगे संदिग्धा, मुहूर्तव्याप्तौ संयुक्ता, उदये संकीर्णा' इत्युक्त्वा

अरुणोदयवेलायां दशमी यदि संगता ।
संपृक्तैकादशी तां तु मोहिन्यै दत्तवान्प्रभुः ॥

इति गोभिलायुक्तेः *पूर्वोक्तगारुडादेश्च सामान्यतो विशेषतश्चारुणोदयवेधो निषिद्धः । *ननु—'अष्टमभागोऽरुणोदयः' इति हेमाद्रिणोक्तम्, यच्च 'महत्तरास्तु रात्र्याः' इति, तत्परमतं स्वयमेव *दूषितम् । *अन्तेऽप्युक्तम्

ध्यत्वानपायाद्दोषमाह—*दशमीति । *पूर्वोक्तेति ।

उदयात्प्राक् त्रिघटिका व्यापिन्येकादशी यदा ।
सन्दिग्धैकादशी नाम वर्ज्यैयं धर्मकाङ्क्षिभिः ॥

इति पूर्वोक्तेत्यर्थः । आदिना

उदयात् प्राक् मुहूर्तेन व्यापिन्येकादशी यदा ।
संयुक्तैकादशी नाम वर्ज्यैयं धर्मकाङ्क्षिभिः ॥

इति ग्रहः । इयमतिविद्धा ।

आदित्योदयवेलाया आरभ्य षष्टिनाडिकाः ॥
संकीर्णैकादशी नाम त्याज्या धर्मफलेप्सुभिः ।

इति च ग्रहः । वेला—तत्प्रत्यासन्नकालः । उदये संकीर्णेति वाक्येऽप्युदयस्तत्प्रत्यासन्नः कालः । इयं महाविद्धा । अतिवेधमहावेधौ ग्रन्थे दर्शितौ । रात्र्यन्ताष्टमभागत्वमरुणोदयत्वमिति हेमाद्रेरनभिमतमाह—*यच्चेत्यादि । *दूषितमिति । रात्र्यन्ताष्टमभा

'वेधतारतम्यं च दोषतारतम्यानुपपत्त्याने' इति । दोषता-
रतम्यं च प्रायश्चित्ततारतम्यादवगम्यते । तथोक्तं हेमा-
द्रौ स्मृत्यन्तरे-

अज्ञानाद्यदि वा मोहात्कुर्वन्नेकादशीं नरः ।
दशमीशेषसंयुक्तां प्रायश्चित्तमिदं चरेत् ॥
कृच्छ्रपादं नरश्चीर्त्वा गां च दद्यात्पयस्विनीम् ।
सुवर्णस्यार्धकं देयं तिलद्रोणसमन्वितम् ॥

विधानान्तरं तत्रैव—

गरूपारुणोदयस्य कदाचिद्घटिकाचतुष्टयरूपत्वात्तद्रूपलक्षणतया सर्ववेधानामैक्यसंभवादिति शेषः । अथैवं वेधतारतम्योत्कीर्तनं व्यर्थमित्यत्राह—*अन्तेऽपीति । वेधतारतम्यादित्यादि ।

दशमीशेषसंयुक्ता गान्धार्या समुपोषिता ।
तस्याः पुत्रशतं नष्टं तस्मात्तां परिवर्जयेत् ॥
दशम्यनुगता यत्र तिथिरेकादशी भवेत् ।
तत्रापत्यविनाशः स्यात् परेत्य नरकं व्रजेत् ॥

इत्याद्यनिष्टस्मरणात् । तत्र

दशमीशेषसंयुक्तां न तु कुर्यात्कथंचन ।
जम्भस्येयं पुरा दत्ता दशमीशेषसंयुता ॥
उपोष्य तां प्रमादेन प्रायश्चित्तं चरेद्बुधः ।

इति वाक्यात् ।

प्रायश्चित्तमकुर्वाणस्तत्फलेन विनाशितः ।
स गच्छत्यन्धतामिस्रं नरकं भृशदारुणम् ॥

इति फलानुत्पत्तिप्रत्यवायोत्पत्त्योरुक्तेश्च वेधनिषेधातिक्रमे कर्तुः पापं स्वीकार्यम् । वेधतारतम्यान्यथानुपपत्त्या च पापतारतम्यं, तत्तारतम्याच्च प्रायश्चित्ततारतम्यम् । यद्वा श्राद्धदिने मैथुनादिनिषेधवत् एतन्निषेधानामपि कर्माङ्गत्वे तदतिक्रमे प्रायश्चित्ता-

ब्राह्मणान्भोजयेत्त्रिंशद्गां च दद्यात्सवत्सकाम् ।
*धरणस्यार्धकं देयं तिलद्रोणमथापि वा ॥ इति ।

करणे कर्तुरनिष्टोत्कीर्तनं तु न हि निन्दान्यायेन व्रतं स्तोतुमेव । तत्र व्रतवैगुण्यं तद्वशान्नित्यकाम्यान्यतरतत्फलस्य पापक्षयस्वर्गविष्णुप्रीत्यादेरसिद्धिः ।

प्रायश्चित्तं तु कर्तव्यं शुद्ध्यर्थं तु व्रतस्य वै ।
निश्छिद्रं जायते येन धर्मः संतानमेव च ॥

इत्यर्थवादेन स्पष्टं तथा प्रतीतेः । प्रायश्चित्तमपि अतिक्रम्यमाणनिमित्तभूतनिषेधोपस्थापितव्रताङ्गतया तत्समाधानार्थम् । तदाचरणे फलश्रुतिश्चाङ्गे फलश्रुतित्वात् प्रधानस्तुत्यर्थैव । एवं च वैगुण्यरूपकर्मदोष एव वेधातिवेधाख्यः तत्तारतम्याच्च तदतिक्रमनिमित्तकस्य तारतम्यमिति । *धरणं सुवर्णं हेमचत्वारिंशन्माषाः ।

तुल्या यवाभ्यां कथिताऽत्र गुञ्जा
वल्लस्त्रिगुञ्जो धरणं च तेऽष्टौ ।
गद्याणकस्तद्द्वयमिन्द्रतुल्यै—
र्वल्लैस्तथैको घटकः प्रदिष्टः ॥

इति ज्योतिषं तु नेह प्रवर्तते धार्मिकसंप्रदायभङ्गापत्तेः । कृच्छ्रपादसवत्सगोदानोभयं केवलैकत्रिंशद्ब्राह्मणभोजनेन वैकल्पिकतिलद्रोणसुवर्णाद्याभ्यां वा समुच्चितद्वयेन वाऽधिकेन युक्तमिति चत्वारः पक्षा वेधातिवेधमहावेधयोगेषु क्रमेण योज्याः । ननु

यातुधानव्रतं योगे महावेधे तु बाष्कलेः ।
जम्भासुरस्यातिवेधे मोहिनी वेधवेशिनी ॥

इति जम्भासुरवेधत्वेनोक्तेऽतिवेध एवैतत्प्रायश्चित्तं स्यात् ।

दशम्याः प्रान्तमादाय यदोदेति दिवाकरः ।
तेन स्पृष्टं हरिदिनं दत्तं जम्भासुराय तु ॥

*अत्र वेधतारतम्याद्व्यवस्थेति हेमाद्रिः । *'निशः प्रान्ते' इत्यपि दोषाधिक्यार्थमेव । *तस्माच्चतुर्घटिकात्मक एवारुणोदय इति सिद्धम् । तेन पञ्चपञ्चाशद्घटिकानन्तरं दशमीप्रवेशेऽरुणोदयवेध उक्तो भवति । अन्त्योऽपि तत्रैव कण्वेनोक्तः—

उदयोपरिविद्धा तु दशम्यैकादशी यदि ।
दानवेभ्यः प्रीणनार्थं दत्तवान्पाकशासनः ॥ इति ।

स्मृत्यन्तरेऽपि—

*दशम्याः प्रान्तमादाय यदोदेति दिवाकरः ।
तेन स्पृष्टं हरिदिनं दत्तं जम्भासुराय तत् ॥ इति ॥

तत्रारुणोदयवेधो वैष्णवविषयः । तद्वाक्येषु वैष्णवग्रहणात् । तत्स्वरूपं तु माधवीये स्कान्दे—

परमापदमापन्नो हर्षे वा समुपस्थिते ।
नैकादशीं त्यजेद्यस्तु यस्य दीक्षाऽस्ति वैष्णवी ।
विष्णवर्पिताखिलाचारः स हि वैष्णव उच्यते ॥ इति ।

*यद्यपि पित्रादेरागमदीक्षायां तन्मात्रस्य वैष्णवत्वं

इत्यग्निमवचनादित्यत्राह—*अत्रेति उच्चावचानां पक्षाणां व्यवस्थयैव निवेशाद्वाक्यशेषस्त निन्दामात्रमिति भावः । ननु दोषतारतम्येन वेधतारतम्यमयुक्तम्, अरुणोदयवेधे दोषतारतम्याभावादित्यत्राह—*निश इति । *तस्मादिति । एतच्च सर्वं जल्पकथायां ग्रन्थकृताऽभिहितम् । वस्तुतस्तु महत्तरह्रस्वतररात्रिष्वरुणोदयसाम्यस्याशुद्धत्वान्मुहूर्तद्वयमरुणोदय इति सिद्धान्तः । घटिकादिपदानि च मुहूर्तार्द्धपराणि । वेधतारतम्यं च मुहूर्तमुपजीव्यैवेति शिष्टानां हेमाद्रिमतमेव सम्यगिति । *दशम्या इति । जम्भपदं तत्प्रधानकयातुधानपरम् । उदेतीतिदर्शनात्तद्वाक्येषु दशमीशेषेत्यादिवाक्येषु विष्णुमन्त्रदीक्षावत्त्वं वैष्णवत्वमालोच्य शङ्कते-*यद्यपीति ।

न तु पुत्रादेः, तथापि स्वपारम्पर्यप्रसिद्धमेव वैष्णवत्वं स्मार्तत्वं च मन्यन्ते वृद्धाः । तत्त्वसागरे भविष्ये—

यथा शुक्ला तथा कृष्णा, यथा कृष्णा तथेतरा ।
तुल्ये ते मन्यते यस्तु स वै वैष्णव उच्यते ॥

केचित्तु दशम्यां नवमीवेधमपि त्यजन्ति । तत्र मूलं मृग्यम् । उदयवेधस्तु *पारिशेष्यात् स्मार्तगोचरः । तदाह माधवः—

अरुणोदयवेधोऽत्र वेधः सूर्योदये तथा ।
उक्तौ द्वौ दशमीवेधौ वैष्णवस्मार्तयोः क्रमात् ॥

हेमाद्रिस्तु केषांचिदर्धरात्रेऽपि दशमीवेधमाह—

अर्धरात्रे तु केषांचिद्दशम्या वेध इष्यते ।
कपालवेध इत्याहुराचार्या ये *हरिप्रियाः ॥
न *तन्मम मतं यस्मात्त्रियामा* रात्रिरुच्यते ॥

इति ब्रह्मवैवर्तात् ।

---

*पारिशेष्यादिति ।

अतिवेधादयः सर्वे ये वेधास्तिथिषु स्मृताः ।
सर्वेऽप्यवेधा विज्ञेया वेधः सूर्योदये स्मृतः ॥

इत्युक्तेर्वैष्णवान् प्रति अतिवेधादीनां वेधत्वानिराकरणबाधादित्यर्थः ।
*हरिप्रिया इति ।

अयमर्थः—अतीतरात्रेः पश्चार्द्धेनागामिरात्रेः पूर्वार्द्धेन सह दिवसोऽद्यतनः, स एकादश्यामुपोष्यः । तत्र दशमीप्रवेशे विद्धा सा त्याज्येति । एतन्निराकरोति—*न तन्मम मतमिति । *त्रियामेति । प्रथमप्रहरार्द्धस्य चतुर्थप्रहरार्द्धस्य च दिनकर्मसंबन्धितया तदन्या कथंचित्त्रियामा रात्रिः रात्रिकर्माणि ग्राह्येत्यर्थः । एवं चोपवासे दिनकर्माणि अरुणोदयमारभ्य ग्राह्या । तत्र

अस्यार्थः-'अनद्यतने लङ्'(पा०सू०३-२-१११)इत्यत्र 'अतीताया रात्रेः पश्चिमयामद्वयमागामिन्या रात्रेः पूर्वयामद्वयं दिवसश्च सकल एषोऽद्यतनः कालः' इत्युक्तं महाभाष्ये । स एव वर्तमानः काल एकादश्यहोरात्र उपोष्यः । तन्मध्ये दशमीप्रवेशो विद्धा । सा त्याज्या । अत एव हेमाद्रौ-

दशम्याः सङ्गदोषेण अर्धरात्रात्परेण तु ।
वर्जयेच्चतुरो यामान् संकल्पार्चनयोः सदा ॥

इति दोष उक्तः । चतुरो यामान् दिवससंबन्धिनः । स्वमते तु रात्रेस्त्रियामत्वात् प्रहरद्वयं पूर्वशेषः । तेन चतुर्थप्रहर एव वेधो युक्तः । सोऽप्यरुणोदय एव ।

सूर्योदयं विना नैव स्नानदानादिकः क्रमः ।

इति मार्कण्डेयपुराणात् । 'प्रत्यूषोऽहर्मुखं कल्यम्' इति कोशादरुणोदयमारभ्य सूर्यांशुप्रवृत्तेस्तत्रैव निषेधः । तेन मतभेदाद्व्यवस्थेति केचित् । कैमुतिकन्यायेनारुणोदयवेधस्यैवेयं स्तुतिरिति तु माधवः । य-

---

विद्धा हेया । यस्तु कपालवेधो नामार्द्धरात्रवेधः, स परेऽहनि उपवासे न त्याज्यः, किं तु दिवा संकल्पे एव ।

दशम्याः सङ्गदोषेण अर्द्धरात्रात्परेण तु ।
वर्जयेच्चतुरो यामान संकल्पार्चनयोः सदा ॥

इति हेमाद्रौ वचनादिति । ये तु-रात्रेस्त्रियामत्वात्प्रहरत्रयं पूर्वशेषः । तेन चतुर्थप्रहर एव वेधो युक्त इति वदन्ति, तदाशयं त एव जानन्ति । अन्ये तु—

सूर्योदयं विना नैव स्नानदानादिकः क्रमः ।

इति वचनात् 'प्रत्यूषोऽहर्मुखं कल्यम्'इति कोशादरुणोदयमारभ्य सूर्यांशुप्रवृत्तेः तत्रैव निषेध इति न तन्मम मतमित्यस्यार्थमाहुः ।

स्तु 'द्विकपञ्चदशाभिस्तथा' इति भेदः, स उपवासातिरिक्तविषय इति माधवः ।

सर्वप्रकारवेधोऽयमुपवासस्य दूषकः ।
सार्धसप्तमुहूर्तैस्तु वेधोऽयं बाधते व्रतम् ॥

इति निगमादिवचनम् । तत्र माधवमते *वैष्णवैररुणोदयविद्धा त्याज्या । यदा त्वेकादश्येव शुद्धा सती वर्धते, द्वादशी वा, उभयं वा, तदा परोपोष्या ।

*एकादशी द्वादशी वाऽधिका चेत्स्यज्जनानां दिनम् ।
पूर्वं, त्याज्यं तूत्तरं स्यादिति वैष्णवनिर्णयः ॥

इति माधवोक्तेः । स्मार्तैस्तु सूर्योदयविद्धा त्याज्या । यदा त्वेकादशी शुद्धा सती वर्धते, द्वादशी च समा

---

*वैष्णवैरिति ।

दशमीशेषसंयुक्तो यदि स्यादरुणोदयः
नैवोपोष्यं वैष्णवेन तद्दिनैकादशीव्रतम् ।

इति वचनात् । इदमुपलक्षणं वैष्णवेतरैरपि कामव्रते अरुणोदयविद्धायास्त्याज्यत्वात् । माधवमते इत्यभिधानं च केषांचिद्ग्रन्थे वैष्णवधर्मविकृत्योपवासो न लिखितस्तस्यावर्तनाय ।
*एकादशीति । नारदः—

संपूर्णैकादशी यत्र द्वादश्यां वृद्धिगामिनी ।
द्वादश्यां लङ्घनं कार्यं त्रयोदश्यां तु पारणम् ॥

संपूर्णा च—"उदयात्प्राग्यदा विप्र मुहूर्तद्वयसंयुता । संपूर्णैकादशी नाम" इत्युक्ता । भागवततन्त्रे—

संपूर्णैकादशी त्याज्या परतो द्वादशी यदि ।
उपोष्या द्वादशी शुद्धा त्रयोदश्यां च पारणम् ॥

यत्तु—व्यासः ।

एकादशी यदा लुप्ता परतो द्वादशी भवेत् ।

न्यूना वा, तदा *गृहस्थैः पूर्वा, यतिभिरुत्तरा कार्या ।

प्रथमेऽहनि संपूर्णा व्याप्याहोरात्रसंयुता ।
द्वादश्यां च तथा तात दृश्यते पुनरेव च ॥
पूर्वा कार्या गृहस्थैश्च यतिभिश्चोत्तरा विभो ॥

इति स्कान्दोक्तेः । वर्धमानोऽप्येवमाह । उभयवृद्धौ तु शुद्धा विद्धा वा सर्वेषां परैव ।

उपोष्या द्वादशी शुद्धा यदीच्छेत्परमां गतिम् ॥

इति, तत्तु न शुद्धाधिकद्वादश्यां भवतेन । लोपो हि सूर्योदयास्पर्शित्वं तस्यावमदिन एव सत्त्वेन विद्धाया एव लाभात् । न च लोपो द्वितीयसूर्योदयास्पर्शित्वम् । "लुप्तादौ दशमीमिश्रितत्वात्" इतिविद्धाप्रस्तावगतमाधवविरोधादिति । हेमाद्रौ—

संपूर्णैकादशी यत्र द्वादशी च परेऽहनि ।
तत्रोपोष्या द्वादशी स्याद्द्वादश्यामेव पारणम् ॥ इति ॥

*गृहस्थैरिति । यत्तु—

संपूर्णैकादशी यत्र प्रभाते पुनरेव सा ।
पूर्वामुपवसेत्कामी निष्कामस्तु परां वसेत् ॥

इति । तत्र कामी गृहस्थः, निष्कामो यतिरित्येके, तन्न ।

निष्कामस्तु गृही कुर्यादुत्तरैकादशीं सदा ।
प्रातर्भवतु वा मा वा द्वादशी च द्विजोत्तमा ॥

इति स्कान्दे निष्कामगृहिणोऽपि परैवेति गृहिसामान्ये पूर्वोपवासाभावात् । एतदेवाभिप्रेत्य सकामैः पूर्वा निष्कामैरुत्तरेति सामान्यतो वक्ष्यति । अत एव—

पुनः प्रभातसमये घटिकैका यदा भवेत् ।
अत्रोपवासो विहितो वनस्थस्य यतेस्तथा ॥
विधवायाश्च तत्रैव परतो द्वादशी न चेत् ॥

इत्यादौ वनस्थादिशब्दानां निष्कामोपलक्षणत्वान्न वाक्यभेदः । अत्र 'उदयात्प्राक्' इति

*संपूर्णैकादशी यत्र प्रभाते पुनरेव सा ।
सर्वैरेवोत्तरा कार्या परतो द्वादशी यदि ॥

इति नारदोक्तेः । द्वादशीमात्रवृद्धौ तु शुद्धायां *पूर्वैव ।

न चेदेकादशी विष्णौ द्वादशी परतः स्थिता ।
उपोष्यैकादशी तत्र यदीच्छेत्परमं पदम् ॥

इति नारदोक्तेः ।

द्वादशीमात्रवृद्धौ तु शुद्धाविद्धे व्यवस्थिते ।
शुद्धा पूर्वोत्तरा विद्धा स्मार्तनिर्णय ईदृशः ॥

इति माधवोक्तेश्च । मदनरत्नेऽप्येवम् । यत्तु—

विद्धाऽप्यविद्धा विज्ञेया परतो द्वादशी न चेत् ।
अविद्धाऽपि च विद्धा स्यात्परतो द्वादशी यदि ॥

परिभाषिता न ग्राह्या । नाडीपञ्चकात्मकतिथिवृद्ध्या विना परेद्युः-
र्घटिकासत्त्वासम्भवात् तावत्तिथिवृद्धौ चाकस्मिकह्रासस्य ज्योतिः-
शास्त्रविरुद्धत्वादित्युदयद्वयमात्रव्यापित्येव वाच्या । प्रभातपदं तु
द्वितीयदिनप्रातःपरमिति । 'प्रथमेऽहनि संपूर्णा'इत्युक्ते 'संपूर्णैकाद-
शी'इत्याग्रिमे च 'उदयात्प्राक्'इति परिभाषितैव । नाडीपदसत्त्वात् ।
एवं चैतद्वाक्यद्वयं स्मार्तपरमेव, न वैष्णवपरं तेषां विद्धत्वमात्रेण
परत्वादिति । *संपूर्णेति । स्मार्तपरताबीजमुक्तम् । विद्धानिषे-
धात्परेति स्मर्तव्यम् । *पूर्वेति ।

संपूर्णैकादशी शुद्धा द्वादश्यां नैव किञ्चन ।
द्वादशी च त्रयोदश्यामपि तत्र कथं भवेत् ॥
पूर्वा गृहस्थैः कार्या स्यादुत्तरा यतिभिस्तिथिः ।

इति तु निर्मूलम् । 'विद्धाऽपि'इति स्मार्तपरम् । वैष्णवानां
विद्धानिषेधात् । 'अविद्धाऽपि च'इति स्मार्तपरं,न वैष्णवपरं; तेषां
द्वादश्यामेवोपवासविधानात् । किं तु स्मार्तपरं परं तु तेषामविद्धै-

इति हेमाद्रौ पाद्मवचनं, तदेकादश्या* वृद्धौ ज्ञेयम् । तदुक्तं माधवेन-

एकादशी द्वादशी चेत्युभयं वर्धते यदा ।
तदा पूर्वं दिनं त्याज्यं स्मार्तैर्ग्राह्यं परं दिनम् ॥ इति ।
विद्धैकादश्यां द्वादशीमात्रवृद्धौ च सर्वेषां *परैव ।
*तत्र चैकादशीमात्रवृद्धौ गृहिणः पूर्वा, यतेरुत्तरा ।
*पूर्वोक्तपाद्मोक्तः ।

एकादशी विशुद्धा चेच्छुक्ले कृष्णेऽविशेषतः ।
उत्तरां तु यतिः कुर्यात् पूर्वामुपवसेद् गृही ॥
इति प्रचेतसोक्तः *एतच्छुद्धाविद्धातुल्यमिति माधवः ।

कादशीत्यागो न युज्यते इत्यभिमानः । *एकादश्या इति ।
तथा च तत्र स्मार्तानामविद्धैकादशीत्यागो न युक्तः । *परैवेति ।
उपवासदिनं विद्धं यदा भवति पूर्वया ।
द्वितीयेऽह्नि यदा न स्यात्स्वल्पाऽप्येकादशी तिथिः ॥
तत्रोपवासो विहितः कथं तद्वद सूतज ।
सूत उवाच—
यदा न प्राप्यते विप्रा द्वादश्यां पूर्ववासरः ।
रविचक्रार्द्धमात्रोऽपि तत्रोपोष्यं परं दिनम् ॥
उपोष्या द्वादशी शुद्धा द्वादश्यामेव पारयेत् ।
इति नारदीयात् । पारणपर्याप्तद्वादश्या लाभे तस्यामेव । अन्यथा तु तामुल्लङ्घ्यापि पारणं कार्यमित्यर्थः । *तत्र च-विद्धैकादश्यां च । *पूर्वोक्तेति । 'विद्धाऽप्यविद्धा विज्ञेया' इत्यादिः । *एत-दिति । अविशेषत इत्युक्तेः । ननु इदं प्रचेतोवाक्यं शुद्धाविषयमेव ।
संपूर्णैकादशी यत्र प्रभाते पुनरेव सा ।
उत्तरां तु यतिः कुर्यात्पूर्वामुपवसेद् गृही ॥

इति वचने संपूर्णापदात् । विद्धा तु सर्वेषां परैव ।

द्वादशीमिश्रिता कार्या सर्वत्रैकादशी तिथिः ॥
द्वादशी च त्रयोदश्यां विद्यते यदि वा न वा ।

इति पार्माकैः । उपोषणस्य प्राधान्यात्तत्रान्त्यकालावच्छिन्नतिथिरपेक्षिता । पारणं त्वङ्गत्वादेव तादृशद्वादश्यलाभे न दोष इति । नैवम् । तथा सति—

संपूर्णैकादशी यत्र द्वादश्यां वृद्धिगामिनी ।
द्वादश्यां लङ्घनं कार्यं त्रयोदश्यां तु पारणम् ॥

इत्याद्येकवाक्यतयोक्तपारणस्यापि शुद्धाविषयत्वापत्तेः । यदि च तस्य शुद्धाधिकायां वैष्णवान् प्रति, विद्धाधिकायां स्मार्तान् प्रतीत्यधिकारिभेदेन प्रवृत्तिकल्पनम्, तदा एकाधिकारिणं स्मार्तं प्रति शुद्धाविद्धासाम्येन प्रवृत्तावनियमप्रसक्तिर्दुर्वारेति । नन्वेवमप्यत्र गृहिणः कथं पूर्वा ? ।

दिनत्रयस्पृगे देवि नोपोष्या दशमीयुता ।
सैवोपोष्या सदा पुण्या परतश्चेत्त्रयोदशी ॥

इत्यादिदिनत्रयातिरिक्तदशमीविद्धाया उपवासनिषेधात् । दिनत्रयं हि दशम्येकादशीद्वादशीरूपं, न तु एकादशीद्वादशीत्रयोदशीरूपम् ।

यदि दैवात्तु संसिध्येदेकादश्यां तिथित्रयम् ।
तत्र क्रतुशतं पुण्यं द्वादशी पारणं भवेत् ॥

इत्येकवाक्यत्वात् । इत्थं च सैवेति तच्छब्देन "सा वैश्वदेवी" इत्यादौ सदोषपयस इव दिनत्रययुतदशमीविद्धाया एव परामर्शो न दशमीमात्रस्येत्ययमेव विधिः "एवं कृत्वाग्रयम्" इतिवत् । 'नोपोष्या दशमीयुता' इति तु "न गिरागिरा" इतिवदनुवादः । न च नोपोष्येति विधिरेव, सैवेति त्वनुवादः । एवकारस्य विधिशक्तिकुण्ठकत्वादिति वाच्यम् । द्वादश्यङ्गत्वार्थैव परतश्चेदित्यस्य व्यर्थ-

त्रयोदश्यां न लभ्येत द्वादशी यदि किंचन ।
उपोष्यैकादशी तत्र दशमीमिश्रितापि च ॥

इति स्कान्दात् ।

अविद्धानि निमित्तैश्च न लभ्यन्ते दिनानि तु ।
मुहूर्तैः पञ्चभिर्विद्धा ग्राह्यैवैकादशी तिथिः ॥

इत्यृष्यशृङ्गोक्तेश्च । मुहूर्तपञ्चकमरुणोदयमारभ्य ज्ञेयम् । अन्यथोत्तरेऽह्नि एकादश्यभावासम्भवात् । तथा च स एव ।

सर्वत्रैकादशी कार्या द्वादशीमिश्रिता नरैः ।
प्रातर्भवतु वा मा भूद्यस्मान्नित्यमुपोषणम् ॥ इति ।

यदपि हेमाद्रिणा 'शुद्धसमा शुद्धन्यूना वा अधिकद्वादशिका चेत्सर्वेषां परैव' इत्युक्तं, तदपि वैष्णवविषयम् । स्मार्तानां तु पूर्वैवेत्यविरोधः* ।

हितान्वयापत्तेः । नैवम् । कालादर्शोक्तौ —

सर्वत्रैकादशी कार्या दशमीमिश्रिता नरैः ।
प्रातर्भवतु वा मा वा यतो नित्यमुपोषणम् ॥

इत्यृष्यशृङ्गवचसो विद्धाधिकैकादशिकायां विद्धोपवासविधायकत्वेनार्थवत्त्वात् । अन्यथा प्रातर्भवत्वित्यस्यासङ्गतेः । न च त्रयोदश्यां द्वादशी प्रातर्भवत्विति तदर्थः । दशमीमिश्रितेत्युक्तेस्तदव्यवहितोत्तरप्रातर्लाभात् । अत्र संकल्पकाले एकादश्यसत्त्वेऽपि संकल्पं वक्ष्यति । तथा च "दिनत्रयस्पृते देवि" "सर्वत्रैकादशी कार्या" इत्याद्योर्विरोधभञ्जाय गृहिणां पूर्वा यतेरुत्तरेति व्यवस्था स्वीकार्या । त्रयोदश्यामिति वाक्यद्वयं विद्धसमापरं तस्यां यतीनां परा भविष्यतीत्याशङ्कावारणार्थम् । अविरोध इति प्रतिज्ञानिर्वाहाय

*हेमाद्रिमते तु रूपमं । तत्र—

*शुद्धा विद्धा द्वयी नन्दा, त्रेधा न्यूनसमाधिकैः ।

षट्प्रकारा पुनस्त्रेधा स्याद्‌न्यूनसमाधिकैः ॥

इत्यष्टादशैकादशीभेदाः। तत्र *शुद्धाऽधिका न्यूनद्वादशिका, शुद्धाऽधिका समद्वादशिका च सकामैः पूर्वा, निष्कामैरुत्तरा कार्या। *'प्रथमेऽहनि सम्पूर्णा' इति पूर्वोक्त-

---

स्मार्तान् प्रति हेमाद्रिमतमाह —

*हेमाद्रीति। हेमाद्रिमाधवयोः स्मार्तान् प्रति न मतभेद इति स्मर्तव्यम्। *शुद्धेति। शुद्धन्यूना न्यूनद्वादशिका १, शुद्धन्यूना समद्वादशिका २, शुद्धन्यूनाऽधिकद्वादशिका ३, शुद्धसमा न्यूनद्वादशिका ४, शुद्धसमा समद्वादशिका ५, शुद्धसमाऽधिकद्वादशिका ६, शुद्धाऽधिका न्यूनद्वादशिका ७, शुद्धाऽधिका समद्वादशिका ८, शुद्धाऽधिकाऽधिकद्वादशिका ९, एवं विद्धाऽपीत्यष्टादशभेदा इत्यर्थः। पूर्वदिनसूर्योदयात्प्राक् समाप्तिर्न्यूनत्वं, सूर्योदयात्किञ्चिदूनत्वं समत्वं, सूर्योदयोत्तरमवस्थानमधिकत्वम्। तत्र—

आद्यासु पञ्चसु पूर्वैव व्यवस्थाऽनन्तरद्वये ।

गृहस्थयतीनां स्याद्व्यवस्था स्यात्परेऽहनि ॥

शुद्धाधिका न्यूनसमोत्तरा चेत् पूर्वा गृहस्थैर्यतिभिः परैव ।

सा चेत्पराधिक्यवती परैव, शेषास्तु शुद्धाः प्रथमा उपोष्याः ॥

विद्धात्रये तु पूर्वा स्याद्व्यवस्थाऽनन्तरद्वये ।

अपरेऽहनि शेषाः स्युः सप्तमी तु व्यवस्थया ॥

विद्धासमा न्यूनसमोत्तरा चेद्विद्धाधिका न्यूनपरा च तत्र ।

सैव व्यवस्था, यदि विद्धहीना प्रागोपवासे प्रथमैव सर्वैः ॥

विद्धासमा यद्यधिकोत्तरा स्याद्विद्धासमा विद्धसमोत्तरा स्यात् ।

तदा परैव प्रतिमुक्तशङ्कैरेकादशी सर्वजनैरुपोष्या ॥

इति कारिकाऽनुसारेणाह—*शुद्धेत्यादि। *प्रथमेति।

स्कान्दात् ।

ऊनत्वादशिकायां तु विष्णुप्रीतिकामैरुपवासद्वयं* कार्यम् ।

प्रथमेऽहनि सम्पूर्णा व्याप्याहोरात्रसंयुता ।
द्वादश्यां च तथा नास्ति दृश्यते पुनरेव च ॥
पूर्वा कार्या गृहस्थैश्च यतिभिश्चोत्तरा विभो ।

इति स्कान्दादित्यर्थः । अत्र गृहस्थयतिपदे सकामनिष्कामपरे ।

सम्पूर्णैकादशी यत्र प्रभाते पुनरेव सा ।
पूर्वामुपवसेत्कामी निष्कामस्तु परां वसेत् ॥

इति मार्कण्डेयवाक्यैकवाक्यत्वात् । न च सकामनिष्कामशब्दयोरेव गृहियतिपरत्वमस्तु, प्रायशो गृहिणां सकामत्वाद्यतीनां निष्कामत्वादिति वाच्यम् ।

निष्कामस्तु गृही कुर्यादुत्तरैकादशीं सदा ।
प्रातर्भवतु वा मा वा द्वादशी च द्विजोत्तम ॥

इति स्कान्दे गृहस्थस्यापि निष्कामस्योत्तरोपवासविधानात् । इदं च हेमाद्रेर्जीवमात्रमिति । शुद्धाऽनधिकाऽनधिकद्वादशिका, शुद्धानधिकाऽधिकद्वादशिका २, शुद्धाऽधिकाधिकद्वादशिका ३, शुद्धाधिकानधिकद्वादशिका ४ इति चत्वार एव भेदाः । तत्रायं चतुर्थो भेदः । द्वितीयसूर्योदयसमाया एव तिथेर्ज्योतिषे प्रसिद्धेर्द्वित्रिपलान्तरेण समा तदधिकान्तरेण न्यूना चेत्युभय्या एवानधिकत्वेन सङ्ग्रहात् ।

*उपवासद्वयमिति । न चैकाधिकारिकमुपवासद्वयं कथं विधीयते ?, एकनिमित्तकस्यावृत्तेरयुक्तत्वात् किन्त्वयं गृहियतिभेदेन विहितस्यानुवादोऽस्तु, तथा सति अधिकार्यन्तरमपि न कल्प्यमिति वाच्यम् । 'तिथी' इति द्वन्द्वसमासार्थकैकशेषेणेतरेतरयोगप्रतीतेस्तदनुरोधेनाधिकार्यन्तरादेरपि युक्तत्वात् । अत्र

सम्पूर्णैकादशी यत्र प्रभाते पुनरेव सा ।
लुप्यते द्वादशी, तस्मिन्नुपवासः कथं भवेत् ॥
उपोष्ये द्वे *तिथी तत्र विष्णुप्रीणनतत्परैः ॥

इति वृद्धवसिष्ठोक्तेः ।

शुद्धन्यूना शुद्धाधिका शुद्धसमा विद्धन्यूना विद्धसमा वाऽधिकद्वादशिका चेत्सर्वैवैषा परैवेति हेमाद्रिः । *मदनरत्ने तु *शुद्धाधिका परा । *'संपूर्णैकादशी यत्र' इति पूर्वोक्तेः । *अन्या पूर्वा ।

लुप्यते इत्यस्योनेत्यर्थः ।

सम्पूर्णैकादशी यत्र परतः पुनरेव सा ।
त्रयोदशी उषःकाले उपोष्या तत्र का भवेत् ॥
उपोष्ये द्वे तिथी तत्र विष्णुप्रीणनतत्परैः ।

इति स्कान्दे 'त्रयोदशी उषःकाले'इत्युक्तेस्तद्वाक्यस्वारस्यादित्याशयेनोनद्वादशिकायामित्युक्तम् । वस्तुतः समद्वादशिकायामपि विष्णुप्रीतिकामस्योपवासद्वयं युक्तम् । ऊनां द्वितीयसूर्योदयास्पर्शित्वमपीति तस्या अपि संग्रहात् । 'त्रयोदशी उषःकाले'इति स्वतन्त्रमिति नवीनाः ।

शुद्धन्यूनेत्यादित्रयेऽधिकद्वादशिकाऽन्वयः । एतच्च वैष्णवाभिप्रायम् । स्मार्तान्प्रति त्वाह *मदनेति । *शुद्धाधिकेति । अधिकद्वादशिकेति शेषः । अयं च शुद्धाधिकाऽधिकद्वादशिकारूपस्तृतीयो भेदः । *संपूर्णेति ।

संपूर्णैकादशी यत्र प्रभाते पुनरेव सा ।
सर्वैरेवोत्तरा कार्या परतो द्वादशी यदि ॥

इत्यर्थः ।

पूर्णाऽप्येकादशी त्याज्या वर्द्धते द्वितयं यदि ॥

इत्यपि द्रष्टव्यम् । *अन्येति । शुद्धन्यूना शुद्धसमा वाऽधिकद्वा-

*शुद्धा यदा समा हीना समा हीनाऽधिकोत्तरा ।
एकादशी मुनिश्रेष्ठ शुद्धां वैष्णवीमपि ॥

इति स्कान्दात् । शुद्धा=एकादशी । उत्तरा=द्वादशी । 'न चेदेकादशी विष्णौ' इति नारदोक्तेश्च । यत्तु-'अविद्धाऽपि च विद्धा स्यात्' इति वाक्यं तच्छुद्धाधिकापरम् । यत्तु—

संपूर्णैकादशी त्याज्या परतो द्वादशी यदि ।
उपोष्या द्वादशी शुद्धा द्वादश्यामेव पारणम् ॥

इत्यादि, *तद्वैष्णवपरम् । स्मार्तानां तु *पूर्वैवेत्युक्तम् ।

दशिकेत्यर्थः । अयं च शुद्धानधिकाधिकद्वादशिकेति द्वितीयो भेदः । *शुद्धेति । एकादशी यदि शुद्धा सती समा द्वितीयसूर्योदयपर्यन्ता ततो न्यूना वा, द्वादशी ततो न्यूना समाऽधिका वा तदा शुद्धामेवोपवसेत् न वैष्णवीं=द्वादशीमित्यर्थः । एतेन शुद्धानधिकानधिकद्वादशिकेति प्रथमभेदोऽपि संगृहीतः । तत्राविवादान्न ग्रन्थे नोट्टङ्कितः । *वैष्णवेति । वैष्णवग्रन्थान्तर्गतत्वात् । *पूर्वैवेति । यत्तु—

उदयात्प्राग्यदा विप्रा मुहूर्तद्वयसंयुता ।
संपूर्णैकादशी नाम तत्रैवोपवसेद्गृही ॥

इति वचनाद् गृहिणां पूर्वा ।

संपूर्णैकादशी यत्र द्वादशी चापरेऽहनि ।
तत्रोपोष्या द्वादशी स्याद् द्वादश्यामेव पारणम् ॥
न गर्भे विशते जन्तुरित्याह भगवान् हरिः ।

इति वाक्याद्यतीनां परेति; तन्न । प्रथमवाक्यस्य उक्तरीत्या गृही सकामोऽवैष्णवः । तस्यारुणोदयविद्धायां काम्योपवासनिवर्तकत्वात् । तत्रैवेत्येवकारवशात्तद्भिन्ने उपवासो नेत्यर्थात्, द्वितीयवाक्यस्य च गृहिणामेवोभयाधिक्यविषयत्वात् । तत्र पराया एव "न गर्भे विशते जन्तुः" इत्यर्थवादसूचितगर्भवासप्रदुःखनिवोपनिवर्तकत्वात् ।

विद्धाऽपि एकादशी चतुर्धा । तथा विद्धाऽनधिकाऽनधिकद्वादशिका १, विद्धाऽनधिकाऽधिकद्वादशिका २, विद्धाधिकाऽधिकद्वादशिका ३, विद्धाधिकाऽनधिकद्वादशिका चेति चत्वारो भेदाः । तत्र विद्धन्यूना विद्धसमा वाऽधिकद्वादशिका चेत्सर्वेषां परा ।

एकादशी यदा लुप्ता परतो द्वादशी भवेत् ।
उपोष्या द्वादशी शुद्धा यदीच्छेत्परमां गतिम् ॥

इत्युक्तेः । लुप्ता दिनद्वये सूर्योदयास्पर्शेन क्षयं गता । न चेदं मुमुक्षुपरं परमां गतिं=मुक्तिमपेक्षमाणत्वात्, अन्यथा तु पूर्वा "अविद्धानि निषिद्धैश्च"इत्युक्तेरिति वाच्यम् ।

एकादशी यदा विद्धा द्वादश्यां न प्रवर्तते ।
द्वादशी च त्रयोदश्यामस्ति तत्र कथं भवेत् ॥
उपोष्या द्वादशी शुद्धा सर्वैरेव न संशयः ।

इति नारदीये सर्वैरित्युक्तेः । "न चेदेकादशी विद्धा"इति तु शुद्धापरम् । 'अविद्धानि'इत्यादीनि विद्धाप्रशस्तवाक्यानि परत एकादश्यभावे द्वादश्यवृद्धावेव प्रवर्तन्ते ।

एकादशी द्विधा मुक्ता परतोऽपि न वर्तते ।
गृहिभिर्यतिभिश्चैव सैवोपोष्या क्षये तिथिः ॥

इति वाक्यवत् "त्रयोदश्यां न लङ्घयेत"इत्यादिवाक्यादिति । तदुक्तं–'विद्धन्यूना विद्धसमाऽधिकद्वादशिका सर्वेषां परा'इति । अयं विद्धानधिकाधिकद्वादशिकारूपो द्वितीयो भेदः । पारणपर्याप्तद्वादश्यलाभे तामुल्लङ्घ्य पारणं भवतीत्युक्तम् । यश्च विद्धानधिकानधिकद्वादशिकारूपः प्रथमभेदः, स चतुर्द्धा । एकादशीन्यूनत्वे–द्वादशीसाम्ये १, तन्न्यूनत्वे वा २ । एकादशीसाम्ये—द्वादशीसाम्ये ३, तन्न्यूनत्वेन वा ४ । तत्राद्यं आह—*विद्धेति । *मुमुक्षूणामिति ।

*विद्धन्यूना समद्वादशिका तु *मुमुक्षुणां *पुत्रवतां च परा। *अन्येषां *पूर्वा। पुत्रवतोऽपि पूर्वेति मदनरत्ने। विद्धन्यूना न्यूनद्वादशिका च सैव *सर्वैः कार्येति हेमाद्रिः। मुमुक्षूणां पराऽन्येषां पूर्वेति मदनरत्ने। वि-

---

दिनक्षये तु शुद्धेऽपि द्वादशी मोक्षकाङ्क्षिभिः।
उपोष्या, दशमी विद्धा नोपोष्यैकादशी सदा ॥

इति सौमन्तवात्। अत्र दिनक्षयो न निषेधप्रयोजकं, किं तु विद्धत्वादेकादश्याः सूर्योदयास्पर्शमात्रम्। *पुत्रवतामिति।

एकादश्यां यदा वत्स दिनक्षयाभिर्भवेत्।
अत्रोपोष्या द्वादशी स्यात्त्रयोदश्यां तु पारणम् ॥

इति पितामहोक्तेः।

दिनक्षये तु संप्राप्ते उपोष्या द्वादशी भवेत्।
दशमीशेषसंयुक्तां न कुर्वीत कदाचन ॥

इति कौर्मनिषेधाच्च। यद्यप्यत्रोभयत्र पुत्रवत्पदं न दृश्यते तथापि-

एकादशीषु नष्टासु रविसंक्रमणे तथा।
पारणं चोपवासं च न कुर्यात्पुत्रवान् गृही ॥

इति वाक्येन

एकादशीदिनक्षये उपवासं करोति यः।
तस्य पुत्रा विनश्यन्ति मघायां पिण्डदो यथा ॥

इत्यर्थवादेन च पूर्वोपवासनिषेधेऽपेक्षितपुत्रवदधिकारित्वाभा-व्। पिण्डद इति आदन्तात् षष्ठ्येकवचने "आतो धातोः" (पा० ६-४-१४०) इत्याल्लोपः। *अन्येषां=पुत्रवद्भिन्नगृहिणाम्। *पूर्वेति। पुत्रवतः पूर्वोपवासनिषेधवशेनापुत्रस्य तदुपवाससिद्धेः। पुत्रवतोऽपीत्यत्रारुचिः उक्तरीत्या स्पष्टा। द्वितीये विद्धन्यूनेति तृतीयचतुर्थयोर्विद्धसमेत्यादि। *सर्वैरिति।

ऽसमा सप्तम्यादिशाकोनस्यादशिका च मुमुक्षुभिः परा-ऽन्यैः पूर्वा कार्या ।

दशमीमिश्रिता पूर्णा द्वादशी यदि लभ्यते ।
शुक्लैव द्वादशी राजन्नुपोष्या मोक्षकाङ्क्षिभिः ॥

इति कथासोक्तेः । मोक्षकाङ्क्षिपदस्वरूपादन्येषां पूर्वैव ।

सर्वैरेकादशी कार्या द्वादशीमिश्रिता नरैः ।
प्रातर्भवतु वा मा वा यतो नित्यमुपोषणम् ॥

इति पाद्मोक्तेः । षिद्धाधिका सप्तम्यादशिका सर्वे-षां पूर्वैव ।

एकादशी दशाविद्धा परतोऽपि न वर्द्धते ।
यतिभिर्गृहिभिश्चैव सैवोपोष्या क्षये तिथिः ॥

इति पाद्मात् । 'अत्र परतोऽपि न वर्द्धते' इत्यनेनैकादश्याः साम्यमपि गृह्यते । क्षयोऽपि तस्याः साम्येऽपि यद्यपि सम्भवति एका-दश्याः सूर्योदयास्पर्शात् तथापि पृथक् क्षयशब्दानर्थक्यापत्तेः क्षयः तन्न्यूनत्वरूपो ग्राह्यः । न च यत्यर्थम् । साम्ये मुमुक्षूणामुत्तरत्रोपवा-सविधानात् । तथा च क्षये यतिभिर्गृहिभिश्च सैवोपोष्या, साम्ये तु गृहिभिः सैवोपोष्येत्यनुरागः ।

लुप्यते=वृद्धिं न प्राप्नोति । "पूर्णा च द्वादशी परा"-इति पाठान्तरात् । परा=परदिनगतैव न तु पूर्वदिनारात्रपवित्रे-स्युक्त्या एकादश्याः सूर्योदयपर्यन्तत्वलाभः । अन्यथा परशब्दवैय-र्थ्यात् । एतत्पाठे यद्यपि द्वादश्या अनाधिक्यं न लभ्यते तथापि

दिनक्षयस्पृते देवि नोपोष्या दशमीयुता ।
सैवोपोष्या सदा पुण्या परतश्चेत्त्रयोदशी ॥

इति स्कान्दे,

यदि दैवात्तु संसिध्येदेकादश्यां तिथित्रयम ।
तत्र क्रतुशतं पुण्यं द्वादशी पारणे भवेत् ॥

*पारणाहे न लभ्येत द्वादशी कलयाऽपि चेत् ।
तदानीं दशमीविद्धाऽप्युपोष्यैकादशी तिथिः ॥
इति ऋष्यशृङ्गोक्तेश्च । *माधवमते तु अत्र गृहिणां पूर्वा, यतेरुत्तरा । *विद्धाधिका न्यूनद्वादशिका मोक्षपा-

---

इति नारदीये च तथैवाभिधानात् । विद्धायां तु
अविद्धानामलाभे तु पयोदधिफलानि तु ।
सकृदेवाक्षमश्नीयादुपवासस्त्वसौ भवेत् ॥
इति भक्ष्यनियमो बोध्यः ।

अत्र विवेचनप्रकाराः । "दिनक्षये तु सम्प्राप्ते" इति कौर्मे दिनक्षयो दिनत्रयस्पृक्त्वं तेन तत्रैव पुत्रवद्गृहिणामुपवास-निषेधः परत्रोपवासश्च; साम्ये तु तेषामपि पूर्वत्रैवोपवासः तत्र निषेधाप्रवृत्तेः । "दिनक्षये तु शुद्धेन" इति सुमन्तुवाक्ये च दिनक्षयो न प्रोक्तः किं तु विद्धत्वात्सूर्योदयास्पर्शित्वम् । तथा च एतत् द्वितीयसूर्योदयपर्यन्तत्वरूपसाम्यपरमेव। "न्यूनत्वविषये या तिथिर्गृहिभिश्चैव" इति वचनाविरोधात् गृहिभिन्नपरम् । तेषामेकादशीदिनक्षये उपवासनिषेधोऽयं । तेन विद्धन्यूनानधिकद्वादशिकायां पुत्रवद्गृहिभिन्नानां सर्वेषां पूर्वत्रैवोपवासः, पुत्रवतामेव परेद्युः । विद्धसमाऽनधिकद्वादशिकायां सर्वेषां गृहिणां पूर्वेद्युः, यतीनां तु परेद्युरिति प्राहुः ।

विद्धाधिका-समद्वादशिकाऽधिकद्वादशिका च सर्वेषां परैवेति पाठः । पूर्वैवेत्यपपाठः । अधिकत्वात् । अधिकद्वादशिकामधिकृत्याह—*पारणाहे इति । पारणाहे द्वादशीलाभे तु विद्धा नोपोष्येत्यत्र तात्पर्यम् । *माधवमते त्विति । तुनाऽरुचिः । सा च
दशम्यनुगता यत्र तिथिरेकादशी भवेत् ।
तत्रापत्यविनाशः स्यात्परेत्य नरकं व्रजेत् ॥
इत्यादिना पुत्रवतः परत्वसूचनात् । अयं च विद्धाधिकाधिकद्वादशिकारूपस्तृतीयो भेदः । *विद्धेति । विद्धाधिकानधिकद्वाद-

इति पाद्मोक्तेश्च वेधसन्देहे ज्योतिर्विदां विप्रतिपत्तौ वा परा कार्येत्युक्तम्, तद् *वैष्णवविषयमित्यलं बहुना।

अथात्रोपयुक्तं किञ्चिदुच्यते । तत्र दशम्यामेकादशीयोगे *दशमीमध्य एव भोजनं कार्यम् । 'एकादश्यां न भुञ्जीत' इति तस्या एव निषिद्धत्वात् ।

निषेधस्तु निवृत्त्यात्मा कालमात्रमपेक्षते ॥

इति देवलोक्तेश्च । केचित्तु एकादशीव्रताङ्गत्वेन पूर्वेद्युः *एकभक्तविधानाद्विधिस्पृष्टे च निषेधानवकाशात् काम्यव्रताङ्गभोजननिषेधः प्रवर्तते । नैकादशीमध्येऽपि पूर्वदिने भोजनमित्याहुः* ।

अत्राधिकारी माधवीये कात्यायनेनोक्तः—

---

*वैष्णवेति । सन्देहे स्मार्तोपलक्षणम् ।

*दशमीमध्य एवेति । एकभक्तविधौ चान्द्रायणादिनि-वृत्तिवद्भुक्ताङ्गतया द्वितीयभोजननिवृत्तिरेव विधीयते लाघवात्, न तु तद्विशेष्यं भोजनमपि गौरवात् । तेन शुद्धाधिकद्वादश्यामुपवासद्वयं भवति । *एकभक्तेति ।

दशम्यामेकभक्तस्तु मांसमैथुनवर्जितः ।
एकादशीमुपवसेत्पक्षयोरुभयोरपि ॥
देवतास्तस्य तुष्यन्ति कामितं चास्य सिध्यति ।

इत्युक्तेः । कामितं चेत्यतः काम्य इव नित्येऽप्येकभक्तं कार्यम् । "शक्तिमांस्तु पुनः कुर्याद्" इत्युक्तेः । *आहुरित्यरुचिः । तद्बीजं तु एकभक्ते विशेष्यं भोजनं नार्थः ।

सायमाद्यन्तयोरह्नोः सायंप्रातश्च मध्यमे ।
उपवासफलं प्रेप्सुर्जह्याद्भक्तचतुष्टयम् ॥

इति जाबालादिस्थैवाभिधानात् । निषेधस्य सर्वैः पाल्यत्वाच्चेति । विद्धाऽधिकायां निषेधपालकस्य प्रातर्मध्याह्निकापकर्षविध्यभावाच्च-

*अष्टवर्षाधिको मर्त्यो ह्यशीतिन्यूनवत्सरः ।
एकादश्यामुपवसेत्पक्षयोरुभयोरपि ॥ इति ।

आग्नेये—

ब्रह्मचारी च *नारी च शुक्लामेव सदा गृही । इति ।

यत्तु विष्णुः—

पत्यौ जीवति या नारी उपोष्य व्रतमाचरेत् ।
आयुष्यं हरते भर्तुर्नरकं चैव गच्छति ॥

इति, तद्भर्त्रननुज्ञाविषयमिति प्रागुक्तम् ।
उपवासासामर्थ्ये तु मार्कण्डेयकौर्मौ:—

दपर्याप्तदशमीस्थलं कथं भीमनामेति विभावनीयम् । *अष्टवर्षेति । उपनयनोपलक्षणम् । "अपि वा वेदतुल्यत्वादुपायेन प्रवर्तेरन्" इति न्यायात् । न चैवमष्टवर्षग्रहणं व्यर्थं, किं च तदंशे न्यायप्राप्तानुवादित्वम्, अन्यांशे चाप्राप्तविधायकत्वमिति वैरूप्यमिति वाच्यम् । "जातपुत्रः कृष्णकेश" इतिवदिहापि पदद्वयेनोपवासयोग्यावस्थाविशेषलक्षणयाऽशीतिवर्षोर्ध्वमपि अष्टवर्षात्प्रागपि समर्थस्योपवासं वदतस्तवाप्युक्तवैरूप्यस्य दुर्वारत्वात् । तेनैव रूपेणाष्टानष्टसाधारणस्योपवासस्य विधानान्न वैरूप्यमिति चेत् तर्हि उपनीतत्वमात्रेणैव तद्विधाने वैरूप्यासम्भवात्, लाघवाच्च, तथापि च तादृशस्य समर्थस्याकृतोपनयनस्याप्यधिकारप्रसक्तेन तद्रूपस्योपनयघटितत्वावश्यकत्वाच्च । यच्च स्वनष्टवर्षीयादिरुपनीतस्याशक्तस्यानुकल्पेनापि व्रतसिद्ध्याऽधिकारनिर्वाहात् । यद्वक्ष्यति शक्तिमांस्त्विति । *नारी चेति । नारी सधवा । तस्याः शुक्लायामेवोपवासः ।

एकादश्यां विना रण्डा पतिश्च सुमहामते ।
पच्यते ह्यन्धतामिस्रे यावदाभूतसंप्लवम् ॥

इति नारदीये रण्डापदात् । नित्योपवासासामर्थ्येऽनुकल्पः । तत्र प्रथमं क्रियाऽनुकल्पः, पश्चात्कर्त्रनुकल्प इति क्रियानुकल्प-

एकभक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन *दानेन न निर्द्वादशिको भवेत् ॥

अत्र—

एकभक्तेन यो मर्त्य उपवासव्रतं चरेत् ।

इत्येकभक्तादिषूपवासशब्दस्तद्धर्मातिदेशार्थः । तेन तत्प्रयुक्ताः सर्वे धर्माः तत्स्थानापन्नेऽपि भवन्ति । संकल्पवाक्ये चैकभक्तादिपदेनोहः कार्य इति मदनरत्ने ।

पाद—*एकभक्तेनेति । "नक्तं हविष्यान्नम्" इति नक्तमुक्तं, तदसंभवे अयाचितमेकभक्तं वा कार्यमित्यत्र तात्पर्यम् । अत्र च

एकभक्तेन नक्तेन बालवृद्धातुरः क्षिपेत् ।
पयोमूलफलैर्वाऽपि न निर्द्वादशिको भवेत् ॥

इत्यादौ च खलेकपोतन्यायेनैव एकभक्तादेर्विकल्पः, न तु क्रमः । "अशक्तस्तत्रोत्तरमुत्तरं च" इत्येव तदुक्तेः । क्रमवाक्ये च फलग्रहणं मूलादेः,क्षीरग्रहणं च दुग्धादेरुपलक्षणम् । उपवासेनेति च तत्कल्पत्वार्थम् । *दानेनेति । "तावद्धनादि वा दद्यात्" इत्याद्युक्तम् । *तद्धर्मेति । एषां चैकभक्तनक्तायाचितदानानामुपवासधर्मातिदेशतया तत्तिथावनुष्ठानं निर्णीतम् । यानि त्विमानि स्वतन्त्राणि तत्र दशमीविद्धा त्याज्या । दशमीवेधश्च पञ्चदशनाडीरूपः "त्रिंश्- पञ्चदशाभिस्तथा" इति वचनात् ।

पूर्णाविद्धां त्रिनार्धेन नन्दां पूर्णामपि त्यजेत् ।
एकभक्तं च नक्तं च दानं चायाचितं च न ॥
नन्दायां पूर्णविद्धायां कुर्यादैश्वर्यमीहितः ।

इत्यभियुक्तोक्तेश्च । तद्धर्मो मुख्योपवासधर्मः । एवम् 'उपवासासमर्थश्च' इत्यादावुपवासशब्दः एकभक्तादेर्ग्रहणार्थः । तेन यथा— 'स्वर्यातस्य ह्यपुत्रस्य' इत्यादेर्गौणपुत्रस्य दत्तकादेरभावे पुत्रानुकल्पविधिवद् गौणस्याप्युपवासस्य स्वयं कर्तुमसामर्थ्ये कर्त्रनुकल्प

तथा—

> शाकं मांसं मसूरांश्च पुनर्भोजनमैथुने ।
> द्यूतमत्यम्बुपानं च दशम्यां वैष्णवस्त्यजेत् ॥

मदनरत्ने नारदीये—

> अक्षारलवणाः सर्वे हविष्यान्ननिषेविणः ।
> अवनीतल्पशयनाः प्रियासंगमवर्जिताः ॥

व्रतघ्नान्याह हेमाद्रौ देवलः—

> असकृज्जलपानाच्च सकृत्ताम्बूलचर्वणात् ।
> उपवासः प्रणश्येत दिवास्वापाच्च *मैथुनात् ॥

च बोध्यम् । कैमुतिकन्यायात् ।

> पुनर्भोजनमत्याशं दशम्यां परिवर्जयेत् ।

इत्युक्तेश्च । अक्षाराक्लवणा इति पाठेऽक्षाराश्चाक्लवणाश्चेति विग्रहः । अक्षारलवणा इति पाठेऽपि क्षाराश्च लवणानि चेति समासानन्तरं नञ्समासः । समान एवार्थः । क्षारलवणं खारीति प्रसिद्धम् । तन्निषेधोऽयमिति केचित् । तन्न, क्षारलवणपदयोः एकवैयर्थ्यात् । सकृत्पानं=पात्रं भूमावनाधाय पानम् ।

> पानीयादि पिबेद्येन तत्पात्रं द्विजसत्तम ।
> अनुच्छिष्टं भवेत्तावद्यावद्भूमौ न निक्षिपेत् ।

इति शातातपवचनात् । यत्तु शातातपेन —

> पीतोच्छिष्टं तु पानीयं पीत्वा तु ब्राह्मणः क्वचित् ।
> त्रिरात्रं तु व्रतं कुर्याद्वामहस्तेन वा पुनः ।

इत्युक्तं, तत्प्रात्याहिकजलपानपरम् । तथा च तादृशं जलपानमुपवासदिने सकृत् अन्यदा त्वसकृदित्यर्थः । *मैथुनादिति । अयं पुंश्चलीषु

> स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।
> संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च ॥

अशक्तौ तु मदनरत्ने देवलः

अत्ययं चाम्बुपानेन नोपवासः प्रणश्यति ।

अत्ययं=कष्टे ।

विष्णुरहस्ये

गात्राभ्यङ्गं शिरोऽभ्यङ्गं ताम्बूलं चानुलेपनम् ।
व्रतस्थो वर्जयेत्सर्वं यच्चान्यच्च निराकृतम् ॥

एषु प्रायश्चित्तमुक्तं निर्णयामृते संग्रहे—

स्तेनान्त्यस्त्रकयोः स्पर्शं कृत्वा स्तैन्यं च हिंसनम् ।
प्रायश्चित्तं व्रती कुर्याज्जपेन्नामशतत्रयम् ॥

एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ।

इत्यष्टाङ्गस्यापि निषेधः, न तु स्त्रीषु । "प्रेक्षणालम्भने मैथुनशङ्कायाम्" इति गौतमेन शङ्कितया तासु तदभावात् । स्वदारेषु तु क्रियानिवृत्तिमात्रस्य ।

स्त्रीणां तु प्रेक्षणात्स्पर्शात्ताभिः संकथनादपि ।
निपतति ब्रह्मचर्यं स्वदारेषु तु संगमात् ॥

इति देवलोक्तेः । न दारेष्वृतुसंगमादिति वा पाठः । ✻अभ्य-र्थेति । पुरुषार्थनिषिद्धस्य सर्वस्याप्ययं क्रत्वर्थो निषेधः । यच्चान्य-द्धकरागकृदिति वा पाठः । स्तैन्यं तृणादेरपि । हिंसनं कीटादेरपि । नाम्ना=विष्णुनाम्ना शतत्रयं न त्वेकमेव नाम शतत्रयवारम् । संख्यायाः पृथक्त्वनिवेशात् ।

व्रतलोपो न चेत्कुर्यात्कृष्णावद् भुजिवर्जनम् ।

इति । व्रतलोप इति पूर्वान्वयः । तत्र भुजिवर्जनम्=उपवासं न कुर्यात्, किं तु कृष्णावत्=किंचिद्भक्षणमित्यर्थः । अत्र प्रायश्चित्तं—

व्रतलोपो भवेत्कुर्याद्दशाक्षरमनोर्जपम् ।

इति पाठे बोध्यम् । संभोगः स्वदारेषु, परदारेषु तु स्मार्तप्राय-श्चित्तेन समुच्चयः । एतत्प्रायश्चित्तं भक्ष्यमांसे । अभक्ष्यमांसभक्षणे-

मिथ्यावादे दिवास्वापे बहुशोऽम्बुनिषेवणे ।
अष्टाक्षरं व्रती जप्त्वा शतमष्टोत्तरं शुचिः ॥
प्रणवं पूर्वमुच्चार्य नमो नारायणः पदम् ।
चतुर्थ्यन्तं पदं तत्राप्यनुरष्टाक्षरो मनुः ॥

तत्रैव पैठीनसिः —

ताम्बूलचर्वणे स्त्रीसंभोगे सोमनिषेवणे ।
प्रमत्तानां न कुर्वीत कृष्णानष्टाजितार्जनम् ॥ इति ।

कृष्णोच्चारणाष्टोत्तरजपानिभमात्रपरिपालने तु ता-म्बूलचर्वणादावपि न दोष इत्यर्थः । संभोगे ऋतुकाला-दन्यत्र

*रेतःसेकात्मसंभोगमृतेऽन्यत्र भङ्गः स्मृतः ।

इति कात्यायनोक्तेः ।

हेमाद्रौ वसिष्ठः—

*उपवासे तथा श्राद्धे न कुर्याद्दन्तधावनम् ।

ऽहिंस्याहिंसने च स्यात्प्रायश्चित्तेन गगुदगः । *रेत इति । रेतःसेकात्मसंभोग ऋतुकालः । भङ्गः=व्रतभङ्गः । 'रेतःसंक्रमणात्संगात्भंगे' इति पाठे रेतसः संक्रमणं=गर्भकारि तत्संगं गमनं ऋतुकालगमनमेव तदात्मकात् स्त्रीसम्भोगादन्यत्र स्त्रीसम्भोगे इति स एवार्थः । ऋतुगमनाभ्यनुज्ञाऽपि मासमध्यविहितस्य पाडप्यापेन रात्रौ सन्निहितस्यानन्यगतिकत्वात् श्राद्धे तदनुज्ञावत् । अत्रानुक्तप्रायश्चित्तेषु कायिकेषु ऋतुसंभोगस्य न प्रवेशः । तेन—

जपोऽष्टाक्षरमन्त्रस्य नामशतत्रयस्य वा ।

इति उत्तरार्द्धोक्तं विकल्पितप्रायश्चित्तं कायिकसामान्ये सिध्यति । जपे संख्या त्वष्टशतस्यैव पूर्वोक्ता । *उपवासे इति । अत्र

दशम्यामेकभक्तं तु कुर्वीत नियतेन्द्रियः ।
आचम्य दन्तकाष्ठं तु खादेत तदनन्तरम् ॥
ततश्चानन्तरं विप्रो ब्रह्मचारी जितेन्द्रियः ।

दन्तानां काष्ठसंयोगो दहत्यासप्तमं कुलम् ॥

*काष्ठग्रहणात् *लोष्ठाद्यनिषेध इति हेमाद्रिः ।

विष्णुरहस्ये—

आत्तोपवासदिवसे खादित्वा दन्तधावनम् ।
गायत्र्या शतसंपूतमम्बु प्राश्य विशुध्यति ॥

निर्णयामृते व्यासः—

*वर्जयेत्पारणे मांसं व्रताहेऽप्यौषधं सदा । इति ॥

रात्रिं नयेत्ततः पश्चात् प्रातः स्नात्वा समाहितः ।
उपवासं तु संकल्प्य मन्त्रपूतं जलं पिबेत् ॥

इति वाक्येन पूर्वसूत्रोक्तभक्तानन्तरं काष्ठेन दन्तधावनमुक्तं स्मर्तव्यम् । *काष्ठेनेति । "अक्ताः शर्करा उपदधाति, तेजो वै घृतम्" इत्यादौ विधेरिव निषेधस्यापि विशेषपरत्वे वाक्यशेष एव बीजम् । तथा च न कुर्यात्काष्ठेन दन्तधावनमित्यर्थ इति विशेषनिषेधः शेषाभ्यनुज्ञाफलक इति भावः । *लोष्ठादीनि । आदिना

अलाभे वा निषेधे वा काष्ठानां दन्तधावने ।
पर्णादिना विशुध्येत जिह्वोल्लेखः सदैव हि ॥

इति पैठीनस्युक्तम् । दन्तपदोपादानात्काष्ठेन जिह्वोल्लेखो दर्शितः ।

अलाभे दन्तकाष्ठानां निषिद्धायां तथा तिथौ ।
अपां द्वादशगण्डूषैर्विदध्याद्दन्तधावनम् ॥

इति व्यासेन यदुक्तं, तत् मृदादिसहितमसहितं वा द्रष्टव्यम् । "तृणपर्णोदकेनाङ्गुल्या वा दन्तान् धावेत् प्रदेशिनीवर्जम्" इति पैठीनस्युक्तेः,

पश्चाद् द्वादशगण्डूषैर्विदध्याद्दन्तधावनम् ।
स्मृत्वोङ्कारं च गायत्रीं निबध्नीयाच्छिखां ततः ॥

इति शौनकोक्तेश्च । मांसनिषेवणे इति यदुक्तं, तदुपवासदिने तल्लक्षणप्रसक्त्यभावात्कथमित्यत आह—*वर्जयेदिति । पारणदिनमपि

*एकादश्यां श्राद्धप्राप्तौ पाद्मगोभिले कात्यायन आह —

उपवासो यदा *नित्यः श्राद्धं नैमित्तिकं भवेत् ।
उपवासं तदा कुर्यादाघ्राय पितृसेवितम् ॥

व्रताहः । "पारणान्तं व्रतं ज्ञेयम्" इत्युक्तेः । तथा च तत्र मांसभक्षणे व्रतलोप इति तदर्थः । मांसभक्षणं च "अष्टौ तान्यव्रतघ्नानि" इत्यभ्यनुज्ञातमपि मांसं मुख्यव्रताहेऽपि वर्जयेदित्यर्थः । मांसतुल्यानां वसारुधिरादीनां तद्वदेव वर्जनं "बहूनामेकधर्माणाम्" इति न्यायात् । *एकादश्यामिति ।

श्राद्धं कृत्वा तु यो मर्त्यो न भुङ्क्ते पितृसेवितम् ।
हविर्देवा न गृह्णन्ति कव्यानि पितरस्तथा ॥

इति वाक्येन सामान्यतः

व्यतीपाते कृते श्राद्धे पुत्री नोपवसेद् गृही ॥

इत्यादिना विशेषतश्च श्राद्धशेषभोजनं विहितम् । तत्र पुरुषार्थस्योपवासस्य क्रत्वर्थेन श्राद्धशेषभोजनेन बाधः स्यादित्यर्थः । *नित्य इति नैमित्तिकोपलक्षणम् । काम्योपवासे तु शेषभोजनं, तत्स्थानापन्नं तदाघ्राणं वा न कार्यम् । काम्यस्य नित्यबाधकत्वात् । तद्विधिः स्कान्दे—

यस्मिन् दिने पितुः श्राद्धं मातुर्वाऽथ भवेद् गुह ।
तस्मिन्नेव दिने तात भवेदेकादशीव्रतम् ॥
अन्यद्वाऽपि व्रतं स्कन्द तदा कार्यं तु तच्छृणु ।
तदा कृत्वा तु वै श्राद्धं भुक्तशेषं तु यद्भवेत् ॥
तत्सर्वं दक्षिणे पाणौ गृहीत्वाऽन्नं शिखिध्वज ।
अवजिघ्रेदनेनाथ तेन श्राद्धं शिखिध्वज ॥
पितॄणां तृप्तिदं जातं व्रतभङ्गो न विद्यते । इति ।

एतच्च मुख्योपवासपरम् । कन्दमूलाद्यनुकल्पे तु देवपितृपात्रे तत्परिवेषणेन शेषभक्षणं कार्यम् । सर्वजातीयशेषभोजनं विनाऽपि

*मातापित्रोः क्षये प्राप्ते भवेदेकादशी यदि ।
अभ्यर्च्य पितृदेवांश्च आजिघ्रेत्पितृसेवितम् ॥ इति ।

हेमाद्र्यादिसर्वनिबन्धेष्वदर्शनम् । एतेनैकादशीनिमित्तकं श्राद्धं द्वादश्यां कार्यमिति वदन्तः परास्ताः । किंच महालये—

स पक्षः सकलः पूज्यः श्राद्धषोडशकं प्रति ।

इति श्रुतं(१) षोडशत्वं, पौषैकादश्यां च मन्वादिश्राद्धं, क्षयाहापरिज्ञाने च तत्रत्यैकादश्यां विहितं श्राद्धं बाधितमेव स्यात् । यदपि स्मृतिचन्द्रिकायां पठन्ति—

अन्नाश्रितानि पापानि तद्भोक्तृदातुरेव वा ।
मज्जन्ति पितरस्तस्य नरके शाश्वतीः समाः ॥ इति ।

तस्यापि(२) रागप्राप्तभुजिनिषेधपरस्य वैधं श्राद्धं गोचरयतो महत्त्वादक्षमत्वमित्यलम्* । यदपि—

अकृतश्राद्धनिचया जलपिण्डं विना कृताः ।

इति लघुनारदीये एकादश्यां श्राद्धादिनिषेधः स मातापितृभिन्नविषयः । पूर्ववाक्ये तद्ग्रहणात् । यद्वा-

---

श्राद्धविगुणपरत्वमपि स्पष्टत्वात् । *मातापित्रोरिति भ्रात्राद्युपलक्षणम् । मातापितृभिन्नेत्यस्य मातापितृभ्रात्रादिभिन्नेत्यर्थः । श्राद्धं नैमित्तिकमित्यस्याऽऽवश्यकमित्यर्थात् ।

सूतके मृतके श्राद्धं सूतकान्ते विधीयते ।
तथैकादशीश्राद्धं द्वादश्यामेव कारयेत् ॥

इति तु प्रलाप एवेत्याह—*अलमिति ।

---

(१) तस्मिन् पक्षे प्रतिपदारभ्य नवरात्रप्रतिपदन्तं प्रतितिथि श्राद्धस्य विधानादिति भावः ।

(२) निषेधस्येत्यर्थः । रात्रिसत्रन्यायेन निन्दाऽर्थवादान्निषेधकल्पनमिति तात्पर्यम् ।

श्राद्धनिमन्त्रणः—श्राद्धे प्रतिग्रहः(१) ॥

अव्रतघ्नान्याह मदनरत्ने देवलः—

*सर्वभूतभयं व्याधिः प्रमादो गुरुशासनम् ।
अव्रतघ्नानि पठ्यन्ते *सकृदेतानि शास्त्रतः ॥

स्कान्देऽपि—

अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः ।
हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम् ॥

*इदं चासकृद्विषयम् । नारदीये—

अनुकल्पो नृणां प्रोक्तः क्षीणानां वरवर्णिनि ।
मूलं फलं पयस्तोयमुपभोग्यं भवेच्छुभे ॥
नक्तं च भोजनं केचिदेकादश्यां बुधैः स्मृतम् ॥ इति ।

अस्यापवादः—

शयने च समुत्थाने मत्पार्श्वपरिवर्तने ।

---

*सर्वेति । सर्वेभ्यो भूतेभ्यः सकाशाद् व्रतकर्तुर्भयम् । मदनरत्ने तु भूतमयेभ्यः सर्पादिभ्यो भयम् । तेन सर्पादिभयाद् व्रताङ्गवैकल्येऽपि न व्रतहानिरित्युक्तम् । *सकृदिति । असकृत्तु "कामात् क्रोधात्" इत्यादिनोक्तं प्रायश्चित्तम् । *इदं चेति । यथा हेमाद्रौ—

व्रतस्थं व्याधितं दृष्ट्वा मुमूर्षुं च तपोधनम् ।
दृष्ट्वा तु ब्राह्मणस्तस्य कुर्यात् सम्यगनुग्रहम् ॥
अमृतं पायसं क्षीरमिच्छमानं सकृन्निशि ।
यथेह न वियुज्येत प्राणैः क्षुत्पीडितो व्रती ॥
पाययित्वाऽमृतं क्षीरं रक्षेद्दत्त्वा फलानि च ।
एवं मासोपवासस्थमारूढप्राणसंशयम् ॥

इति मासोपवासव्रतपरं संकटविषयं, तद्वत् 'अष्टौ तानि' इति

(१) तेन श्राद्धप्रतिग्रहीतुरयं तद्दिने निषेधो न तु श्राद्धकर्तुरिति भावः ।

*नरो मूलफलाहारी हृदि ध्यात्वा समर्पयेत् ॥

इदं चान्यसंकल्पविषयम्(१) ।

एवं चाविरोधिनो निर्णयाः सर्वव्रतेषु ज्ञेयाः ।

तत्रैकादश्यां *सङ्कल्पः—

गृहीत्वौदुम्बरं पात्रं वारिपूर्णमुदङ्मुखः ।

उपवासं तु गृह्णीयाद्यद्वा धीर धारयेत् ॥

इति माधवीये वाराहोक्तेः ।

मन्त्रस्तु विष्णुः—

एकादश्यां *निराहारः स्थित्वाऽहमपरेऽहनि ।

भोक्ष्यामि पुण्डरीकाक्ष शरणं मे भवाच्युत ॥ इति ।

शैवादीनां तु हेमाद्रौ सौरपुराणे—

सावित्र्याऽप्यथ वा नाम्ना सङ्कल्पं तु समाचरेत् ।

*शिवादिगायत्र्यो यजुर्वेदे प्रसिद्धाः । वाराहे-

सर्वव्रतपरमपि सङ्कल्पविषयमित्यर्थः । *नरो मूलेति । 'पयोमूल' इति युक्तः पाठः । पयःपदं दध्यादेरुपलक्षणम् । *सङ्कल्प इति । प्रातः सङ्कल्पश्च प्रातः सन्ध्योत्तरं कार्यः ।

प्रातःसन्ध्यां ततः कृत्वा सङ्कल्पं तत आचरेत् ।

इति वचनात् । सायमादिसङ्कल्पा अपि सायमादिसन्ध्या-ऽनन्तरमेव ।

संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ।

इति वचनात् । *निराहार इति । फलाहार इत्याद्यूहो बोध्यः । देशकालौ संकीर्त्य विष्ण्वनुज्ञया एकादशीव्रतमहं करिष्ये इति पठित्वेमं श्लोकं पठेत् । "भोक्ष्यामि" इत्यत्र चाहंपदमनुवर्त्तते अध्याहार्यं वा । सर्वथाऽहंपदाभावे पाणिनिस्मृत्या कथंचित् प्रयोगसम्भवेऽपि क्रतुवैगुण्यात्(२) । *शिवादीनि । "तत्पुरुषाय

---

(१) इयं पङ्क्तिर्मुद्रितपुस्तके नास्ति ।

(२) वस्तुतस्तु अहंपदानुवृत्तेरध्याहारस्य वा नात्यपेक्षा । 'एका-

*इत्युच्चार्य ततो विद्वान् पुष्पाञ्जलिमथार्पयेत् ।
*ततस्तज्जलं पिबेत् ।

अष्टाक्षरेण मन्त्रेण त्रिर्जप्तेनाभिमन्त्रितम् ।
*उपवासफलं प्रेप्सुः पिबेत्पात्रगतं जलम् ॥

इति कात्यायनोक्तेः । मध्यरात्रे उदये वा दशमीवेधे रात्रौ सङ्कल्प इति माधवः ।

विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात्" इति शिवगायत्री। अन्या विस्तरभयान्नोच्यन्ते(१)। श्लोकमन्त्रस्तु नाम्नां सम्भवेऽसम्भवे च । श्लोकमन्त्रासम्भवेऽपि संकल्पो भवत्येव । संकल्पानन्तरकृत्यमाह—*इत्युच्चार्येति ।*तत इति । पात्रे हस्ते वा संकल्पवाक्योच्चारणसहितं वारिणो धारणं सङ्कल्पः । तत्र पात्रस्थं जलं पिबेत्, हस्तस्थं तु भूमौ त्यजेत् । *उपवासफलमिति । व्रतमात्रान्यं

दश्यां निराहारः स्थित्वाऽपरेऽहनि अहं भोक्ष्यामि' इत्यन्वयेन गतार्थत्वात् । निराहारस्थितिकर्तृत्वमहमर्थस्य समानकर्तृकतायां विहितक्त्वाप्रत्ययेनैव लब्धमिति चिन्त्यम् ।

(१) तास्तु तैत्तिरीयशाखायां नारायणोपनिषदुक्ताः—'ॐ पुरुषस्य विद्महे सहस्राक्षस्य महादेवस्य धीमहि । तन्नो रुद्रः प्रचोदयात् ॥ १ ॥ ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥२॥ ॐ तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्तिः प्रचोदयात् ॥ ३ ॥ ॐ तत्पुरुषाय विद्महे महासेनाय धीमहि । तन्नः षण्मुखः प्रचोदयात् ॥ ४ ॥ ॐ नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् ॥ ५ ॥ ॐ वज्रनखाय विद्महे तीक्ष्णदंष्ट्राय धीमहि । तन्नो नारसिंहः प्रचोदयात् ॥ ६ ॥ ॐ भास्कराय विद्महे महद्द्युतिकराय धीमहि । तन्नो आदित्यः प्रचोदयात् ॥ ७ ॥ ॐ वैश्वानराय विद्महे लालीलाय धीमहि । तन्नो अग्निः प्रचोदयात् ॥८॥ ॐ कात्यायनाय विद्महे कन्याकुमारि धीमहि । तन्नो दुर्गिः प्रचोदयात् ॥ ९ ॥' इति क्रमेण परमपुरुष-शिव-गणपति-षडानन-विष्णु-नृसिंह-भास्कर-अग्नि-दुर्गाणां ज्ञेयाः ।

*दशम्याः सकृदाचेण अर्धरात्रादपरेण तु ।
वर्जयेच्चतुरो यामान्सङ्कल्पार्चनयोः सदा ॥
*विद्धोपवासेऽशक्तस्तु दिनं त्यक्त्वा समाहितः ।
रात्रौ संपूजयेद्विष्णुं सङ्कल्पं च तदाऽऽचरेत् ॥

इति नारदीयोक्तेः । तत्रैव पूजामभिधाय —

देवस्य पुरतः कुर्याज्जागरं नियतो व्रती ।

द्रष्टव्यम् । *दशम्या इति विद्धोपवासे इति च

प्रातः सम्पूजयेद्विद्वानुपवासागमनादिकम् ।

इत्यस्यापवादः । पूजाप्रकारश्च ब्राह्मे —

एकादश्यां शुभे पक्षे निराहारः समाहितः ।
नानापुष्पैर्मुनिश्रेष्ठ विचित्रं मण्डपं शुभम् ॥

कृत्वेति शेषः ।

स्नात्वा सम्यग्विधानेन सोपवासो जितेन्द्रियः ।
सम्पूज्य विधिवद्विष्णुं श्रद्धया सुसमाहितः ॥
पुष्पगन्धैस्तथा धूपैर्दीपैर्नैवेद्यकैः परैः ।
उपचारैर्बहुविधैर्जपहोमैः प्रदक्षिणैः ॥
स्तोत्रैर्नानाविधैर्दिव्यैर्गीतवाद्यमनोहरैः ।
दण्डवत्प्रणिपातैश्च जयशब्दैस्तथोत्तमैः ॥
एवं सम्पूज्य विधिवद्रात्रौ कृत्वा प्रजागरम् ।
याति विष्णोः परं स्थानं नरो नास्त्यत्र संशयः ॥ इति ।

निराहार इति फलाहारादेरुपलक्षणम् ।

सताम्बूलमताम्बूलं सभोजनमभोजनम् ।
साहारं च निराहारं चतुर्विधमुपोषणम् ॥

इत्यनेनैकधर्मिणामेव विभागात् । इयं च पूजा नित्यपूजातः पृथक्, अशक्तावपृथक्कार्या, अत्यशक्तौ नित्यपूजाङ्गानां द्रव्यमन्त्रादीनां लोपः । सोपवासः=कृतोपवाससङ्कल्पः । विशेषो नारदीये—

पञ्चामृतेन संस्नाप्य एकादश्यां जनार्दनम् ।

द्वादश्यां पयसा स्नाप्य हरिमाकल्पमश्नुते ॥

एतेन द्वादश्यां स्नानोपचारो नेत्यपि(स्तं) परास्तम् । एकादशी-
विशेषपूजा च भविष्ये—

पृथक् जलं पृथक् पुष्पं मासे मासे पृथक् पृथक् ।
मार्गशीर्षे सिते पक्षे हरेरेकादशी प्रिया ॥
जयन्ती नाम विख्याता सर्वपापप्रणाशिनी ।
केशवं स्थापयेत्तत्र विशालाक्ष्या समन्वितम् ॥
पूजयेन्मालतीपुष्पैर्नैवेद्यं मोदका मताः ।
नारङ्गेण दद्दर्घ्यं सप्तधान्यं प्रदीयते ॥

मोक्षा एकादशी । शेषं पूर्ववदित्यन्यत्र । अर्घ्यमन्त्रः—

स्मृतो हरसि पापानि सत्यमेतज्जनार्दन ॥
दुःस्वप्नं दुर्मतं चैव मनसा दुर्विचिन्तितम् ।
नारकं च भयं देव भयं दुर्गतिसम्भवम् ॥
भयमेतत् सुरेशान ऐहिकं पारलौकिकम् ।
तेन सत्येन मे नाशं गृहाणार्घ्यं जनार्दन ॥ इति ॥ १ ॥
कृष्णपक्षे च विख्याता विमलैकादशी शुभा ।
न्यसेत् संकर्षणं देवं सहितं च सुनन्दया ॥
पूजयेद्विमलैः पुष्पैः शृणु राजन्नगस्त्यकैः ।
रम्भाफलेन चैवार्घ्यं नैवेद्यं गणकाः स्मृताः ॥
सुवर्णं दीयते दानं द्विजेभ्यो नृपसत्तम ।

अन्यत्र फला एकादशी, पक्वान्नं नैवेद्यम ॥ २ ॥

पौषस्यैकादशी शुक्ला सा नन्दा नाम भूपते ।

पुत्रदेत्यन्यत्र ।

न्यसेन्नारायणं देवं लक्ष्म्या चैव समन्वितम् ॥
पूजयेत्पद्मपुष्पैश्च दाडिमं चार्घ्यमुत्तमम् ।
चूर्णमुक्तं तु नैवेद्यं रूप्यपात्रं प्रदीयते ॥

चूर्णं=चूर्मो इति गुर्जरभाषा । रूप्यपात्रं घृतपूर्णमिति स-

म्प्रदायः ॥ ३ ॥

कल्याणी कृष्णपक्षे तु न्यसेद्देवं हरिं शुभम् ।

षट्तिलेत्यन्यत्र ।

सहितं श्रीसुभिगया कल्हारेण प्रपूजयेत् ।

ददेदर्घ्यं शुभां द्राक्षां नैवेद्यं घृतरं वर ॥

घृतरं=घेवरमिति भाषा, घृतपूरमिति केचित् ।

दानानि दीयते दुग्धं द्विजेभ्यो नृपपुङ्गव ॥ ४ ॥

माघे कामप्रदा चैव शुक्ला माधवदेवता ।

जयाभिधेत्यन्यत्र ।

रुक्मिण्या सहितो देवः पूजयेत्कुन्दकैः शुभैः ॥

कुब्जकैरित्यन्यत्र ।

बीजपूरं ददेदर्घ्यं नैवेद्यं मण्डकास्तथा ।

द्विजाय तिलधेनोश्च कथितं दानमुत्तमम् ॥

गुडातिलपिष्टयुता धेनुः, तण्डुलपिष्टकयो वा देया इति संप्रदायः ॥ ५ ॥

एकादशी जया कृष्णे अच्युतं पूजयेत् गुरम् ।

धात्र्या च सहितं देवं पूजयेत् तुलसीदलैः ॥

सोगालिका च नैवेद्यं जम्बीरेणार्घ्यमुत्तमम् ।

उपानद्दीयते दानं द्विजाय विष्णुवत्सलैः ॥

विजया एकादशी, खर्जूरीफलं नैवेद्यं, पक्वान्नहोम इत्यन्यत्र ॥६॥

फाल्गुनेकादशी शुक्ला सा धात्री नाम भूपते ।

गोविन्दं पूजयेद्देवं चन्द्रकान्त्या समन्वितम् ॥

पूजयेच्चम्पकैः पुष्पैरक्षोटेनार्घ्यमुत्तमम् ।

कंसारकं च नैवेद्यं तिलपात्रं प्रदीयते ॥ ७ ॥

सौम्या चैकादशी कृष्णे आनिरुद्धं प्रपूजयेत् ।

सहितं मित्रविन्दाया कुसुमैर्मुचुकुन्दकैः ॥

अर्घ्यं चैवोत्पत्ती दद्यान्नैवेद्यं शक्तां शुभाम् ।

तिलधेनुः प्रदातव्या द्विजाय कृष्णरूपिणे ॥

खर्जूरी अर्घ्यं, वटकं नैवेद्यमन्यत्र ॥ ८ ॥

चैत्रे च दमना नाम विख्यातैकादशी शुभा ।
विष्णुं संपूजयेद्देवं विशालाक्ष्या समन्वितम् ॥
पूजयेच्चूतपुष्पैश्च चिर्भटेनार्घ्यमुत्तमम् ।
नैवेद्यं सक्तुकं चैव कर्पूरागुरुचन्दनम् ॥

कामदा एकादशी एलाऽर्घ्यं एक्षवो रसो दण्डो वा नैवेद्यम्॥९॥

बहुला कृष्णपक्षे च वासुदेवं सुरं नृप ।
शैव्यया सहितं देव्या मरुपुष्पैश्च पूजयेत् ॥
अर्घ्यं जातीफलं चैव नैवेद्यं वटकानि च ।
दीयते वस्त्रयुग्मं च द्विजाय विष्णुरूपिणे ॥

वरूथिनी एकादशी, सक्तु नैवेद्यम् ॥ १० ॥

एकादशी नरश्रेष्ठ वैशाखे मधुसूदन ।
मधुसूदनदेवं च माधव्या च समन्वितम् ॥
पूजयेद्दमनैः पुष्पैरर्घ्यं तु पनसं स्मृतम् ।
उपानद्युगलं दानं पायसं शर्करान्वितम् ॥

मोहिनी एकादशी, राजनीकफलार्घ्यं, गुल्मशाकी नैवेद्यं दुग्धदानम् ॥ ११ ॥

सिद्धा चैकादशी कृष्णे प्रद्युम्नं देवमर्चयेत् ।
कालिन्द्या सहितं देव्या अर्घ्यं चूतफलं नृप ॥
नैवेद्यं कथितं दुग्धं गोदानं द्विजसूनवे ।

अपारानमनाम एकादशी,बकुलं पुष्पं,कर्कटी अर्घ्यं छत्रोपानदानम्१२॥

ज्येष्ठे त्रिविक्रमा शुक्ले देवं चैव त्रिविक्रमम् ।
पूजयेद्यूथिकापुष्पैः पद्मालया या तयाऽन्वितम् ॥
करणेन ददेदर्घ्यं नैवेद्यं घृतशालिजम् ।
दानं च दीयते छत्रं द्विजायानन्तरूपिणे ॥

निर्जला एकादशी, दध्योदनं नैवेद्यं, जलघटदानं परमान्-

माज्यं च ॥ १३ ॥

एकादशी कृष्णपक्षे विख्याता पापनाशिनी ।
नृसिंहं स्थापयेद्देवं क्षेमकान्त्या समन्वितम् ॥
पूजयेद् भृङ्गराजेन अर्घ्यमाम्रफलं स्मृत ।
करम्बकैश्च नैवेद्यं जलधेनुर्द्विजाय च ॥

योगिनी एकादशी, क्षेमकरी देवी, पक्वान्नं नैवेद्यं, पट्टिकाच-न्दनदानम् ॥ १४ ॥

एकादशी शुक्लपक्षे आषाढे सुगतिप्रदा ।
पूजयेद्वामनं देवं देव्या कमलयाऽन्वितम् ॥
नारिकेलं ददेदर्घ्यमपामार्गेण पूजयेत् ।
खण्डमोदकाश्च नैवेद्यं भूमिं छत्रं च दीयते ॥

पद्मा एकादशी, मधुमती देवी, पक्वान्नं नैवेद्यम्, इक्षुदानम् ॥१५॥

एकादशी च विख्याता ह्यसिते चारिनाशिनी ।
युक्तं विजयया देव्या पूजयेत्पुरुषोत्तमम् ॥
सुगन्धैर्बहुलैः पुष्पैरर्घ्यं बिल्वफलं स्मृतम् ।
नैवेद्यं पूपकैः कार्यं नवनीतं प्रदीयते ॥

कामिका एकादशी, मल्लिका पुष्पं, मालपुवा नैवेद्यं, कांस्यपात्र-दानं नवनीतदानं मिष्टान्नभोजनम् ॥ १६ ॥

श्रावणस्य सिते पक्षे ललितैकादशी नृप ।
श्रीधरं स्थापयेद्देवं कान्तिमत्या समन्वितम् ॥
पूजयेच्छतपत्रैश्च अर्घ्यं पनसकं वरम् ।
नैवेद्यं पोलिका श्रेष्ठा पुस्तकं दीयतेऽनघ ॥

पुत्रदा एकादशी, पक्वान्नं नैवेद्यं, छत्रताम्बूलदानम् ॥ १७ ॥

धर्मप्रदाभिधा कृष्णेऽधोक्षजं पूजयेत् सुरम् ।
रुक्मिण्या सहितं भूप पुष्पैः पाटलजैर्वरैः ॥
अर्घ्यं पूगीफलं चैव नैवेद्यं पूरिका मता ।
दीयते घृतपात्रं तु विप्राय विष्णुरूपिणे ॥

अजा एकादशी, शेवगाजिल्बी नैवेद्यं तिलपिष्टकल्पनापात्रदानम् १८॥

एकादशी भाद्रपदे शुक्ले च हरिवल्लभा ।
स्थापयेच्च हृषीकेशमपराजितया सह ॥
पूजयेत्काशपुष्पैश्च कूष्माण्डेनार्घ्यमुत्तमम् ।
तिलक्षोदं च नैवेद्यं दानं ब्रह्मपुरी मता ॥

कामिका एकादशी, रतिकरी देवी, कुशपुष्पं पुष्पं, खाजा नैवेद्यं, कनपात्रदानम् ॥ १९ ॥

रौद्रा चैकादशी कृष्णे पूजयेच्च जनार्दनम् ।
देवं सुभगया सार्धं दूर्वाङ्कुरवरैः शुभैः ॥
शिवाफलं ददेदर्घ्यं नैवेद्यं खण्डमण्डकाः ।
त्रिधिवर्षायने कन्या सजातीयवराय च ॥

इन्दिरा एकादशी, सुप्रभा देवी धात्रीफलार्घ्यं, पक्वान्नं नैवेद्यं गोदानं, सक्तुदानम् ॥ २० ॥

एकादशी विशोका च आश्विने मासि सिता ।
स्थापयेत्पद्मनाभं तु पद्मावत्या समन्वितम् ॥
पूजयेच्च शमीपुष्पैरर्घ्यं मदनजं फलम् ।
शालिपिष्टेन नैवेद्यं शर्करासहितेन वै ॥
दीयन्ते मोदका भूप गुडेन सर्पिषाऽन्विताः ॥

पापाङ्कुशा एकादशी, कमलफलार्घ्यं, कदलीफलं नैवेद्यं, लड्डुदानम् ॥ २१ ॥

एकादशी च विख्याता असिते सुखवर्धिनी ।
कृष्णं संपूजयेद्देवं सुदेव्या मत्यया सह ॥
मुचुकुन्दैर्वरैः पुष्पैरर्घ्यं रम्भाफलं वरम् ।
नैवेद्यं गुडसर्पिर्भ्यां सुवर्णं दीयतेऽनघम् ॥

रमा एकादशी, नागकेसरमुचुकुन्दौ पुष्पम्, अशोकफलार्घ्यं, मुद्गलड्डुकं नैवेद्यं, गुडधेनुदानम् ॥ २२ ॥

एकादशी च विख्याता ज्ञानदा शुक्लकार्तिके ।

द्वादश्यां निवेदनमन्त्र उक्तः कात्यायनेन—
*अज्ञानतिमिरान्धस्य व्रतेनानेन केशव ।

न्यसेद्दामोदरं देवं सहितं राधया वरम् ॥
पूजयेत्कुम्भिकापुष्पैरर्घ्यं तु पद्मिनी फलम् ।
मुद्गचूर्णं तु नैवेद्यं गुरुवशय्या च दीयते ॥
प्रबोधिनी एकादशी, हर्षा दीपाश्च कार्याः, घृतपक्वा नैवेद्यं, दाडिमीफलार्घ्यं, गुडधेनुदानम् ॥ २३ ॥
अभया चाश्विने पक्षे उपेन्द्रं पूजयेत्सुधीः ।
सुगन्धया च सहितं तिलपुष्पैश्च पाण्डव ॥
इक्षुदण्डं ददेदर्घ्यं नैवेद्यं गुणसर्पिषी ।
भूमिदानं च विधिवद्विधिश्च कथितो मया ॥
उत्पत्तिका एकादशी, सत्या देवी, मोदका नैवेद्यम् ॥ २४ ॥
एवं द्वादशवर्षाणि कृत्वा संवत्सरं तु वा ।
पश्चादुद्यापनं कुर्यात् सुव्रती व्रतसिद्धये ॥
कार्तिके मार्गशीर्षे वा माघे भीष्मतिथौ तु वा ।
फाल्गुनैकादशी चैत्रे वैशाखे मधुसूदनी ॥
कर्तव्यं तत्र वा राजन्नेकादश्यां विसर्जनम् ॥ इति ।
उद्यापनप्रकारोऽन्यत्र बोध्यः । एकादशीव्रतोद्यापनाकरणे दोषो विष्णुरहस्ये—
समादाय विधानेन द्वादशीव्रतमुत्तमम् ।
व्रतभङ्गं नरः कृत्वा रौरवं नरकं व्रजेत् ॥
परिगृह्य व्रतं सम्यगेकादश्यादिकं नरः ।
न समापयते यस्तु तस्य पापीयसी गतिः ॥
व्रतभङ्गे प्रायश्चित्ताद्यनन्तरं,तदभङ्गे च केवलमुद्यापनमित्यर्थः ।
*अज्ञानेति ।

प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भव ॥ इति ।

नारदीये—

*ब्राह्मणान् भोजयेच्छक्त्या दद्याद्वै दक्षिणां ततः ।

स्कान्दे—

कृत्वा चैवोपवासं तु योऽश्नाति द्वादशीदिने ।
नैवेद्यं तुलसीमिश्रं हत्याकोटिविनाशनम् ॥

द्वादश्यां च वर्ज्यान्याह बृहस्पतिः-

दिवा निद्रां परान्नं(१) च पुनर्भोजनमैथुने ।

प्रातः स्नात्वा हरिं पूज्य उपवासं समर्पयेत् ।

इति पूर्वम् । *ब्राह्मणानिति ।

ततः स्वबन्धुभिः सार्द्धं नारायणपरायणः ।
कृतपञ्चमहायज्ञः स्वयं भुञ्जीत वाग्यतः ॥

इत्युत्तरार्द्धोक्तं पारणं कार्यम् । तत्र वर्ज्यानि ब्रह्माण्डे—

कांस्यं मांसं सुरां क्षौद्रं लोभं वितथभाषणम् ।
व्यायामं च प्रवासं च दिवास्वापमथाञ्जनम् ॥
तिलपिष्टं मसूरं च द्वादशैतानि वैष्णवः ।
द्वादश्यां वर्जयेन्नित्यं सर्वपापैः प्रमुच्यते ॥

तथा—

कांस्यं मांसं सुरां द्यूतं व्यायामं क्रोधमैथुने ।
हिंसामत्यन्तलौल्यं च तैलं निर्माल्यलङ्घनम् ॥
द्वादश्यां द्वादशैतानि वैष्णवः परिवर्जयेत् ।
द्वादश्यां पारणं कुर्याद्वर्जयित्वा ह्युपोदकीम् ॥

उपोदकी=पोई इति महाराष्ट्रप्रसिद्धा ।

कांस्यं मांसं मसूरं च चणकं कोरदूषकाः ॥

---

(१) अत्र-'श्वशुरान्नं गुरोरन्नं मातुलान्नं तथैव च । पितृव्यभ्रातृपुत्राणां परान्नं नैव दोषकृत् ॥' इत्यपि नोपयुज्यते । तस्य व्रतादिभिन्नदिनपरान्नग्रहणविषयत्वात् ।

क्षौद्रं कांस्यामिषं तैलं द्वादश्यामष्ट वर्जयेत् ॥

हेमाद्रौ ब्रह्माण्डपुराणे—

पुनर्भोजनमध्वानौ भार आयासमैथुने ।
उपवासफलं हन्युर्दिवा निद्रा च पञ्चमी ॥

स्कान्दे—

परान्नं कांस्यताम्बूले लोभं वितथभाषणम् ।

वर्जयेदिति शेषः । विष्णुधर्मे—

*असम्भाष्यानिह संभाष्य तुलस्यसितकादलम् ।

शाकं मधु परान्नं च हन्युरष्टाविमे फलम् ।

*असंभाष्यानिति । असम्भाष्याश्च—

बहिर्ग्रामादन्त्यजान् सूतिं पतितं च रजस्वलाम् ।
न स्पृशेन्नाभिभाषेत नेक्षेत व्रतवासरे ॥

इत्यादिनोक्ताः । हारीतोऽपि "पतितपाषण्डनास्तिकादिसम्भाषणानृताश्लीलादि उपवासादिषु वर्जयेत्" इति। अस्यापवादः—

स्त्रीषु नर्म विवाहे च वृत्त्यर्थे प्राणसङ्कटे ।
गोब्राह्मणार्थे हिंसायां नानृतं स्याज्जुगुप्सितम् ॥

स्त्रीष्वनृतं नर्मेत्याद्यन्वयः । हिंसायां=गोब्राह्मणहिंसायां प्रसक्तायां गोब्राह्मणजीवनार्थे, यद्वा गोब्राह्मणार्थे=तज्जीवनार्थे। हिंसायां=हिंसासामान्ये वा ।

अथ वाऽन्यदेव प्रायश्चित्तं कार्यं शास्त्रान्तरात् । तथा हि—

सम्भाष्यैतान् शुचिषदं चिन्तयेदच्युतं बुधः ।
इदं चोदाहरेत्सम्यक् कृत्वा तत्प्रवणं मनः ॥

शारीरमन्तःकरणोपघातं
वाचश्च विष्णुर्भगवानशेषम् ॥
शमं नयत्वस्तु ममेह शर्म
यायादनन्ते हृदि सन्निविष्टे ॥

अन्तःशुद्धिं बहिःशुद्धिं शुद्धो धर्ममयोऽच्युतः ।
स करोतु मयैतस्मिन् शुचिर्येनास्मि सर्वदा ॥
बाह्योपघातानखिलान् बौद्धांश्च भगवानजः ।
शमं नयत्वनन्तात्मा विष्णुश्चेतसि संस्थितः ॥
एतत्संभाष्य जप्तव्यं पाषण्डिभिरुपोषितैः । इति ॥

पाषण्डिभिरिति बहुवचनात्सदृशानां ग्रहः । यद्यपीदं सर्वोपघाते प्रतीयते तथापि संभाषण एव । "एतत्संभाष्य जप्तव्यम्" इत्युपसंहारात् । हारीतः—

चण्डालैः सह संभाष्य द्विजसंभाषणाच्छुचिः ।
गायत्रीं व्याहरेद्वाऽपि इति धर्मो व्यवस्थितः ॥

अनेन सामान्यप्रायश्चित्तेन समुच्चयः । चण्डालादिदर्शने तु विष्णुपुराणे—

तस्यावलोकनात्सूर्यं पश्येत मतिमान्नरः ।

इति सूर्यावलोकनं च शुचिपदपाठोत्तरं कार्यम् ।

नमः शुचिपदेत्युक्त्वा सूर्यं पश्यते दीक्षितः ।

इति विष्णुधर्मात् । दीक्षितः=कृतनियमः । रात्रिस्पर्शे तु पराशरः—

अस्तं गते यदा सूर्ये चण्डालं पतितं स्त्रियम् ।
सूतिकां स्पृशतश्चैव कथं शुद्धिर्विधीयते ॥
जातवेदः सुवर्णं च सोममार्गं तथैव च ।
ब्राह्मणानुगतिश्चैव स्नानं कृत्वा विशुध्यति ॥

रात्रिस्नानीयं तोयमाह देवलः—

दिवाऽऽहृतैर्जलैः स्नानं निशि कुर्यान्निमित्ततः ।
प्रक्षिप्य च सुवर्णं च सन्निधाप्य च पावकम् ॥

सुमन्तुः—

साक्षात् स्पर्शे तु यत्प्रोक्तं तद्द्रव्यान्तरितेऽपि च ।

दिवास्पर्शे तु तत्रैव—

आमलक्यगाः फलं वाऽपि पारणे प्राश्य शुध्यति ॥

बृहन्नारदीये—

रजस्वलां च चण्डालं महापातकिनं तथा ।
सूतिकां पतितं चैव उच्छिष्टं रजकादिकम् ॥
व्रतादिमध्ये शृणुयाद्यद्येषां ध्वनिमुत्तमम् ।
अष्टोत्तरसहस्रं तु जपेद्वै वेदमातरम्* ॥

एतद्व्रतं सूतकेऽपि कार्यम् ।

सूतके मृतके चापि न त्याज्यं द्वादशीव्रतम् ।

इति विष्णूक्तेः । तत्र स्वयं दानादि सूतकान्ते कार्यम् ।

सूतकान्ते नरः स्नात्वा पूजयित्वा जनार्दनम् ।
*दानं दत्त्वा विधानेन व्रतस्य फलमश्नुते ॥

इति मात्स्योक्तेः । रजोदर्शनेऽपि कार्यम् ।

संस्पर्शे च नरः स्नात्वा शुचिरादित्यदर्शनात् ॥ इति ।

मौनलोपे योगियाज्ञवल्क्यः—

यदि वाग्यमलोपः स्याज्जपादिषु कथं चन ।

'स्नानदानादिकर्मसु' इति वा पाठः ।

व्याहरेद्वैष्णवं मन्त्रं स्मरेद्वा विष्णुमव्ययम् ॥

इत्यादि । मानसं तु—

मानसे नियमे लुप्ते स्मरेद्विष्णुमनामयम् ॥

इति यमोक्तं द्रष्टव्यम् । एवं व्रताधिकारे—

विहितस्याननुष्ठानादिन्द्रियाणामनुग्रहः ।
निषिद्धसेवनं नित्यं वर्जनीयं प्रयत्नतः ॥

इति सुमन्तूक्तौ,

जपोऽष्टाक्षरमन्त्रस्य नामशतत्रयस्य वा ।

इति प्रायश्चित्तं स्मार्तप्रायश्चित्तेन समुच्चितं बोध्यम् ।

*वेदमाता=गायत्री । *दानमिति । ब्राह्मणभोजनमपि

*एकादश्यां न भुञ्जीत नारी दृष्टे रजस्यपि ।

इति पुलस्त्योक्तेः । यदा द्वादश्यां श्रवणर्क्षं तदा शुद्धाप्येकादशीं त्यक्त्वा तत्रैवोपवासः कार्यः ।

शुक्ला वा यदि वा कृष्णा द्वादशी श्रवणाऽन्विता ।
तयोरेवोपवासश्च त्रयोदश्यां च पारणम् ॥

इति नारदीयोक्तेः । एते च नियमाः काम्यव्रते नियताः* । नित्यव्रते सति संभवे कार्याः ।

शक्तिमांस्तु पुनः कुर्यान्नियमं सविशेषणम् ।

इति कात्यायनोक्तेः । अशक्तौ तु ब्रह्मवैवर्ते-

इति विज्ञाय कुर्वीत नक्तमेकादशीव्रतम् ।
त्रिंशांशनियमाशक्तोऽहोरात्रं भुजिवर्जितः ॥ इति ॥

अथाष्टौ महाद्वादश्यः । तत्र शुद्धाधिकैकादशीयुता द्वादशी उन्मीलिनीसंज्ञा१। द्वादश्येव शुद्धाधिका वर्धते चेत्सा वञ्जुली२। यामत्रयस्पर्शिनी त्रिस्पृशा३। अत्र पर्वणः संपूर्णाधिकत्वे पक्षवर्धिनी४। पुष्यर्क्षयुता जया५। श्रवणयुता विजया६। पुनर्वसुयुता जयन्ती७। रोहिणीयुता पापनाशिनी८ । अत्र *मूलं हेमाद्रौ ज्ञेयम्। *एताः

प्राणप्रदानत्वात् । *एकादश्यां न भुञ्जीतेति ।

संप्राप्तेऽपि रजसि न त्याज्यं द्वादशीव्रतम्

इति व्रतमपि द्रष्टव्यम् । *नियता इति । "सायमाद्यन्तयो-रह्नोः" इत्यादौ "पुनर्भोजनम्" इत्यादौ च फलपदोक्तेः ।

*मूलमिति । ब्रह्मवैवर्ते —

उन्मीलिनी वञ्जुली च त्रिस्पृशा पक्षवर्द्धिनी ।
जया च विजया चैव जयन्ती पापनाशिनी ॥
द्वादश्योऽष्टौ महापुण्याः सर्वपापापहा द्विजाः ।
तिथियोगेन जायन्ते चतस्रश्चापरास्तथा ॥

नक्षत्रयोगात्प्रबलं पापं प्रशमयन्ति ताः ।
एकादशी तु संपूर्णा वर्द्धते पुनरेव सा ॥

तयुता द्वादशीत्यर्थः ।

उन्मीलिनी भृगुश्रेष्ठ कथिता पापनाशिनी १ ॥
द्वादश्यामुपवासश्च द्वादश्यामेव पारणम् ।
वञ्जुली नाम सा प्रोक्ता हत्यायुतविनाशिनी ॥ २ ॥
अरुणोदय आद्या स्याद्द्वादशी सकलं दिनम् ।
अन्ते त्रयोदशी प्रातस्त्रिस्पृशा सा प्रकीर्तिता ॥

आद्या=एकादशी । अरुणोदये=सूर्योदये ।

"एकादशी द्वादशी च रात्रिशेषे त्रयोदशी । त्र्यहस्पृक् तदहोरात्रम्" इति पाद्मपञ्चहोरात्रे तिथित्रययोगोक्तेः ॥ ३ ॥

कुहू राके यदा वृद्धे भवतः पक्षवर्द्धिनी ।
विहायैकादशीं तत्र द्वादशीं समुपोषयेत् ॥ ४ ॥
पुष्यश्रवणपुष्याग्ररोहिण्या संयुतास्तथा ।

पुष्याग्रः=पुनर्वसुः ।

उपोषिताः सप्तफला द्वादश्योऽष्टौ पृथक् पृथक् ॥ इति ।

सप्तफला इति आसां काम्यत्वं, न तु नित्यत्वम् ।

न करिष्यन्ति ये लोके द्वादश्योऽष्टौ ममाऽऽज्ञया ।
तेषां यमपुरे वासो यावदाभूतसंप्लवम् ॥

इत्यकरणे दोषस्मरणं त्वनाकरमित्याशयेनाऽऽह काम्या इति । मुक्त्याद्यर्थस्य स्वर्गाद्यर्थत्वं पुराणादौ निरूढमेव । अत्र तिथियुक्तासु न संदेहः । यत्तु—

विहायैकादशीं तत्र द्वादशीं समुपोषयेत् ।

इति, तदुपवासद्वयासमर्थं प्रति, श्रवणद्वादशीवत् । नक्षत्रयोगयुक्तासु श्रवणद्वादशी निर्णेष्यते । तादृशीष्वितरद्वादशीषु परेऽह्नि अल्पनक्षत्रयोगेऽपि तत्संयुक्तमुपवासादि कार्यम् । "तिथिनक्षत्रयोः योगे" इत्याग्रिमवचनात् । यत्तु कश्चिच्छ्रवणरोहिण्योरभिधानं तद-

पापक्षयमुक्तिकाम उपवसेत् । *एकादशीद्वादश्योरेकत्वे तन्त्रेणोपवासः । *पार्थक्ये तु शक्तस्योपवासद्वयम् ।

वयुत्याऽनुवाद इति प्राञ्चः । वस्तुतस्तु—सूर्योदयादारभ्य द्वितीयसूर्योदयपर्यन्तमस्तमयपर्यन्तं वा श्रवणाद्यृक्षयोगोऽपेक्षितः । उपवासस्याहोरात्रसाध्यत्वेन

प्रातः संकल्पयेद्विद्वानुपवासव्रतादिकम् ॥

इति संकल्पस्य सूर्योदयानन्तरकालत्वेन

यो यस्य विहितः कालः कर्मणस्तदुपक्रमे ।
तिथिर्याऽभिमता सा तु कार्या नोपक्रमोज्झिता ॥

इति वचनात् ॥

कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः ।
दिवारात्रिव्रतं यत्र एतदेव निर्णायकम् ॥

इत्यादिवचनेभ्यश्च

कृत्तिकादिभरण्यन्तं तारा वा तारसप्तकम् ।
नैते संयोगमात्रेण पुनन्ति सकलां तिथिम् ॥

इति शाङ्करगीतानिबन्धवाक्याच्च श्रवणरोहिणीयोगस्याल्पस्यापि ग्राह्यत्वे मानाभावात् "तिथिनक्षत्रयोर्योग" इति श्रवणद्वादशीप्रकरणगतत्वेन सामान्यवचनत्वाभावाच्चेति प्राहुः । *एकादशीति । "द्वादशी त्वेकादशीयुता" इति वक्ष्यति । तत्र खण्डतिथित्वादेकादशीद्वादश्युपवासयोरुपक्रमप्रभृति तन्त्रमित्यर्थः । *पार्थक्ये त्विति । प्रक्रान्तद्वादश्युपवासस्य प्रधानभूतद्वादश्युपवासानुरोधेनैकादश्युपवासाङ्गपारणबाध इत्यर्थः । अनुपक्रान्तद्वादश्युपवासेन तत्र द्वादश्युपवासो नोपक्रमितव्यः । "आपो वाऽशितमनाशितं च" इति श्रुतेरप्प्राशनस्याशितत्वेन पूर्वोपवाससमाप्तिरनशितरूपत्वेनोत्तरोपवासाविघात इति, तत्र जलपारणं कृत्वोपक्रान्तोऽनुपक्रान्तो वा द्वादश्युपवासः कार्य इति तु माधवः । अन्यतिथिषूपवासद्वयस्य नैरन्तर्ये-

एकादशीमुपोष्यैव द्वादशीं समुपोषयेत् ।
इति विष्णुरहस्यात् । अशक्तौ तु द्वादश्यामेव ।
एवमेकादशीं *भुक्त्वा द्वादशीं समुपोषयेत् ।
पूर्ववासरजं पुण्यं सर्वं प्राप्नोत्यसंशयम् ॥
इति तत्रैवोक्तेः । *यदा त्वल्पा द्वादशी तदोक्तं मात्स्ये—
यदा भवति अल्पाऽपि द्वादशी पारणादिने ।
उषःकाले द्वयं कुर्यात्प्रातर्माध्याह्निकं तदा ॥
नारदीयेऽपि —
अल्पायामथ विप्रेन्द्र द्वादश्यामरुणोदये* ।
स्नानार्चनक्रियाः कार्या दानहोमादिसंयुताः ॥ इति ।
*संकटे तु माधवीये देवलः—
संकटे विषमे प्राप्ते द्वादश्यां पारयेत्कथम् ।
अद्भिस्तु पारणां कुर्यात्पुनर्भुक्तं न दोषकृत् ॥ इति ।
संकटं=*त्रयोदशीश्राद्धप्रदोषादौ* ।

ण प्रामाण्यमेव निर्णयः । *भुक्त्वेति फलाहारपरम् । त्यक्त्वेति पाठेऽपि तत्परमेव । एकादशीपारणायां माधवीये स्मृत्यन्तरे—
फलाद्यं द्वयं वाऽपि द्वादशीं न त्वतिक्रमेत् ।
पारणे मरणे नृणां तिथिस्तात्कालिकी स्मृता ॥
इति । तत्राऽऽह्निकापकर्षमाह *यदा त्विति । *अरुणोदये इति तदधिककालमाध्यम्याऽऽवश्यकं सन्ध्यादि संकोचेनापि कार्यम् ।
महाहानिकरी ह्येषा द्वादशी लङ्घिता नरैः ।
करोति धर्महरणमस्नातेव सरस्वती ॥
इति द्वादशीलङ्घने दोषोक्तेः । अस्नातेति स्नानपदेऽत्यधिकरणेऽर्थ-आद्यच् । *संकटे=कथंचित्पारणाया असंभवे । *त्रयोदशी-श्राद्धं=मृततिथि-गजच्छाया-वारुण्याद्यलभ्ययोगनिमित्तकम् । प्रदोषादाविति । आदिना स्नानदानादिकमन्यद्वा किञ्चिद्ग्राह्य-

अत्र केचिदाहुः—*'अपकर्षवाक्यानि अनाहिताग्निविषयाणि । अग्निहोत्रादीनां *श्रौतत्वेनापकर्षायोगात्' इति । द्वादश्यां च प्रथमपादमतिक्रम्य पारणं कार्यम् ।

म् । सकलधार्मिकग्रन्थेषु जलपारणां कृत्वा श्राद्धाद्यनुष्ठानलिखनाच्च तल्लोपो युक्तः, नापि श्राद्धापकर्ष इति भावः । सर्वथा द्वादश्यभावे नारदोऽपि —

त्रयोदश्यां तु शुद्धायां पारणं पृथिवीफलम् ।
शतयज्ञाधिकं वापि नरः प्राप्नोत्यसंशयम् ॥

तत्र प्रातरेवेति द्रष्टव्यम् । यत्तु भोजनापकर्षे तत्पूर्वभाविनैसर्गिकनित्यकृत्यमात्रापकर्षः ।

क्रमतस्तु न कुर्वीत यद्यदपकृष्यते ।
तदा सर्वापकर्षः स्यादन्यथा क्रमबाधनात् ॥

इति कात्यायनवाक्यादिति मतं, तन्न । वैश्वदेवादेरन्नसंस्कारत्वेन भोजनार्थत्वात् अन्यथात्वेऽपि वा दर्शपूर्णमाससोमयागवद्वाचनिकपौर्वापर्यात्तदपकर्षे तदपकर्षो भवतु प्रातरौपासनदेवपूजादेस्तु तथाभावात्कथं प्राक्तन्यायादपकर्षः कालपौर्वापर्यकृतस्याऽर्थकपौर्वापर्यस्यानुष्ठानात्क्रमेणानपकर्षेऽपि तल्लोपनिमित्तप्रकृतवैगुण्याभावात्, प्रत्युतापकर्षे काललोपेन वैगुण्यापाताच्च । अन्यथा पशुना सहत्वे अग्नीषोमीयसवनीययोः प्रकृतौ पौर्वापर्येऽपि सवनीयस्यैव प्रथममुपाकरणं आश्विनग्रहग्रहणोत्तरकालानुरोधात् अग्नीषोमीयानुबन्ध्ययोरग्नीषोमीयप्राथम्यं तु क्रमप्राप्त्यवैगुण्यादिति सिद्धान्तो भज्येत । तस्माद्वाचनिक एवायमपकर्षो वाच्यः । वचनं च 'प्रातर्मध्याह्नकर्तव्ये नित्य एव' इति तत्रैवापकर्षो न सर्वत्र । अत एव 'संकटे विषमे प्राप्ते' इति संकटपदसङ्गतिः । अन्यथा त्रयोदशीश्राद्धादेरप्यपकर्षुं शक्यत्वेनासंकटादिति । *अपकर्षवाक्यानीति । होमादीत्यस्य तात्पर्याद्धोमः औपासनहोमवैश्वदेवादिः स्मार्तश्च ग्राह्य इत्यर्थः *श्रौतत्वेनेति । पौराणधर्माणां दौर्बल्यात् ।

द्वादश्याः प्रथमः पादो हरिवासरसंज्ञितः ।

*तमतिक्रम्य कुर्वीत पारणं विष्णुतत्परः ॥

इति निर्णयामृते मदनरत्ने च विष्णुधर्मोक्तेः । अत्र केचित्साङ्गिरन्ते—'यदा भूयसी द्वादशी तदाऽपि प्रातर्मुहूर्तत्रयं पारणं कार्यम् ।

सर्वेषामुपवासानां प्रातरेव हि पारणम् ।

इति वचनात्' इति ।

अस्मद्गुरवस्तु—'बहूनां कर्मकाण्डानां विना कारणं बाधापत्तेः प्राग्युक्तवचनैश्च अल्पद्वादश्यां नापकर्षविधानादपराह्ण एव कार्यम् । प्रातःशब्दस्तु—

सायंप्रातर्द्विजातीनामशनं श्रुतिचोदितम् ।

इतिवदपराह्णस्यापि तत्वेऽप्युपपन्नः । नच वाक्यवैयर्थ्यं, पुनर्भोजनमात्रपारणानिवृत्त्यर्थत्वात्तस्य; इत्याहुः ।

प्रमादेन एकादश्युपवासातिक्रमे अपरार्के वाराहे—

एकादशी विलुप्ता चेद् द्वादशी परतः स्थिता ।

उपोष्या द्वादशी तत्र यदीच्छेत्परमं पदम् ॥ इति ।

केचित्तु विष्णुना चोदितेति पठितम् । अत्रापि रात्रिभिन्नो नियमाः सर्वव्रतेषु बोद्धव्याः । अन्ये च नवरात्रे वक्ष्यन्ते इति दिक् ।

इति श्रीरामकृष्णभट्टात्मजकमलाकरभट्टकृते निर्णयसिन्धौ एकादशीनिर्णयः ।

उदितहोमिनामिदम् । अनुदितहोमिनां तु उपासि माध्याह्निकापकर्षः ततो होम इति भवति । *तमतिक्रम्येति प्रातः पारणापवादः ।

(१)इति श्रीकृष्णभट्टकृतौ निर्णयसिन्धुव्याख्यायामेकादशीनिर्णयः समाप्तः ॥

---

(१) इमे न पङ्क्ती ग्रन्थकारस्य ।

अथ शुद्धाविद्धादिभेदेन स्मार्तवैष्णवयोः स्फुटज्ञानार्थं श्रीवासुदेवोपाध्यायविरचितो धर्मसिन्धुस्थोदाहरण-सहितश्चैकादशीनिर्णयपट्टो लिख्यते ।

श्रीकाशिनाथोपाध्यायैरेकादश्या विनिर्णयः ।
कृतोऽष्टादशभेदात्मा स्मार्तवैष्णवयोः पृथक् ॥ १ ॥
सल्लक्ष्योदाहृतैः स्पष्टं संक्षेपेण प्रबन्धगैः ।
विभाजितं च पट्टेऽस्मिन्स यथामति लिख्यते ॥ २ ॥
श्रीरामचन्द्रनामा नामप्रागर्भनृपो जगद्धामः ।
स प्रार्थयिता मे जयतितरामेव जानकीजानिः ॥३॥
नामस्मृत्या यस्य च विघ्नाभिन्ना भवेच्छास्त्रबोधम् ।
निर्णयमेकादश्या निःसंदिग्धं सुखेन विलिखामि ॥४॥

अत्र समत्वं सूर्योदयावच्छिन्नक्षणाव्यवहितपूर्वक्षणान्त-तिथिमत्त्वं षष्टिघटिकारूपम् । न्यूनत्वं तु किञ्चिन्न्यू-नषष्टिघटिकावत्त्वं शुद्धाविद्धाभेदेषु तिथिक्षयवृद्धिभ्यां विलक्षणम् । यथा वैष्णवशुद्धैकादशीप्रथमभेदे दशमी-५५।२९, एकादशी-४९।५९, द्वादशी-४३।५०। एवं पर-मक्षये पलोनचतुश्चत्वारिंशद्घटीमितं न्यूनत्वम् । एवमेव स्मार्तवैष्णवयोः शुद्धाविद्धाभेदैर्विलक्षणत्वमूह्यम् ।

एते वैष्णवानामेकादश्याः शुद्धाभेदाः ।

अत्रारुणोदयवेधरहिता शुद्धा सा चतुर्विधा सा चो-दाहरणेषु प्रदर्श्यते—

	दशमी		एकाद.		द्वादशी		
	घ०	प०	घ०	प०	घ०	प०	
शुद्धन्यूना न्यूनद्वादशिका ।	५५	५९	५८	०	५९	५९	इयमनुभयाऽधिक्यवती शुद्धा । अत्र स्मार्तानां वैष्णवानां चैकादश्यामेवोपवासः । भेदः १।
धर्माब्धिस्थमुदाहरणम् ।	५५	०	५७	०	५८	०	
शुद्धन्यूना समद्वादशिका ।	५५	५९	५८	०	६०	०	इयमप्यनुभयाऽधिक्यवती शुद्धा । अत्रापि स्मार्तानां वैष्णवानां चैकादश्यामेवोपवासः । भेदः २।
धर्माब्धिस्थमुदाहरणम् ।	५५	०	५७	०	५८	०	
शुद्धन्यूनाऽधिकद्वादशिका ।	५५	५९	५८	०	६०	१	इयं द्वादशीमात्राऽधिक्यवती शुद्धा । अत्र स्मार्तानामेकादश्यां, वैष्णवानां द्वादश्यामेवोपवास इति माधवमतं, सर्वेषां द्वादश्यामेवेति हेमाद्रिमतम् । भे० ३।
धर्माब्धिस्थमुदाहरणम् ।	५५	०	५८	०	६०	१	
शुद्धसमा न्यूनद्वादशिका ।	५५	५९	६०	०	५९	५९	इयमनुभयाधिक्यवती शुद्धा । अत्र स्मार्तानां वैष्णवानां चैकादश्यामेवोपवासः ।
धर्माब्धिस्थमुदाहरणम् ।	५५	०	५७	०	५८	०	इदमुदाहरणं विचार्यम् । भे० ४।
शुद्धसमा समद्वादशिका ।	५५	५९	६०	०	६०	०	इयमप्यनुभयाधिक्यवती शुद्धा । अत्र स्मार्तानां वैष्णवानां चैकादश्यामेवोपवासः । भे० ५।
धर्माब्धिस्थमुदाहरणम् ।	५५	०	५७	०	५८	०	
शुद्धसमाऽधिकद्वादशिका ।	५५	५९	६०	०	६० ३	० १	इयं द्वादशीमात्राधिक्यवती शुद्धा । अत्र स्मार्तानामेकादश्यां, वैष्णवानां द्वादश्यामेवोपवास इति माधवमतं सर्वेषां द्वादश्यामेवोपवास इति हेमाद्रिमतम् । भे० ६।
धर्माब्धिस्थमुदाहरणम् ।	५५	०	५८	०	६०	१	

	दशमी		एकाद.		द्वादशी		
	घ०	प०	घ०	प०	घ०	प०	
शुद्धाऽधिका न्यूनद्वादशिका ।	५५	५९	६०	०	५९	५८	इयमेकादशीमात्राधिक्यवती शुद्धा । अत्र स्मार्तगृहस्थानां पूर्वैकादश्यां. यतीनां वैष्णवानां चोत्तरैकादश्यामेवोपवास इति माधवमतं. कामाद्वा अकामाद्वा वैष्णवो ह्यनुपवसेदिति हेमाद्रिमतम् ।
			०	१	क्ष	यः	
धर्माब्धिस्थमुदाहरणम् ।	५५	०	६०	१	५८	०	इदमुदाहरणं विचार्यम् । मं० ७।
शुद्धाऽधिका समद्वादशिका	५५	५९	६०	०	५९	५९	इयमप्येकादशीमात्राधिक्यवती शुद्धा । अत्रापि स्मार्तगृहस्थानां पूर्वैकादश्यां. यतीनां वैष्णवानां चाविद्धैकादश्यामेवोपवास इति माधवमतं. कामाद्वा अकामाद्वा वैष्णवो ह्यनुपवसेदिति हेमाद्रिमतम्
			०	१	क्ष	यः	
धर्माब्धिस्थमुदाहरणम् ।	५५	०	६०	१	५८	०	
					क्ष	यः	मं० ८।
शुद्धाऽधिकाऽधिकद्वादशिका ।	५५	५९	६०	१	३	५५	इयमुभयाधिक्यवती शुद्धा । अत्र स्मार्तैर्वैष्णवैश्च परैवैकादश्युपोष्येत्युभयमतम् ।
धर्माब्धिस्थमुदाहरणम् ।	५५	०	६०	१	६	०	मं० ९।

इति वैष्णवानां शुद्धैकादशीभेदाः ।

एते वैष्णवानां विद्धैकादशीभेदाः ।

अत्र विद्धत्वमरुणोदये दशमीसत्त्वम् । अरुणोदयस्तु सूर्योदयात्प्राक् चतुर्घटिकात्मकः ।

	दशमी घ०	दशमी प०	एकादशी घ०	एकादशी प०	द्वादशी घ०	द्वादशी प०	
विद्धन्यूना न्यूनद्वादशिका ।	५६	१	५८	०	५९	५९	इयमनुभयाधिक्यवती विद्धा । अत्र स्मार्तानामेकादश्यामेवोपवासो वैष्णवानां विद्धत्वात् द्वादश्यामुपवासः । भेदः १।
धर्माब्धिस्थमुदाहरणम् ।	५७	०	५८	०	५९	०	
विद्धन्यूना समद्वादशिका	५६	१	५८	०	६०	०	इयमप्यनुभयाधिक्यवती विद्धा । अत्रापि स्मार्तानामेकादश्यामेवोपवासो, वैष्णवानां विद्धत्वात् द्वादश्यामुपवासः । भे० २।
धर्माब्धिस्थमुदाहरणम् ।	५७	०	५८	०	५९	०	
विद्धन्यूनाऽधिकद्वादशिका।	५६	१	५८	०	६०	०	द्वादशीमात्राऽधिक्यवती विद्धेयम् । अत्र स्मार्तैरेकादश्युपोष्या, वैष्णवैर्द्वादश्युपोष्या । हेमाद्रिमते तु सर्वैर्द्वादश्येवोपोष्या । भे० ३।
					१	१	
धर्माब्धिस्थमुदाहरणम् ।	५८	०	५९	०	६०	१	
विद्धसमा न्यूनद्वादशिका ।	५८	५९	६०	०	५९	५९	इयमनुभयाधिक्यवती विद्धा । अत्र स्मार्तानामेकादश्यामेवोपवासो वैष्णवानां विद्धत्वात् द्वादश्यामुपवासः । भे० ४।
धर्माब्धिस्थमुदाहरणम् ।	५७	०	५८	०	५९	०	

	दशमी घ०	दशमी प०	एकादशी घ०	एकादशी प०	द्वादशी घ०	द्वादशी प०	
विद्धसमा समद्वादशिका।	५९	१	६०	०	६०	०	इयमप्यनुभयाधिक्यवती विद्धा। अत्र स्मार्तानामेकादश्यामेवोपवासो वैष्णवानां विद्धत्वाद् द्वादश्यामुपवासः। मं० ५।
धर्माब्धिस्थमुदाहरणम्।	५७	०	५८	०	५९	०	
विद्धसमाऽधिकद्वादशिका।	५७	१	६०	०	६०	०	इयं द्वादशीमात्राऽधिक्यवती विद्धा। अत्र स्मार्तैरेकादश्युपोष्या, वैष्णवैर्द्वादश्युपोष्या। इमाविमौ तु सर्वैर्द्वादश्येवोपोष्या। मं० ६।
					१	०	
धर्माब्धिस्थमुदाहरणम्।	५८	०	५९	०	६०	१	
विद्धाधिका न्यूनद्वादशिका।	५९	१	६०	०	५०	५८	इयमेकादशीमात्राधिक्यवती विद्धा। अत्र स्मार्तैर्गृहस्थैः पूर्वैकादश्युपोष्या, यतिभिर्निष्कामगृहिभिर्वनस्थैर्विधवाभिर्वैष्णवैश्च परैवोपोष्या। विष्णुप्रीतिकामैः स्मार्तैरप्युभयं कार्यमिति केचित्। मं० ७।
			०	१	क्ष	यः	
धर्माब्धिस्थमुदाहरणम्।	५८	०	६०	१	५८	०	
					क्ष	यः	
विद्धाधिका समद्वादशिका।	५९	१	६०	०	५०	५९	इयमप्येकादशीमात्राधिक्यवती विद्धा। अत्र स्मार्तैर्गृहस्थैः पूर्वैकादश्युपोष्या यतिभिर्निष्कामगृहिभिर्वनस्थैर्विधवाभिर्वैष्णवैश्च परैवोपोष्या। विष्णुप्रीतिकामैः स्मार्तैरप्युभयं कार्यमिति केचित्। मं० ८।
			०	१	क्ष	यः	
धर्माब्धिस्थमुदाहरणम्।	५८	०	६०	१	५८	०	
					क्ष	यः	
विद्धाधिकाऽधिकद्वादशिका	५६	१	६०	०	५	०	इयमुभयाधिक्यवती विद्धा। अत्र सर्वैः स्मार्तैर्वैष्णवैश्चाविशेषात् परैकादश्युपोष्या। मं० ९।
			१	०			
धर्माब्धिस्थमुदाहरणम्।	५८	०	६०	१	४	०	

इति वैष्णवानां विद्धैकादशीभेदाः ।

इमे स्मार्तानां शुद्धैकादशीभेदाः ।

शुद्धत्वं नाम सूर्योदये दशम्यसत्त्वम् । सा चतुर्विधा । सा चोदाहरणैः प्रदर्श्यते ।

	दशमी घ०	दशमी प०	एकाद० घ०	एकाद० प०	द्वादशी घ०	द्वादशी प०	
शुद्धन्यूना न्यूनद्वादशिका।	५९	५९	५९	०	५९	०	इयमनुभयाधिक्यवती शुद्धा । अत्र स्मार्तानामेकादश्यामेवोपवासो न द्वादश्यां. वैष्णवानां तु विद्धत्वात् द्वादश्यामुपवासः । मे० १
धर्माब्धिस्थमुदाहरणम् ।	५७	०	५८	०	५९	०	
शुद्धन्यूना समद्वादशिका ।	५९	५९	५९	५१	६०	०	इयमप्यनुभयाधिक्यवती शुद्धा । अत्र स्मार्तानामेकादश्यामेवोपवासो न द्वादश्याम् । वैष्णवानां तु विद्धत्वात् द्वादश्यामुपवासः । मे० २
धर्माब्धिस्थमुदाहरणम् ।	५७	०	५८	०	५९	०	
शुद्धन्यूनाऽधिकद्वादशिका ।	५९	५९	५९	५९	६०	०	इयं द्वादशीमात्राऽऽधिक्यवती शुद्धा । अत्र शुद्धत्वात् स्मार्तानामेकादश्यामेवोपवासो न द्वादश्यामिति माधवमतम् । हेमाद्रिमते तु सर्वैर्द्वादश्येवोपोष्या । केचित्तु मुमुक्षुभिः स्मार्तैः परैवोपोष्येत्याहुः । मे० ३
					१	०	
धर्माब्धिस्थमुदाहरणम् ।	५८	०	५९	०	६०	०	
					०	१	
शुद्धसमा न्यूनद्वादशिका ।	५८	५२	६०	०	५९	५९	इयमनुभयाधिक्यवती शुद्धा । अत्र स्मार्तानामेकादश्यामेवोपवासो न द्वादश्याम् । वैष्णवानां तु विद्धत्वात् द्वादश्यामेवोपवासः । मे० ४
धर्माब्धिस्थमुदाहरणम् ।	५७	०	५८	०	५९	०	
शुद्धसमा समद्वादशिका ।	५८	५२	६०	०	६०	०	इयमप्यनुभयाधिक्यवती शुद्धा । अत्रापि स्मार्तानामेकादश्यामेवोपवासो न द्वादश्याम् । वैष्णवानां तु विद्धत्वात् द्वादश्यामेवोपवासः । मे० ५
धर्माब्धिस्थमुदाहरणम् ।	५७	०	५८	०	५९	०	

स्मार्तानां शुद्धैकादशीपक्षः।

	दशमी		एकाद.		द्वादशी		
	घ०	प०	घ०	प०	घ०	प०	
शुद्धसमाऽधिकद्वादशिका।	५९	५९	६०	०	६०	०	इयं द्वादशीमात्राऽऽधिक्यवती शुद्धा। अत्र शुद्धत्वात्स्मार्तानामेकादश्यामेवोपवासो। न द्वादश्यामिति माधवमतम्। हेमाद्रिमते तु सर्वैः परा द्वादश्येवोपोष्या। केचित्तु मुमुक्षुभिः स्मार्तैः परोपोष्येत्याहुः। भे० ६।
					१	०	
धर्माब्धिस्थमुदाहरणम्	५८	०	५९	०	६०	०	
					०	१	
शुद्धाऽधिका न्यूनद्वादशिका।	५९	५९	६०	०	५८	५९	इयमेकादशीमात्राऽऽधिक्यवती शुद्धा। अत्र स्मार्तैर्गृहिभिः पूर्वैकादश्युपोष्या. यतिभिर्निष्कामगृहिभिर्वनस्थैर्विधवाभिर्वैष्णवैश्च परैवोपोष्या। विष्णुप्रीतिकामैरुपवासद्वयं कार्यमिति केचित्। भे० ७।
			१	०	क्ष	यः	
धर्माब्धिस्थमुदाहरणम्।	५८	०	६०	१	५८	०	
					क्ष	यः	
शुद्धाऽधिका समद्वादशिका।	५९	५९	६०	०	५९	०	इयमन्यैकादशीमात्राऽऽधिक्यवती शुद्धा। अत्र स्मार्तैर्गृहिभिः पूर्वैकादश्युपोष्या. यतिभिर्निष्कामगृहिभिर्वनस्थैर्विधवाभिर्वैष्णवैश्च परैवोपोष्या। विष्णुप्रीतिकामैरुपवासद्वयं कार्यमिति केचित्। भे० ८।
			१	०	क्ष	यः	
धर्माब्धिस्थमुदाहरणम्।	५८	६०	६०	१	५८	०	
					क्ष	यः	
शुद्धाधिकाऽधिकद्वादशिका।	५९	५९	६०	०	२	०	इयमुभयाधिक्यवती शुद्धा। अत्र सर्वैः स्मार्तैर्वैष्णवैश्चावशिष्टा परैवैकादश्युपोष्या। भे० ९।
			१	०			
धर्माब्धिस्थमुदाहरणम्।	५८	०	६०	०	४	०	
			१	०			

इति स्मार्तानां शुद्धैकादशीभेदाः।

अत्र विद्धत्वं सूर्योदये दशमीसत्त्वम् । सूर्योदयस्तु षष्टिघटिकान्त्यक्षणाव्यवहितोत्तरक्षणलवादिकालावच्छिन्नः । इयमपि विद्धा चतुर्विधा, सा चोदाहरणेषु प्रदर्श्यते—

	दशमी घ०	दशमी प०	एकाद. घ०	एकाद. प०	द्वादशी घ०	द्वादशी प०	
विद्धन्यूना न्यूनद्वादशिका ।	२	०	५७	५९	५७	०	इयमनुभयाधिक्यवती विद्धा । अत्र स्मार्तानामेकादश्यामुपवासः । वैष्णवानां द्वादश्यामुपवासः । भेदः १।
			क्ष	यः			
धर्माब्धिस्थमुदाहरणम् ।	२	०	५६	०	५५	०	
			क्ष	यः			
विद्धन्यूना समद्वादशिका	२	०	५७	५९	६०	०	इयमप्यनुभयाधिक्यवती विद्धा । अत्रापि स्मार्तानामेकादश्यामुपवासः वैष्णवानां द्वादश्यामुपवासः । भेदः २।
			क्ष	यः			
धर्माब्धिस्थमुदाहरणम् ।	२	०	५६	०	५५	०	
			क्ष	यः			
विद्धन्यूनाधिकद्वादशिका ।	१	०	५८	५९	६०	०	इयं द्वादशीमात्राधिक्यवती विद्धा । अत्रैकादश्या विद्धत्वात् द्वादश्यामेव स्मार्तानामप्युपवासः । तत्र किमु वक्तव्यं वैष्णवानामिति । एवं चोभयाधिक्ये द्वादशीमात्राधिक्ये च स्मार्तानां विद्धायाम्त्यागो नान्यत्र । भे० ३।
					१	०	
धर्माब्धिस्थमुदाहरणम् ।	१	०	५८	०	६०	०	
					०	१	
विद्धसमा न्यूनद्वादशिका ।	२	०	५८	०	५८	५९	इयमनुभयाधिक्यवती विद्धा । अत्र स्मार्तानामेकादश्यामुपवासः वैष्णवानां द्वादश्यामुपवासः । भे० ४।
			क्ष	यः			
धर्माब्धिस्थमुदाहरणम् ।	२	०	५६	०	५५	०	
			क्ष	यः			

स्मार्तानां विद्धैकादशीपट्टः ।

	दशमी घ०	दशमी प०	एकाद. घ०	एकाद. प०	द्वादशी घ०	द्वादशी प०	
विद्धसमा समद्वादशिका ।	२	०	५८	०	६०	०	इयमनुभयाधिक्यवती विद्धा । अत्र स्मार्तानामेकादश्यामुपवासः । वैष्णवानां द्वादश्यामुपवासः । मे० ५।
धर्माब्धिस्थमुदाहरणम् ।	२	०	क्ष ५६ क्ष	यः ० यः	५५	०	
विद्धसमाऽधिकद्वादशिका ।	२	०	५८	०	६०	०	इयं द्वादशीमात्राऽऽधिक्यवती विद्धा । अत्रैकादश्या विद्धत्वाद् द्वादश्यामेव स्मार्तानामप्युपवासः । तत्र किमु वक्तव्यं वैष्णवानामिति । पूर्ववदत्र स्मार्तानां विद्धायास्त्यागः । मे० ६।
धर्माब्धिस्थमुदाहरणम् ।	१	०	क्ष ५८ क्ष	यः ० यः	१ ६० ०	० ० १	
विद्धाधिका न्यूनद्वादशिका।	७	०	२	०	५५	०	इयमेकादशीमात्राऽऽधिक्यवती विद्धा । अत्र स्मार्तैर्गृहिभिः पूर्वैकादश्युपोष्या, यतिभिर्निष्कामगृहिभिर्वनस्थैर्विधवाभिर्वैष्णवैश्च परैवोपोष्या । विष्णुप्रीतिकामैः स्मार्तैरुपवासद्वयं कार्यमिति केचित् । मे० ७।
धर्माब्धिस्थमुदाहरणम् ।	४	०	२	०	क्ष ५८ क्ष	यः ० यः	
विद्धाऽधिका समद्वादशिका।	५	०	२	०	५८	०	इयमेकादशीमात्राऽऽधिक्यवती विद्धा । अत्र स्मार्तैर्गृहिभिः पूर्वोपोष्या, यतिभिर्निष्कामगृहिभिर्वनस्थैर्विधवाभिर्वैष्णवैश्च परैवोपोष्या । विष्णुप्रीतिकामैः स्मार्तैरुपवासद्वयं कार्यमिति केचित् । मे० ८।
धर्माब्धिस्थमुदाहरणम् ।	४	०	२	०	क्ष ५८ क्ष	यः ० यः	
विद्धाधिकाऽधिकद्वादशिका।	७	०	४	०	३	०	इयमुभयाधिक्यवती विद्धा । अत्र सर्वैः स्मार्तैर्वैष्णवैश्चाविद्धा परैवैकादश्युपोष्या । एतदुदाहरणेऽपि स्मार्तानां विद्धायास्त्यागः । मे० ९।
धर्माब्धिस्थमुदाहरणम् ।	२	०	३	०	४	०	

इति स्मार्तानां विद्धैकादशीभेदाः ।

द्वादशी तु पूर्वैव *युग्मवाक्यात् —

द्वादशी तु प्रकर्त्तव्या एकादश्या युता प्रभो ।

इति स्कान्दाच्च ॥

त्रयोदशी तु *सर्वमते शुक्ला पूर्वा, कृष्णोत्तरा ।

---

*युग्मेति । रुद्रेण द्वादशीयुक्तेत्यादि: । सर्वकार्यपरमिदम् । उपवासे तु विशिष्यापि ।

एकादशी तथा षष्ठी अमावास्या चतुर्थिका ।

उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुताः ॥

इति गार्ग्येण पूर्वविद्धाविधानात् ।

द्वितीया पञ्चमी वेधाद्दशमी च त्रयोदशी ।

चतुर्दशी चोपवासे हन्युः पूर्वोत्तरे तिथी ।

इति वासिष्ठेन तत्रोत्तरविद्धानिषेधाच्च । *सर्वमते इति । "एकादश्यष्टमी षष्ठी" इति सामान्यत उभया विहिता । 'द्वितीया पञ्चमी वेधात्'इति निषिद्धा च । एवं च —

षष्ठ्यष्टमी अमावास्या कृष्णपक्षे त्रयोदशी ।

एताः परयुताः पूज्याः पराः पूर्वयुतास्तथा ॥

इति निगमवचनात्कृष्णपक्षे परा, शुक्लपक्षत्रयोदशी तु पूर्वा इति । सामान्यविशेषन्यायात् । एवं च—

त्रयोदशी तु कर्त्तव्या द्वादशीसहिता मुने ॥

इति ब्रह्मवैवर्त्ते सामान्यवचनाच्छुक्लत्रयोदश्यामेव प्रवर्तते । या तु पूर्वा सा त्वपराह्णिकी ।

त्रयोदशी तु कर्त्तव्या या भवेदापराह्णिकी ॥

इति स्कान्दात् ।

या शुक्ला गृह्यते पूर्वा गृह्यता साऽपराह्णिकी ॥

'त्रयोदशातिथिः पूर्वः सितोऽथाऽसितः *पश्चात्'इ
दीपिकोक्तेः।

शुक्ला त्रयोदशी पूर्वा, परा कृष्णा त्रयोदशी।
इति माधवाच्च।

इति माधवाच्च। *पश्चादिति। परदिने लाभे तु पूर्वै
"एकादशी तृतीया च"इति वचनात्। "यदि न स्यात्परेऽहनि"
इति दर्शनात्। अत्र प्रदोषव्रतं स्कान्दोत्तरखण्डे—

पक्षद्वये त्रयोदश्यां निराहारो भवेद्दिवा।
घटीत्रयादस्तमयात्पूर्वं स्नानं समाचरेत्॥
शुक्लाम्बरधरो भूत्वा वाग्यतो नियमान्वितः।
कृतसंध्याजपविधिः शिवपूजां समारभेत्॥

इति व्रतमभिधाय

एवमाराधयेद्देवं प्रदोषे गिरिजापतिम्।
ब्राह्मणान् भोजयेत्पश्चाद् दक्षिणाभिश्च तोषयेत्॥

इति दिनेऽनाहारकर्तृकं शिवपूजाप्रधानकं व्रतं स्मर्यते। अत्र प्रदोषव्यापिनी ग्राह्या। तत्रैव पूजाविधानात्। प्रदोषस्त्रिमुहूर्त्तमित्यभिप्रायः। दिनद्वये प्रदोषव्याप्तावव्याप्तौ वा पूर्वा।

त्रयोदशी तु कर्त्तव्या द्वादशीसहिता मुने।

इति सुमन्तूक्तेरिति मयूखकृतः। दिनद्वये प्रदोषव्याप्तौ तदव्याप्तौ साम्येन तदेकदेशस्पर्शे वा उत्तरा। संकल्पकाले सत्त्वात्। वैषम्येणैकदेशस्पर्शे तदाधिक्यवती ग्राह्येति विवेचनानुसारिणः। अधिकमुक्तं नक्तव्रते। इदं च मन्दवारे कृष्णपक्षेऽतिप्रशस्तम्।

मन्दवारे प्रदोषोऽयं दुर्लभः सर्वदेहिनाम्।
तत्रापि दुर्लभस्तस्मिन् कृष्णपक्षे समागतः॥

इति तत्रैवोक्तेः। आरम्भश्च शनिप्रदोषे कार्यः—

यदा त्रयोदशी शुक्ला मन्दवारेण संयुता।

चतुर्दशी तु सर्वमते *कृष्णा पूर्वा, *शुक्लोत्तरा । *उपवासे तु *द्वयमपि परेति मदनरत्ने ।

आरभेत्तद् व्रतं तत्र सन्तानफलसिद्धये ॥

इति तत्रैवोक्तेः । पृथक्शानिप्रदोषव्रतं तु एतद्देवमिति प्रकाशः ।

*कृष्णेति ।

कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी ।
पूर्वविद्धैव कर्त्तव्या परविद्धा न कुत्रचित् ॥
उपवासादिकार्येषु एष धर्मः सनातनः ॥

इत्यापस्तम्बवाक्यात् । *शुक्लेति । "चतुर्दश्या च पूर्णिमा" इति युग्मवाक्यात् ।

सदा कार्या त्रयोदश्या न तु युक्ता चतुर्दशी ।
पौर्णमासीयुता सा स्याच्चतुर्दश्या च पूर्णिमा ॥

इति भविष्याच्च । *उपवासे त्विति । रुद्रोपवासभिन्ने इति शेषः । *द्वयमपीति ।

एकादश्यष्टमी षष्ठी उभे पक्षे चतुर्दशी ।
अमावास्या तृतीया च ता उपोष्याः परान्विताः ॥

इति वासिष्ठात् । रुद्रोपवासे तु पक्षद्वयगताऽप्यापराह्णिकी चेत् पूर्वा ।

चतुर्दशी तु कर्त्तव्या त्रयोदश्या युता प्रभो ।
मम भक्तैर्महाबाहो भवेद्या चापराह्णिकी ॥
दर्शविद्धा न कर्त्तव्या राकाविद्धा तथा मुने ॥

इति स्कान्दे "मम भक्तैः" इतीश्वरोक्तिलिङ्गेन रुद्रव्रतविषयत्वप्रतीतेः । आपराह्णिक्या अलाभे तु परा । "ता उपोष्याः परान्विताः" इति दर्शितवासिष्ठात् । यदि कृष्णा पूर्वा न लभ्यते तदा परा ।

अष्टम्येकादशी षष्ठी कृष्णपक्षे चतुर्दशी ।
अमावास्या तृतीया च कर्तव्या परसंयुता ॥

पौर्णमास्यमावास्ये तु सावित्रीव्रतं विना परे ग्राह्ये
*भूतविद्धे न कर्तव्ये दर्शपूर्णे कदाचन।
वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तमम् ॥
इति ब्रह्मवैवर्तात् । अमायां योगविशेषमाहाऽपरार्के शातातपः—

अमावास्यां भवेद्वारो यदा भूमिसुतस्य वै ।
जाह्नवीस्नानमात्रेण गोसहस्रफलं लभेत् ॥
अमा वा सोमवारेण रविवारेण सप्तमी ।
चतुर्थी भौमवारेण त्रिपुनत्सदृशं फलम् ॥

तत्रैव व्यासः—

सिनीवाली कुहूर्वापि यदि सोमदिने भवेत् ।
गोसहस्रफलं दद्यात्स्नानं चेन्मौनिना कृतम् ॥

हेमाद्रौ बृहन्मनुः—

श्रवणाश्विधनिष्ठार्द्रानागदैवतमस्तकैः ।
यद्यमा रविवारेण व्यतीपातः स उच्यते ॥
नागदैवतम्=आश्लेषा, मस्तको=मृगशिरःप्रथमपाद इत्यन्ये । स च सर्वेषाम् ॥

इति ब्रह्मवैवर्तात् । *भूतविद्धे इति । तथा च "चतुर्दश्या च पूर्णिमा" इति युग्मवाक्यम्—

दर्शं च पूर्णमासं च पितुः सांवत्सरं दिनम् ।
पूर्वविद्धमकुर्वाणो नरकं प्रतिपद्यते ॥

इति पूर्वविद्धाविधानं—

पूर्णिमा परविद्धा च नोपोष्यं तिथिपञ्चकम् ॥

इति परविद्धानिषेधश्च सावित्रीव्रतविषयः ।

एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी ।
अमावास्या तृतीया च ता उपोष्याः परान्विताः ॥

अथेष्टिकालः । गोभिलः—'पक्षान्ता उपवस्तव्याः पक्षादयोऽभियष्टव्याः' इति । उपवासोऽन्वाधानम् ।

इति विष्णुधर्मोक्तं—

षष्ठ्यष्टमी तथा दर्शः कृष्णपक्षे चतुर्दशी ।
एताः परयुताः पूज्याः पराः पूर्वेण संयुताः ॥

इति पाद्मं—

नागविद्धा च या षष्ठी सप्तम्या न तथाऽष्टमी ।
दशम्येकादशी विद्धा त्रयोदश्या चतुर्दशी ॥
भूतविद्धा त्वमावास्या न ग्राह्या मुनिपुङ्गव ।
उत्तरोत्तरविद्धास्ताः कर्तव्याः काठकी श्रुतिः ॥

इति प्राचीनमतं च तत्सावित्रीव्रतेतरव्रतविषयमिति भावः ।
अन्वाधानं यत्र क्रियमाणे यागदेवता यजमानसमीपं तिष्ठन्ति तदग्रीध्मादिसंपादनरूपप्रयोगप्रारम्भः । "पूर्वेद्युरग्नीन् गृह्णाति, उत्तरमहर्यजति" इति, "पूर्वेद्युरिध्माबर्हिः करोति, यज्ञमेवारभ्य गृहीत्वोपवसति" इति श्रुतेः उपवास कृत्यक्रमाभिगमः । इत्थं च "पौर्णमास्यां पौर्णमास्या यजेत" "अमावास्यायाममावास्यया यजेत" इति श्रुतिरुपक्रमपरा । अथ वा संधिपार्श्वद्वयवर्तिपर्वप्रतिपत्समुदायलक्षणया कृत्स्नप्रयोगकालविधायिनी । "संधौ यजेत" इत्यादावपि लक्षणैव । अन्यथा संधेर्दुर्लक्ष्यत्वेन तत्र एकस्याप्यनुष्ठातुमशक्यत्वात् "संधिमभितो यजेत" इत्याद्येकवाक्यत्वाच्च । तदुक्तं बौधायनेन—

सूक्ष्मत्वात्संधिकालस्य संधेर्विषय उच्यते ।
सामीप्यं विषयं प्राहुः पूर्वेणाह्ना परेण च ॥ इति ।

तत्राखण्डपर्वणि पर्वप्रतिपदोरुदयास्तमयस्पृक्त्वे पर्वण एवास्तादूर्ध्वं समाप्तौ वा न कोऽपि विचारः । "त्रीनंशानौपवस्तस्य" इत्यादिवक्ष्यमाणयागान्वाधानकालयोरबाधात् । खण्डपर्वणि

*तत्र मध्याह्ने तत्पूर्वं वा पर्वप्रतिपत्सन्धौ तद्दिने यागः।

पूर्वाह्ने वाऽथ मध्याह्ने यदि पर्व समाप्यते।
उपोष्य तत्र पूर्वेद्युस्तदहर्याग इष्यते॥

इति लौगाक्षिवचनात्। अत्र च त्रेधा विभागः—

आवर्तनात्तु पूर्वाह्णो ह्यपराह्णस्ततः परः।
मध्याह्नस्तु तयोः सन्धिर्यदावर्तनमुच्यते॥

तु आह—*तत्रेति। पर्वण आद्यमंशत्रयमन्वाधानस्य कालः। तच्चतुर्थांशसहितं प्रतिपदोऽंशत्रयं प्रातरवच्छिन्नं तु यागस्य।

त्रीनंशानौपवस्तस्य यागस्य चतुरो विदुः।
द्वाविंशानुत्सृजेदन्त्यौ यागे च व्रतकर्मणि।

इति लौगाक्ष्युक्तेः। न ह्ययं स्वतन्त्रो यागविधिः। वाक्यभेदापत्तेः॥

पर्वणो यश्चतुर्थांश आद्याः प्रतिपदस्त्रयः।
यागकालः स विज्ञेयः प्रातरुक्तो मनीषिभिः॥

इति वचनान्तरवशादंशान्तरे प्रसक्त्यभावाच्च, किं तु पर्वान्त्यचतुर्थांशभिन्नांशानिति पर्युदासविधया पूर्वशेषः। एवं प्रतिपदन्त्यचतुर्थांशभिन्नांश्चतुर इत्यर्थः।

न यष्टव्यं चतुर्थेऽशे यागैः प्रतिपदः क्वचित्।
रक्षांसि तद्विलुम्पन्ति श्रुतिरेषा सनातनी॥

इति कात्यायं तु पर्युदाससिद्धार्थानुवादः। 'आद्याः प्रतिपदस्त्रयः' इत्येतावन्मात्रोक्तेः। न चाद्याः प्रतिपदस्त्रय इत्येव पर्युदाससिद्धार्थानुवादः, प्राप्ते कर्मणि पर्वचतुर्थांशप्रतिपदाद्यत्रयांशप्रातःकालरूपानेकार्थविधायकत्वात्सम्भवादिति वाच्यम्। "अर्द्धमन्तर्वेदि अर्द्धं बहिर्वेदि मिनोति" इति न्यायेन एकस्य सन्धिपार्श्वद्वयवर्तिस्थूलकालविशेषस्य विधानात्। न हि पर्वचतुर्थांशप्रतिपदाद्यभागत्रययोः विशिष्यविधेयत्वम्। तथा सति एकवाक्योपादानात् कालद्वयसमुच्चये सति

इति मदनरत्ने वचनात् । मध्याह्नादूर्ध्वं सन्धौ *मा-धवमते परेऽह्नि यागः ।

अपराह्णेऽथ वा रात्रौ यदि पर्व समाप्यते ।
उपोष्य तस्मिन्नहनि श्वोभूते याग इष्यते ॥

इति लौगाक्षिणोक्तेः । *हेमाद्रिस्त्वपराह्णसन्धाव-पि* परदिने प्रतिपत्तुर्यांशे चन्द्रोदये च सति द्विती-यादिष्वन्यतमलक्षणे सति पूर्वेद्युर्यागः ।

पर्वणोंऽशो द्वितीये तु यष्टव्यं तु द्विजातिभिः ।
द्वितीयासहितं यस्मात् दृश्यते त्वात्र चलाग्रता: ॥ इति ।

द्वितीये त्विति कैमुतिकन्यायेन तुर्यांशपरम् । तु-रीये त्विति शूलपाणौ पाठः स्पष्टार्थ एव । तथा—

भूता पञ्चदशी पूर्णा द्वितीया क्षयगामिनी ।
चतुर्थी दृष्टिरमायां स्याद्धूनं फल्गादिको क्रिया ॥

इति बौधायनवचनोक्तेरयुक्तत्वात् । मदनरत्नेऽपि—

पौर्णमास्यां च" इतिवदश्रुतकर्माङ्गत्वापत्तेः । मानाभावे तु वाक्य-भेदेन, पौरुषेयवाक्ये तस्यादोषत्वात् अवच्छेदकं वा मानत्वाविरुद्ध इत्यर्थात् । अधिकमन्यतोऽवगन्तव्यम् । *माधवमते इति । एतन्मतेऽमायां द्वितीया त्रिमुहूर्ता चेदित्यादि दर्शयिष्यति । तत्र हेमाद्रिमतं दर्शयति—*हेमाद्रिस्त्विति । *अपराह्णसंध्याव-पीति । "द्वितीया त्रिमुहूर्ता चेत्" इत्यादीन्यावर्तनमभिक्रष्टापराह्ण-ऽमाप्रतिपत्सन्धिपराणीति तन्मतम् । *परदिने इति । अय-मर्थः—द्वितीया त्रिमुहूर्ता चेदित्याग्रिमवाक्यात् द्वितीयैव यागनिवर्तिका न चन्द्रदर्शनं, मेघादिना व्यभिचारात् । "परतः सोमदर्शनात्" इति हेतूक्तिस्तु चन्द्रोदयो लभ्यते । स च प्रातिपदष्टमांशे भवती-ति चन्द्रदर्शनयोग्यतालक्षणायात्यन्तक्षयानुधावनम् । *तृतीये

चतुर्दशी चतुर्यामा अमावास्या न दृश्यते ।
प्रवोभूते प्रतिपदोत्स्यात्* पूर्वां तत्रैव कारयेत् ॥ इति।

तिकन्यायेन तृतीयांशे तात्पर्यम् । द्वितीयायाः क्षीणत्वं क्वाचित्कमित्यत्रा-
ह–*भूतामिति । भूतस्य पूर्णत्वं नियत, न पश्चाद्दृश्या इत्याह *च-
तुर्दशीति । अमावास्या चतुर्यामा न दृश्यते इत्यन्वयः ।*पूर्वामिति
अयं च प्रधानकालः । तदनुरोधेन चतुर्दश्यामन्वाधानं कार्यम् । 'भूत
कण्यादिकौ'इत्यादिपदात् । अत्रेदमकाचिद्बीजं–इष्ट्यादावपि प्रतिपदा-
पराह्णिकीत्यपराह्णशब्दस्य द्वेधाविभक्तदिनान्त्यदलवाचित्वात्तत्र च
सूर्यास्तात्प्राक् त्रिमुहूर्त्ताद्द्वितीयाप्रवेशेन चन्द्रदर्शने सति पर्वप्रतिपदो
रात्रिसन्धावपि परदिने यागनिषेधापत्तिः । न चापराह्णसन्धिप्रतिषेधेनैव
कैमुतिकन्यायेन रात्रिसन्धावपि परदिने यागसिद्धौ "अपराह्णे ऽथ
वा रात्रौ"इति रात्रिशास्त्रं व्यर्थं स्यादतश्चन्द्रदर्शननिषेधबाधकत-
यैव रात्रिसन्धिशास्त्रं सार्थकमिति वाच्यम् । अपराह्णशब्देन योगेना-
हर्वत्त्यावर्त्तनोत्तरदलाभिधाने कैमुतिकन्यायेन तच्छास्त्रप्रवृत्तेरिति
त्रिमुहूर्तशास्त्रं पञ्चधाभक्तदिनचतुर्थभागरूपापराह्णस्यापि द्वितीयावि-
षयम् । एवं च सोमदर्शनादीति हेतूक्तिः सङ्गच्छते, न तु सायाह्ने त्रिमु-
हूर्तमात्रसत्त्वे । तत्र चन्द्रदर्शनस्य व्यभिचारात् । एतच्च दिवासन्धावे-
व प्रवर्त्तते न रात्रिसन्धौ । परेद्युस्तावतः क्षयस्यासम्भवात् । यत्तु
तत्रापराह्णो दिनद्वितीयभाग इति, तन्न । यौगिकपारिभाषिकयोः
परिभाषासार्थक्याय पारिभाषिकस्यैव ग्राह्यत्वात् । सन्धिनिर्णये
तु द्वेधाविभक्तदिनभागार्थतया पूर्वाह्णापराह्णशब्दौ मध्याह्नशब्दश्च
यौगिका एव ।

आवर्तने यदा सन्धिः पर्वप्रतिपदोर्भवेत् ।
तदहर्याग इष्येत परतश्चेत्परेऽहनि ॥
पर्वप्रतिपदोः सन्धिरर्वागावर्तनाद्यदि ।

यत्तु माधवः—

> यस्तु वाजसनेयी स्यात्तस्य सन्धिदिनात्पुरा ।
> *न कापि त्वाहितिः, किं तु सदा सन्धिदिने हि सा ॥

इत्याह ।

> *यच्च कात्यायनेनोक्तम्—
> आवर्तनाद्धः सन्धिर्यस्यन्वाधानं तद्दिने ।
> परेद्युरिष्टिरित्याहुर्विप्रा वाजसनेयिनः ॥ इति ।

यच्च मदनरत्ने—

> मध्यन्दिनात्स्यादहर्नाशे यस्मिन्
> प्राक्पर्वणः सन्धिरिदं तृतीये* ।
> सा सार्विका वाजसनेयिसत्या
> तस्यामुपोष्याऽथ परेद्युरिष्टिः ॥ इति ।

एतत्पौर्णमासीपरमिति तत्रैव । *आवर्तनाद्धर्वमर्वा-गस्तात्प्रात्रौ वा समाप्तौ वं मध्याह्नादर्वाक् समाप्तौ तृती-

---

> आवर्तनात्परः सन्धिर्यदि नास्मिन्नुपक्रमः ।
> परेद्युरिष्टिरित्येष पर्वद्वयविनिर्णयः ॥

इति गोभिलवचने 'अर्वागावर्तनात्' 'आवर्तनात्पर' इति शब्दस्वरसात् 'आवर्तनात्तु पूर्वाह्ण' इति ग्रन्थस्थवाक्यमपि यौगिकार्थानुवादो, न तु परिभाषा । येन तद्वत्यास्त्रापराह्णो द्वेधाविभक्तदिनापरभागो भवेत् । तस्मात् दिनसन्धौ परदिने पञ्चधाविभक्तदिनचतुर्थभागरूपसङ्गवापराह्णयोरपि द्वितीयासत्त्वे चतुर्दश्यामन्वाधानं, सन्धिदिने याग इति । 'पर्वणोऽंशे तृतीये तु' इत्यादिवचनत्रयं चात्रानुकूलमेव । *न कापीति । तस्य पर्वद्वयेऽपि चतुर्दश्यामन्वाधानकालत्वबाध इत्यभिमानः । *यथेति । चन्द्रदर्शननिषेधबाधापत्तिरित्यभिमानः । तृतीयेति पूरणप्रत्ययसङ्गत्यर्थमाह—*आवर्त-नोर्ध्वमिति ।

येत्यर्थः। *तत्कर्कभाष्य-देवजानि-श्रीअनन्तभाष्यादि-सकलतच्छाखीयग्रन्थविरोधात् *पूर्वाह्णानादराच्चोपेक्ष्यम्।

पौर्णमास्यां विशेषमाह कात्यायनः —

*सन्धिश्चेत्सङ्गवादूर्ध्वं प्राक्पर्यावर्तनाद्रवेः।
सा पौर्णमासी विज्ञेया सद्यस्कालविधौ नरैः॥

अमायां विशेषमाह बौधायनः —

पूर्वाह्णसन्धिशास्त्रं सद्यस्कालत्वं चापोद्यते परेद्युः प्रतिपत्तृतीयांशरूपयागकाललाभादिति भावः। माधवादिमतं दूषयति *तदिति। वाजसनेयिनामपि पौर्णमास्यां तच्छाखीयग्रन्थेषु आवर्तनात्प्राक् सन्धौ तद्दिन एव यागोक्तेरिति भावः। कर्कभाष्येत्यादिसकलवाजसनेयिशाखीयग्रन्थोपादानं माधवादिवचसां निर्मूलत्वव्यञ्जकम्। समूलत्वेऽप्याह—*पूर्वेति। इदानींतनाचारस्तु अनादेय इति भावः। विवेचनकृतस्तु "मध्यंदिनात्स्यादहनीह यस्मिन्" इति भाष्यार्थसंग्रहवाक्यम् आवर्तनादूर्ध्वमस्तात्पूर्वं समाप्ता पौर्णमासी प्रथमा खार्विका, सूर्यास्तोत्तरं समाप्ता द्वितीया, आवर्तनात्पूर्वं समाप्ता तृतीया। सर्वाऽपि अल्पत्वात् खार्विकेत्युच्यते। अयं च वाजसनेयिनां संधिशास्त्रप्राप्तनिर्णयस्य सद्यस्कालत्वस्य चापवादः। तृतीयखार्विकायां वाजसनेयिभिन्नानां यागः। वाजसनेयिनां तु पूर्वेद्युरन्वाधानं, परेद्युर्यागः। स च परेद्युस्तृतीयांशलाभे, न तु चतुर्थांशलाभे; तस्यापराह्णसंभावेन यागकालत्वात् इति समर्थयन्ते। *संधिश्चेदिति। एतच्च वैकल्पिकम्-

अन्वाहितिश्चास्तरणोपवासौ पूर्वेद्युरेते खलु पौर्णमास्याम्।
आवर्तनात्प्राक् यदि पर्वसंधिः सद्यस्तदा वा क्रियते समस्तम्॥

इति संग्रहवचनादिति विवेचने। सद्यस्तदैवेति पाठाच्च विकल्प इति मयूखाशयः। *परत इति।

द्वितीया त्रिमुहूर्ता चेत्प्रतिपद्यापराह्णिकी ।
अन्वाधानं चतुर्दश्यां *परतः सोमदर्शनात् ॥

कात्यायनश्च—

*यजनीयेऽह्नि सोमश्चेद्वारुण्यां दिशि दृश्यते ।
तत्र व्याहृतिभिर्हुत्वा दण्डं दद्याद् द्विजातये ॥ इति ।
एतच्च *बौधायनवाजसनेयिविषयम् ।
*तैत्तिरीयश्रुतौ तु चन्द्रदर्शनेऽपि याग उक्तः—
'एषा वै सुमनानामेष्टिर्यमद्यजानं पश्चाच्चन्द्रमा

अर्वागस्तमयाद् यत्र द्वितीया तु प्रदृश्यते ।
तत्र यागं न कुर्वीत विश्वेदेवाः पराङ्मुखाः ॥

इति तत्र यागनिषेधात् । द्वितीया च त्रिमुहूर्ता प्रायशस्तगात् । यतो विश्वेदेवाः पराङ्मुखा अतस्तत्र यागं न कुर्वीतेत्यर्थः । तर्हि तत्र क याग इत्यत्राह परत इति । तत्र यागनिषेधादित्यर्थः ।
वसिष्ठः—

आदित्येऽस्तमिते चन्द्रः प्रक्षीण उदियाद्यदि ।
प्रतिपद्यतिपत्तिः स्यात्पञ्चदश्यां यजेत्तदा ॥

अस्तमिते=अस्तमयप्रत्यासन्ने । अतिपत्तिः=अननुष्ठानम् । चन्द्रदर्शनदिने यागकरणे प्रायश्चित्तमाह—*यजनीये इति । वारुणीसोमदर्शनवदहश्चेत् यजनीयं=यागसम्बन्धि मोहाच्चेत् तत्र यजेतेति यावत् । अत्र चेच्छब्दोपजनितं निमित्तत्वं विशेषणं याग एव 'हविरार्तिमार्च्छेत्'इत्यत्र हविश्चेदार्तिमासिमत् स्यादित्यत्रार्त्तावित्र । एतेन दर्शनस्य चेच्छब्देन न निमित्तत्वमायाति तस्यानिषिद्धत्वात् । निर्निमित्तकस्य व्याहृतिहोमादेर्यागाङ्गतापत्त्या तत्र यागो दुर्वार इत्यपास्तम् । तस्य यागनिमित्तकतया तद्वैगुण्यपरिहारार्थतया यागाङ्गत्वाभावात् । *बौधायनेति । बौधायनवाक्यात् कात्यायनवाक्याच्चेति शेषः । तैत्तिरीयाश्वलायनयोश्चन्द्रदर्शनदिनेऽपि यागं ध्वनयन्नाह—

अभ्युदेत्यस्मिन्नेवास्मै लोकेऽर्धुकं भवति' इति । *श्रुत्यन्तरेऽपि—'यदहः पश्चाच्चन्द्रमा अभ्युदेति तदहर्यजति-माँल्लोकानभ्युदेति' इति । इदं बह्वृचब्राह्मणस्थवचनम् । मदनरत्नेऽप्येवम् । *आपस्तम्बप्रयोगार्थमक्रुहेऽप्येवम् । *अतः पक्षयागस्य इत्यस्य सूत्राद्गतस्थिति मतम् । *'तृप्यन्त्याश्वलायनाः' इति तु *पूर्वोक्तमतनिर्विषयमिति माधवः ।

---

*तैत्तिरीयेति । *श्रुत्यन्तरे ऐतरेयब्राह्मणे । *आपस्तम्बेति । तत्र च कारिकाः ।

अपराह्णेऽथ वा रात्रौ यदि पर्व समाप्यते ।
उपोष्या तत्र राका स्यात् सा पूर्णेन्दुसमलक्षणा ॥
पूर्वाह्णे वाऽथ मध्याह्ने यदि पर्व समाप्यते ।
उपोष्याऽनुमतिस्तत्र सा अनःपूरितलक्षणा ॥
अपराह्णे क्षपायां वा यदि पर्व समाप्यते ।
उपोष्या तु कुहूस्तत्र यदृष्टेन्दुत लक्षणा ॥
पूर्वाह्णे वाऽथ मध्याह्ने पर्वसन्धिर्यदा भवेत् ।
तत्रोपोष्या सिनीवाली इन्दो न द्रष्टृकलक्षणा ॥ इति ।

पौर्णमासीवदमावास्यानिर्णयकरणादेतन्मते चन्द्रदर्शनेऽपि अमावास्यायां न निषेध इति ज्ञायते । *अत इति । तैत्तिरीयब्राह्मणादेर्विधित्वोपगमाच्चन्द्रदर्शनादिने यागनिषेध आश्वलायनापस्तम्बाभिन्नविषय इति भावः । नन्वन्वाधानेऽपि "यदहस्त्वेव चन्द्रमा न दृश्येत तामामावास्यां कुर्वीत" इति चन्द्रदर्शनस्य पर्युदस्तत्वात्कथं तत्र तदनुष्ठानम्?। सत्यम् । द्वयोरपि चन्द्रदर्शनरहितं दिनमपेक्षितम् । अखण्डपर्वणि पूर्णायां प्रतिपदि च तत्संभवति । यदा त्वेकस्मिन्नेव दिने चन्द्रादर्शनं तदा द्वयोः स्वकालत्वासम्भवाद्गुणविरोधन्यायेन चन्द्रादर्शनादिने यागः, पूर्वस्मिंश्चन्द्रदर्शनादिने

शेषपर्वणीष्टौ विशेषमाह माधवीये गार्ग्यः—

प्रतिपद्यप्रविष्टायां यदि चेष्टिः समाप्यते ।
पुनः प्रणीय कृत्स्नेष्टिः *कर्त्तव्या यागवित्तमैः ॥
*गृह्याग्नेर्नायं नियम इति मदनपारिजातः । *एवं

चान्वाधानं कार्यम् । 'दृश्यमानेऽप्येके' इति गोभिलोक्तेः । "तद्वैके दृष्टोपवसन्ति" इति श्रुतेश्च । एके दृष्टोपवसन्ति तदयुक्तमिति तदर्थः । "एके" इति न पाक्षिकाभिप्रायं, किं तु परदिने यागानुष्ठानाभिप्रायम् । तस्मात् "यद्वैनं न पुरस्तान्न पश्चात्पश्येत्तदहरुपवसेत्" इति श्रुतिश्च पर्वप्रतिपदोः पूर्णतानिर्णायिकेति ।

नवीनास्तु तैत्तिरीयादिश्रुतिश्चन्द्रदर्शने प्रत्यक्षतो न यागं विधत्ते किं तु स्तौति । स्तुत्या तु न विधिः कल्पयितुं शक्यते । चन्द्रादर्शने यागविधायकप्रत्यक्षश्रुतिविरोधात् । स्तुतिश्च तादृशप्रत्यक्षविधिशेषत्वेन अतिप्रशस्तमपि चन्द्रदर्शनादिनं चन्द्रादर्शनदिनाद् हीनमेवेति यथाविधिशेषतया आग्निहोत्रभक्षस्तुतिवत् । अस्तु वा विधिः, परं तु रात्रिसन्ध्यां दृष्टोभूते चन्द्रदर्शनादिने याग इति तद्विषयक इत्याहुः ।

प्रकृतमनुसरामः—ननु चन्द्रदर्शनेऽपि यागानुष्ठाने ।
द्वितीयासहितं यस्माद् दूषयन्त्याश्वलायनाः ॥

इत्यसङ्गतं स्यादित्यत्राह—*दूषयन्तीति । *पूर्वाह्णेति । आवर्त्तने तत्पूर्वसन्ध्योस्तौ विहाय परेद्युः पूर्वचतुर्थांशे याग इदमित्यर्थः । न त्वपराह्णसन्धौ परेद्युर्यागे दोष इति भावः । इष्टौ समाप्तायां विशेषं प्रायश्चित्तं—प्रणीय अग्निम् । *कर्त्तव्येति । एतद्वयेन ब्राह्मणभोजनादिः कश्चन पदार्थः प्रतिपदि कार्य इति रहस्यमनुसन्धेयम् । ततो माध्यान्हिकाद्युपक्रम इति स्मर्त्तव्यम् । *गृह्याग्नेरिति । इष्टिपदस्वारस्यात् । अत्रेयमरुचिः—

पर्वान्त्यांशः प्रतिपदश्च आद्योंऽशो यागकाल उक्तः । *क्वचित्प्रतिपत्तुर्यांशोऽपि यागः ।

सन्धिर्यद्यपराह्णे स्याद्यागं प्रातः परेऽहनि ।
कुर्वाणः प्रतिपद्भागे चतुर्थेऽपि न दुष्यति ॥

इति वृद्धशातातपोक्तेः । *एतत् पूर्णिमापरमिति मदनरत्ने । पर्वणि प्रतिपदः क्षयस्य वृद्ध्यर्धं प्रक्षिप्य संधिर्ज्ञेयः । तदाह माधवः-

वृद्धिः प्रतिपदो याऽस्ति तदर्धं पर्वणि क्षिपेत् ।

पक्षादावेव कुर्वीत सदा पक्षादिकं चरुम् ।
पूर्वाह्ण एव कुर्वन्ति विद्धेऽप्यन्ये मनीषिणः ॥

इति परिशिष्टे पक्षादिप्रतीक्षाविरोधात् । विद्धे=दर्शविद्धे । *एवमित्यादि । एतेनैतदुक्तं भवति-पूर्णिमाऽमावास्ययोर्मध्याह्ने तत्पूर्वं वा सन्धौ सन्धिशास्त्रमेव निर्णायकं, दिनद्वये प्रातर्नियमविषययागकालसत्त्वेन तच्छास्त्रस्यौदासीन्यात् । एवमावर्तनविप्रकृष्टापराह्णसन्धावपि तदेव निर्णायकम् । द्वितीयदिनेऽपि प्रातर्नियमविषयप्रतिपत्तृतीयांशरूपयागकालसत्त्वेन तच्छास्त्रस्यौदासीन्यादिति । नन्वेवमावर्तनसन्निकृष्टापराह्णसन्धौ परेद्युर्द्व्यभावेन न प्रतिपत्तृतीयांशः किं तु तच्चतुर्थांशस्तत्र कथं सन्धिशास्त्रं प्रवर्तेत ? । परेद्युर्नियमविषयप्रातःकालाभावात्,

न यष्टव्यं चतुर्थांशे यागैः प्रतिपदि क्वचित् ।

इति निषेधाच्च । न च तत्र पूर्वेद्युरेवास्तु यागः तस्य नियमविषयत्वाद् दर्शितनिषेधागोचरत्वाच्चेति वाच्यम् । संधिशास्त्रविरोधात्; इत्यत आह-*क्वचिदिति । न यष्टव्यमिति न निषेधो विकल्पापत्तेः । किं तु "अयज्ञिया वै माषाश्चणकावरकाः कोद्रवाः" इति प्रतिनिधिवर्जनवद् "द्वावंशावुत्सृजेदन्त्यौ" इत्युक्तपर्युदासानुवादः । नन्वेवं यत्र परदिने चन्द्रदर्शनं तत्र परदिने यागापत्तिः

क्षयस्यार्धं तथा क्षिप्त्वा संधिर्निर्णीयतां सदा ॥ इति ।

कात्यायनोऽपि—

*परेऽह्नि घटिका न्यूनास्तथैवाभ्यधिकाश्च याः ।
तदर्धक्लृप्त्या पूर्वस्मिन् ह्रासवृद्धी प्रकल्पयेत् ॥ इति ।

एवं स्मार्तस्थालीपाकेऽपि ज्ञेयम् । तत्राग्निस्थालीपाकाधानगृहप्रवेशनीयहोमानन्तरभाविनयां पौर्णमास्यां प्रारम्भणीयो न तु दर्शे । यद्यारम्भे मलमासपौषमासगुरुशुक्रास्तादि भवति तदाप्यारम्भः कार्यः ।

यानि तु—

उपरागोऽधिमासश्च यदि प्रथमपर्वणि ।
तथा मलिम्लुचे पौषे नान्वारम्भणमिष्यते ॥
गुरुभार्गवयोर्मौढ्ये चन्द्रसूर्यग्रहे तथा ॥

इति संग्रहवचनानि, तानि आलस्यादिनाऽतिक्रान्तशुद्धकालप्रारम्भविषयाणि ।

न दुष्यतीत्युक्तेरत आह—*एतदिति । भगराङ्कसंधौ वृद्ध्यादिना परादिने चन्द्रदर्शनासत्त्वे तु अमायामपि प्रतिपच्चतुर्थांशे याग इति स्मर्तव्यम् । *परेऽह्नीति । विवृतं चैतत् "वृद्धिः प्रतिपदो याऽस्ति" इति माधवेन । यत्र चतुर्दशी दशदण्डा, पर्व पञ्चदशदण्डं, प्रतिपत्तु एकोनविंशतिदण्डा, तत्र प्रतिपद्वृद्धेरर्द्धं दण्डद्वयं पर्वणि क्षिपेत् । ततश्च सप्तदशदण्डा संधिः । एवं यत्र चतुर्दशी पञ्चविंशतिदण्डा, पर्व एकोनविंशतिदण्डं, प्रतिपच्चतुर्दशदण्डा तत्र प्रतिपद्ध्रासार्धं सार्धदण्डद्वयं पर्वणि क्षिपेदित्यर्थः । अत्र लौगाक्षिः—

तिथेः परस्ताद् घटिकास्तु या स्यु-
र्न्यूनास्तथैवाभ्यधिकास्तु तासाम् ।
अर्द्धं वियोज्यं च तथा प्रयोज्यं
ह्रासे च वृद्धौ प्रथमे दिने तत् ॥

नामकर्म च दर्शेष्टिं यथाकालं समाचरेत् ।
अतिपाते सति तयोः प्रशस्ते मासि पुण्यभे ॥

इत्यपरार्के गार्ग्यवचनादिति प्रयोगपारिजाते । उक्तं चैतत् प्रयोगरत्ने भट्टैः । कालादर्शे तु 'नामकर्म च जातेष्टिम्' इति पाठः ।

*याज्ञिकास्तु—

आधानानन्तरा पौर्णमासी चेन्मलमासगा ।
तस्यामारम्भणीयादीन्न कुर्वीत कदाचन ॥

इति त्रिकाण्डमण्डनवचनाच्छुद्धकाल एव विभ्रष्टेष्टिं कृत्वाऽऽरम्भं कुर्यादित्याहुः । कालादर्शे स्मृतिसंग्रहेऽपि—

आरम्भं दर्शपूर्णेष्ट्योरधिमासस्य चादिमम् ।
प्रतिष्ठाः पञ्च कूर्माद्या मलमासे विवर्जयेत् ॥ इति ।

अत्र चतुर्दशीनां यावत्यः पञ्चघटिकाः प्रतिपदस्ततो न्यूनत्वे आधिक्ये वा ह्रासवृद्धी इति रीत्या ते अवधिसापेक्षे, न तु निरपेक्षे । घटिकान्यूनाधिकभावे ह्रासवृद्ध्योरसंभवात् । तथा च प्रथमोदाहरणे ह्रासः, द्वितीयोदाहरणे तु वृद्धिरिति । यत्तु—

षोडशेऽहन्यपीष्टिश्चेद्यष्ट्या पञ्चदशेऽहनि ।
चतुर्दशे जघन्येष्टिः पापा सप्तदशेऽहनि ।

इति आपस्तम्बवाक्यं, तत्र प्रधानयागपरम् । पूर्वेष्टिदिनमारभ्य गणनायां वृद्धौ कदाचित् सप्तदशे दिनेऽपि यागस्य प्राप्तेस्तत्र नाभिधेयानौचित्यात् । अधिकमन्यतोऽवगन्तव्यम् । *याज्ञिकास्त्वत्ययुक्तिः—पुरुषापराधकृतविहितकालातिक्रमरूपनिमित्ताभावेन विभ्रष्टेष्टेरनौचित्यात् । यदीत्यादिविधेयकालगतमेकत्वं विवक्षितम् । तेनैकस्यां पौर्णमास्यामेकस्याममावास्यायां वा साङ्गप्रयोगसिद्धेः सद्यस्कालीनत्वं लभ्यते । वाशब्दोपादानात् । पौर्णमासीकालीनोपांशुयाजाग्नीषोमीयाविकाराणां पौर्णमास्यामेवावामा-

अथ विकृतीष्टिः । तत्रापस्तम्बः—'यदीष्ट्या यदि पशुना यदि सोमेन यजेत सोऽमावास्यायां पौर्णमास्यां वा' इति । *अत्र प्रकृतितः काले सिद्धेऽपि तत्तत्कालता विधेया । तृतीयया साङ्गत्वेनोक्तः । अत्र पौर्णमास्यमावास्याशब्दाभ्यां तदन्तपक्षणो गृह्यते । तेन तद्वत्यहोरात्र इत्यर्थमाह रामाण्डारः । माधवोऽपि

इष्ट्यादिविकृतिः सर्वा पर्वण्येवेति निर्णयः । इति ।

अत्र विशेषमाह त्रिकाण्डमण्डनः, कात्यायनश्च—

आवर्तनात्प्राग्यदि पर्वसन्धिः
कृत्वा तु तस्मिन्प्रकृतिं विकृत्याः ।
तदैव यागः, परतो यदि स्यात्
*तस्मिन्विकृत्याः प्रकृतेः परेद्युः ॥ इति ।

धूर्तस्वाम्यादयोऽप्येवमाहुः । *'यदीष्ट्या' इति साङ्गाया विकृतेः पर्वकालत्वादा*वर्तनात् प्राक् सन्धौ 'म-

---

वास्याकालीनसान्नाय्यादिविकाराणां चामावास्यायामेवेति नाव्यवस्थाप्रसङ्गः । न च वाक्यभेदः इष्टिपशुसोमेष्वनुगतस्य यागस्योद्देश्यतावच्छेदकत्वात् पौर्णमास्यमावास्ययोरनुगतस्य पर्वत्वस्य विधेयतावच्छेदकत्वात् । *अत्रेति । तथा च पर्वान्त्यक्षणवदहोरात्र इत्यर्थात् 'आवर्तनात् प्राक्' इति वचनमनावश्यकमित्यभिमानः । वस्तुतस्तु पौर्णमास्यमावास्याशब्दयोस्तिथिवाचिनोर्न लक्षणा युक्ता । 'न विधौ परः शब्दार्थः' इति न्यायात् । *तस्मिन्निति । प्रातःकालस्यातिदेशात् प्राप्तस्तत्र विकृतिः, ततः प्रकृतेरुपक्रमः, तस्यां चाङ्गत्वात्प्रातःकालबाधः । आवर्तनादितिवाक्यस्य याज्ञिकसंप्रदायेनार्थं सूचयित्वा मीमांसकसंप्रदायेनार्थमाह—*यदीष्ट्येति । *आवर्तनात्प्राक् सन्धाविति । अयं भावः- आवर्तनात्प्राक् सन्धेः प्रकृत्यधिकरणतया पर्वणो विकृत्यधिकर-

न्धिमभिनो यजेत'इति *प्रकृतेः प्रतिपदि समाप्तिनिय-
मात् । प्रकृत्यनन्तरं प्रतिपदि विकृत्ययोगात् पूर्वेद्यु-
र्विकृतिरित्युक्तं तन्त्ररत्ने पार्थसारथिना । यद्यपि
*'प्रकृतेः पूर्वत्वादपूर्वमन्ते स्यात्'इत्यापस्तम्बेनोक्तम्,

णत्वश्रुतेः,

कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः ।

इति स्मृतेश्च प्रकृतिविकृतिपर्वाश्रयत्वेन तद्दिन एवोभयोः
कर्तव्यत्वसिद्धौ क्रमाकाङ्क्षायां पूर्वार्द्धेन क्रमो विधीयते, न त्वेत-
त्प्रयोगद्वयव्यापिपर्वसत्त्वे प्रवर्त्तते; श्रुतपर्वाधिकरणत्वबाधापत्तेः ।
किं तु तत्रावर्तनप्राक्सन्धावपि पूर्वदिन एव विकृतिः, सन्धिदिने तु
प्रकृतिमात्रमिति । *प्रकृतेरिति । न च प्रयोगद्वयव्यापिपर्वण्यपि
"कृत्वा तु तस्मिन् प्रकृतिं विकृत्याः" इति प्रकृतिसमाप्त्यनन्तरं
विकृतेः कर्तव्यत्वावगमात् प्रतिपदधिकरणकप्रकृत्यनन्तरपदार्थोत्तरं
विकृतिरस्तु, न तु ततः प्रागिति वाच्यम् । श्रुतपर्वाधिकरणत्वबा-
धापत्तेः । तदुक्तं-'प्रतिपदि विकृत्ययोगात्'इति । वस्तुतस्त्वनन्तरप-
दार्थव्यतिरिक्ताया एव प्रकृतेः पर्वाधिकरणकत्वेन विकृत्यैककाल-
त्वात्तादृश्या एव क्रमविधिराकाङ्क्षितः । न च प्रकृतेः प्रतिपदि
समाप्तिनियमात्तन्मध्ये कथं विकृतिः?, 'न कर्मणि कर्मारम्भः'इ-
त्युक्तेरिति वाच्यम् । न हि न कर्मणीत्यत्र श्रुतिर्मूलं, किं तु प्रयोग-
प्राशुभावभङ्गप्रसङ्गः । स चात्र प्रतिपत्प्रतीक्षया विकृत्यननुष्ठाने-
ऽप्यावश्यकः । अन्यथा दर्शस्य पौर्णमासस्य वा प्रयोगस्य
मध्येऽग्निहोत्रस्यानुष्ठानं न स्यात्, न स्याच्चान्ततः पर्वद्वयसाध्यतन्त्र-
द्वयप्रयोगमध्ये काम्यादीनामन्येषामपि कर्मणाम् । तस्मात्प्रयोगद्वय-
व्यापिपर्वणि तादृशप्रकृतिविकृत्योरेवायं क्रमविधिर्नान्यत्रेति भावः ॥
*प्रकृतेरिति । तथा चावर्तनपूर्वसन्धावपि प्रकृत्यनन्तरं वि-

तथाऽपि हेतुवादेन श्रुतिमूलत्वाभावादङ्गं* वा सम-
भिव्याहारादितिवदप्रामाण्यमिति तदाशयः । आग्र-
यणे तु विशेषं वक्ष्यामः । 'अन्वारम्भणीया तु चतुर्दश्यां
कार्या' इति हिरण्यकेशिसूत्रे मातृदत्तीये । *अन्येषां
पर्वण्येव ।

पशौ सोमे च कालान्तरमप्याह बौधायनः—'अ-
मावास्येन वा हविषेष्ट्वा नक्षत्रे वा' इति । शुक्लपक्षे कृत्ति-
कादिविशाखान्तेषु देवनक्षत्रेष्विति केशवस्वामी
व्याचख्यौ । चातुर्मास्येष्वपि *द्वादशाहप्रथमप्रयोगपक्ष-
योर्नक्षत्रेष्वप्यारम्भः । यावज्जीवसांवत्सरप्रयोगयोस्तु
फाल्गुन्यां चैत्र्यां वाऽऽरम्भः । पशौ तु विशेषमाह
कात्यायनः—

अर्वागह्नो भवति नियतं पर्वसन्धिः परस्तात्
कृत्वा तस्मिन्नहनि तु पशुं सद्य एव द्व्यहं वा ।

कृत्यनुष्ठानमित्यभिमानः । *अङ्गं वेति । "पितृयज्ञः स्वकालविधा-
नादनङ्गं स्यात्"(जै० सू० ४ । ४ । १९)इति सिद्धान्तसूत्रात् ।
*अन्येषामिति । नित्यकृत्वर्थत्वेन प्रधानपरतन्त्रत्वात् । तदवि-
रोधेन पर्वापेक्षणात् । गृहदाहेष्ट्यादीनां तु निमित्तानन्तरमनुष्ठाने च
न पर्वापेक्षा । तदसम्भवे तु जातेष्टिवत् । जातेष्टिश्च शेषिविरोधेन नि-
मित्तानन्तरमसम्भवादुचितकालप्रतीक्षायां पितुर्मातुश्च दशविंश-
तिरात्रातिक्रमे पर्वणि अनुष्ठेया । हविर्दोषादिनिमित्तकक्रत्वर्थे-
ष्टयस्तु स्विष्टकृदनन्तरं समिष्टयजुषः प्राक् निमित्तस्मृतौ तन्त्र-
मुपजीव्य निर्वापप्रभृति तदानीमेव, समिष्टयजुषोऽनन्तरं स्मरणे
तु तत्प्रयोगं समाप्येति । *द्वादशाहेति । आद्येऽह्नि वैश्वदेवं
पर्व, चतुर्थे वरुणप्रघासम्, अष्टमनवमयोः साकमेधं, द्वादशे शुना-

आरम्भोऽथ प्रकृतेरथ चेत्पर्वसन्धिः पुरस्तात्
कृत्वा तस्मिन् प्रकृतिमथ तु स्यात्पशुः सद्य एव ॥
'अधिकारपशुस्त्वग्नीषोमीयेण सवनीयेन वा समानतन्त्रः कार्यः' इति त्रिकाण्डमण्डनः ।

सोमे त्वाहाऽऽपस्तम्बः—'अमावास्यायां दीक्षायजनीये वाऽमावास्यायां *यजनीये वा सुत्यमहः, पौर्णमास्यां दीक्षायजनीये वा पौर्णमास्यां यजनीये वा सुत्यमहः' इति । लाट्यायनसूत्रेऽपि—'पूर्वपक्षस्य प्रथमेऽहनि दीक्षेत दृष्ट्वा वा नक्षत्रयोगम्(१)' इति । पूर्वपक्षः=शुक्लपक्षः । नक्षत्रयोगे वेति । अयमर्थः चैत्र्यादिपूर्णिमायां चित्रादिनक्षत्रयोगे दीक्षेतेति । आधानं तु पर्वणि नक्षत्रेषु चोक्तम् । तत्र पर्व 'तत्त्वं गार्हपत्यमादधाति' इत्यादिकर्मकालव्यापि ग्राह्यम् । दिनद्वये तत्त्वे परं ग्राह्यम् । सङ्कल्पस्य पर्वणि लाभात् । पूर्वनक्षत्रयोगे तदेव ग्राह्यम् । 'यत्र त्रीणि सान्निपातिकान्यृतुर्नक्षत्रं सौरीयमित्येकः पक्षः । क्रमेण पर्वनक्षत्रयोरिति द्वितीयः । फाल्गुन्याः पौर्णमास्यामारभ्य चतुर्षु मासेषु क्रमेणैकैकं पर्वेतयवं यावज्जीवमिति तृतीयः । एकवर्षं तथा कृत्वा सवनेष्टिपशुसोमान्यतमेन यजेदिति तुरीयः । एकाहचातुर्मास्यप्रयोगोऽपि शाङ्खायनेनोक्तः—'अपि वाऽप्येकपर्वणि' इति । *यजनीये वेति । यदीक्षेत्यादिवाक्यगतामावास्यादिपदस्य संनिपदहोरात्रवाचित्वमिति याज्ञिकमते आवर्तनतत्पूर्वसंध्योस्तत्रैव । तथा च त्रिकाण्डमण्डनः—

खण्डपर्वणि सोमश्चेत्प्रतिपन्मिश्रपर्वणि ।
सोमसुत्या प्रयोक्तव्येत्याह कौषीतकी श्रुतिः ॥ इति ।

मीमांसकमते तु पूर्वेद्युः तिथेरङ्गत्वेन विधानात्तस्याश्च प्रोक्त-

(१) मुम्बापुरीस्थमुद्रितपुस्तके 'नक्षत्रयोगे च' इति पाठः ।

पर्व च, तत्समूलं. विप्रतिषेधे ऋतुर्नक्षत्रं च बलीयः' इति हिरण्यकेशिसूत्रात् । ऋतुः 'वसन्ते ब्राह्मणोऽग्नीनादधीत' इत्यादिः । रेणुककारिकायां तु-

माघादिपञ्चमासेषु श्रावणे चाश्विने तथा ।
मार्गशीर्षे शुक्लपक्षे आधानमथ कारयेत् ॥

इत्युक्तम् । अत्र मूलं मृग्यम् । आधाननक्षत्राणि त्वापस्तम्बसूत्रे 'कृत्तिका-रोहिणी मृगशीर्ष पुनर्वसु-पूर्वोत्तरा फाल्गुनी हस्त-चित्रा विशाखा ऽनुराधा-श्रवणो-त्तराभाद्रपदा' इति । सोमपूर्वाधाने विशेषमाहाऽऽपस्तम्बः —'सोमेन यक्ष्यमाण आदधानो नर्तून्सूर्क्षेत न नक्षत्रम्' इति । अत्र प्रकरणादा*धानकालबाधः । *तेन सोमस्य वसन्तकालता न बाध्यते' इति रुद्रदत्तवृत्तौ नारायणवृत्तौ चोक्तम् । *तन्त्ररत्ने वार्तिके च-'ते वा एते उभये अपहतपाप्मानो ऋतवः । एष वा उद्यन्नादित्य एषां पाप्मनोऽपहन्ता । यदैवैनं कदाचन यज्ञ उपनमेदथादधीत' इत्युत्तरायणरूपं दैवं, दक्षिणायनरूपं च पित्र्यमित्युभयमृतुत्रयं सोमाधाने शतपथे विशिष्य विहितम् । तदेकवाक्यतया शाखान्तरेऽपि 'नर्तून् सूर्क्षेत' इत्यत्र सोमकालबाध एव । आधानकालबाध-

---

संधिपूर्वेद्युरेव भूयः प्रयोगैकदेशव्याप्तेरिति। *आधानकालः=पर्वनक्षत्रादिः । ननु ऋतुनियमो रुद्रदत्तादिभिराश्रित इत्यत आह—*तेनेति। मीमांसकानामपि ऋत्वनियमः सम्मत इत्याह—*तन्त्ररत्ने चेति। तत्र हि 'ते वा एते अपहतपाप्मान ऋतवः। एष वा उद्यन्नादित्य एषां पाप्मनोऽपहन्ता, यदैवैनं कदाचन यज्ञ उपनमेदथादधीत'इति शतपथे उत्तरायणरूपं दैवं, दक्षिणायनरूपं पित्र्यमित्युभयमृतुत्रयमपहतपाप्मत्वं परीक्ष्याङ्गतया सोमाधाने विहितम् । तदेकवाक्यतया शाखा-

स्य 'यदैवैनं श्रद्धोपनमेत्तदादधीत' इति तस्यां शाखायां वाक्यान्तरेण सिद्धत्वात्सोमकालबाधार्थमेवेदमित्युक्तम्। धूर्तस्वामी तु सोमस्यापि य ऋतुस्तस्यापि 'न सूर्क्षेत्'इति लिखनादुभयकालबाधं मन्यते। श्रीरामाण्डारस्तु काला-

---

न्तरेऽपि 'न ऋतून् सूर्क्षेत्'इत्यादौ सोमकालबाधः। 'यदैवैनं श्रद्धोपनमेत्तदादधीत'इति तच्छाखास्थवाक्यान्तरेणाधानकालबाधस्य सिद्धत्वादेतस्य सोमकालबाधार्थत्वमिति। दिगर्थस्तु उदगयनादेः प्राशस्त्यमात्रम्। न चाग्निहोत्रं दर्शपूर्णमासावप्युत्तरायणे

उपक्रम्य यथाकालमुपासीरन् द्विजातयः।
सोमं च पशुबन्धं च सर्वाश्च विकृतीरपि॥
सौम्यायने यथाकालं विदध्युर्गृहमेधिनः॥

इतिवचनादुदगयननियम इति वाच्यम्। तद्यथा पशौ काम्यपरम्, अन्यथा 'पशुः सदायनं तथा'इत्यनेन विरोधात्; तथा सोमांशेऽपि तत्सहचारात्। अत एवाग्निहोत्रादिकमपि काम्यमेव, न तु नित्यमपि। ब्राह्मणाधिकारिकस्य तस्य नित्यप्राप्तत्वात्, वैश्याद्यधिकारिकस्य च यावज्जीवश्रुत्याऽनन्तरसायङ्कालादावेव प्राप्तेर्बाधात्। उपक्रम्येति तु द्वितीयादिप्रयोगेऽनियमार्थम्। केचित्तु आधानानन्तर्यमनपेक्ष्यापि सर्वसोमानुष्ठाने कालबाधमाहुः। 'वसन्ते ब्राह्मणोऽग्निमादधीत'इति सूत्रोत्तरं 'कृत्तिकास्वादधीत'इति सूत्रम्। तथा च विकल्पः, न तु समुच्चयः। तथा सति 'वसन्ते कृत्तिकास्वादधीत'इत्येव सूत्रयेत्। एवं सोमेऽपि ऋतुनक्षत्रयोर्विकल्प इति श्रीकुमारः। 'सोमेन यक्ष्यमाणो नर्तून् सूर्क्षेन्न नक्षत्राणि, तदेतस्यार्तस्यातिवेलं वा श्रद्धायुक्तस्य'इति सूत्रम्, तदार्तस्येव विशिष्टश्रद्धाशालिनोऽप्यधिकारार्थं वाशब्दात्। तत्र केवलाधानेऽपि ऋतोर्नादरः 'यदहरेव विरजेत्' इतिवत् 'यदैवैनं श्रद्धोपनमेत्तदादधीत'इति श्रुतौ यदैवैनमित्युक्तेः श्रद्धायाः सामान्यतोऽङ्गत्वेऽपि इहाधिकारितावच्छेदकत्वं 'यदेव श्रद्धया करोति'इत्यादा-

न्तरविधानं वा सर्वकालानादरो वेति पक्षद्वयमुक्तवान् । तत्राद्ये कृत्तिकादिकालान्तरस्य यथा आधाने वसन्ताद्यबाधेन विधानम्, तथा 'सोमेऽप्युदगयनपूर्वपक्षपुण्याहसन्निपाते यज्ञकालो नादेशः' इति च्छन्दोगसूत्रोक्तोदगयनाबाधेन सोमाभिसन्धिरूपकालान्तराविधानादुदगयनं त्वपेक्ष्यत इत्युक्तम् । द्वितीयपक्षे तु 'यदैवैनं यज्ञ उपनमेत्' इति सर्वकालानादर उक्त इति भारद्वाजसूत्रात्सर्वशब्दस्य च विश्वजित्सर्वपृष्ठइतिवद्गुणोपप्रयोगात् सर्वकालबाध इति । तेन दक्षिणायनेऽपि भवतीत्युक्तम् । यद्गुरुभाष्ये देवत्रातभाष्ये तत्त्वरत्ने च षट्स्वपि ऋतुषु भवतीत्युक्तमिति दिक् ॥

श्राद्धे त्वमावास्या अभाविभक्तदिनतृतीयांशो योऽपराह्णभागस्तद्व्यापिनी *साग्निकैर्ग्राह्या ।

विव । आर्तस्येति तु सद्यस्कालाधानपक्षपरम् । 'तदहर्विदधीत पौर्णमास्यां सद्यस्कालम्' इति कर्मान्तसूत्रात् ।

प्रतिसंवत्सरं सोमः पशुः प्रत्ययनं तथा ।
कर्त्तव्याऽऽग्रयणेष्टिश्च चातुर्मास्यानि चैव हि ॥
एषामसम्भवे कुर्यादिष्टिं वैश्वानरीं द्विजः ।

इति वैश्वानरी तु प्रत्याम्नायत्वात्तत्कर्मकाल एव । संस्थावाजपेयस्य तु वसन्तः कालः । आश्रयकाल एव गुणानां प्रवृत्तेः । अन्यस्य तु तस्य शरदादिरित्यन्यत्र विस्तरः । *साग्निकैरिति । अन्वाधानपिण्डपितृयज्ञश्राद्धान्येकदिने अनुष्ठातृभिरिति शेषः ।

पक्षान्तं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः ।
पिण्डयज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं बुधः ॥

इति वचनात् । एतेषामन्वाधानादित्रयस्यैकदिनकर्त्तव्यत्वार्थं

***पिण्डान्वाहार्यकं श्राद्धं *क्षीणे राजनि शस्यते ।**

दीर्घापराह्णापेक्षणात् । एवं च त्रिंशांशे योऽपराह्णभाग इत्यस्य स्मृतिसमीपवशात्तृतीयांशापराह्णभागपरत्वे तात्पर्यं, पञ्चधाभागस्याप्रवेशात् । *पिण्डान्वाहार्यकं=पिण्डपितृयज्ञोत्तरक्रियमाणं दार्शम् । तच्च तत्प्रकरणन्यायेन कर्मनामधेयम् ।

पितृयज्ञं तु निर्वर्त्य विप्रश्चन्द्रक्षयेऽग्निमान् ।
पिण्डान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकम् ॥

इति मानवेन तथैव प्राप्तेः । मासानुमासिकं=मासे मासे भवं वीप्सापर्यायत्वात् । तेनावश्यकर्तव्यतासिद्धिः । यत्तु

पितृयज्ञं तु निर्वर्त्य तर्पणाख्यं द्विजोऽग्निमान् ।
पिण्डान्वाहार्यकं कुर्याच्छ्राद्धमिन्दुक्षये सदा ॥

इति मात्स्यं, तदञ्जलिदानरूपपितृयज्ञासमर्थस्यानुकल्पेन तर्पणरूपतत्परम् । न चेह—

एकमप्याशयेद्विप्रं पित्रर्थे पाञ्चयज्ञिके ।

इत्युक्तं ब्राह्मणभोजनमेव पितृयज्ञोऽस्त्विति वाच्यम् । तस्य दार्शेन प्रसङ्गसिद्धेः पृथगसत्त्वात् । न च—पिण्डाः=पितरः

ततः आरभ्य पितरः पिण्डसंज्ञां तु लेभिरे ।

इति मात्स्यात् । तेषामन्वाहार्यं=तत्सम्बन्धिपिण्डभक्षणमिति कुतो नार्थ इति वाच्यम् । सर्वस्मृतिषु पिण्डैकदेशभक्षणविध्यदर्शनात् । अत एव—

यस्मादन्वाहृता मात्रा भक्षयन्ति द्विजातयः ।
अन्वाहार्यकमित्युक्तं तस्मात्तच्चन्द्रसंक्षये ॥

इति मात्स्यम् ।

पिण्डेभ्यस्त्वल्पिकां मात्रां समादायानुपूर्वशः ।
तानेव विप्रानासीनान्विधिवत्पूर्वमाशयेत् ॥

इति मन्वुक्तप्रकारविशेषानुष्ठानपरमित्युक्तमाकरे । *क्षीण इति ।

वासरस्य तृतीयांशे *नातिसन्ध्यासमीपतः ॥

इति कात्यायनोक्तेः ।

*दर्शश्राद्धं तु यत्प्रोक्तं पार्वणं तत्प्रकीर्तितम् ।

अपराह्णे पितृणां च तत्र दानं प्रशस्यते ॥

इति शातातपोक्तेश्च । *दिनक्षये तत्र सत्त्वं सर्वा-पराह्णव्यापी दर्शो ग्राह्यः । 'यतुभयेद्युरेव निहितः सर्वोऽपराह्णास्थितः' इति दीपिकोक्तेः ।

चन्द्रक्षयकालः प्रशस्तः । क्षयोऽग्रे । *नातीति ।

सायाह्नस्त्रिमुहूर्तः स्याच्छ्राद्धं तत्र न कारयेत् ।

राक्षसी नाम सा प्रोक्ता गर्हिता सर्वकर्मसु ॥

इति निषेधात् । ततश्चैकादशद्वादशमुहूर्तयोरेव पिण्डान्वाहार्यं तीव्र-प्रयत्ने पितृयज्ञं कृत्वा श्राद्धोपक्रमात् । शिथिलप्रकृतेस्तु तत्पूर्वभावि-दशममुहूर्तेऽपि तदुपक्रम इत्याशयेनाह—*दर्शेति । अपराह्णः पञ्चधा-विभक्तादिनचतुर्थो भागः । वस्तुतस्तु पितृयज्ञादित्रयानुष्ठानार्थं दिवसतृतीयभागरूपापराह्णोऽपेक्षितः । तत्रान्त्यमुहूर्त एव नाती-त्यनेन पर्युदस्यते । सायाह्न इति वाक्यं त्वीदृशविषयं हेय-मेव । एवं च दशममुहूर्तादिरपराह्ण इत्यसंगतमिति दिक् । अत्रोक्तदीर्घापराह्णे न षट्पक्षाः त्रिमुहूर्ताधिकक्षयवृद्ध्योरभावेन कृत्स्नकालव्याप्तितदस्पर्शपक्षयोरसंभवात्, किं तु चत्वार एव । तत्रैकस्मिन् दिने कार्त्स्न्येन व्याप्तिर्द्विविधा—तद्दिनपरदिनेऽपराह्ण-स्पर्शेन तदस्पर्शेन च । उभयथापि द्विधा पूर्वेद्युरेव कृत्स्न-व्याप्तेः, परेद्युरेव वा । तत्र या पूर्वेद्युरेव कृत्स्नकर्मकालव्यापिनी उत्तरादिने तदेकदेशमपि न स्पृशति सा पूर्वेवासंदेहात् । या च पूर्वेद्युरेव कृत्स्नकर्मकालव्यापिनी उत्तरादिने तदेकदेशं स्पृशति, सा द्वेधा—परदिने चन्द्रस्य दर्शनात्, तददर्शनाद्वा । तत्राद्यामभिप्रेत्याह—*दिनक्षये इति । अन्त्यायां तु परदिने चन्द्रादर्शनात् प्रतिपद्येव

*यत्तु कार्ष्णाजिनिः—

भूतविद्धाममावास्यां मोहादज्ञानतोऽपि वा ।
श्राद्धकर्मणि ये कुर्युस्तेषामायुः प्रहीयते ॥ इति ।

तदपराह्ण* चतुर्दशीवेधपरमिति श्राद्धहेमाद्रिः । *अपराह्णव्याप्तिपरमिति माधवः । *दिनद्वयेऽपराह्णव्या-

---

यागस्तदाऽन्वाधानानुरोधेन श्राद्धमप्येकदेशव्याप्तिदिन एव कार्यम् । त्रयाणामेककालत्वानियमात् । तथा हि 'पञ्चान्ता उपवस्तव्याः' इत्याद्युपक्रमके "यदहस्त्वेव चन्द्रमा न दृश्यतेताममावास्यां कुर्वीत" "गताध्वा भवति" इति सूत्रद्वयम् ।

संमिश्रा या चतुर्दश्या अमावास्या भवेत् क्वचित् ।
खर्विकां तां विदुः केचिद् गताध्वामिति चापरे ॥

इति गताध्वालक्षणम् । तत्राद्यस्य दर्शाङ्गभूतोपवासपरत्वे तदधिकारिकश्राद्धविषयत्वमपीति गोभिलगृह्यभाष्यकारादयः । या तु उत्तरेद्युरेव कृत्स्नकर्मकालव्यापिनी पूर्वेद्युस्तदस्पर्शिनी सोत्तरैव, उत्तरस्यां कालव्याप्तिलाभात् । पूर्वेद्युरेकदेशस्पर्शस्याप्यभावात्, अह्नि दर्शप्रवेशाभावाच्च । या तु तादृशी पूर्वेद्युरेकदेशस्पर्शिनी तामप्युत्तरां छलतो दर्शयति—*यस्त्विति । *अपराह्ण इति । एतेन पूर्वेद्युरेकदेशस्पर्श उक्तः । एवं च तत्रोत्तरा कार्या उत्तरदिने प्रतिपत्प्रवेशाभावेन यागासंभवात् । अन्वाधानादेरेव तत्रानुष्ठातुमुचितत्वात् ।

वर्द्धमानाममावास्यां लक्षयेदपरेऽहनि ।
यामांस्त्रीनधिकान् वाऽपि पितृयज्ञस्ततो भवेत् ॥

इति परिशिष्टाच्च । *अपराह्णव्याप्ताविति । तन्मते पञ्चधाविभक्तदिनचतुर्थो भागोऽपराह्णः । तद्व्याप्त्या च निर्णयः । तत्र पूर्वेद्युरेव तद्व्याप्तौ सैव ग्राह्या । कर्मकालव्याप्तत्वात् । तस्याश्च निषेद्धुमशक्यत्वात् । अतस्तदभावपरमित्यर्थः । अपराह्णव्याप्ती-

त्यभावेऽशतो व्याप्तौ च तिथिक्षये पूर्वेति हेमाद्रिः।

*यदा चतुर्दशी यामं तुरीयमनुपूरयेत्।
अमावास्या *क्षीयमाणा तदैव श्राद्धमिष्यते॥

इति कात्यायनोक्तेः।

चतुर्दश्याश्चतुर्थं यामं दर्शः पूरयेत्। चतुर्दशी याममात्रं स्यादित्यर्थः। *क्षीयमाणा=परदिनेऽ*पराह्णव्यापिनी नेत्यर्थः। व्यतिरेकमाह—

ति पाठे परेद्युरिति शेषः। तदा पूर्वेद्युर्निन्दाया औचित्यात्। *दिनद्वयेऽपराह्णव्याप्त्यभावे इति। अत्र व्याप्तिपदोपसंदानात् या पूर्वेद्युरेकदेशं स्पृशति सा पूर्वेत्यर्थः। कुत इत्यत आह—*यदेति। चतुर्दशीदिनस्य चतुर्थं याममावास्याऽनुपूरयेत्=तत्र प्रविशेदित्यर्थः। *क्षीयमाणा=यागादिने चन्द्रदर्शनप्रयोजकक्षयवती। अंशतो व्याप्तौ च तिथिक्षये इति। दिनद्वयेऽपि क्षयेण सैकदेशव्याप्तौ च पूर्वेत्यर्थः। चन्द्रदर्शनप्रयोजकक्षयसत्त्वात्। नन्वत्र पूर्वस्यां श्राद्धानुष्ठानेऽन्वाधानमपि तत्रैव कर्तव्यं, तदनुपपन्नम्। पूर्वस्यां चन्द्रदर्शनावश्यम्भावात् तत्सत्त्वे च 'यदहस्त्वेव चन्द्रमा न दृश्यते तामभावास्यां कुर्वीत' इति वचनविरोध इति; सत्यम्। तस्य चन्द्रक्षयपरत्वात्। यदुक्तं 'यदहस्त्वेव दर्शनं नैति चन्द्रमाः' तत् क्षयापेक्षया ज्ञेयं, 'क्षीणे राजनि चेत्यपि' इति वचनात्। या तूत्तरेद्युरेवैकदेशव्यापिनी सोत्तरैव, पूर्वेद्युर्दर्शप्रवेशाभावात्। वैषम्येणैकदेशव्याप्तौ त्वाधिक्यवती ग्राह्या। तत्र पूर्वस्यास्तथात्वे पूर्वैवेत्यत्र वचनं योजयति—*क्षीयमाणेति। *अपराह्णव्यापिनी नेति। आधिक्येनापराह्णव्यापिनी नेत्यर्थः। पूर्वेद्युरेवाधिक्येनापराह्णस्पृगिति यावत्। तदाधिक्यवती पूर्वेत्यर्थः। इतरथोत्तरामवतारयति—

वर्धमानाममावास्यां लक्षयेदपरेऽहनि ।
यामांस्त्रीनधिकान् वाऽपि पितृयज्ञस्ततो भवेत् ॥

ततः श्राद्धं च। *दिनद्वयेऽपराह्णव्याप्त्यादौ *तिथिवृद्धौ च हारीतः—

*त्रिमुहूर्ता च कर्तव्या पूर्वा खर्वा च बह्वृचैः ।
कुहूरध्वर्युभिः कार्या *यथेष्टं सामगायिभिः ॥
*त्रिमुहूर्ताभावे तु *पूर्वा नेत्यर्थः ॥

---

*दिनद्वय इति । दिनद्वये वैषम्येण एकदेशेनापराह्णव्याप्तौ इत्यर्थः । *तिथिवृद्धौ इति । पूर्वेद्युरिति शेषः । इदं च पूर्वेद्युस्तदाधिक्यमुत्तरत्र यागादिनगतचन्द्रादर्शनप्रयोजकं ग्राह्यम् । तदैव वर्द्धमानामावास्यादुत्तरामानुयोगाभावापत्त्या ग्राह्यत्वात् । *त्रिमुहूर्ता चेति । यद्यपि पञ्चधाविभागपक्षेणेदं प्रतीयते, तथाऽपि त्रेधाविभागपक्षेऽपि युक्तम् । या दशमैकादशद्वादशमुहूर्तगा त्रिमुहूर्ता सा त्रेधाविभागपक्षे पूर्वैव । या खर्वा सिनीवाली च, (सिनीवालीलक्षणमुक्तम्) साऽपि पूर्वैव । कुहूः परा । 'बह्वृचैरध्वर्युभिः' इत्याद्युपादानं पूजार्थम् । चन्द्रदर्शने पूर्वा तददर्शने तु परेति यावत् । अत एवाह *यथेष्टमिति । अनेनाभिप्रायान्तरं सूचयति—त्रिमुहूर्ताभावे त्विति । दिनद्वये वैषम्येणैकदेशव्याप्तौ, उत्तरस्या आधिक्ये त्विति यावत् । *पूर्वा नेति । उत्तरेत्यर्थः । यद्युत्तरदिने चन्द्रदर्शनं न भवतीति शेषः । उत्तरदिने चन्द्रदर्शने तु पूर्वैवेत्यर्थः । तिथिवृद्धौ चेति चकारात् साम्यसमुच्चयः । तेन तिथेः साम्येनापि कालैकदेशस्य वैषम्येण व्याप्तौ चन्द्रदर्शनप्रयुक्तोऽधिकाग्रहणस्यापवादो बोध्यः । एतेन या दिनद्वयेऽपि साम्येन एकदेशव्यापिनी, सा—यदि क्षयेण तदा पूर्वा, क्षीयमाणावाक्यात्; यदि वृद्ध्या तदा परा; वर्द्धमाना

वाक्यात् । तत्रापि चन्द्रादर्शनदर्शनप्रयुक्तस्तयोरपवादः प्राग्वत् । यदि साम्येन, तदा यागदिने चन्द्रादर्शने परा; तद्दर्शने पूर्वेति सूचितं भवति । एवं क्रमेणान्वाधानादित्रयस्यैकदिनकर्तव्यता. वतः प्रतिनिर्णयमनुसृत्यायं ग्रन्थो योजितः ।

तन्नियमरहिताश्वाश्वलायनापस्तम्बास्तैः कदाचिद्यागदिनेऽपि पितृयज्ञकरणात् सौत्रस्यामावास्यापदस्य सन्धिमदहोरात्रपरत्वेन तद्भाष्यकारादिभिर्व्याख्यानात्तान् प्रत्ययं ग्रन्थो योज्यते—त्रेधाविभक्तेति । संपूर्णदर्शोऽयमेवेत्यभिप्रायः । तत्रान्वाधानादित्रयं सुलभमित्यग्रे स्पष्टम् । वस्तुतस्तु पञ्चधाभक्तदिनचतुर्थभाग एव तान् प्रत्यपराह्णः श्राद्धकालः प्रशस्त इत्याह—दर्शश्राद्धं त्विति । एवं चामावास्या तत्राप्येवं निर्णया । "कर्मणो यस्य यः कालः" इति वचनात् । एवं च पूर्वेद्युरेवापराह्णव्यापिनी सा पूर्वैव ।

यस्यां सन्ध्यागतः सोमो मृणालमिव दृश्यते ।
अपराह्णे तु या तस्यां पिण्डानां करणं ध्रुवम् ॥

इति हारीतोक्तेश्च । या चोत्तरेद्युरेवापराह्णव्यापिनी सोत्तरैव कर्मकालशास्त्रात् ।

अपराह्णः पितॄणां तु याऽपराह्णानुयायिनी ।
सा ग्राह्या पितृकार्ये तु न पूर्वास्तानुयायिनी ॥

इति हारीताच्च । एतदेव हेमाद्रिसंवादेन द्रढयति—दिनक्षये इति । माधवसंवादेनाप्याह—अपराह्णव्याप्तीति । उत्तरस्या एवेत्यादिः । अपराह्णव्याप्त्यभावे=अपराह्णास्पर्शिन्यामिति यावत् । अत्र साग्न्यनग्निभेदेन व्यवस्था ।

अपराह्णद्वयाव्यापी यदि दर्शस्तिथिक्षये ।
आहिताग्नेः सिनीवाली निरग्न्यादेः कुहूर्मता ॥

इति जाबालिवचनात् ।

सिनीवाली द्विजैः कार्या साग्निकैः पितृकर्मणि ।
स्त्रीभिः शूद्रैः कुहूः कार्या तथा चानग्निकैर्द्विजैः ॥

इति लौगाक्षिवचनाच । सिनीवालीकुह्वोः स्वरूपमेत्र । एतन्मते यः पञ्चधाविभक्तदिनचतुर्थभागरूपापराह्णमाश्रित्यादित आरभ्य सान्तो निर्णयः स एव निरग्निकान स्त्रीशूद्रादींश्च प्रति बोध्यः । तथापि स्वयं साग्निकैरित्युक्तपासदनुसारेणाह क्षयेपूर्वेति । सिनीवालीत्यर्थः । यामं तुरीयमनु इति तुरीयभागोत्तरमित्यर्थः । अपराह्णव्यापिनी=अपराह्णस्पृक् इत्यर्थः । तेन दिनद्वयापराह्णस्पर्शित्वलाभः । अंशतो व्याप्तावित्ति । दिनद्वये साम्येनैकदेशव्याप्तौ प्राप्ततिथेः क्षयसाम्यवृद्धिसम्भवात् क्षये पूर्वा, साम्यवृद्ध्योः परेत्यर्थः । खर्वादिवाक्यात् ।

तिथिक्षये सिनीवाली तिथिवृद्धौ कुहूः स्मृता ।
साम्येऽपि च कुहूर्ज्ञेया वेदवेदाङ्गवेदिभिः ॥

इत्युक्तेश्च । दिनद्वयेऽपराह्णव्याप्त्यभावादावित्ति । दिनद्वये अपराह्णव्याप्तौ उत्तरातिथेः क्षये पूर्वा, वृद्धिसाम्ययोस्तु परा ।

अमावास्या तु या हि स्यादपराह्णद्वयेऽपि सा ।
क्षये पूर्वा परा वृद्धौ साम्येऽपि च परा स्मृता ॥

इति शिवराघवसंवादात् । अत्र च क्षयादिर्न प्राप्ततिथिगतः । तस्याः क्षयेऽपराह्णद्वयव्याप्तेरसम्भवात् । एकदेशपदानुपादाने स्वरसतस्तथा प्रतीतेः । तथा च तिथिवृद्धौ इत्यस्य उत्तरतिथिवृद्धौ साम्ये चेत्यर्थः । एवं च त्रिमुहूर्ता चेति वाक्यमेतदनुसारेण कुशलमतिभिर्योज्यम् । दिनद्वये वैषम्येणैकदेशव्याप्तौ अधिकतव्यापिनी ग्राह्या

अपराह्णद्वयव्यापिन्यमावास्या यदा भवेत् ।
अत्राल्पत्वमहत्त्वाभ्यां निर्णयः पितृकर्मणि ॥

इति वचनात् अधिका ग्राह्येत्यर्थः । स्वरसतः सम्पूर्णापराह्णप्रत्ययेऽपि अल्पत्वायुक्त्या एकदेशलाभः । एतच्च सम्पूर्णोऽपराह्णः श्राद्धकाल इति विवेचनमतेन अपराह्णेऽप्येकादशद्वादशमुहूर्तौ पार्वणे मुख्यः काल इति मयूखमतेन व्याख्यायते—त्रेधाविभक्तेति । अपराह्णभाग एकादशद्वादशमुहूर्तरूपः ।

सायाह्नस्त्रिमुहूर्त्तः स्याच्छ्राद्धं तत्र न कारयेत् ॥

इति सायाह्ननिषेधात् । एतच्च पार्वणे । एकोद्दिष्टे तु कुतपाख्ये अष्टमे आरम्भः, नवमे रौहिणे समाप्तिः ।

कुतपं प्रथमे भागे एकोद्दिष्टमुपक्रमेत् ।
आवर्त्तनसमीपे वा तत्रैव नियतात्मवान् ॥

इति व्यासोक्तेः ।

आरभ्य कुतपे श्राद्धं कुर्यादारौहिणं बुधः ।
विधिज्ञो विधिमास्थाय रौहिणं तु न लङ्घयेत् ॥

इति गौतमोक्तेश्च । यत्तु नारदः—

मध्येऽह्नस्त्रिमुहूर्त्तस्तु यदा चलति भास्करः ।
स कालः कुतपो ज्ञेयः पितॄणां दत्तमक्षयम् ॥

इति नारदेन कुतपो मुहूर्त्तत्रयात्मक उक्तस्तत्र मुहूर्त्तत्रयात्मकमध्याह्नस्यैकोद्दिष्टकालतया विधानेऽष्टमनवममुहूर्त्तयोस्तत्कालतया विनियोगेऽवशिष्टस्य दशमस्य गौणकालताविधानार्थम् ।

ऊर्ध्वं मुहूर्त्तात्कुतपाद्यन्मुहूर्त्तचतुष्टयम् ।
मुहूर्त्तपञ्चकं ह्येतत् स्वधाभवनमिष्यते ॥

इति तु एकोद्दिष्टपार्वणयोः क्रोडीकाराभिप्रायम् । साग्निकैरिति । एतन्मते निरग्निकस्त्रीशूद्रोपलक्षणमेतत् । ग्रन्थकृन्मते तु न तदुपलक्षणं कुतपव्यापिन्या बाध्यत्वात् । पार्वणे एकादशद्वादशमुहूर्त्तयोरेव मुख्यकालत्वं दर्शितम् । तत्र वैषम्येणैकदेशव्याप्त्यधिका ग्राह्या 'अपराह्नद्वयव्यापिनी'इत्युक्तवचनात् । एकदेशसमव्याप्त्युभयापराह्नव्याप्तौ च क्षये पूर्वा वृद्धिसाम्ययोः परा 'अमावास्या तु या हि स्यात्'इति त्रिपुरराघवसंवादात् । क्षयादिश्चाद्ये तत्तिथिगतः, अन्त्ये परतिथिगतः । दिनद्वये कालास्पर्शे तु आहिताग्नेः, सिनीवाली, निरग्न्यादेः कुहूः । 'अपराह्नद्वयव्यापिनी'इति जाबालिवचनात् । "सिनीवाली द्विजैः कार्या"इति लौगाक्षिवचनेन स्त्रीशूद्रनिरग्निकानामपि ग्रहादिति

पिण्डपितृयज्ञस्तु कात्यायनैर्यागदिनात्पूर्वेद्युः कार्यः । 'पूर्वो वाऽङ्गत्वात् पिण्डपितृयज्ञः' इति तत्सूत्रात् । व्याख्यातं चैतत् कर्काचार्यैः-'पूर्व एव दर्शात् पिण्डपितृयज्ञो न पश्चात् । कुतः *अङ्गत्वात् । *तथा च श्रुतिः-'तस्मात् पूर्वेद्युः पितृभ्यः क्रियत उत्तरमहर्देवान्यजन्ते' इति । 'पूर्वेद्युः पितृभ्यो यज्ञं निपृणीय प्रातर्देवेभ्यः प्रतनुते' इति च । तेन तन्मते अङ्गमेवासौ । तदुक्तम्-'अङ्गं वा समभिव्याहारात्' इति । तेन कर्कमते *चतुर्दशीयुक्तदर्शे पिण्डपितृयज्ञ इति । श्रीअनन्तभाष्ये तु *परेद्युरित्युक्तम् । अत्र देशाऽद्याचारो द्रष्टव्यः ।

आपस्तम्बानां तु परदिने मुहूर्तमपि दर्शसत्त्वे तत्रैव पितृयज्ञः । *तदाह आपस्तम्बः 'अमावास्यायां यदहश्चन्द्रमसं न पश्यन्ति तदहः पिण्डपितृयज्ञं कुरुते' इति । अस्य रुद्रदत्तीया व्याख्या 'पिण्डैर्युक्तः पितृयज्ञः=पिण्डपितृयज्ञः । स च कर्मान्तरं न तु दर्शाङ्गम् । यथा वक्ष्यति-'पितृयज्ञः स्वकालविधानादनङ्गं स्यात्' इति । तं च यदहश्चन्द्रमसं न पश्यन्ति पश्चाद्दृश्यां प्रतिपदि वा तदहः कुरुते । यदह-

---

ग्रन्थस्तु योजितः । *अङ्गत्वात् दर्शयागं प्रतीति शेषः । अमायुक्तापराह्णनियमं निराकर्तुमाह *तथा चेति । अमावास्यायामपराह्णे पिण्डपितृयज्ञ इत्यमावास्यापदं च कर्मपरमिति तदभिप्रायः । *चतुर्दशीयुक्तेति । चतुर्दशीयोगेन गताऽध्वा यस्याः सा गताध्वेति व्युत्पत्तेः । अध्वा=स्थानम् । चन्द्रक्षयवदपराह्णः । *परेद्युरिति । अमावास्यायामपराह्ण इत्यमावास्यापदं पर्वसंधिमदहोरात्रपरम् । तस्मात्पूर्वेद्युरित्यादिश्रुतिस्तु काचित्काभिप्रायेति तदाशयः । नन्वेवम् "अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरति" इति श्रुतिविरोध इत्यत्राह-*तदाहेति ।

स्तयोः सन्धिस्तदहरित्यर्थः इति । श्रीरामाण्डारोऽप्याह—'पिण्डपितृयज्ञस्तु पर्वसन्धिमदहोरात्रापराह्ले' इति । अतः पर्वसन्धिदिने पितृयज्ञः । शतपथश्रुतिरपि—"यदैवैष न पुरस्तान्न पश्चाद् ददृशेऽथ पितृभ्यो ददाति" इति । पर्वसन्धिदिने हि पूर्वतः पश्चाद्वा चन्द्रो न दृश्यत एवेत्यर्थः । सत्याषाढोऽपि पितृयज्ञं प्रक्रम्य 'दृश्यमाने तूपांश्व श्वोभूते यजेत' इत्याह । हेमाद्रिस्तु—'अमावास्याशब्दस्तिथिवचन एव । पूर्वोक्तापस्तम्बसूत्रे यदुक्तं 'न पश्यन्ति' इति, तत्र क्षयोऽभिप्रेतः । अतश्चतुर्दश्यां चन्द्रस्य क्षीणत्वात्तद्युक्तदर्शे पितृयज्ञः ।

पितृयज्ञं तु निर्वर्त्य विप्रश्चन्द्रक्षयेऽग्निमान् ।

इति मनूक्तेः । यदुक्तं 'यदहस्त्वेव दर्शनं नैति चन्द्रमाः—' तत्क्षयापेक्षया ज्ञेयम् । 'क्षीणे राजनि चेत्यपि' इति, 'यदुक्तं दृश्यमानेऽपि, तच्चतुर्दश्यपेक्षया' इति च कात्यायनोक्तेः । 'दृश्यमानेऽप्येके' इति गोभिलोक्तेश्च ।

यस्यां सन्ध्यागतः सोमो मृणालमिव दृश्यते ।
अपराह्ले क्षयस्तस्यां पिण्डानां करणं ध्रुवम् ॥

इति हारीतोक्तेश्च । चन्द्रक्षयकालश्चोक्तः कात्यायनेन—

अष्टमेंऽशे चतुर्दश्याः क्षीणो भवति चन्द्रमाः ।
अमावास्याष्टमेंऽशे तु पुनः किल भवेदणुः ॥ इति ।

तेन पूर्वेद्युरेव पितृयज्ञ इत्यभिधानात् । कर्काचार्यैरपि—'अपराह्ले पिण्डपितृयज्ञश्चन्द्रादर्शनेऽमावास्यायाम्' इति कात्यायनसूत्रेऽदर्शनेन क्षय एवोक्तः । 'तस्मिन्क्षीणे ददाति' इति श्रुतेः । अतस्तन्मते चतुर्दशीयुक्तदर्शे पितृयज्ञे सति परदिने यागोऽर्थात्सिद्धः । तदेतत् *सर्वोत्कृष्टमपि हेमाद्रिकर्कादिव्याख्यानमापस्तम्बेतन-

---

*सर्वोत्कृष्टमिति । अमावास्याशब्दस्य तिथिवाचित्वाद्-

भ्युपगमात्कात्यायनीभाष्यनादिविषयम् ।

*आश्वलायनानामपि शेषपर्वणि पिण्डपितृयज्ञः । तथा च सूत्रम्-'अमावास्यायामपराह्णे पिण्डपितृयज्ञः' इति ।

अत्र नारायणवृत्तिः-'अमावास्याशब्दः प्रतिपत्पञ्चदश्योः संधिवचनोऽन्यत्रापराह्णशब्दसमन्वयात्तदत्यहोरात्रे वर्तते । तस्यापराह्णेऽह्नश्चतुर्थे भागे पिण्डपितृयज्ञः कार्यः । औपवसथ्ये यजनीये वाऽहनि । यदा त्वहोरात्रसंधौ तिथिसंधिः स्यात्तदौपवसथ्य एवाहनि क्रियते' इति । अत एव

मुहूर्तमप्यमावास्या प्रतिपद्यपि चेद्भवेत् ।
तदन्तमक्षयं पर्व ज्ञेयं शेषं तु पर्ववत् ॥

इति हेमाद्रौ वचनं पिण्डपितृयज्ञपरमित्युक्तं प्रयोगपारिजाते । अयं च स्मार्ताग्निमता संपूर्णे दर्शे *श्राद्धव्यतिषङ्गेण कार्यः । व्यतिषङ्गो नामोभयोः सहानुष्ठानम् । *एतच्च 'स्थालीपाकेन सह पिण्डार्थमुद्धृत्य' इतिसूत्रे वृत्तिकृतोक्तम् ।

खण्डपर्वणि तु केचिदाहुः । पूर्वेऽह्नि पिण्डपि-

क्षणाविरहाच्च । *आश्वलायनानामिति । शाखायनानां त्वन्वाधानानन्तरं पितृयज्ञः । तथैव तत्सूत्रात् । *श्राद्धव्यतिषङ्गेणेति । पितृयज्ञाधीनं परमापूर्वमेकं, श्राद्धे पिण्डदानाधीनं च तदपरमुभयमपि अग्नौकरणरूपाङ्गाधीनम् । अतः खण्डपर्वणि प्रधानयोर्भिन्नकालत्वात्तादृशमङ्गं भिद्यते, अखण्डपर्वणि तु स्थालीपाकसुक्तशेषाभ्यामेकस्मादेव पिण्डदानात्तादृशपरमापूर्वद्वयं जायते तत्रोभयत्राप्येकमेवाग्नौकरणमङ्गं न तु स्वेच्छया पितृयज्ञश्राद्धयोः पृथगनुष्ठानं कार्यं सूत्रविरोधादित्याह-*एतच्चेति ।

तृयज्ञस्यानिषङ्गेण श्राद्धं कृत्वा परेऽहि केवलः पिण्डपि-
तृयज्ञः कार्यः। वृत्तिकृता तु—

आन्वष्टक्यं च पूर्वेद्युर्मासि मास्यथ पार्वणम्।
काम्यमाभ्युदयेऽष्टम्यामेकोद्दिष्टमथाष्टमम्॥

इत्युदाहृत्य पूर्वेषु चतुर्षु स्थालीपाकानुकृत्याग्नौक-
रणमित्युक्तेर्दर्शश्राद्धे स्थालीपाको निगत इति गम्यते।
स्थालीपाकश्च पितृयज्ञ एवेति पूर्वदिने व्यतिषङ्गः सिद्धः।
प्रयोगपारिजाते तु *वार्षिकश्राद्धादेरपि व्यतिषङ्ग उक्तः,
किमुत दर्शश्राद्धस्य।

न्यायविदस्त्वाहुः—*सूत्रस्य वृत्तेश्च संपूर्णदर्शविषय-
त्वात् खण्डपर्वणि *पूर्वदिने केवलं श्राद्धं परदिने च के-
वलः पितृयज्ञः कार्यः। अत एवोक्तं वृत्तिकृता—*'नात्रा-
पूर्वस्थालीपाकश्चोद्यते, सर्वश्राद्धेषु प्रसङ्गात्' इति। प्रयो-

---

*वार्षिकेति। "यद्यदन्नमुपभुक्तं तत्तत्स्थालीपाकेन सह पिण्डार्थ-
मुद्धृत्य" इति सूत्रे सहोद्धरणं स्थालीपाकोऽङ्गं करणतृतीयाबलात्,
उपपदविभक्तेः कारकविभक्तेर्बलीयस्त्वात्। ततश्च स्थालीपाकः
पिण्डार्थः, वार्षिके च पार्वणविकृतित्वात्तत्प्राप्तिरित्यभिप्रायः।
*सूत्रस्येत्यादि। "सह शाखया प्रस्तरं प्रहरति" इतिवत्सहार्थे तृती-
या। सा चोद्धरणे एव कर्मत्वेनान्नसाहित्यबोधिका, अतो न पिण्डा-
र्थत्वसम्भवः। पिण्डदाने चोपभुक्तजातीयस्यैवान्नस्य करणत्वाच्च
चरुश्रपणापेक्षेति भावः। *पूर्वदिने इति। कालभेदेन तन्त्र-
न्यायाप्रवृत्तेः। *नात्रेति। सिद्धस्थालीपाकानुवाद इति न
"उपपदविभक्तेः" इति न्यायप्रसङ्गः, नापि खण्डपर्वणि पूर्वेद्युः
स्थालीपाकप्राप्तिः। न च—

पिण्डयज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं बुधः।

इति वचनात्तत्प्राप्तिरिति वाच्यम्। तस्य एकदिनविषयत्वाका-

गपारिजाताद्धिरण्येनाग्निमेव। पूर्वदिने च श्राद्धेऽग्नौ- करणमेव, न पाणिहोमः ।

> चतुर्ष्वाद्येषु साग्नीनां वह्नौ होमो विधीयते ।
> पित्र्यब्राह्मणहस्ते स्यादुत्तरेषु चतुर्ष्वपि ॥

इति परिशिष्टे नियमात् । न च लौकिकाग्नौ पक्वस्य कथं गृह्याग्नौ होमः । 'नान्याग्नौ पक्वमन्याग्नौ जुहुयात्' इति निषेधात् । मैवम् । आवसथ्यं गृह्यत्वेन स्मार्ताग्नौ *पचनाग्नौ वा कर्तव्यत्वात् । तस्मात् पूर्वेद्युः केवलं श्राद्धं, न कर्षूनिषङ्गः । *इदमेव च युक्तम् । आहिताग्निनाग्निकपाभिधायकत्वेनोपपत्तेरनाहिताग्नेरभिधानीयापूर्वविधायकत्वे मानाभावात् । *अनाहिताग्ना=आर्धिकस्थालीपाकविषया । अत्र विस्तरः । *पचनाग्नावित्ति । लौकिकाग्नौ श्राद्धानुष्ठाने च पाणिहोम एव । आवसथ्याग्न्यभिमानां तु अन्वष्टक्येऽपि न कर्षूनिषङ्गः तत्सूत्रानुक्तेः । तैत्तिरीयाणां पृथक्श्राद्धेऽपि न पाणिहोम इति स्मर्तव्यम् । आह्निकपत्रे । *इदमेव चेति । तथा च सूत्रम्:—यत्र स्थालीपाको विहितः तत्र तेन भुक्तशेषेण च पिण्डनिपरणम् । यत्र स्थालीपाकविधिर्नास्ति तत्र केवलेन भुक्तशेषेणैव पिण्डनिपरणम् । आचार्येणाष्टौ श्राद्धान्युक्तानि- "आन्वष्टक्यं च पूर्वेद्युः" इत्यादि । तत्र पूर्वेषु चतुर्षु स्थालीपाकादन्नमुद्धृत्याग्नौकरणम्, अग्निसमीपे भुक्तशेषेण स्थालीपाकेन च पिण्डनिपरणं पिण्डपितृयज्ञकल्पस्य तेषु विद्यमानत्वात् । उत्तरेषु चतुर्षु भोजनार्थादन्नमुद्धृत्य घृताक्तं कृत्वा पाणिहोमः, ब्राह्मणसमीपे भुक्तशेषमात्रेण पिण्डनिपरणं तेषु स्थालीपाकविध्यभावात्, पिण्डपितृयज्ञकल्पप्राप्त्यभावाच्चेति । स्थालीपाकेनेति करणतृतीयावादिनामुत्तरेषु चतुर्ष्वपि स्थालीपाकप्राप्त्यापत्तेः । किं च सर्वश्राद्धेषु अग्निप्रणयनादिपितृयज्ञेतिकर्तव्यता न प्राप्नोति । "आन्वष्टक्यं च पूर्वेद्युः" इत्याद्युक्त्वा आचार्येण—

तु सर्वाधानिनाऽर्धाधानिना* वा संपूर्णे खण्डे वा दर्शे *श्रौताग्नौ पृथगेव पितृयज्ञः कार्यो न तु दर्शश्राद्धव्यतिषङ्गेणेति विस्तरभीतेर्विरमामः । संपूर्णे दर्शे च विशेषमाह लौगाक्षिः—

पक्षान्तं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः ।
पिण्डयज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं बुधः ॥ इति ।

पक्षान्तं कर्म=अन्वाधानम् । अन्वाहार्यकं=दर्शश्राद्धम् । अयमेव साग्नेर्जीवत्पितृकस्य पिण्डपितृयज्ञकालो ज्ञेयः । तस्यापि कात्यायनेन "होमान्तमनारम्भो वा" इत्याम्नानात् । पिण्डपितृयज्ञाकरणे *प्रायश्चित्तमाह पराशरमाधवीये कात्यायनः—

पितृयज्ञात्यये चैव वैश्वदेवात्ययेऽपि च ।
भोजने पतितान्नस्य चरुर्वैश्वानरो भवेत् ॥

इत्यलम् ।

चतुर्ष्वाद्येषु साग्नीनां वह्नौ होमो विधीयते ।

इति पितृयज्ञातिदेशप्रसज्यमानाग्नेः श्राद्धान्तरे परिसंख्यानात् ।

पित्र्यब्राह्मणहस्ते स्यादुत्तरेषु चतुर्ष्वपि ।

इति त्वनुवादकं विधाने वाक्यभेदादित्यन्यत्र विस्तरः । दर्शश्राद्धे तु पाणिहोमः । *अर्धाधानिना वेति । अत्र मथुरः "पर्व=अमावास्या तत्र भवं पार्वणम् । तद् आहिताग्निः पिण्डपितृयज्ञं कृत्वा करोति । अनाहिताग्निस्तु तद् इतरेण व्यतिषजन्"इति परिशिष्टम् । तत्राहिताग्निः=सर्वाधानी, अनाहिताग्निस्तु अर्धाधानी, केवलस्मार्त्ताग्निमांश्च । अर्धाधानेऽपि व्यतिषङ्गानुरोधादिति । ग्रन्थकारस्तु *श्रौताग्नौ दक्षिणाग्नौ । निर्भरान्तरप्रसक्तोऽनुपदमग्रे साग्निकादीन् दर्शयिष्यति । तदनुसारेणानुष्ठाने संप्रदायविरोधः । *प्रायश्चित्तमिति । अथ वा श्रौतग्रन्थोक्तं प्रायश्चित्तान्तरं सप्तहोतृहोमो बोध्यः । साग्निकान् प्रत्यमावास्या निर्णीता । अन्वाधाना-

प्रकृतमनुसरामः । *निराग्निकादिभिस्त्वमावास्याऽपराह्णव्याप्त्यलाभे कुतुपकालव्यापिनी ग्राह्या ।

भूतविद्धाऽप्यमावास्या प्रतिपन्मिश्रिताऽपि वा ।
पित्र्ये कर्मणि विद्वद्भिर्ग्राह्या कुतुपकालिकी ॥

इति हारीतोक्तेः । इदं च निराग्निकादिविषयम् ।

सिनीवाली द्विजैः कार्या साग्निकैः पितृकर्मणि ।
स्त्रीभिः शूद्रैः कुहूः कार्या तथा चानग्निकैर्द्विजैः ॥

इति लौगाक्षिवचनात् । अत्र *साग्निरौपासनाग्निरपीति मदनपारिजाते उक्तम् । *कुतुपश्चा*पराह्णव्याप्त्यलाभेऽनुकल्पः ।

अपराह्णद्वयव्यापी यदि दर्शस्तिथिक्षये ।
आहिताग्नेः सिनीवाली निरग्न्यादेः कुहूर्मता ॥

इति जाबालिना विधानात् । तेन साग्नीनां निरग्नीनां चापराह्णव्यापिन्येव मुख्या* । *तिथिसाम्यवृद्धिक्षयैः *समव्याप्तौ स्वर्वादिना निर्णयः । वैषम्ये-

---

दिनद्वयस्यैककालव्यनियमनद्वाहितान्मति यथामतं ग्रन्थोऽपि योजितः । तत्प्रकरणे च निरग्निकादीन प्रति प्रागुक्तवचनं दर्शितम् । इदानीं हेमाद्रिमतमनुरुध्याह *निरग्निकादिभिरिति । आदिना स्त्रीशूद्रग्रहः । *साग्निरिति ।

य आहिताग्निधर्मः स्यात्स औपासनिकस्य तु ।

इति वचनात् । हेमाद्रिमाधवयोर्विशेषं सूचयितुं माधवमतं स्मारयति *कुतुपश्चेति । *अपराह्णेति । दिनद्वये अपराह्णस्पर्शाभावे इति यावत् । *मुख्येति । पूर्वेद्युरेवापराह्णव्याप्तौ पूर्वा । उत्तरेद्युरेव तद्व्याप्तावुत्तरा, कर्मकालव्याप्तेः । "यस्यां संस्थागतः" इत्यादिविशिष्यापि वाक्यद्वयं पूर्वमुक्तम् । *तिथीति । प्रकृततिथीत्यर्थः । *समव्याप्ताविति । एतेन "तिथिक्षये सिनीवाली" इत्यग्रिमम्,

ऽधिका * । दिनद्वयेऽपराह्णस्पर्शे कुतुपव्यापिनीति माधवः । *इदमेव च युक्तम् । *हेमाद्रिमते कुतुपव्यापिन्येव निरग्न्यादेर्मुख्या । सिनीवाली=दृष्टचन्द्रा । तथा च व्यासः-

दृष्टचन्द्रा सिनीवाली, नष्टचन्द्रा कुहूः स्मृता । इति । पूर्वदिने परदिन एव वा तद्व्यापित्वे सैव ग्राह्या । अंशव्यापित्वे वैषम्येऽधिककालव्यापिनी ग्राह्या । दिनद्वयेऽप्यतः समव्याप्तौ तिथिक्षये पूर्वा, वृद्धौ साम्ये च परा ।

तिथिक्षये सिनीवाली तिथिवृद्धौ कुहूः स्मृता ।
साम्येऽपि च कुहूर्ज्ञेया वेदवेदाङ्गवादिभिः ॥

इति प्रचेतोवचनात् । दिनद्वये संपूर्णकुतुपव्याप्तिस्तु तिथिवृद्धावेव भवतीत्यनन्तरवचनात् परैवेति ।

कुतुपस्तु-

अमावास्या तु या हि स्यादपराह्णद्वये समा ।
क्षये पूर्वा परा वृद्धौ साम्येऽपि च परा स्मृता ॥

इत्युक्तं च स्मर्तव्यम् । *आधिकेति । "अपराह्णद्वयव्यापि" इति शिवराघवसंवादात् । ननु कुतपस्य मुख्यकालत्वं युक्तम् । अन्यथा-

सिनीवाली कुहूश्चैव श्रुत्युक्ते श्राद्धकर्मणि ।
स्यातां ते यदि मध्याह्ने श्राद्धादि स्यात्कथं तदा ॥

इत्युपक्रम्य "तिथिक्षये सिनीवाली"इति प्रचेतोवाक्यस्य निर्विषयत्वं स्यात्; इत्यत्राह-*इदमेव चेति । "स्यातां ते यदि मध्याह्नात्"इति प्रामाणिकपाठात्र कुतपो मुख्य इति भावः । प्रकृतं हेमाद्रिमतमनुसृत्याह-*हेमाद्रिमते इति । तद्व्यापिनी=कुतपव्यापिनी । तिथिवृद्धीति । तदविनाभावादित्यर्थः । अत्र

अह्नो मुहूर्ता विख्याता *दश पञ्च च सर्वदा ।
तत्राष्टमो मुहूर्तो यः स कालः कुतपः स्मृतः ॥

इति मात्स्योक्तः । तुल्यादानपितृदेवप्रीत्यर्थोपवासादौ तु *परा ग्राह्येत्यन्यत्र विस्तरः ॥

दर्शे च मासिकवार्षिकादिश्राद्धप्राप्तौ कालादर्शे विशेष उक्तः—

दर्शस्य चोदकुम्भस्य दर्शमासिकयोरपि ।
नित्यस्य चाब्दिकस्यापि दार्शिकाब्दिकयोरपि ॥

नवीनाः--यत्तु माधवेन हेमाद्रिणा च दिनद्वये संपूर्णापराह्णव्याप्तौ संपूर्णकुतपव्याप्तौ वा परेत्युक्तं, तदयुक्तम्; खर्वादिवाक्ये "तिथिक्षये सिनीवाली" इति वाक्ये च क्षयादीनां प्राप्ततिथिगतत्वात् दिनद्वयगतसर्वैकदेशव्याप्तिविषयकत्वेनेहाप्रवृत्तेः । किं तूत्तरतिथेः क्षये पूर्वा, वृद्धिसाम्ययोस्तूत्तरा ।

अमावास्या तु या हि स्यादपराह्णद्वयेऽपि सा ।
क्षये पूर्वा परा वृद्धौ साम्येऽपि च परा स्मृता ॥

इत्युक्तेः । न चेदं दिनद्वयगतसर्वैकदेशव्याप्तिपरं, स्वरसतोऽपराह्णव्याप्तेरेव प्रतीतेः । एवं कुतपव्याप्त्यादिनापीति वदन्ति ।

*दशेति ।

रौद्रः श्वेतस्तथा मैत्रस्तथा सारभटः स्मृतः ।
सावित्रो वैश्वदेवश्च गान्धर्वः कुतपस्तथा ॥
रौहिणस्तिलकश्चैव विभवो निर्ऋतिर्भयः ।
शम्बरो विजयश्चैव भेदाः पञ्चदश स्मृताः ॥

तत्रासंभवे तु—

कुतपाद्यान् मुहूर्तांस्त्रीन् यदाचरति भास्करः ।
स कालः कुतपस्तत्र पितॄणां दत्तमक्षयम् ॥

इत्युक्तो गौणः कुतपो ग्राह्यः । *परेति । दानादिकर्मकालपर्याप्ता,

इत्युक्त्वा

संपाते देवताभेदाच्छ्राद्धयुग्मं समाचरेत् ।
निमित्ता नियतिश्चात्र पूर्वानुष्ठानकारणम् ॥ इति ।

निर्णयदीपेऽपि—

नष्टचन्द्रे यदा काले क्षयाहादिवसो भवेत् ।
वैश्वदेवं क्षयश्राद्धं कुर्यात्प्राग्दर्शकर्मणः ॥

अमाश्राद्धं चानुपनीतोऽपि कुर्यात् । श्राद्धशूलपाणौ—

अमावास्याष्टकाकृष्णपक्षपञ्चदशीषु च ।

इत्युपक्रम्य

एतच्चानुपनीतोऽपि कुर्यात्सर्वेषु पर्वसु ।
श्राद्धं साधारणं नाम सर्वकर्मफलप्रदम् ॥
भार्याविरहितोऽप्येतत्प्रवासस्थोऽपि नित्यशः ।
शूद्रोऽप्यमन्त्रवत्कुर्यादनेन विधिना बुधः ॥

इति मात्स्योक्तेः । अमाश्राद्धातिक्रमे प्रायश्चित्तमुक्तमृग्विधाने—

न्यूषुवाचं जपन्मन्त्रं शतवारं दिने दिने ।
अमाश्राद्धं यदा नास्ति तदा संपूर्णमेति तत् ॥

अत्र पूर्वोक्तसाग्निपदेनाऽऽहिताग्निः स्मार्ताग्निमांश्च गृह्यते । विच्छिन्नाग्निकादिश्च निरग्निकः । तथा च हेमाद्रिरग्नौकरणप्रकरणे—

साग्निरग्नावनग्निस्तु द्विजपाणावथाप्सु वा ।
कुर्यादग्नौ क्रियां नित्यं लौकिकेनेति निश्चितम् ॥

इति स्मृतिवाक्यमुदाहृत्य 'यस्त्वस्वीकृतौपासनतया समुच्छिन्नाग्नितया भार्याविधुरतया वाऽग्निरहितस्तस्य द्विजपाणौ जलादौ वा होमः' इति व्याचचक्षे । मदन-

पारिजातेऽप्येवम् । इदमेव साग्निकानग्निकस्वरूपं *सर्वत्र ज्ञेयम् ॥

अथ ग्रहणं निर्णीयते । तत्र चन्द्रग्रहणे यस्मिन्यामे ग्रहणं तस्मात्पूर्वं प्रहरत्रयं न भुञ्जीत । सूर्यग्रहे तु प्रहरचतुष्टयं न भुञ्जीत ।

सूर्यग्रहे तु नाश्नीयात्पूर्वं यामचतुष्टयम् ।
चन्द्रग्रहे तु यामांस्त्रीन्बालवृद्धातुरैर्विना ॥

इति माधवीये वृद्धगौतमोक्तेः ।

*ग्रहणं तु भवेदिन्दोः प्रथमादधि यामतः ।
भुञ्जीतावर्तनात्पूर्वं प्रथमे प्रथमादधः ॥

इति मार्कण्डेयोक्तेश्च । अधि=ऊर्ध्वम् । ननु चन्द्रग्रहे यामचतुष्टयनिषेध उचितो ननु सूर्यग्रहे, सूर्योदयात्प्राग्भोजनाप्राप्तेः । नैवम् । वचनस्य प्रथमयामे सूर्यग्रहे सति पूर्वेद्युः पूर्वरात्रे भोजननिषेधपरत्वात् । चन्द्रग्रहे विशेषमाह माधवीये वृद्धवसिष्ठः—

ग्रस्तोदये विधोः पूर्वं नाहर्भोजनमाचरेत् । इति ।

ग्रस्तास्ते तु माधवीये व्यासः-

अभुक्त्वोरस्तयोरद्यादृष्ट्वा परेऽहनि । इति ।

विष्णुधर्मेऽपि-

मुहूर्तमात्राऽपीति भावः । *सर्वत्रेति । साग्निकानग्निकभेदेन व्यवस्थापेक्षायां मतान्तरं तु प्रागुक्तं स्मर्तव्यम् ॥ यामत्रयादौ ग्रहणयामोऽवधिर्न ग्रहणमित्याह-*ग्रहणं त्विति । प्रथमाद्यामतोऽधि=रात्रिद्वितीयप्रहरे ग्रहणं चेन्मध्याह्नात् पूर्वं भुञ्जीत, रात्रिप्रथमयामे चेत्तदा प्रथमादधः=प्रथमयाममध्ये ।

रवेस्त्वावर्तनादूर्ध्वमर्वागेव निशीथतः ।
चतुर्थप्रहरे चेत्स्याच्चतुर्थप्रहरादधः ॥

*अहोरात्रं न भोक्तव्यं चन्द्रसूर्यग्रहो यदा ।
मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परम् ॥
*अहोरात्रनिषेधः सूर्यग्रस्तास्ते । मदनरत्ने*गार्ग्यः—
संध्याकाले यदा राहुर्ग्रसते शशिभास्करौ ।

इति च द्रष्टव्यम् । *अहोरात्रमिति । इदमर्थाद् ग्रस्तास्तपरं, मुक्तिस्नानं च तत्र परेद्युरित्यर्थः । ब्रह्माण्डेऽपि—

नाश्नीयादथ तत्काले ग्रस्तयोश्चन्द्रसूर्ययोः ।
मुक्तयोश्च कृतस्नानः पश्चात् भुञ्ज्यात्स्ववेश्मनि ॥

इति परान्ननिषेधः । मुक्तावपि भोजनं महानिशातः प्रागेव ।

मुक्ते शशिनि भुञ्जीत यदि न स्यान्महानिशा ॥

इति शातातपोक्तेः । महानिशा च घटीद्वयम् ।

महानिशा द्वे घटिके रात्रिमध्यमयामयोः ।

इति मार्कण्डेयोक्तेः । घटिकाचतुष्टयं तु युक्तं, तथा कल्पतरूक्तेः । चन्द्रग्रस्तास्ते यावत्तदुदयभोजनेन स्थातुमशक्तानां शास्त्रावगतमुक्तिकालभुताहर्भागानन्तरं भागद्वयमेकभागं वा हित्वा भोजनं भवतीत्युक्तं विवेचने । ग्रहणकाले च स्वापादि निषिद्धम् ।

सूर्येन्दुग्रहणं यावत्तावत्कुर्याज्जपादिकम् ।
न स्वपेन्न च भुञ्जीत स्नात्वा भुञ्जीत मुक्तयोः ॥

इत्युक्तेः ।

निद्रायां जायते रोगो मूत्रे दारिद्र्यमाप्नुयात् ।
पुरीषे कृमियोनिः स्यान्मैथुने ग्रामसूकरः ॥
अभ्यङ्गे च भवेत्कुष्ठी भोजने स्यादधोगतिः ।
वचने च भवेत् सर्पो वधे च नरकं व्रजेत् ॥

इति निन्दोक्तेश्च । अहोरात्रम्=अहः पूर्वा रात्रिरित्याशयेनाह—अहोरात्रमिति । वस्तुतोऽहश्च रात्रिश्चेत्यर्थः, तेन चन्द्रग्रस्तास्तस्यापि लाभः, तदाह—*गार्ग्य इति । *स्नानेति । स्नानं च नित्यं मोक्ष-

तदहन्येव भोक्तव्यं रात्रावपि कदाचन ॥

सायंसंध्यायां सूर्यग्रस्तास्ते पूर्वेऽह्नि रात्रौ च न भोक्तव्यम् । प्रातःसंध्यायां चन्द्रस्य ग्रस्तास्ते पूर्वरात्रावुत्तरेऽह्नि च न भोक्तव्यमित्यर्थः । चन्द्रग्रस्तास्ते उत्तरदिने संध्याहोमादौ न दोषः । तदाहोशनाः

ग्रस्ते चास्तंगते त्विन्दौ ज्ञात्वा मुक्त्यवधारणम् ।
*स्नानहोमादिकं कार्यं भुञ्जीतेन्दूदये पुनः ॥

एतदनाहिताग्निविषयम् । 'अपराह्णे व्रतोपायनीयमश्नीत' इति कात्यायनोक्तकर्मणस्य श्रौतत्वेन विहितत्वेन च प्रबलत्वात् । अग्निर्व्रतं कुर्यादिति निर्णयदीपः । रागप्राप्तभोजने कालनियमोऽयम् । तेन ज्वरादाविव न भोजनमिति कर्कानुसारिणः । बालवृद्धातुराणां तु ग्रहणयामात्पूर्वमत्ययामो निषिद्धः ।

*सायाह्ने ग्रहणं चेत्स्यादपराह्णे न भोजनम् ।
अपराह्णे न मध्याह्ने, मध्याह्ने न तु सङ्गवे ॥
भुञ्जीत सङ्गवे चेत्स्यान्न पूर्वं भोजनक्रिया ॥

इति मार्कण्डेयोक्तेः । इदं च *बालादिविषयम् । 'बा-

स्नानस्यौदयिकत्वात् । मोक्षस्नानानन्तरं च भोजनम्, उक्तब्रह्माण्डात् । संवत्सरदीपे तु स्नानपाकादिकमिति पाठः । तत्र "शास्त्रावगतमुक्त्युत्तरमुदयात्पूर्वमपि पाकादि कार्यं, भोजनं तूदयोत्तरमित्यर्थं"इत्युक्तम् । शिष्टास्तूदयोत्तरमेव सर्वं कुर्वन्तीति विवेचने । *सायाह्ने इति स्पष्टं भागपञ्चकं, तच्च रात्रावपि उपलक्षणम् । तेन चन्द्रसूर्यग्रहलाभः । एवं चावतारिकायां यामपदद्वयं भागार्थकम् । यद्वाऽवतारिकारूपधार्मिकव्याख्यादर्शनात्सायाह्नादिपदमेव यामार्थकं चतुर्थयामे ग्रहणं चेत् तृतीययामे न भोजनमित्यादिरर्थः । तत्र सङ्गवे चेदिति दृष्टान्तः । *बालादीति । असमर्थेत्यर्थः ।

त्वृद्धातुरैर्विना' इति पूर्वोक्तेः । वेधकाले ग्रहणे वा पक्वमन्नं त्याज्यम् ।

सर्वेषामेव वर्णानां *सूतकं राहुदर्शने ।
स्नात्वा कर्माणि कुर्वीत शृतमन्नं विवर्जयेत् ॥

इति हेमाद्रौ षट्त्रिंशन्मतात् । शृतमिति तदन्तरितस्योपलक्षणम् ।

नवश्राद्धेषु यच्छिष्टं ग्रहपर्युषितं च यत् ।

इति मिताक्षरायां वचनात् । भार्गवार्चनदीपिकायां ज्योतिर्निबन्धे मेधातिथिः—

*आरनालं पयस्तक्रं दधि स्नेहाज्यपाचितम् ।
मणिकस्थोदकं चैव न दुष्येद्राहुसूतके ॥

मन्वर्थमुक्तावल्याम्—

अन्नं पक्वमिह त्याज्यं स्नानं सवसनं ग्रहे ।
वारि तक्रारनालादि तिलदर्भैर्न दुष्यति ॥

जले त्वदोषो गाङ्गविषयः

ग्रहोषितं जलं पीत्वा पादकृच्छ्रं समाचरेत् ।

इति तत्रैव चतुर्विंशतिमतेऽन्यजलस्य दोषोक्तेः ।

---

*सूतकमिति । तद्विहितेतरकर्मानाधिकारार्थम् । *आरनालमिति प्रतिप्रसवः । अन्यश्च स स्मृत्यन्तरे—

आरनालं तथा क्षीरं किलाटं दधिसक्तवः ।
स्नेहपक्वं च तैलं च न कदाचित्प्रदुष्यति ॥

अत्र विशेषः ।

आरनालं च तक्रं च खाद्यं घृतपाचितम् ।
उदकं च कुशच्छन्नं न दुष्येद्राहुसूतके ॥

स्मृत्यन्तरे—

जले घृते तथा तैले सन्धाने गोरसेषु च ।

वेधकाले ग्रहणे भोजने प्रायश्चित्तमुक्तं माधवीये कात्यायनेन—

चन्द्रसूर्यग्रहे भुक्त्वा प्राजापत्येन शुध्यति ।
तस्मिन्नेव दिने भुक्त्वा त्रिरात्रेणैव शुध्यति ॥ इति ।

ग्रहणे च *त्रिरात्रमेकरात्रं वोपवासः श्रेयोऽर्थिना कार्यः ।

एकरात्रमुपोष्यैव स्नात्वा दत्त्वा च शक्तितः ।
कञ्चुकादिव सर्पस्य निर्मुक्तिः पापकोशतः ॥
त्रिरात्रं समुपोष्यैवं ग्रहणे चन्द्रसूर्ययोः ।
स्नात्वा दत्त्वा च विधिवन्मोदते ब्रह्मणा सह ॥

इति हेमाद्रौ लैङ्गोक्तेः । इदं च पुत्र्यतिरिक्तविषयम् ।

आदित्येऽहनि संक्रान्तौ ग्रहणे चन्द्रसूर्ययोः ।
पारणं *चोपवासं च न कुर्यात्पुत्रवान् गृही ॥

इति जैमिनिवचनात् । *यदा स्वग्रस्तास्तस्तदा पु-

कुशान्तरायं कुर्वीत ग्रहणे चन्द्रसूर्ययोः ॥

आरनालं=काञ्जिकं, घृतपाचितं=द्रोणादकादिमितं कठिनतरं वा बद्धपाकमपिति वाक्यात् । प्राजापत्यं=षडुपवासतुल्यं, तदर्द्धः त्रिरात्रोपवासः । ग्रस्तास्तोत्तरनिषिद्धकालभोजनेऽपि स एव कार्यः । "तस्मिन्नेव दिने"इत्यविशेषोक्तेः । "स्त्रीबालवृद्धानां तत्तदर्धम्"इति विवेचने । *त्रिरात्रमित्यादि । एकरात्रोपवासो ग्रहणवत्यहोरात्र एव । तथैव प्रतीतेः शिष्टाचाराच्च । क्त्वाप्रत्ययः समानकर्तृकत्वे 'मुखं व्यादाय स्वपिति'इतिवत् । त्रिरात्रोपवासेऽपि तृतीयमहोरात्रं ग्रहणवदेव । यद्वोपवासद्वयमपि क्त्वाप्रत्ययवशात्पूर्वदिने एव, ग्रहणे पारणानिषेधात् । *पारणं चेति । पुत्रिणः ग्रहणे पारणोपवासयोर्निषेधात् तदन्यस्य ग्रहणदिने तत्पूर्वदिने चोपवास इति गम्यते । *यदा त्वित्यादि । मार्कण्डेये एकप्रहरवर्जनं 'सायान्हे

त्रिणः *प्रहरद्वयं हित्वा बालादिवद्भोजनं, न तूपवासः । 'सायाह्ने ग्रहणं चेत्स्यात्' इति पूर्वोक्तमार्कण्डेयवचनात् ।

सायाह्ने सङ्गवेऽश्नीयाच्छारदे सङ्गवादधः ।
मध्याह्ने परतोऽश्नीयान्नोपवासो रविग्रहे ॥

इति स्मृतेश्चेति हेमाद्रिः । शारदोऽपराह्णः । माधवमते तु पुत्रिणोऽपि तत्रोपवास एव । 'अहोरात्रं न भोक्तव्यम्' इति पूर्वोक्तनिषेधस्य तेनापि पालनीयत्वात् । उपवासनिषेधस्तु व्रतरूपोपवासपरः कृष्णैकादशीनिषेधवदिति । मदनरत्नेऽप्येवम् । *इदमेव च युक्तम् । वर्धमानस्तु 'अहोरात्रं न भोक्तव्यम्' इति शातातपीयाद्ये ।

सूर्याचन्द्रमसोर्लोकानक्षयान्याति मानवः ।

इति फलश्रुतेर्मुख्यदर्शने उपवासः काम्यः *न त्वयं निषेध इत्याह । तन्न । अत्र व्रतत्वेपि*प्रागुक्तविष्णुधर्मे निषेधावश्यंभावात् । तथा च व्यासः—

रविग्रहः सूर्यवारे सोमे सोमग्रहस्तथा ।
चूडामणिरिति ख्यातस्तत्र दत्तमनन्तकम् ॥
वारेष्वन्येषु यत्पुण्यं ग्रहणे चन्द्रसूर्ययोः ।

सङ्गवे' इत्यत्र प्रहरद्वयवर्जनं, तत्र बालादीनां प्रहरद्वयवर्जनं मुख्यम्, एकप्रहरवर्जनं त्वनुकल्पः । *पुत्रिण इति । पुत्री बालादिवत् "नोपवासो रविग्रहे" "न कुर्यात्पुत्रवान् गृही" इत्यनयोरेकविषयत्वलाभात् । समर्थ च पुत्रिणि नैकप्रहरवर्जनं, किं त्वसमर्थे तत्रेत्यर्थः । *इदमेव चेति । बालादिभिस्तु सर्वं दिनं नक्तं वा भोजनं विना स्थातुमशक्यत्वान्निषेधो न पालनीयः, किं तूक्तकल्पानुकल्पौ कार्याविति भावः । *न त्वयमिति । न हि निन्दान्यायादिति भावः । *प्रागुक्तेति । तथा च काम्य इव नित्योऽप्युप-

तत्पुण्यं कोटिगुणितं योगे चूडामणौ स्मृतम् ॥

अत्र चाद्यन्तयोः स्नानं कुर्यात् ।

*ग्रस्यमाने भवेत्स्नानं ग्रस्ते होमो विधीयते ।

मुच्यमाने भवेद्दानं मुक्ते स्नानं विधीयते ॥

इति हेमाद्रौ वचनात्,

स्नानं स्यादुपरागादौ मध्ये होमः सुरार्चनम् ।

इति ब्रह्मवैवर्ताच्च ।

सर्वेषामेव वर्णानां सूतकं राहुदर्शने ।

सचैलं तु भवेत्स्नानं सूतकान्नं च वर्जयेत् ॥

वासो भवत्यंवेति भावः । *ग्रस्यमाने इति । एतच्च स्नानादि रात्रावपि ।

तथोपरागपातादौ स्नानं दानं निशा शुभा ।

इत्युक्तेः,

स्नानं दानं तपः श्राद्धमनन्तं राहुदर्शने ।

आसुरी रात्रिरन्यत्र तस्मात्तां परिवर्जयेत् ॥

इत्युक्तेश्च । दानं चात्यावश्यकम् ।

अयनादौ सदा देयं द्रव्यमिष्टं गृहेषु यत् ।

षडशीतिमुखे चैव विमोक्षे चन्द्रसूर्ययोः ॥

इति शातातपोक्तसदाशब्दात् । अत एव मलमासेऽपि कार्यमित्युक्तम् । दानं चापात्रायापि ।

अश्रोत्रियः श्रोत्रियो वा पात्रं वाऽपात्रमेव वा ।

विप्रब्रुवो वाऽपि विप्रो ग्रहणे दानमर्हति ॥

इति बौधायनोक्तेः । श्रोत्रियः=संस्कारवेदाध्ययनोभययुक्तः । अश्रोत्रियः=तदन्यतरहीनः । पात्रं—

न विद्यया केवलया तपसा वाऽपि पात्रता ।

यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्तितम् ॥

इति याज्ञवल्क्योक्तं विद्यातपोयुक्तम् । विप्रब्रुवः=सुसंस्कृतोऽध्य-

इति वृद्धवसिष्ठोक्तेश्च । *सचैलत्वं मुक्तिस्नानपरमिति मदनरत्ने उक्तम् । भार्गवार्चनदीपिकायां चतुर्विंशतिमते

*मुक्तौ यस्तु न कुर्वीत स्नानं ग्रहणसूतके ।
स सूतकी भवेत्तावद्यावत्स्यादपरो ग्रहः ॥

इदं च स्नान*ममन्त्रकं कार्यमिति स्मृतिरत्नावल्याम् । तत्र तीर्थविशेषा भारते—

गङ्गास्नानं प्रकुर्वीत ग्रहणे चन्द्रसूर्ययोः ।
महानदीषु वाऽन्यासु स्नानं कुर्याद्यथाविधि ॥

महानदीष्वपि मासविशेषे काश्चिच्छ्रेष्ठाः ।

प्रयागं देविका रेवा सोमहत्या च वारणम् ।
सरस्वती चन्द्रभागा कौशिकी तापिका तथा ॥
सिन्धुर्गण्डकिका चैव शरयूः कार्तिकादितः ॥

*मूलं हेमाद्रौ स्पष्टम् । व्यासः—

ध्ययनादिरहितः ।

नाध्यापयति नाधीते स भवेद् ब्राह्मणब्रुवः ॥

इति चतुर्विंशतिमतात् । सूतकान्नं=ग्रहणकाले ततः प्राग्वा पक्वमन्नम् । *सचैलत्वमिति ।

ग्रहणे शावमाशौचं विमुक्तौ सौतिकं स्मृतम् ।
तयोः संपत्तिमात्रेण उपस्पृश्य क्रियाक्रमः ॥

इति ब्रह्माण्डे स्पर्शे मोक्षे च सपिण्डमृतसूतिवदशुचित्वोक्त्या तयोरिव अनयोरपि सचैलमेव स्नानं कार्यं, तदुत्तरं च कर्माधिकारः । एवं—

यत्र पुंसः सचैलं स्यात् स्नानं तत्र सुवासिनी ।
कुर्वीतवाशिरः स्नानं शिरोरोगी जटी तथा ॥

इत्यपि न प्रवर्त्तते शावाद्यभिधानात् इत्यभिप्रायः । मुक्तिस्नानं चावश्यकमित्याह—*मुक्ताविति । *अमन्त्रकमिति । मन्त्राणामविधानाद् विकृतेरभावेनातिदेशाप्रसक्तेश्च । *मूल·

मिति । हेमाद्रौ-

इन्दोर्लक्षगुणं पुण्यं रवेर्दशगुणं ततः ॥
गङ्गातोये तु संप्राप्ते इन्दोः कोटी रवेर्दश ॥
गवां कोटिसहस्रस्य यत्फलं लभते नरः ।
तत्फलं लभते मर्त्यो ग्रहणे चन्द्रसूर्ययोः ॥

*असंभवे तु माधवीये शङ्खः

वापीकूपतडागेषु गिरिप्रस्रवणेऽपि च ।
नद्यां नदे देवखाते सरस्युद्धृतनाम्बुनि ॥
उष्णोदकेन वा स्नायात् ग्रहणे चन्द्रसूर्ययोः ॥

अत्र तारतम्यमाह मार्कण्डेयः-

शीतमुष्णोदकात्पुण्यमपारक्यं परोदकात् ।
भूमिष्ठमुद्धृतात्पुण्यं ततः प्रस्रवणोदकम् ॥
ततोऽपि सारसं पुण्यं ततः पुण्यं नदीजलम् ।
तीर्थतोयं ततः पुण्यं महानद्यम्बु पावनम् ॥
ततस्ततोऽपि गङ्गाम्बु पुण्यं पुण्यस्ततोऽम्बुधिः ॥ इति ।

कार्तिके ग्रहणं श्रेष्ठं गङ्गायमुनसङ्गमे ।
मार्गे तु ग्रहणं प्रोक्तं देविकायां महामुने ॥
पौषे तु नर्मदा पुण्या माघे सन्निहिता शुभा ।
फाल्गुने वरणा पुण्या चैत्रे पुण्या सरस्वती ॥
वैशाखे तु महापुण्या चन्द्रभागा सरिद्वरा ।
ज्येष्ठे तु कौशिकी पुण्या आषाढे तापिका नदी ॥
श्रावणे सिन्धुनामा तु तथा भाद्रे तु गण्डकी ।
आश्विने सरयूः श्रेष्ठा तथा पुण्या तु नर्मदा ॥

इति देवीपुराणम् । *असम्भवे त्वाह ।

सर्वं भूमिसमं दानं सर्वे ब्रह्मसमा द्विजाः ।
सर्वं गङ्गासमं तोयं राहुग्रस्ते दिवाकरे ॥

*उष्णोदकमातुरविषयम् । तथा-

गोदावरी महापुण्या चन्द्रे राहुसमन्विते ।
सूर्ये च राहुणा ग्रस्ते तमोभूते महामुने ॥
नर्मदातोयसंस्पर्शे कृतकृत्या भवन्ति ते ।

पृथ्वीचन्द्रोदये प्रभासखण्डे-

गावो नागास्तिला धान्यं रत्नानि कनकं मही ।
संप्रदाय कुरुक्षेत्रे यत्फलं लभते नरैः ॥
तदिन्दुग्रहणेऽम्भोभौ स्नानाद्भवति षड्गुणम् ॥

तत्रैव सौरपुराणेऽब्धिस्नानमुपक्रम्य-

दानानि यानि लोकेषु विख्यातानि मनीषिभिः ।
तेषां फलमवाप्नोति ग्रहणे चन्द्रसूर्ययोः ॥

देवीपुराणे—

गङ्गा कनखलं पुण्यं प्रयागे पुष्करं तथा ।
कुरुक्षेत्रं महापुण्यं राहुग्रस्ते दिवाकरे ॥

स्नानासंभवे स्मरणं कार्यम् ।

स्मृत्वा शतक्रतुफलं दृष्ट्वा सर्वाघनाशनम् ।
स्पृष्ट्वा गोमेधपुण्यं तु पीत्वा सौत्रामणेर्लभेत् ॥

इत्यत्र समशब्दोपादानात् ।

मृते जन्मनि संक्रान्तौ ग्रहणे चन्द्रसूर्ययोः ।
अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणा ॥

इत्यत्राह-*उष्णोदकमिति ॥

आदित्यकिरणैः पूतं पुनः पूतं च वह्निना ।
अतोऽव्याध्यातुरः स्नायाद्ग्रहणेऽप्युष्णवारिणा ॥

इति व्याघ्रोक्तेः । अपिनाऽस्पृश्यस्पर्शनादीनां । ग्रहः उष्णोदकायोग्यरोगिणस्तु—

आतुरे स्नान उत्पन्ने दशकृत्वो ह्यनातुरः ।

स्नात्वा वाऽजिमर्त्यं पुण्यं प्राप्नुयादविचारतः।
रविचन्द्रोपरागे च अयने चोत्तरे तथा॥

इति मार्कण्डेयोक्तेः। अत्र *श्राद्धमाह कल्पतरुः—

चन्द्रसूर्यग्रहे यस्तु श्राद्धं विधिवदाचरेत्।
तेनैव सकला पृथ्वी दत्ता विप्रस्य वै करे॥

भारते—

*सर्वस्वेनापि कर्तव्यं श्राद्धं वै राहुदर्शने।
अकुर्वाणस्तु नास्तिक्यात् *पङ्के गौरिव सीदति॥

विष्णुः—

राहुदर्शनदत्तं हि श्राद्धमाचन्द्रतारकम्।

इदं चामान्नेन हेम्ना वा कार्यं, न त्वन्नेन।

आपद्यनग्नौ तीर्थे च चन्द्रसूर्यग्रहे तथा।

इत्यादि अग्रिमश्लोकेन स्नातव्यं, गोरजःस्नानादिकमपि वा कार्यम्। *श्राद्धमिति। श्राद्धं तर्पणं च स्पर्शे कार्यम्॥

त्रिदशाः स्पर्शसमये तृप्यन्ति पितरस्तथा।
मनुष्या मध्यकाले तु मोक्षकाले तु राक्षसाः॥

इति वासिष्ठात्। *सर्वस्वेनापीति। यदि सङ्क्षेपेणापि सामग्रीसम्पादने सर्वस्य व्ययो भवति तदाऽपीत्यर्थः।

विशिष्टे ब्राह्मणे प्राप्ते सूर्येन्दुग्रहणेऽयने॥
जन्मर्क्षग्रहपीडासु श्राद्धं कुर्वीत चेच्छया।

इत्यत्र इच्छया चेति "श्राद्धं प्रति रुचिश्चैव" इत्येतत्समानार्थम्। अतश्चाकरणे प्रत्यवायमाह-*पङ्के इत्यादि। *घृतस्येति। घृतस्य मात्रुर्यं बोध्यम्। तेन न पाकानुपपत्तिः। तथा च अन्ननिवेदनवाक्ये 'इदमन्नम्' इत्यत्र पिण्डदानवाक्ये च 'अयं पिण्डः' इत्यत्र 'इदं घृतम्' इति प्रयोग इत्यर्थः। 'ग्रहीते राहुणा श्राद्धभोक्तु' इति ग्रहणकालीन-श्राद्धतर-भोजन-

आमश्राद्धं प्रकुर्वीत हेमश्राद्धमथापि वा ॥

इति शातातपोक्तेरिति हेमाद्रिमाधवादयः ।

*अपरार्कस्तु एतद्विजातीनां पाकाभावे द्रव्यद्वयं तीर्थश्राद्धवत् ।

पाकाभावे द्विजातीनामामश्राद्धं विधीयते ।

इति सुमन्तूक्तेः ।

सैंहिकेयो यदा सूर्यं ग्रसते पर्वसन्धिषु ।
गजच्छाया तु सा प्रोक्ता तस्यां श्राद्धं प्रकल्पयेत् ॥
*घृतेन भोजयेद्विप्रान्घृतं भूमौ समुत्सृजेत् ॥

इति वायवीयोक्तेश्चेत्याह । विज्ञानेश्वरोऽप्याह–'ग्रहणे श्राद्धे *भोक्तुर्दोषो दातुस्त्वभ्युदयः' इति ।

सूतके मृतके भुक्ते गृहीते शशिभास्करे ।
छायायां हस्तिनश्चैव न भूयः पुरुषो भवेत् ॥

इत्यापस्तम्बेन भोजननिषेधात् । अयं च निषेधः *श्राद्धभोक्तुर्हस्तिच्छायासाहचर्यात् । अत्र *ग्रहणनिमित्तक-

---

व्युदासार्थम् । तत्र गजच्छायायां श्राद्धभोजने यत्प्रायश्चित्तं तत्कार्यं "न भूयः पुरुषो भवेत्" इति दोषसाम्यात् । *अपरार्कस्त्विति । तुनाऽरुचिः । सा चाऽऽमहेमश्राद्धेनैव कार्यं विधानात् । पाकाभाव इत्यस्य यत्र पाकसम्भवस्तत्राऽऽमश्राद्धमिति नार्थः, किन्तु यत्र पाको विहितोऽपि केनचिद्धेतुना न सम्भवति तत्र श्राद्धं न त्याज्यं, किं तु आमश्राद्धं कार्यमित्यर्थः । ग्रहणे तु पाको न विहित इति न पाकश्राद्धप्राप्तिः । *घृतेनेति । आमश्राद्धे बहुघृतस्य हेमश्राद्धे च तद्द्रव्यस्य दानार्थं, घृतमिति तु आमहेमश्राद्धयोः प्रचुरघृतद्रव्यकपिण्डदानार्थम् । *भोक्तुरिति । विज्ञानेश्वरोऽपि ब्राह्मणात्प्रतिगृह्य भोजनार्थकः क्षत्रियादेः प्रतिगृह्य यथेष्टविनियोगोपलक्षणम् । *श्राद्धभोक्तुरिति ।

श्राद्धेनैवामासंक्रान्त्यादिनैमित्तिकानां सिद्धिः । 'दार्शिकालभ्ययोरपि' इति कालादर्शोक्तेः ।
अत्राशौचमध्येऽपि स्नानश्राद्धादि कार्यमेव ।

सूतके मृतके चैव न दोषो राहुदर्शने ।
*तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यते ॥

इति माधवीये वृद्धवसिष्ठोक्तेः ।

*स्मार्तकर्मपरित्यागो राहोरन्यत्र सूतके ।

इति व्याघ्रपादोक्तेश्च । कालादर्शे आङ्गिराः-

सर्वे वर्णाः सूतकेऽपि मृतके राहुदर्शने ।
स्नात्वा श्राद्धं प्रकुर्वीरन्दानं शाठ्यविवर्जितम् ॥

मदनपारिजातेऽप्येवम् । तेन

स्नानमात्रं प्रकुर्वीत दानश्राद्धविवर्जितम् ।

इति *निर्मूलं वदन्तो गौडाः परास्ताः । इयं च शु-

अस्य श्राद्धीयं प्रतिग्रहीतुरित्यर्थः । तस्यैव "न भूयः पुरुषो भवेत्" इति दोष इति । *ग्रहणेति । देशकालाद्यविशेषे,न तु तद्विशेषे । *तावदेवेति । ग्रहणविहितसकलकर्मसु इति शेषः । स्नानमात्रे तद्वैयर्थ्यात् । अत एवानुपदमिदं चेत्यादि । *स्मार्तेति । सूतके= आशौचे राहोरुपरागादन्यत्र तदन्यनिमित्तकानां स्मार्तकर्मणां परित्यागो न तु तन्निमित्तकानामित्यर्थः । जननमरणनिमित्तकाशौचप्रयुक्तानधिकारः अविशेषेण ग्रहणनिमित्तककर्मसामान्ये नास्तीति यावत् ।

चन्द्रसूर्यग्रहे स्नायात् सूतके मृतके तथा ।

इत्यादिविशेषविधिस्तु स्नानाकरणेऽनिष्टविशेषबोधनार्थ इति हेमाद्रिः । एतन्मते स्मार्तः सायंहोमादिः नवघटिकादिगौणकाले ग्रहणानन्तरं कार्यः । "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्यादिश्रुत एव स्वर्गे "सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ" इति तदतिरिक्तविप-

द्भिरविशेषान्मन्त्रदीक्षापुरश्चरणादिसर्वस्मार्तकर्मविषया । मदनरत्नेऽप्येवम् । रजस्वलायास्तु भार्गवार्चनदीपिकायां सूर्योदयनिबन्धे—

न सूतकादिदोषोऽस्ति ग्रहे होमजपादिषु ।
ग्रस्ते स्नायादुदक्यापि तीर्थादुद्धृत्य वारिणा ॥ इति ।

अत्र—

स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला ।
पात्रान्तरिततोयेन स्नानं कृत्वा व्रतं चरेत् ॥

इति मिताक्षरोक्तो विधिर्ज्ञेयः ।

तथा ग्रहणे रात्रावपि श्राद्धादि कार्यम् ।

ग्रहणोद्वाहसंक्रान्तियात्रार्तिप्रसवेषु च ।
*दानं नैमित्तिकं ज्ञेयं रात्रावपि तदिष्यते ॥

इत्यपरार्के व्यासोक्तेः,

चन्द्रग्रहे तथा रात्रौ स्नानं दानं प्रशस्यते ।

इति देवलोक्तेश्च । यदा तु ज्योतिःशास्त्रगम्ये दिने चन्द्रग्रहो रात्रौ सूर्यग्रहस्तदा दानस्नानादि न कार्यम् ।

सूर्यग्रहो यदा रात्रौ दिवा चन्द्रग्रहस्तथा ।
तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचित् ॥

वदयं स्नानान्यविषयक इत्यन्ये । सूतके यः स्मार्तकर्मत्यागः स राहुसूतकादन्यत्र। अत्र तु तत्कालप्राप्तानां तेषां न त्याग इत्यर्थ इति। इदानीन्तनास्ते तु ग्रहणमध्येऽपि तमनुतिष्ठन्ति ।

*निर्मूलामिति । परासहेतुगर्भम् । नैमित्तिके इत्यनेन–सोमयागप्रारम्भानन्तरं रजस्वलाया न स्नानं, किं तु तद्वस्त्रत्यागयोनिशोधनादिकमेवेति श्रौतग्रन्थसंमतं लभ्यते, व्रतं रजस्वलाया विहितम् । *दानमिति । श्राद्धस्य विप्रापेक्षया

इति षड्विंशन्मतात् । ग्रहणदिने वार्षिकश्राद्धप्राप्तौ तु प्रयोगपारिजाते गोभिलः—

दर्शे रविग्रहे पित्रोः प्रत्याब्दिकमुपस्थितम् ।
अन्नेनासम्भवे हेम्ना कुर्यादामेन वा सुतः ॥ इति ।

अत्र रविपितृसुतशब्दाः प्रदर्शनार्थाः, न्यायसाम्यात् । तेन चन्द्रग्रहणेऽपि सपिण्डादिवार्षिकमन्नादिना तद्दिने एव कार्यमिति मदनपारिजाते व्याख्यातम् । पूर्वार्धचन्द्रोदयेऽप्येवम् । तेन यानि—

आमश्राद्धं प्रकुर्वीत मासे संवत्सरादृते ।
अन्नेनैवाब्दिकं कुर्याद्धेम्ना चामेन न क्वचित् ॥

इति मरीचिगोभिलादिवचनानि, तानि ग्रहणादिनातिरिक्तविषयाणि । निर्णयामृतेऽप्येवम् । यानि तु—

ग्रहणात् त्रिदिनोर्ध्वं रजोदोषात् पञ्चमे ।
ग्रस्तोदये यदा चन्द्रे प्रत्यब्दे समुपस्थितम् ॥
तद्दिने चोपवासः स्यात्प्रत्यब्दं तु परेऽहनि ।

तथा—

ग्रस्तोदयास्तमानं तु राहोः पादानुगो यदि ।
प्रत्यब्दं तु तदा कार्यं परेऽहन्येव सर्वदा ॥
चन्द्रसूर्योपरागे च तथा श्राद्धं परेऽहनि ।

इत्यादि वचनानि, तानि महानिबन्धेषु क्वाप्यनुपलम्भान्निर्मूलानि, प्रत्युत पूर्वोक्तनिबन्धेषु तद्दिन एव श्राद्धमुक्तमित्यलम् ।

दानत्वात् सङ्करः । श्राद्धं च दिवाभोजनमकृत्वा कार्यं न तु भोजनं कृत्वा । श्राद्धात्प्राक् तद्दिनभोजननिषेधस्येहापि निष्प्रत्यूहं प्रवृत्तेः । तर्पणं तु भुक्त्वाऽपि कार्यं नित्यतर्पणवदिति सम्प्रदायः ।

ग्रहणादिसप्तदिनपर्यन्तं रामगोपालाद्यागमदीक्षोक्ता शिवार्चनचन्द्रिकायां ज्ञानार्णवे—

*मन्त्राद्यारम्भणं कुर्याद्ग्रहणे चन्द्रसूर्ययोः ।
ग्रहणाद्वाऽपि देवेशि कालः सप्तदिनावधि ॥ इति ।

रत्नसागरे—

*(१)सत्तीर्थेऽर्कविधुग्रासे *तन्तुदामनपर्वणि ।
*मन्त्रदीक्षां प्रकुर्वाणो मासर्क्षादीन्न शोधयेत् ॥

---

*मन्त्रादीनि । आदिना पुरश्चर्यादिग्रहः *सत्तीर्थे इत्यादि । अङ्गत्वे सप्तमी न तु निमित्तत्वे । तेन तेषु तदकरणेऽपि न दोषः । एवं तुलादिमहादानादावपि ग्रहणस्याङ्गत्वमेव न निमित्तत्वमित्यूह्यम् । *तन्त्विति । पवित्रारोपणदमनारोपणकालयोः। *मन्त्रदीक्षा=मन्त्रोपदेशः ।

महादीक्षा तथा दीक्षा उपदेशस्तथा परः ।
युगे युगे च कर्त्तव्य उपदेशः कलौ युगे ॥

इत्युक्तः ।

चन्द्रसूर्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये ।
मन्त्रमात्रप्रकथनमुपदेशः स उच्यते ॥

इत्युपदेशस्वरूपम् । गुर्वलाभे तु मन्त्रशास्त्रे—

गुरोरभावे विप्रेन्द्र मन्त्रग्रहणमुच्यते ।
कृष्णपक्षे त्रयोदश्यां दक्षिणामूर्तिसन्निधौ ॥
ताडपत्रे (२)मनुं लिख्य स्थापयीत तदग्रतः ।
क्षीरखण्डादि नैवेद्यं स्थापयीत ततः शिवे ॥
ताडपत्रं समालोच्य पठेदष्टोत्तरं शतम् ।
एवं गृहीतो मन्त्रश्चेद्गुरोरपि विशिष्यते ॥

---

(१) 'चन्द्रसूर्यग्रहे तीर्थे महापर्वादिके तथा' इति क्वचित्पाठः ।
(२) मनुं=प्राह्यमन्त्रम् ।

अत्र सूर्यग्रहणमेव *मुख्यम् ।

सूर्यग्रहणकाले तु नान्यदन्वेषितं भवेत् ।
सूर्यग्रहणकालेन समो नान्यः कदाचन ॥

न मासतिथिवारादिशोधनं सूर्यपर्वणि ।

इति तत्रैव कालोत्तरवचनात् ।

*चन्द्रग्रहे तु या दीक्षा या दीक्षा ब्रह्मचारिणाम् ।
वनस्थस्य च या दीक्षा दारिद्र्यं सप्तजन्मसु ॥

इति तत्रैव योगिनीतन्त्रे निषेधाच्च ॥

ग्रहणं च जन्मराश्यादौ निषिद्धम् । तदुक्तं ज्योतिषे-

त्रिषडदशाऽऽयोपगतं नराणां
शुभप्रदं स्याद्ग्रहणं रवीन्द्वोः ।
द्विसप्तनन्देषुषु मध्यमं स्या-
च्छेषेष्वनिष्टं कथितं मुनीन्द्रैः ॥ इति ।

आयः=एकादश, नन्दाः=नव, इषुः=पञ्च । मदनरत्ने गर्गः-

जन्मसप्ताष्टरिःफाङ्कदशमस्थे *निशाकरे ।
दृष्टोऽरिष्टप्रदो राहुर्जन्मर्क्षे निधनेऽपि च ॥

रिःफं=द्वादश, अङ्काः=नव, निधनं=सप्तमतारा । पृथ्वीचन्द्रोदये विष्णुधर्मे-

यन्नक्षत्रगतो राहुर्ग्रसते शशिभास्करौ ।
तज्जातानां भवेत्पीडा ये नराः शान्तिवर्जिताः ॥

गुरौ संभाविता दोषाः प्रायेण तु कलौ युगे ।
एवं गृहीते मन्त्रस्य सिद्धिर्भवति पार्वति ॥ इति ।

*मुख्यमिति । सूर्यग्रहदीक्षायाः प्राशस्त्यार्थमिदम् । अन्यथा ज्ञानार्णवधृतचन्द्रपदवैयर्थ्यात् । *चन्द्रग्रहे इत्यादि । निन्दाऽपि स्तुत्यर्थैवेति द्रष्टव्यम् । *निशाकरे इति । दिवाकरोऽपि ग्राह्यः ।

तत्रैव पुराणान्तरे–

सूर्यस्य संक्रमो वाऽपि ग्रहणं चन्द्रसूर्ययोः ।
*यस्य त्रिजन्मनक्षत्रे तस्य रोगोऽथ वा मृतिः ।
*तस्य दानं च होमं च देवार्चनजपौ तथा ।
उपरागाभिषेकं च कुर्याच्छान्तिर्भविष्यति ॥
स्वर्णेन वाऽथ पिष्टेन कृत्वा सर्पस्य चाकृतिम् ।
ब्राह्मणाय ददेत्तस्य न रोगादिश्च तत्कृतः ॥

जन्मनक्षत्रं तत्पूर्वोत्तरे च त्रिजन्मनक्षत्रमित्युच्यते । जन्मदशमैकोनविंशतितारा इति केचित् । सर्पस्य=तदाकारस्य राहोरित्यर्थः । अद्भुतसागरे भार्गवः–

यस्य राज्यस्य नक्षत्रे स्वर्भानुरुपरज्यते ।
राज्यभङ्गं सुहृन्नाशं मरणं चात्र निर्दिशेत् ॥

राज्यस्य नक्षत्रम्=अभिषेकनक्षत्रमिति तत्रैव व्याख्यातम् । भार्गवार्चनदीपिकायां ज्योतिःसागरे–

*सौवर्णं कारयेन्नागं पलेनाथ पलार्धतः ।
तदर्धेन तदर्धेन फणायां मौक्तिकं न्यसेत् ॥
ताम्रपात्रे निधायाथ घृतपूर्णे विशेषतः ।
कांस्ये वा कान्तलोहे वा न्यस्य दद्यात्सदक्षिणम् ॥
चन्द्रग्रहे तु रूप्यस्य बिम्बं दद्यात्सदक्षिणम् ।

---

*यस्येति । होरायां ग्रहणे तु—

होरायां गृह्यते यस्य स वा मरणमृच्छति ।

इति द्रष्टव्यम् । *तस्य दानं चेति । विभवे दानहोमौ, तदभावे एकैकः चकारद्वयात् । होमदेवार्चनजपेषु विशेषस्तत्रैव ।

मण्डलाधिपदैवत्यैर्मन्त्रैर्मृत्युञ्जयादिभिः ।
होमं कुर्यात्प्रयत्नेन तत्तन्मन्त्रान् जपेत्सुधीः ॥ इति ।

मण्डलानि=तत्तन्नक्षत्रगणात्मकानि, तदधिपाः=अग्निवरुणवायिवन्द्राः । नागमात्रदानमशक्तस्य । शक्तस्य त्वाह–*सौवर्णमिति ।

नागं रुक्ममयं सूर्यग्रहे बिम्बं च हेमजम् ॥
*तुरङ्गरथगोभूमितिलसर्पिश्च काञ्चनम् ॥

कालविवेकेऽपि—

सुवर्णनिर्मितं नागं सतिलं कांस्यभाजनम् ।
सदक्षिणं सवस्त्रं च ब्राह्मणाय निवेदयेत् ॥
सौवर्णं राजतं वाऽपि बिम्बं कृत्वा स्वशक्तितः ।
उपरागभवक्लेशच्छिदे विप्राय कल्पयेत् ॥

मन्त्रस्तु—

तमोमय महाभीम सोमसूर्यविमर्दन ।
हेमताराप्रदानेन मम शान्तिप्रदो भव ॥
विधुन्तुद नमस्तुभ्यं सिंहिकानन्दनाच्युत ।
दानेनानेन नागस्य रक्ष मां वेधजाद्भयात् ॥ इति ।

अत्र शान्तिरप्युक्ता हेमाद्रौ मात्स्ये-

यस्य राशिं समासाद्य भवेद्ग्रहणसम्भवः ।
स्नानं तस्य प्रवक्ष्यामि मन्त्रौषधिसमन्वितम् ॥
चन्द्रोपरागं सम्प्राप्य कृत्वा ब्राह्मणवाचनम् ।
संपूज्य चतुरो विप्रान् शुक्लमाल्यानुलेपनैः ॥
पूर्वमेवोपरागस्य समानीयौषधादिकम् ।
स्थापयेच्चतुरः कुम्भानव्रणान्सलिलान्वितान् ॥
गजाश्वरथ्यावल्मीकसङ्गमाद् ह्रदगोकुलात् ।
राजद्वारप्रदेशाच्च मृदमानीय निक्षिपेत् ॥

---

*तुरङ्गेति । गजादेर्दानसामान्यस्य चोपलक्षणम् । राज्याभिषेकनक्षत्रोपरागे च दानहोमादिचतुरङ्गादिदानमप्यत्यावश्यकं, शान्तिश्च कार्या । पुरश्चरणचन्द्रिकायां—

अथान्येन प्रकारेण पुरश्चरणमिष्यते ।
ग्रहणेऽर्कस्य चेन्दोर्वा शुचिः पूर्वमुपोषितः ॥
नद्यां समुद्रगामिन्यां नाभिमात्रोदके स्थितः । इति ।

पञ्चगव्यं पञ्चरत्नं पञ्चत्वक् पञ्चपल्लवम् ।
रोचनं पद्मकं शङ्खं कुङ्कुमं रक्तचन्दनम् ॥
शुक्तिस्फटिकतीर्थाम्बुसितसर्षपगुग्गुलान् ।
मधुकं देवदारुं च विष्णुक्रान्तां शतावरीम् ॥
बलां च सहदेवीं च निशाद्वितयमेव च ।
गजदन्तं कुङ्कुमं च तथैवोशीरचन्दनम् ॥
एतत्सर्वं विनिक्षिप्य कुम्भेष्वावाहयेत्सुरान् ।
सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ॥
आयान्तु यजमानस्य दुरितक्षयकारकाः ।
योऽसौ वज्रधरो देव आदित्यानां प्रभुर्मतः ॥
सहस्रनयनः शक्रो ग्रहपीडां व्यपोहतु ।
मुखं यः सर्वदेवानां सप्तार्चिरमितद्युतिः ॥
चन्द्रोपरागसम्भूतामग्निः पीडां व्यपोहतु ।
यः कर्मसाक्षी लोकानां धर्मो महिषवाहनः ॥
यमश्चन्द्रोपरागोत्थां ग्रहपीडां व्यपोहतु ।
रक्षोगणाधिपः साक्षान्नीलाञ्जनसमप्रभः ॥
खड्गहस्तोऽतिभीमश्च ग्रहपीडां व्यपोहतु ।
नागपाशधरो देवः सदा मकरवाहनः ॥
स जलाधिपतिर्देवो ग्रहपीडां व्यपोहतु ।
प्राणरूपो हि लोकानां सदा कृष्णमृगप्रियः ॥
वायुश्चन्द्रोपरागोत्थां ग्रहपीडां व्यपोहतु ।
योऽसौ निधिपतिर्देवः खड्गशूलगदाधरः ॥
चन्द्रोपरागकलुषं धनदोऽत्र व्यपोहतु ।
योऽसाविन्दुधरो देवः पिनाकी वृषवाहनः ॥
चन्द्रोपरागपापानि स नाशयतु शंकरः ।
त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ॥
ब्रह्मविष्ण्वर्करुद्राश्च दहन्तु मम पातकम् ।

एवमावाहयेद्देवान्मन्त्रैरेभिश्च वारुणैः ॥
एतानेव तथा मन्त्रान्स्वर्णपट्टे विलेखयेत् ।
ताम्रपट्टेऽथ वाऽऽलिख्य नववस्त्रे तथैव च ॥
मस्तके यजमानस्य निदध्युस्ते द्विजोत्तमाः ।
कलशान् द्रव्यसंयुक्तानानारूपसमन्वितान् ॥
गृहीत्वा स्नापयेद् गर्तं भद्रपीठोपरि स्थितम् ।
पूर्वैरेव तु मन्त्रैश्च यजमानं द्विजोत्तमाः ॥
अभिषेकं ततः कुर्यान्मन्त्रैर्वारुणसूक्तकैः ।
आचार्यमर्चयेत्पश्चात्स्वर्णपट्टं निवेदयेत् ॥
आचार्यदक्षिणां दद्याद्गोदानं च स्वशक्तितः ।
होमं वाऽपि प्रकुर्वीत तिलैर्व्याहृतिभिस्तथा ॥
दानं च शक्तितो दद्यात्सदीच्छेद्दात्मनो हितम् ।
सूर्यग्रहे सूर्यनामयुक्तान्मन्त्रांश्च कीर्तयेत् ॥
अनेन विधिना यस्तु ग्रहणे स्नानमाचरेत् ।
न तस्य ग्रहणं दोषः कदाचिदपि जायते ॥

इति ग्रहणशान्तिः ॥

भार्गवार्चनदीपिकायां ब्रह्मसिद्धान्ते—

सर्वैः पटस्थितं वीक्ष्यं स्वस्थं तैलाम्बुदर्पणैः ।
ग्रहणं गुर्विणी जातु न पश्येत पटं विना ॥

तथा मङ्गलकृत्येषु विधिविशेषो हेमाद्रौ—

त्रयोदश्यादितो वर्ज्यं दिनानां नवकं ध्रुवम् ।
माङ्गल्येषु समस्तेषु ग्रहणे चन्द्रसूर्ययोः ॥

प्रकारान्तरं तत्रैवोक्तम्—

द्वादश्यादितृतीयान्तो वेध इन्दुग्रहे स्मृतः ।
एकादश्यादिकः सौरे चतुर्थ्यन्तः प्रकीर्तितः ॥

इदं च पूर्णग्रासे । *'त्र्यहं खण्डग्रहे तयोः' इति त-
*त्र्यहमिति। तदुक्तं दीपिकायाम्–"खण्डग्रहे त्वेतयोः प्राक् प-

त्रैत्रोक्तेः । इदं च *ग्रस्तास्ते त्रिदिनं पूर्वम्' इति नारदेन ग्रस्तास्ते विशेषोक्तेर्ग्रस्तास्तभिन्नग्रहणपरम् । ज्योतिर्निबन्धे कश्यपः—

ग्रहणोत्पातभं त्याज्यं मङ्गलेषु ऋतुत्रयम् ।
यावच्च रविणा भुक्त्वा मुक्तं भं दग्धकाष्ठवत् ॥

अन्यानि चाग्नेयादिमण्डलानि तत्फलं वर्णविकारादिफलं च दैवज्ञेभ्यो ज्ञेयम् । पुरश्चरणचन्द्रिकायाम्—

*चन्द्रसूर्योपरागे च स्नात्वा प्रयतमानसः ।
*स्पर्शादिमोक्षपर्यन्तं जपेन्मन्त्रं समाहितः ॥

श्राद्ध दिनं तथा ग्रहणादिनं नित्यम्'' इति *ग्रस्तास्ते इति । 'ग्रस्तोदये तूत्तरं त्रिदिनम्' इति केचित् । आग्नेयादीनि=आग्नेयवारुणवायव्यैन्द्राणि । अत्राथर्ववेदोक्ताः शान्तयो राजभिः कारणीयाः ।

आग्नेयीं कारयेच्छान्तिं शान्तिं कुर्याच्च वारुणीम् ।
वायवीं च तथा कुर्यान्माहेन्द्रीं तत्र कारयेत् ॥

इति कात्यायनोक्तेः । एवं राजभिस्तादितरैश्च नाडीदोषनिवारणाय स्नानादि कार्यम् ।

ग्रहपरिपीडितनाडीनक्षत्रदोषशमनाय ।
सह शतपुष्पैः स्नायात्फलिनीचन्दनोशीरैः ॥
ताम्रपात्रं तिलैः पूर्णं पूर्णं वा गव्यसर्पिषा ।
भास्करग्रहणे दद्यान्नाडीदोषोपशान्तये ॥
घृतकुम्भोपरि निहितं शङ्खं नवनीतपूरितं दद्यात् ।
नाड्यादिदोषशान्त्यै द्विजाय दोषाकरग्रहणे ॥

इत्यादिवाक्यात् । *चन्द्रसूर्योपरागे चेति ।

यद्वा पुण्योदके स्नात्वा शुचिः पूर्वमुपोषितः ।

इति पाठान्तरात् पूर्वोपवासानन्तरं नाभिमात्रोदके स्थितः इत्यनुवर्तते । *स्पर्शादीति । अतश्च ग्रस्तोदये ग्रस्तास्ते च न पुरश्चरणम् ।

जपाद्दशांशतो होमस्तथा होमात्तु *तर्पणम् ।
तर्पणस्य दशांशेन मार्जनं कथितं किल ॥
तत्रैव देवतारूपं ध्यात्वात्मानं प्रपूज्य च ।
नमोन्तं *मन्त्रमुच्चार्य तदन्ते देवताभिधाम् ॥
द्वितीयान्तामहं पश्चादभिषिञ्चाम्यनेन तु ।
तोयैरञ्जलिना शुद्धैरभिषिञ्चन्स्वमूर्धनि ॥
मार्जनस्य दशांशेन ब्राह्मणानपि भोजयेत् ।
जपोऽर्चापूर्वको होमस्तर्पणं चाभिषेचनम् ॥
भूदेवपूजनं पञ्चप्रकारेयं पुरस्क्रिया ॥

तथा—

होमाशक्तौ जपं कुर्याद्धोमसंख्या *चतुर्गुणम् ।
एवं कृते तु मन्त्रस्य जायते सिद्धिरुत्तमा ॥

ग्रहणग्रस्तकुरुक्षेत्रप्रातग्रहे प्रागुक्तमुच्यते ।
तत्रारुणस्मृतौ

काम्यपुरश्चरणेन न नैमित्तिकस्य बाधः वैद्यनाथकर्तृकप्रयोगे साग्रदर्शनस्य काम्यैकार्थत्वानिसंख्यया बाधनात् । अतः स्नानदानादि न कार्यमिति केचित् । संख्याकार्ये मामित्येनीपारिच्छेदस्तस्य संख्योत्तरेण सिद्धेर्युक्तस्तत्र बाधः, न त्वत्र । काम्येन नैमित्तिकस्नानादिकार्यस्य प्रत्यवायपरिहारस्यासिद्धेः । अतः पुरश्चरणोत्तरमतिक्रान्तं नैमित्तिकं कार्यमित्याहुः । वस्तुतस्तु तदेव भार्यादिमरणादिभिनैव कार्यम्, एकभक्तनक्तादिवत् गौणकालविध्यभावात् 'यावद्दर्शनगोचरः" इत्युक्तेश्चातिक्रान्तस्य दुष्करत्वादिति । *तर्पणमिति । तत्प्रकारश्च—

मूलमन्त्रं समुच्चार्य तदन्ते देवताभिधाम् ।
द्वितीयान्तामहं *पश्चात्तर्पयामि नमोन्तकः ॥

इति बोध्यः । *मन्त्रं=मूलमन्त्रम् । *चतुर्गुणामिति विप्रपरम् ।

प्रतिग्राही कुरुक्षेत्रे न भूयः पुरुषो भवेत् ।
तथाऽपि मनसः शुद्ध्यै प्रायश्चित्तं समाचरेत् ॥
तप्तकृच्छ्रत्रयं कुर्यादैन्दवेन समन्वितम् ।
सत्रेण वा यजेताथ जपेद्वा लक्षसप्तकम् ॥
वापीकूपतडागादिखननैर्विप्रभोजनम् ॥ इति ।

*एतच्च—

यद्गर्हितेनार्जयन्ति कर्मणा ब्राह्मणा धनम् ।
तस्योत्सर्गेण शुद्ध्यन्ति दानेन तपसैव च ॥

इति मनूक्तकृत्स्नसर्गोत्तरं ज्ञेयमिति दिक् । ग्रहणान्तरितस्य पूर्वसंकल्पितद्रव्यस्य द्वैगुण्यं भवतीति शिष्टाः । पठन्ति च ब्रह्मवैवर्ते—

अन्येषां तु—

षड्गुणं चाष्टगुणितं यथासंख्यं द्विजातयः ।
तेषां स्त्रीणां तु विज्ञेयस्तेषामेव समो जपः ॥
यं वर्णमाश्रितः शूद्रस्तज्जपस्तस्य कीर्तितः ।

इत्यपि द्रष्टव्यम् ।

यद्यदङ्गं विहीयेत तस्य स्याद् द्विगुणो जपः ।

इति मन्त्रशास्त्रं तु अशक्तपरम् । तप्तकृच्छ्रं=तत्प्रत्याम्नायः प्राजापत्यत्रयम् । ऐन्दवं=चान्द्रायणं, प्राजापत्याष्टकम् ।

यत्रोक्तं यत्र वा नोक्तमिह पातकनाशनम् ।
प्राजापत्येन कृच्छ्रेण शोधयेन्नात्र संशयः ॥

इति वचनात् । तदुभयोत्तरं सत्रं कार्यम्, अथ वा तदुभयोत्तरं सप्तलक्षगायत्रीजपः ।

प्रजप्य भोजयेद्विप्रान् शतं साग्रमतन्द्रितः ।

इत्युत्तरार्द्धम् । वाप्याद्यकरणे तु विप्रेभ्यो देयमित्याह—*एतच्चेति । ग्रहणभोजनेऽप्येतदेव प्रायश्चित्तम् "न भूयः पुरुषो भ-

दानकर्माणि नो काम्यां वक्रकं कुर्यात्कथंचित् ।
अहोरात्रमतीतस्य तद्दानं द्विगुणं भवेत् ॥
दशान्तरं पर्वसु स्याच्छतं चन्द्रग्रहे भवेत् ।
सूर्यग्रहे सहस्रं तत्परतोऽनन्तकं स्मृतम् ॥ इति ।

अत्र मूलं चिन्त्यम् ॥ अत्र केचिद्गौडानुगता आहुः—"ग्रहणस्य निमित्तत्वेन तज्ज्ञानस्य प्रयोजकत्वात् ज्योतिःशास्त्रादिना जातस्य ज्ञानस्य निमित्तत्वे प्राप्तेऽपि—

स्नानं दानं तपः श्राद्धमनन्तं राहुदर्शने ।
चन्द्रसूर्योपरागे तु यावद्दर्शनगोचरे ॥

इति जाबाल्यादिवचनेषु *दृशिप्रयोगाच्चाक्षुषज्ञानस्यैवोपसंहारन्यायेन निमित्तत्वम् । अन्यथा दृशौ लक्षणा स्यात् । *तेन मेघाच्छादनेऽन्धादीनां जन्मसमाप्त्यादिनिषिद्धदर्शनानां च स्नानश्राद्धादौ नाधिकारः" इति । कल्पतरुस्त्वाह—'दर्शनशब्देन चाक्षुषज्ञानं गृह्यते, न ज्ञानमात्रम् । अज्ञातस्य निमित्तत्वासंभवात् निमित्तत्वमहिम्नैव ज्ञानलाभेन दर्शनपदवैयर्थ्यापत्तेः । तेन चाक्षुषधीयोग्यः कालः पुण्यः । योग्यत्वं च प्रयत्नानपनेयचाक्षुषज्ञानप्रतिबन्धकराहित्यम् । *तेन मेघच्छन्ने योग्यताऽभावान्न स्नानादि' इति । निर्णयामृतेऽप्येवम् । तदेतत्तुच्छम् । यदि चाक्षुषज्ञानं निमित्तं स्यात्तदा

सूर्यग्रहो यदा रात्रौ दिवा चन्द्रग्रहस्तथा ।
तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचित् ॥

इति वाक्यं व्यर्थं स्यात् । चाक्षुषज्ञानाभावेन प्राप्त्य-

वेत्''इत्युक्तेः । *दृशीति । राहुदर्शन इत्यस्य रूढाभिहितन्यायेन दृश्यमाने राहावित्यर्थः । *तेनेति । "दृष्ट्वा स्नायात्" "मुक्तिं दृष्ट्वा तु भुञ्जीत" इत्यादौ च स्नानादिकर्तृगतस्यैव दर्शनस्य धातुसम्बन्धाधिकारविहितक्त्वाप्रत्ययादिविशेषणत्वप्रतीत्या स्नानादावप्य-

भावात् । तत्पूर्वकत्वाच्च निषेधस्य । न चेदं* ग्रस्तास्तपरम् । रविचन्द्रयोरस्तानन्तरं रात्रिदिवाग्रहणस्यादिति वाच्यम् । तत्रपदस्य ग्रहपरत्वेऽधिकरणत्वायोगान्निमित्तपरत्वे च तद्ग्रहनिमित्तकस्नानदानादेरस्तात्प्रागप्यभावापत्तेः । अथ तत्रेति रात्रिदिने उच्येते *सा वैश्वदेवीतिवद्गुणभूते अपि । तन्न । *तादृशमन्त्रलिङ्गाभावात् । तयोर्निमित्तत्वेऽधिकरणत्वे वाऽन्यप्रयुक्तस्नानाद्यभावापत्तेश्च । *किं च

> नेक्षेतोद्यन्तमादित्यं नास्तं यन्तं कदाचन ।
> नोपरक्तं न वारिस्थं न मध्यं नभसो गतम् ॥

इति मनुवचनं बाध्येत*, 'दृष्टोऽरिष्टप्रदो राहुः' इत्यादि च । न चात्र विहिते दर्शने निषेधाप्रवृत्तिवत्पर्युदस्तनीयताऽपि न युक्तेति वाच्यम् । दर्शनस्य निमित्तत्वानुवादेन *विधेयत्वाभावात् । एतच्चाग्रे वक्ष्यामः ।

न्वयः । अन्यथा दर्शनापगमादौ स्नानापत्तेरिति भावः । दर्शनोपधाननिवेशे एकस्यापि कर्मणस्तत्काले कर्तुमशक्यत्वाद्योग्यतानिवेशः । *इदमिति । तानतोऽपि तद्विधर्म्यपरिहारात् । *सेति । "तप्ते पयसि दध्यानयति सा वैश्वदेवी" इति श्रुतौ गुणीभूतं पयस्तच्छब्दार्थः । *तादृशेति । वैश्वदेवीशब्दार्थान्वयेन मान्त्रवर्णिकदेवतासंबन्धिनि यागे विनियोगलाभात्पयोलाभः, न त्विह तथा किंचिद्दृश्यतेऽर्थः । ननु अन्यनिमित्तकस्नानादि भविष्यति तन्निमित्तकन्यायादित्यत आह—*किं चेति । *बाध्येतेति । उपरक्तेक्षणस्याभिन्नेः । *विधेयत्वेति । येन "मा हिंस्यात्" इत्यस्याग्नीषोमीयादिविधिनेव प्रकृते दर्शनविधिना निषेधस्य रागप्राप्तगोचरत्वं स्यात्तदेव तु नेत्यर्थः । ननु—

> एकरात्रमुपोष्यैव राहुं दृष्ट्वाऽक्षयं नरः ।
> पुण्यमाप्नोति कृत्वा च स्नानश्राद्धे विधानतः ॥

*तस्ये वा दर्शनस्य विधौ तत्र स्नानविधौ च *वि-
रुद्धत्रिकद्वयापत्तेः । अस्तु *सकृद्दर्शनविधानेन संकोच
इति चेन्न । 'मुक्तिं दृष्ट्वा ततः स्नायात्' इति मुक्तिस्नानेऽपि
चाक्षुषज्ञानस्य निमित्तत्वापत्तेः । अस्तु किं नश्छिन्नमिति
चेत् । न, प्रस्तास्ते

तयोः परेद्युरुदयं दृष्ट्वाऽभ्यवहरेत्सुधीः ।

इति दर्शनोत्तरं भोजनविधानादन्यस्य पूर्वविधकाल
इव यावद्दर्शनं भोजननिषेधापत्तेः । मध्येऽभ्रीभूतस्य
सुतरां यावच्चक्षुःप्राप्त्युपवासप्रसङ्गश्च । अथावलोलुप-
तया तत्र ज्ञानमात्रं निमित्तं । तन्नापूर्वमपि निर्लज्जेन

इति वाक्येन उपरागदर्शनोत्तरपूर्वकस्नानश्राद्धं विधाय तत्राक्षयपु-
ण्यरूपफलसंबन्धो बोधनीयः, न तूपरागदर्शनमात्रस्याक्षयफलसंबन्धः ।
बहुषु वचनेषु स्नानश्राद्धयोरेव फलसंबन्धश्रवणात् । दर्शनोपवासयो-
स्त्वफलत्वादङ्गतया विधिरस्त्विति आह—*तस्ये वेति । *विरुद्धेति ।
दर्शनस्य विधौ तत्र स्नानादिविधौ च दर्शनस्य उपादेयत्वविधेयत्व-
गुणत्वानि त्रीणि उद्देश्यत्वानुवादत्वमुख्यत्वानि त्रीणि इति विरुद्धे-
त्यर्थः । यथा "वाजपेयेन स्वाराज्यकामो यजेत" इत्यत्र वाजपेयेन
यागं कुर्यात् यागेन स्वाराज्यं संपादयेदित्यर्थमाशङ्क्य यजरूपादे-
यत्वविधेयत्वगुणत्वानि उद्देश्यत्वानुवादत्वमुख्यत्वानीति विरुद्ध-
त्रिकद्वयमापादितम् । तदुक्तं माधवेन—

उपादेयविधेयत्वगुणत्वाख्यं त्रिकं यजेः ।
उद्देश्यानूक्तिमुख्यत्वं त्रिकं तस्य गुणं प्रति ॥ इति ।

*सकृदिति । सर्वनैमित्तिकार्थं तन्त्रेण सकृद्दर्शनं विधेयम् ।
तत्र न विरुद्धत्रिकद्वयम्, अनुवादत्वानुपगमात्, "दृष्टोऽरिष्टमदः" इति
"नोपरक्तम्" इत्यादि च रागग्रासेक्षणनिषेधपरम् । न च नोपरक्त-
मित्येतदस्तु तथा, "अरिष्टमदः" इति तु वैधविषयमिति वा-

स्वीक्रियताम्* । एतेन यत्केनचिदुक्तं स्पर्शस्नानं मुक्तिस्नानं च यस्य दर्शनं तेनैव कार्यं नान्येन क्त्वाप्रत्ययेन समानकर्तृकत्वावगतेरिति, तन्निरस्तम् । का तर्हि

रूपम् । चन्द्रांशे सार्थकत्वात् । अङ्गस्वपने च उपरागनिमित्तकाशौचस्यापि दर्शनोत्तरकालत्वेन "नाशुची राहुतारकाः" इति निषेधोऽपि सार्थक, ऐहिकानिष्टविशेषाभावो वा स्यात् । यत्तु—"जन्मादिदृश्योपरागकालः 'दृष्ट्वा स्नायात्' इतिदर्शनविधिविशेषोऽयं विशेषतःपुरुषगतानिष्टविशेषतत्कीर्तनरूपानिन्द्रोक्तितः पर्युदासः, तादृशोपरागकाणां च वैधदर्शनाभावान्न सर्वथा स्नानादीति, तत्तुच्छम् । तेषामपि प्रमादादिना स्नानजन्याभ्युदयलाभेन वाऽनिष्टमङ्गीकृत्यापि दर्शने इष्टं स्नानादि न स्यात् । पर्युदस्तकर्तृकदर्शनस्यावैधत्वेनाधिकारासम्पादकत्वात्, अवैधाध्ययनवत् । किंच वैधदर्शनशेषपर्युदासातिक्रमे तत्कार्यासम्पत्तिमात्रं न तु द्रष्टॄणां कश्चिदनर्थ इति शान्तिविशेषाद्यनुपपत्तिश्च । न च नायं शान्तिविधिः पर्युदासातिक्रमविषयः, किं तु यः सामान्यरूपो रागप्राप्तदर्शननिषेधस्तदतिक्रमविषयः । यथा ऋतुगमननियमविधौ पर्ववर्जमिति पर्वपर्युदासेऽपि रागप्राप्तगमनसामान्यगोचरपर्वनिषेधातिक्रमप्रायश्चित्तविधिस्तद्वदिति वाच्यम् । सामान्यतो दर्शननिषेधस्येहानभिधानात् । तस्मादयं राशिविशेषगतोपरागे रागप्राप्तदर्शननिषेध एव, अस्तु वा पर्युदासः । ऋतुगताद्यनिशाचतुष्टयगमनादिषु नञ्युक्तस्नातकव्रतातिक्रमे च शतशः पर्युदासविषयेषु च प्रायश्चित्तविधिदर्शनाद्वर्जनप्रतीत्यविशेषाच्च तदतिक्रमेऽपि प्रायश्चित्तमपेक्षणीयमेव । तत्र निषेधवत्क्रत्वर्थपर्युदासातिक्रमे क्रतुवैगुण्यपरिहारार्थत्वेन क्रत्वर्थं, पुरुषार्थतदतिक्रमे च पुरुषगतानिष्टपरिहारार्थत्वेन पुरुषार्थम् । तस्माद्राशिविशेषोपरागवतामपि प्रमादादिना दर्शने स्नानादि भवत्येवेति भावः ।

*स्वीक्रियतामिति । तथा च 'यावद्दर्शनगोचरे' इति वाक्येऽन्या-

तस्य शान्तिः ।। इत्येकदेशोद्ग्रहणं विशेषणत्वात् ग्रहैकत्ववत् *अविवक्षयाऽर्थतः सिद्धं *ज्ञानमात्रानुवादत्वं सर्वं सुस्थम् । अतुल्यत्वात्तु नादेश्यग्रहणकानुपपत्त्या वा दर्शनस्यार्थवत्त्वम् । *न चोक्तयोग्यतानाशाद्यपि स्यादिति, दर्शनोत्तरं मेघच्छन्ने योग्यताऽभावापत्त्या दानाद्यभावापत्तेः । *तेन तत्तद्दशावच्छेदेन ज्योतिःशास्त्रावगम्यत्वमेव योग्यता । किं च—

रजसो दर्शने नार्या निराश्रयमशुचिर्भवेत् ।
इत्यत्राप्यनध्यायानाम् *आशौचाभावप्रसङ्गः ।

दिवाधारणार्थं कथयिकरणत्वोप दर्शनस्य निमित्तावच्छेदकत्वेनान्वयाच्चन्द्रसूर्योपरागः यस्मिन् देशे यावत्कालपर्यन्तं चाक्षुषज्ञानयोग्यः स तद्देशे तावत्कालं तु निमित्तमिति निष्कर्षः । देशान्तरे च "सूर्यग्रहो यदा रात्रौ" इत्यादिद्वीपान्तरस्थपर्युदासात्, द्वीपान्तरस्थान् प्रति तयोर्द्रष्टुं योग्यत्वात् । अतिसूक्ष्मत्वादनादेश्यं तु न निमित्तमयोग्यत्वात् ।

रात्रौ सूर्यग्रहः स्याद्दिवा चन्द्रग्रहस्तथा ।
नादेश्यमशुभं राज्ञे यच्च सूक्ष्मतमं भवेत् ॥

इति गर्गादिः पाठाच्च । तस्य च शास्त्रतो ज्ञानमेवानुष्ठानप्रयोजकं, तत्कालश्च तादृशः न तु संक्रान्त्यादिवत् पूर्वापरकालः । तथा च चाक्षुषज्ञानयोग्येऽस्तकालेऽपि ग्रहणे स्नानदानादि स्नानमेव वा यावत्कर्तुं शक्यं तावत्कुर्यात् । वर्तमानमेव हि ग्रहणं निमित्तं न त्वतीतं भावि वेति वक्तुं यावद्दर्शिनि निष्कर्षः । *उद्ग्रहणं=ग्रहणम् । *अविवक्षया चाक्षुषत्वस्येत्यादिः । *ज्ञानमात्रेति । तदुक्तं—चाक्षुषज्ञानयोग्य इति शास्त्रतो ज्ञानमात्रेणेति वाऽर्थः । इदानीमयत्नानवनेयचाक्षुषज्ञानप्रतिबन्धकराहित्यरूपां तद्योग्यतां दूषयति—*न चेति । स्वयं योग्यतामाह—*तेनेति ।

*आशौचाभावेति । तत्रापि रजोदर्शनस्याशौचाङ्गतापत्त्या तदङ्गासम्भवात् । यदि तु भावलक्षणसप्तमी तर्हीहापि तुल्यैव प्रसक्ति-

यत्तु वर्धमानेनोक्तम्—*ज्ञानोत्तरं ह्यधिकारो *न ज्ञानकाले । स्नानकाले *ज्ञानाभावात् । एवं *दर्शनोत्तरं मुक्तिपर्यन्तमस्तमयेन योग्यतेति, तदपि *प्रतिज्ञामात्रम् । *किञ्च ग्रस्तास्ते

तयोः परेऽह्नि दृष्ट्वाऽभ्यवहरेच्छुचिः ।

इत्यादिवाक्यवैयर्थ्यापत्तिः । चाक्षुषज्ञानान्यथानुपपत्त्यैवार्थात्तदृशे स्नानसिद्धेः । ननु मुक्तिस्नाने शास्त्रीय-दृश्यैवेक्षणत्वात् । तथा च श्रोत्रेऽपि विधिसम्बन्धो विहन्यते । तदा 'दृष्टे स्नायात्' इत्यत्रापि तद्विनाश एव । 'दृष्ट्वा स्नायात्' इत्यादौ तु कैमुतिकन्यायेनैव, तत्र तस्य नानपेक्षणीयत्वादिति भावः ।

ज्ञानोत्तरं=चाक्षुषज्ञानोत्तरम् । *न ज्ञानकाले=न चाक्षुषज्ञानकाले । चाक्षुषज्ञानरूपस्याङ्गस्याधिकारसम्पादकत्वा-दिति भावः । *ज्ञानाभावात्=ज्ञानरूपाङ्गाभावादन्धा-देरधिकारः *दर्शनोत्तरमिति । योग्यतावशाज्जातस्य सकृ-द्दर्शनस्यैव दानादिप्रयोजकत्वोपगमादित्याशयः । *प्रतिज्ञामात्र-मिति । ज्ञानमात्रस्य प्राप्तत्वाद्दर्शनं नियम्यते, न त्वपूर्वं विधी-यते, अवघातवत् । तथा चान्धादीनामशक्यत्वेन तदङ्गासम्भवेऽपि यथाशक्त्युपबन्धेनैव नैमित्तिकेऽधिकारो दुर्वारः । नन्वशक्याङ्गहा-नेऽप्यधिकारे तत्सम्पादकाग्निविद्याद्यभावेऽपि अधिकारः स्यात् । न स्यात् । कर्मप्रयोगविध्यप्रयोज्ये हि न यथाशक्तिन्यायविषय-ताम् । यथा स्वतः सिद्धतया कर्मानुरोधेन कर्तुमशक्येषु देशकालकर्तृ-कत्वब्राह्मणत्वराजत्वादिषु यथा वा विध्यन्तरसिद्धतया तादृशेषु आ-धानविधिसिद्धेष्वग्निषु, अध्ययनविधिसिद्धायां विद्यायां च न ह्येतादृशो दर्शननियम इति भवति यथाशक्त्युपबन्धविषयः । तस्मादन्धादेस्तद-ङ्गाभावेऽपि स्नानं दुर्वारमिति भावः । एतच्च दर्शनस्य स्नानेऽङ्गत्वमुपेत्य दूषणमुक्तम् । इदानीं वस्तुतस्तस्याङ्गत्वमेव न सम्भवतीत्याह—*किञ्चेति ।

मेव ज्ञानं निमित्तं न चाक्षुषम् ।

चन्द्रसूर्यग्रहे नाद्यादहान्यष्टहानि पूर्वतः ।
राहोर्विमुक्तिं विज्ञाय स्नात्वा कुर्वीत भोजनम् ॥

इति वृद्धगौतमेन विज्ञायेति ज्ञानमात्रोक्तेः । तथा—

मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परम् ।

इति तदपि ज्ञानमात्रपरम् ।

*मेघमालादिदोषेण यदि मुक्तिर्न दृश्यते ।
आक्रम्यैव तु तं कालं स्नात्वा भुञ्जीत वाग्यतः ॥

इति गौडनिबन्धे वचनात् । मैवम् । अज्ञानस्य *निमित्तत्वाभावेन निमित्तमात्रस्यैव ज्ञानलाभे वाक्यवैयर्थ्यात्, प्रकारान्तरेऽपि तदापत्तेश्च । किञ्च दर्शनं पुंसो *विशेषणं *मुपलक्षणं वा ? । नाद्यः । दर्शनावच्छिन्ने काले स्नानतुल्यादानादेरभावात् । दर्शनविच्छेदे कृतमपि स्नानादि न ग्रहणनिमित्तं स्यात् । नान्त्यः । 'यावद्दर्शनगोचरे' इति *यावत्पदवैयर्थ्यप्रसङ्गात् । *दृष्टग्रह-

---

दर्शनं मुक्तिस्नानाधिकारसम्पादकमिति निरस्यति—*मेघेति । तं कालमित्यस्य मुक्तिकालमित्यर्थः ।

यदैवास्तङ्गतश्चन्द्रो राहोर्वा नतगोचरः ।
आक्रम्यैव तु तं कालं क्रिया कार्या विचक्षणैः ॥

इत्यादिवचनेष्वेव तं कालमित्यस्य चन्द्रोदयकालमित्यर्थः । अन्यथा 'तयोः परेद्युरुदये' इत्यनेन विरोधात् ।

*निमित्तत्वाभावेन=अनुष्ठानहेतुस्वरूपतदसम्भवेन । *विशेषणं=विद्यमानं सत् व्यावर्तकम् । *उपलक्षणम्=अविद्यमानं सत्तादृशम् । *यावदिति । संक्रान्तौ पूर्वोत्तरकालयोः पुण्यत्वात्तद्वैयर्थ्यवारणार्थमिदं यावत्पदम् । उपलक्षणत्वे त्विहापि तत्कालयोः प्राप्तेस्तद्वैयर्थ्यमित्यर्थः । ननु भाविग्रहणमादाय स्नानवारणाय तदित्य-

णोत्तरमपि स्नानाद्यापत्तेश्च । ज्ञानपक्षेऽप्येष दोषस्तुल्य इति चेत् मूर्खोऽसि । यदि ज्ञानवाचकं पदं श्रूयेत, ततस्तस्यान्वयो विचार्येत । दृष्टिस्तु श्रूयत इति वैषम्यम् । कथं तर्हि ज्ञानं लभ्यते ? । 'संक्रान्तौ स्नायात्' इतिवद् *र्थादित्यवेहि । अश्रुतत्वादेव नोद्देश्यविशेषणविवक्षाकृतो वाक्यभेदोऽपि । *अस्तु तर्हि दृष्टं ग्रहणं निमित्तमिति चेत् । ग्रस्तास्तेऽस्तोत्तरं स्नानापत्तेः विशिष्टोद्देशे वाक्यभेदाच्च । तथाप्येवमनुल्यमिति चेत् 'यावद्दर्शनगोचरं' इति वचनेन *तन्निषेधात् । तथ त्वन्यग्रह इव ग्रस्तास्तेऽपि स्यात् ।

आह- *दृष्टे इति ।*अर्थादिति । ननु संक्रान्तौ ज्ञानस्यार्थिकत्वं युक्तं न तु 'दृष्टे राहौ'इत्यादौ, दृष्ट इति श्रवणादिति चेत् । अत्राहुः–दृष्टे इति । "यस्य च भावेन भावलक्षणम्"(पा० सू० २-३-३७)इति सूत्रेण सप्तमी । ज्ञानरूपभावलक्षणभूतराहुविषयकभावान्तरापेक्षायां तस्य निमित्तत्वेन लक्षणत्वात् । तत्स्वभावलक्ष्यो ज्ञानरूपो भावो दर्शनेन लक्ष्यः । यथा "यस्य हविर्निरुप्तं पश्चात् चन्द्रमा अभ्युदेति"इत्यादौ निरुप्तशब्देन प्रवृत्तिमात्रम् । अप्रवृत्तस्य हविषोऽभिशब्दोक्तचन्द्रोदयलक्षणत्वायोगात् । न चैवं लक्षणा । प्रधानभूतसप्तम्यर्थान्वयानुरोधेन गुणभूते प्रातिपदिके तस्या अदोषत्वात् । प्रातिपदिकार्थानुरोधेन सप्तम्या एवार्थत्यागे तु तस्या एवासाधुतापत्तेः । वस्तुतः शास्त्रीयज्ञानं दृशेरभिधेयमेव । "दृशार्थश्चानालोचने" "षड् दर्शनानि"इति प्रयोगात् । तथा च क्व लक्षणाऽपि ।

इयान् परं भेदः–"संक्रान्तौ स्नायात्"इत्यादौ निमित्तमहिम्ना "दृष्टे राहौ स्नायात्"इत्यादौ तु लक्षणमहिम्नेति । दर्शनविशेषणतया निमित्तान्तर्भावं शङ्कते–*अस्त्विति । *तन्निषेधादिति । योग्यतामुखेन निमित्तावच्छेदकत्वस्यावेदितत्वात् ।

किञ्च दर्शनस्य विधिरनुवादो वा ? । आद्ये ग्रहणोद्देशेन दर्शनविधिरुत दर्शनविशिष्टस्नानविधिरुत स्नानोद्देशेन दर्शनविधिः ? । नाद्यः । ग्रहणोद्देशेन स्नानविधाने दर्शनविधाने च वाक्यभेदात् । *एतेन द्वितीयोऽपि परास्तः । न तृतीयः । स्नानस्याप्राप्तेः दर्शनस्य निमित्तत्वेनाविधेयत्वाच्च । अन्यथा सोमक्रयणादौ प्रसक्तविधिः केन वार्येत । अथ *नानावाक्येषु क्वचिद्दर्शनविशिष्टस्नानविधिः, क्वचिच्च प्राप्तं दर्शनं निमित्तीकृत्य स्नानमात्रविधिः । तन्न । *स्नानस्य प्रधानस्य प्राप्तौ तदङ्गदर्शनप्राप्तिः, तस्यां च निमित्ते सति स्नानमित्यन्योन्याश्रयात् । एवं दर्शनविधौ सति तन्निमित्तकस्नानविधिः । सति च प्रधानस्नानविधौ तदङ्गदर्शनविधिः । एवं *अधिकारे प्रयोजकत्वे च यो-

---

*एतेन=विशेषणविशेष्योभयविधेयत्वप्राप्त्या वाक्यभेदेन । *नानावाक्येष्विति निर्धारणसप्तमी । क्वचित् "दृष्ट्वा स्नायात्"इत्यादौ दर्शनस्य प्राप्त्यभावात्तस्य दूषयति– *स्नानस्येति । ननु 'दृष्ट्वा स्नायात्'इत्यादौ दर्शनविशिष्टस्नानविधिः "एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा"इति विशिष्टविधिवदिति चेन्न । "वारवन्तीयमग्निष्टोमसाम कृत्वा" इत्यादौ सर्वथैवाप्राप्तेस्तत्कृत्वा तदुत्तरक्रियाकरणाशक्यतयैव विशिष्टविधिः, इह तु कथंचिदपि प्राप्ते लाघवाय न तद्विधिः । क्त्वो हि न विधायकत्वं, स्नायादेः परस्य लिङादेस्तदर्थविधान एव च व्यापृतत्वमिति विशेषात् । *अधिकार इत्यादि । स्नानाद्यधिकारिणः सिद्धस्य दर्शनाधिकारसिद्धिः तस्य स्नानाद्यङ्गत्वात्, अङ्गानां च प्रधानाधिकारिकत्वात्, दर्शनाधिकारिणश्च स्नानाद्यधिकारसिद्धिः तस्य दर्शननिमित्तकत्वात् । एवं स्नानं दर्शने प्रयोजकं

उयम् । *कृत्वार्थपूर्वकालत्वविधौ चास्त्येव वाक्यभेदः ।
अन्यथा स्नानोत्तरमपि दर्शनमङ्गं स्यात् । न द्वितीयः ।

प्रधानत्वात्, दर्शनं च स्नाने निमित्तज्ञानत्वादित्यर्थः । ननु सत्त्वेन दर्शनस्य निमित्तान्तर्भावे पुंप्रवृत्तिविधिप्रवृत्त्यधिकारप्रयुक्तिनिरोधाः, शुद्धमेवोपरागं निमित्तीकृत्य स्नानं विधाय पश्चात्तदङ्गतया दर्शनं विधीयतां, दोषाभावात् । तथा हि निमित्तमेव शास्त्रीयं प्रयोजकं तद्भावाभावौ नैमित्तिकानां विधानात् । ज्ञानं त्वर्थतस्तथा । तथा च ज्योतिःशास्त्राद्दर्शनयोग्यं ग्रहणं निश्चित्य धर्मशास्त्राच्च तन्निमित्तकं महाभ्युदयसाधनं स्नानाद्यवगत्य तत्प्रवृत्त्या दर्शनप्रयुक्तिरिति न प्रयुक्तेर्विरोधः, नापि पुंप्रवृत्तेः । शास्त्रीयायास्तस्याः शास्त्रावगतनिमित्तकत्वाद्दर्शनस्य निमित्तेऽनन्तर्भावात् । अत एव न विधिप्रवृत्तेः, नाप्यधिकारस्य । अधिकारो हि कर्तृत्वपूर्वकं फलस्वाम्यं विधेययोरप्रधानयोरेकप्रयोजकत्वेन तदङ्गाक्षिप्ततायाः कर्तृशक्तेरैक्यात् न त्वविधेयस्य दर्शनस्येत्यत्राह—*कृत्वार्थेति । निरूपितमेतत् । ननु दृश्यविशेषणालिङ्गितस्य दर्शनस्याशक्यनिरूपणत्वेनानुवादत्वायोगात् ग्रहणदर्शनं स्नानादिकं प्रति निमित्तमस्तु ।

सर्वेषामेव वर्णानां सूतकं राहुदर्शने ।

इति वचनात्, तद्देव चाशौचं सत्यपि तथाऽस्तु । अन्यथा "नाशुची राहुतारकाः" इति निषेधात् निषेधपालकानां शिष्टानां स्नानाद्यनापत्तेः, अस्तु वाऽत एव निषेधात् सपिण्डजननादिना निमित्तान्तरेणाशुचेर्दर्शनाभावात्स्नानादेरभावः, अस्तु च निषेधातिक्रमजन्यप्रत्यवायपरिहारस्योपायापेक्षत्वेन तदर्थतया—

चन्द्रसूर्यग्रहे स्नायात् सूतके मृतके तथा ।

इति स्नानादिविधानं सुरापानादिनिमित्तकप्रायश्चित्तवि-

अश्वत्थसागरौ सेव्यौ न स्प्रष्टव्यौ कदाचन।
अश्वत्थं मन्दवारे तु सागरं पर्वणि स्पृशेत्॥
पृथ्वीचन्द्रोदये स्कान्दे-
पुनाति पर्वणि स्नानात्स्पर्शनैः सरितां पतिः।
कदाचिदपि नैवात्र स्नानं कुर्यादपर्वणि॥
अस्यापवादस्तत्रैव प्रभासखण्डे-
पर्वकाले च संप्राप्ते नदीनां च समागमे।
सेतुबन्धे तथा सिन्धौ तीर्थेष्वन्येषु संयुते॥
*एवमादिषु सर्वेषु मेध्योऽन्ये तु स्वकर्मणि।
तथा-
विना मन्त्रं विना पर्व *क्षुरकर्म विना नरैः।
कुशाग्रेणापि देवेशि न स्प्रष्टव्यो महोदधिः॥

न्तर्भावे नैमित्तिकेषु निमित्तवत एवाधिकारादधिकारिणश्च तदकरणे प्रत्यवायादर्शने सति स्नानाद्यकरणे प्रत्यवायः 'तदभावे च तदभाव' इति प्रत्यवायकष्टकर्मानुष्ठानान्यतरप्रयोजकं दर्शनं बुद्धिपूर्वकारी कोऽपि न कुर्यादिति तन्नियोजकः स्नानादिविधिर्दुःस्थितः स्यात्। न चैवमाधानाध्ययनाभ्यामग्निविद्यार्जनमपि न कोऽपि कुर्यात्। तस्मिन् सति अग्निहोत्रादिकर्माकरणे प्रत्यवायस्य तत्परिहारार्थं कष्टकर्मकरणस्य चापत्तेः, सिद्धाग्निविद्यस्यैव कर्माधिकारोपगमात् तयोः कर्मविध्यप्रयोज्यत्वात्, इति वाच्यम्। नित्यतया तयोः पुरुषार्थत्वेनोपगमात्, व्रात्यताऽनाहिताग्नितयोरुपपातकपाठादपि विद्यावत्त्वरूपकर्माधिकारस्यासंपादने प्रत्यवायकल्पनाद्वेति। *एवमादिष्विति। एवमादिषु देशकालेषु सर्वेषु कर्मसु मेध्यः, अन्ये देशादौ तु स्वकर्मणि तत्तीरवासिनां नियमिते कर्मणि मेध्य इत्यन्वयः। *क्षुरकर्म=समुद्रलक्षणतीर्थप्रयुक्तम्।

तथा—

न कालनियमः सेतौ समुद्रस्नानकर्मणि ।

तद्विधिश्च तत्रैव—

पिप्पलादसमुत्पन्ने कृत्ये लोकभयङ्करे ।
पाषाणस्ते मया दत्त आहारार्थं प्रकल्प्यताम् ॥

इति पाषाणं प्रक्षिप्य

विश्वाची च घृताची च विश्वयोने विशां पते ।
सान्निध्यं कुरु मे देव सागरे लवणाम्भसि ॥
नमस्ते विश्वगुप्ताय नमो विष्णो अपांपते ।
नमो जलाधिरूपाय नदीनां पतये नमः ॥
समस्तजगदाधार शङ्खचक्रगदाधर ।
देव देहि ममानुज्ञां तव तीर्थनिषेवणे ॥
त्रिलक्षवानरकर्मांशानं नमो विष्णुमुखाग्निम् ।
सान्निध्यं कुरु देवेश सागरे लवणाम्भसि ॥

अग्निश्च योनिरनिलश्च देहो
रेतोधा विष्णुरमृतस्य नाभिः ।
एतद् ब्रुवन्पाण्डव सत्यवाक्यं
ततोऽवगाहेत पतिं नदीनाम् ॥

इति भारतोक्तमन्त्रान्पठित्वा विधिवत्स्नात्वा—

सर्वरत्नो भवान् श्रीमान् सर्वरत्नाकरो यतः ।
सर्वरत्नप्रधानस्त्वं गृहाणार्घ्यं महोदधे ॥

इत्यर्घ्यं दत्त्वा तर्पयेत् । यथोक्तं पृथ्वीचन्द्रोदये स्कान्दे—

पिप्पलादं विकर्णं च कृतान्तं जीविकेश्वरम् ।
वसिष्ठं वामदेवं च पराशरमुमापतिम् ॥
वाल्मीकिं नारदं चैव बालखिल्यांस्तथैव च ।
नलं नीलं गवाक्षं च गवयं गन्धमादनम् ॥

जाम्बवन्तं हनूमन्तं सुग्रीवं चाङ्गदं तथा ।
मैन्दं च द्विविदं चैव ऋषभं शरभं तथा ॥
रामं च लक्ष्मणं चैव सीतां चैव यशस्विनीम् ।
एतांस्तु तर्पयित्वाथ जलमध्ये विशेषतः ॥
आब्रह्मस्तम्बपर्यन्तं यत्किंचित्सचराचरम् ।
मया दत्तेन तोयेन तृप्तिमेवाभिगच्छतु ॥ इति ॥

इति श्रीमीमांसकनारायणभट्टसूरिसूनुरामकृ-
ष्णभट्टात्मजदिनकरभट्टानुजकमलाकरभ-
ट्टकृते निर्णयसिन्धौ प्रथमः परि-
च्छेदः समाप्तः ॥

गुणरसेभभनाथमिताब्दका-
धिकनभस्य सिताष्टमिकातिथौ ।
सुरगुरावलिखल्लघुमूलजि-
त्प्रथमनिर्णयसिन्धुजटिप्पणम् ॥ १ ॥
हुतभुगृत्विभचन्द्रसमागता-
धिकनभस्य सिताष्टमिकातिथौ ।
प्रथमनिर्णयसिन्धुपरिच्छिदा
विवरणं व्यलिखल्लघुमूलजित् ॥ २ ॥

इति प्रथमस्य वृत्तिः ॥

श्रीः।

सव्याख्ये निर्णयसिन्धौ

द्वितीयः परिच्छेदः।

श्रीगणेशाय नमः॥ अथ संवत्सरप्रतिपदमारभ्य—

*तिथिकृत्यं च कृष्णादिं व्रतं शुक्लादिमेव च।
विवाहादौ च सौरादिं मासं कृत्ये विनिर्दिशेत्॥

इति प्राच्यं *प्रागयशोऽनुसृत्य तिथिनिर्णयस्तत्कृत्यं च निरूप्यते। तत्र मीनसंक्रान्तौ पश्चात्षोडश घटिकाः पुण्यकालः। रात्रौ तु निशीथात्प्राक्परतश्च संक्रमे पूर्वोत्तरदिनार्धे(१) पुण्यं, निशीथे तु दिनद्वयं पुण्यमिति सामान्यनिर्णयादवसेयम्॥

अथ तिथिनिर्णयः। तत्र चैत्रशुक्लप्रतिपदि *वत्सरारम्भः। तत्रौदयिकी ग्राह्या।

श्रीगणेशाय नमः॥

*तिथि कृत्यं चेति। यद्यप्यग्रे शुक्लादिमासेन तिथिनिर्णयकरणाद्विरोधो भाति, तथाऽपि 'व्रतं शुक्लादिना' इत्युक्तेर्न दोषः। तत्र तिथिकृत्यानि दीपावल्यादीनि कृष्णादिमासेनैव। शुक्लादिमासावलम्बनं च चैत्रादिविशेषणवन्मासानां तत्र मुख्यत्वात्। वस्तुतः 'श्रावणे बहुले पक्षे' इत्यादौ श्रावणः शुक्लादिः। 'व्रते शुक्लादिमेव च' इत्युक्तेः। 'मासि भाद्रपदे' इत्यादौ तु नेत्येतदर्थं *प्रागयशा इति। *वत्सरारम्भ इति। तत्र शाकादिश्रवणमपि कार्यम्।

---

(१) रात्रावर्धरात्रात्प्राक् संक्रमे पूर्वदिनस्य पश्चार्धे परतश्च संक्रमे उत्तरदिनस्य पूर्वार्धे पुण्यमित्यर्थः।

चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेऽहनि ।
शुक्लपक्षे समग्रं तु तदा सूर्योदये सति ॥

इति हेमाद्रौ ब्राह्मोक्तेः । दिनद्वये तद्व्याप्तावव्याप्तौ* वा पूर्वैव । तदुक्तं ज्योतिर्निबन्धे —

शकवत्सरभूपमन्त्रिणां स्वफलान्यवरोधपत्तनानाम् ।
श्रवणात्पठनाच्च वै नृणां शुभतां यात्यशुभं सह श्रिया ॥
चैत्रे मासि महाबाहो पुण्या या प्रतिपत्परा ।
तस्यां वै निम्बपत्राणि प्राश्य संशृणुयात्तिथिम् ॥

तत्र (१)यष्टीप्रवेशः कार्यः । उपरिचरवसुकथायाम् —

यष्टिं च वैणवीं तस्मै ददौ वृत्रनिषूदनः ।
इष्टप्रदानमुद्दिश्य शिष्टानां प्रतिपालनीम् ॥
ततः शक्रस्य पूजार्थं भूमौ भूमिपतिस्तदा ।
प्रवेशं कारयामास गते संवत्सरे तदा ॥
ततः प्रभृति चाद्यापि यष्ट्याः क्षितिपसत्तमैः ।
प्रवेशः क्रियते राजन् यथा तेन प्रवर्तितः ॥
अपरेद्युस्तथा तस्याः क्रियते तूच्छ्रयो नृपैः ।
अलङ्कृतायाः पिटकैर्गन्धैर्माल्यैश्च भूषणैः ॥
माल्यदामपरिक्षिप्ता विधिवत् क्रियतेऽपि च ।

इति भारतात् । पिटकः=काष्ठादिरचितपात्रभेदः ।

*अव्याप्ताविति । तत्राऽव्याप्त्याख्यपक्षेऽपि संकल्पः प्रातरेव । 'प्रातः संकल्पयेत्'इति वचनात्, सङ्कल्पवचनाच्च प्रतिपत्संकीर्तनम् । आपाद्यसाकल्यस्य प्रयोगाविषयत्वे संकल्पविषयत्वात् ।

केचित्तु ततोऽप्युषः कालः प्रशस्तः 'तावति कुर्वीत यत्कारी स्यात्'इति श्रुतिव्याख्याने वेदभाष्ये सूर्योदयात्प्रागारम्भस्य सतामपि शास्त्रोक्तदोषाणामुपशामकत्वोक्तेः, मीमांसकैः 'पुरावाचः

(१) 'तत्र च गुडीकार्या'इति क्वचित् पुस्तके पाठः ।

चैत्रे सितप्रतिपदि
यो वारोऽर्कोदये स वर्षेशः ।
उदयद्वितये पूर्वो
नोदययुगलेऽपि पूर्वः स्यात्(१) ॥
यस्माच्चैत्रसितादेरुदगात्प्रवृत्तिरब्दादेः ॥ इति ॥
वत्सरादौ वसन्तादौ बलिराज्ये तथैव च ।
पूर्वविद्धैव कर्तव्या प्रतिपत्सर्वदा बुधैः ॥
इति वृद्धवसिष्ठोक्तेः ।
चैत्रमासस्य या शुक्ला प्रथमा प्रतिपद्भवेत् ।
तदह्नि ब्रह्मणः कृत्वा सोपवासस्तु पूजनम् ॥
संवत्सरमवाप्नोति सौभाग्यानि भृगुनन्दन ॥
इति हेमाद्रौ विष्णुधर्मोक्तेः । यदा तु चैत्रो मलमासो भवति तदा दैवकार्यस्य तत्र *निषिद्धत्वाच्छुद्धे मासि संवत्सरारम्भः कार्य इति केचिदाहुः । निष्कर्षस्तु—
शुक्लादिर्मलमासस्य सोऽन्तर्भवति चोत्तरः ।
इत्यादिवचनादधिमवर्षान्तःपातान्मलमासमारभ्यैव वर्षप्रवृत्तेः शुक्लास्तादाविव मलमास एव कार्य इति वयं प्रतीमः ।
ननु शुक्रास्तादौ चैत्रशुक्लप्रतिपदन्तरस्याभावाद्युक्तं तन्मध्य एवानुष्ठानम् । मलमासे तु शुद्धप्रतिपदन्त-

---

प्रवादितो निर्वपेत्'इत्यस्य नियमविधित्वार्थमुपःकालस्यापि प्रातःशब्दवाच्यत्वोपगमाच्च । 'अश्लीलसंज्ञस्तु भागः परं निषिद्धो न श्रौतस्येति स्वरूपात्'इत्याहुः । *निषिद्धत्वादिति ।

---

(१) यदा दिनद्वये उदयकाले चैत्रशुक्लप्रतिपत् तदा पूर्वस्मिन् दिने यो वारः स वर्षेशः । यदा दिनद्वयेऽप्युदयकाले प्रतिपन्नाऽस्ति तदाऽपि पूर्वस्मिन्नेव वारो वर्षेश इत्यर्थः ।

रस्य सम्भवात् शुद्ध एव वत्सरारम्भो युक्त इति चेत्, भ्रान्तोऽसि* । न हि प्रतिपदन्तरस्पर्शं प्रयोजकं, त्रिःकरणापत्तेः वर्षत्रय(१)प्राप्तेश्च । अपि तु वत्सरारम्भः स तु मलमासेऽपीत्युक्तं प्राक् । न हि चैत्रशुक्लादिर्मलमासः पूर्ववर्षेऽन्तर्भवतीति प्रमाणमपि सुवचम् । अत्र तैलाभ्यङ्गो नित्यः ।

वत्सरादौ वसन्तादौ बलिराज्ये तथैव च ।
तैलाभ्यङ्गमकुर्वाणो नरकं प्रतिपद्यते ॥

इति वासिष्ठोक्तेः ।

अस्यामेव नवरात्रारम्भः । तदुक्तं मार्कण्डेयपुराणे—

शरत्काले महापूजा क्रियते या च वार्षिकी* । इति ।

तत्र परयुतैव ग्राह्या ।

श्रौतस्मार्तक्रियाः सर्वा द्वादशे मासि कीर्तिताः ।
त्रयोदशे तु सर्वास्ता निष्फलाः परिकीर्तिताः ॥
तस्मात्त्रयोदशे मासि कुर्यान्नैव कथञ्चन ।
कुर्वन्ननर्थमेवाशु कुर्यादात्मविनाशनम् ॥
—इत्यादिना । *भ्रान्तोऽसीत्यादि ।

नव्यास्तु प्रतिपदः प्राधान्याच्छुद्धादितरसमवाये शुद्धैव ग्राह्या। किञ्च यादृशेन स्थूलोपाधिना शुद्धा भवति तादृशस्तत्सजातीयः स मलमासो न तु स एव, उत्तरमासशेषत्वविरोधात् । अत एव न तत्तत्तिथिकूटः । एवं च 'उत्तरेऽब्दे च कार्याणि' इत्युक्तेरुत्तरस्यैव वत्सरारम्भः, तत्रैवाभ्यङ्गस्नानादिश्चेति प्राहुः ।

*या च वार्षिकीति । वर्षाशब्दो वर्षादिपरः । वर्षे वर्षे भवेति व्युत्पत्त्या प्रतिवर्षादिकर्तव्यत्वं, याचेति चकारेण तत्समुच्चयः ।

---

(१) वैयर्थ्यापत्तेः वर्षशब्दत्वापत्तेश्चेति प्राचीनपुस्तके पाठः ।

अमायुक्ता न कर्तव्या प्रतिपच्चण्डिकार्चने।
मुहूर्तमात्रा कर्तव्या द्वितीयादिगुणान्विता॥

इति देवीपुराणात्।

तिस्रो ह्यष्टाः पराः प्रोक्तास्तिथयः कुरुनन्दन।
कार्तिकाश्वयुजोर्मासोश्चैत्रे मासि च भारत॥

इति हेमाद्रौ ब्राह्मोक्तेः। पराः=परयुताः।

*अत्र विशेषः पारणानिर्णयश्च शारदनवरात्रे वक्ष्यते।

अत्र प्रपादानमुक्तमपरार्के भविष्ये—

अतीते फाल्गुने मासि प्राप्ते चैत्रमहोत्सवे।
पुण्येऽह्नि विप्रकथिते प्रपादानं समारभेत्॥

इत्युपक्रम्य—

ततश्चोत्सर्जयेद्विद्वान्मन्त्रेणानेन मानवः।
'प्रपेयं सर्वसामान्या *भूतेभ्यः प्रतिपादिता॥
अस्याः प्रदानात्पितरस्तृप्यन्तु हि पितामहाः'।
अनिवार्यं ततो देयं जलं मासचतुष्टयम्॥ इति।

तथा—

प्रपां दातुमशक्तेन विशेषाद्धर्ममीप्सुना।
प्रत्यहं धर्मघटको वस्त्रसंवेष्टिताननः॥
ब्राह्मणस्य गृहे देयः शीतामलजलः शुचिः॥

तत्र मन्त्रः—

'एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः।
अस्य प्रदानात्सकला मम सन्तु मनोरथाः'॥
अनेन विधिना यस्तु धर्मकुम्भं प्रयच्छति।
प्रपादानफलं सोऽपि प्राप्नोतीह न संशयः॥ इति।

---

*अत्रेति। चण्डिकार्चनविषयकसकलविधिनिषेधाना-मिहापि प्रवृत्तिरिति भावः। *भूतेभ्य इति। पश्वादिसाधारण्य-

चैत्रशुक्लतृतीयायां गौरीमीश्वरसंयुतां संपूज्य दोलोत्सवं कुर्यात्। तदुक्तं निर्णयामृते देवीपुराणे—

तृतीयायां यजेद्देवीं शंकरेण समन्विताम्।
कुङ्कुमागरुकर्पूरमणिवस्त्रसुगन्धकैः॥
स्रग्गन्धधूपदीपैश्च दमनेन विशेषतः।
आन्दोलयेत्ततो वत्स शिवोमातुष्टये सदा॥ इति।

अत्र चतुर्थीयुता ग्राह्या।

मुहूर्तमात्रसत्त्वेऽपि दिने गौरीव्रतं परे।

इति माधवोक्तेः। अत्र सौभाग्यशयनव्रतमुक्तं मात्स्ये—

वसन्तमासमासाद्य तृतीयायां जनप्रिये।
सौभाग्याय सदा स्त्रीभिः कार्यं पुत्रसुखेप्सुभिः॥इति।

*तत्रापि परयुतैव।

इयं च मन्वादिरपि। अत्रैव प्रसङ्गात्सर्वमन्वादिर्निर्णीयते(१)। तदुक्तं दीपिकायाम्—
'तिथ्यग्नी न तिथ्याशानष्टाष्टौ कृष्णेऽष्टोऽनलो ग्रहः।
तिथ्यर्कौ न शिवोऽश्वोऽमातिथी मन्वादयो मधोः'॥

इति।

तिथिः=पूर्णिमा। अग्निः=तृतीया। नेति। वैशाखे नास्तीत्यर्थः। आशा=दशमी। कृष्णेऽष्टः=कृष्णाष्टमी। अनलः=तृतीया। ग्रहाः=नवमी। अर्कः=द्वादशी। नेति। मार्गशीर्षे नेत्यर्थः। शिवः=एकादशी। अश्वः=सप्तमी। मधोश्चैत्रादारभ्यैता मन्वादय इत्यर्थः। अत्र *मूलवच-

---

लाभः। *तत्रापीति। गौरीव्रतत्वात्। *मूलेति।

आश्वयुक् शुक्लनवमी कार्तिके द्वादशी तथा।
तृतीया चैत्रमासस्य तथा भाद्रपदस्य च॥

---

(१) मुम्बापुरीस्थमुद्रितपुस्तके 'मन्वादिनिर्णय उच्यते' इति पाठः।

नानि हेमाद्र्यादेर्ज्ञेयानि । एताश्च मन्वादयो हेमाद्रिमते शुक्लपक्षस्थाः पौर्वाह्णिकाः, कृष्णपक्षस्था आपराह्णिका ग्राह्याः ।

पूर्वाह्णे तु सदा ग्राह्याः शुक्ला मनुयुगादयः ।
दैवे कर्मणि पित्र्ये च कृष्णे चैवापराह्णिकाः ॥

इति गारुडवचनात् ।

'अथो मन्वादियुगादिकर्मतिथयः
पूर्वाह्णिकाः स्युः सिते
विज्ञेया अपराह्णिकाश्च बहुले'

इति दीपिकोक्तेश्च । कालादर्शे त्वपराह्णव्यापित्वं मन्वादिषूक्तं तत् अयुक्तमिति युगादिनिर्णये वक्ष्यामः । अत्र च श्राद्धमुक्तं मात्स्ये—

कृतं श्राद्धं विधानेन मन्वादिषु युगादिषु ।
हायनानि द्विसाहस्रं पितॄणां तृप्तिदं भवेत् ॥ इति ।
मन्वादिश्राद्धं च मलमासे सति मासद्वयेऽपि कार्यम् ।
मन्वादिकं तैथिकं च कुर्यान्मासद्वयेऽपि च ॥

इति स्मृतिचन्द्रिकोक्तेः । अत्र पिण्डरहितं श्राद्धं (कुर्यात् । तदुक्तं कालादर्शे —

विषुवायनसंक्रान्तिमन्वादिषु युगादिषु ।
विहाय पिण्डनिर्वापं सर्वं श्राद्धं)(१)समाचरेत् ॥ इति ।

फाल्गुनस्य त्वमावास्या पुष्यस्यैकादशी सिता ।
आषाढस्यापि दशमी माघमासस्य सप्तमी ॥
श्रावणस्याष्टमी कृष्णा तथाऽऽषाढी च पूर्णिमा ।
कार्त्तिकी फाल्गुनी चैत्री ज्यैष्ठी पञ्चदशी सिता ॥
मन्वन्तरादयश्चैता दत्तस्याऽक्षयकारकाः ॥ इति ॥

(१) कंसान्तर्गतो ग्रन्थः कपुस्तके नास्ति ।

मन्वादिश्राद्धं नित्यम्। अकरणे प्रायश्चित्तदर्शनात्। तदुक्तमृग्विधाने—

स्वं भुवः प्रतिमन्त्रं च शतवारं जले जपेत्।
मन्वादयो यदा न्यूनाः कृतं तेन च्युता पितृः ॥ इति।

एवं यत्र प्रायश्चित्तवीप्सादिदर्शनं तानि षण्ण-वतिश्राद्धानि नित्यानि। तानि तु—

अमायुगमन्वादिक्रान्तिधृतिपातमहालयाः।
अन्वष्टक्यं च पूर्वेद्युः षण्णवत्यः प्रकीर्तिताः ॥

इत्युक्तानि। चकारादष्टकाग्रहणम्।

चैत्रशुक्लतृतीयैव मत्स्यजयन्ती। अत्रैव प्रसङ्गा-द्दशावतारजयन्त्यो निर्णीयन्ते। तत्र पुराणसमुच्चये—

मत्स्योऽभूद्धुतभुग्दिने मधुसिते कूर्मो विधौ माधवे
वाराहो गिरिजासुते नभसि यद्भूते सिते माधवे।
सिंहो भाद्रपदे सिते हरितिथौ श्रीवामनो माधवे
रामो गौरितिथावतः परशुभृद्रामो नवम्यां मधोः ॥
कृष्णोऽष्टम्यां नभसि सितपरे, चाश्विने यद्दशम्यां
बुद्धः, कल्की नभसि समभूच्छुक्लषष्ठ्यां क्रमेण।
अह्नो मध्ये वामनो रामरामौ
मत्स्यः क्रोडश्चापराह्णे विभागे।
कूर्मः सिंहो बौद्धकल्की च सायं
कृष्णो रात्रौ कालसाम्ये च पूर्वं ॥ इति।

केचित्तु स्फुटान् श्लोकान् पठन्ति। तथा—

अत्र विशेषानिर्देशे शुक्लः। *षण्णवत्य इति। यत्र वर्षमध्ये द्विर्व्यतीपातादि तत्र सप्तनवत्यादि आधिक्यस्यापि तस्याधिका-प्राबल्यात्। एवं ह्यासप्ततीत्यत्रापि। हुतभुक्=तृतीया। विधुः=द्वादशी गिरिजासुतः=चतुर्थी। भूतं=चतुर्दशी। हरिः=द्वादशी। गौरी=

चैत्रे तु शुक्लपञ्चम्यां भगवान्मीनरूपधृक्* ।
ज्येष्ठे तु शुक्लद्वादश्यां कूर्मरूपधरो हरिः* ॥
चैत्रेऽकृष्णे नवम्यां तु हरिर्वाराहरूपधृक्* ।

तृतीया । *धृगिति । ततः—
वेदस्योद्धरणार्थाय मध्याह्ने समुपस्थिते ॥
मध्याह्नव्यापिनी यत्र पञ्चमी मूलसंयुता ।
तत्रोपवासं कुर्वीत विष्णुसायुज्यमाप्नुयात् ॥
पञ्चमी गणसंयुक्ता नोपोष्या हि प्रयत्नतः ।
वेदस्योद्धरणार्थाय धर्मसंस्थापनाय च ॥
परित्राणाय साधूनां जातो मत्स्यः स्वयं हरिः ।
गृहाणार्घ्यं मया दत्तं जनन्या सहितो हरे ॥
देवान् पितॄन् समभ्यर्च्य अनन्तं फलमश्नुते ।
यत्किञ्चिद्दत्तं यद्दानं तद्दानं मरुणा समम् ॥ इति ।
*हरिरिति ।
कृत्तिकाऋक्षसंयोगे सायाह्ने च विधूदये ।
द्वादश्यां पूर्वविद्धायामुपवासव्रतं चरेत् ॥
जगन्निरीक्षणार्थाय विश्वसंस्थापनाय च ।
परित्राणाय साधूनां जातः कूर्मः स्वयं हरिः ॥
गृहाणार्घ्यं मया दत्तं गिरिणा सहितो हरे ।
स्नानं दानं प्रकुर्वीत पितॄनुद्दिश्य तर्पणम् ॥
वित्तशाठ्यं न कर्त्तव्यं विष्णुसायुज्यमिच्छता ।
जयन्ती व्रतमाहात्म्यं श्रोतव्यं च विशेषतः ॥ इति ।
*धृगिति ।
शुक्लपक्षे विशेषेण प्रभाते समुपस्थिते ।
नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः ॥
तस्मात्सर्वप्रयत्नेन दशाविद्धा प्रशस्यते ।

नरसिंहश्चतुर्दश्यां वैशाखे शुक्लपक्षके* ॥
मासि भाद्रपदे शुक्लद्वादश्यां वामनो हरिः* ।

दुष्टमौलिविनाशाय भूभारोत्तारणाय च ॥
परित्राणाय साधूनां हरिर्नारहरूपधृक् ।
गृहाणार्घ्यं मया दत्तं श्रद्धया सहितो हरे ॥
तत्रोपवासं कुर्वीत पितृनुद्दिश्य तर्पणम् ।
यदेव दीयते किञ्चित्तद्दानं भक्त्या अक्षयम् ॥ इति ।

*पक्षके इति ।

स्वातीयोगे च संध्यायां मन्दवारसंयुते ।
संध्याकाले समुत्पन्नो स्तंभोद्भवकारणात् ॥
तस्मात्तत्र समालोक्य त्रेतायामादिपूरुषः ।
जयायुक्ता न कर्तव्या परविद्धा प्रशस्यते ॥
हिरण्यस्य वधार्थाय प्रह्लादरक्षणाय च ।
दानवानां विनाशाय दैत्यानां निधनाय च ॥
परित्राणाय साधूनां जातो नरहरिः स्वयम् ।
गृहाणार्घ्यं मयादत्तं श्रीलक्ष्म्या सहितो हरे ॥
स्नानं दानं च कर्तव्यं पितृनुद्दिश्य तर्पणम् ।
विशलाढ्यं न कुर्वीत विष्णुलोके महीयते ॥

*हरिरिति ।

सङ्गमे श्रवणे चैव पुण्यकालः प्रशस्यते ।
द्वादशी श्रवणोपेता मध्याह्नव्यापिनी तिथिः ॥
तत्रोपवसते कामी विष्णुसान्निध्यहेतवे ।
सङ्गमे सरितः स्नात्वा जाह्नवीस्नानजं फलम् ॥
जातो बलिविनाशाय धर्मसंस्थापनाय च ।
दानवानां विनाशाय दैत्यानां निधनाय च ॥
परित्राणाय साधूनां वामनश्च स्वयं हरिः ।

राधशुक्लतृतीयायां रामो भार्गवरूपधृक्* ॥
चैत्रशुक्लनवम्यां तु रामो दशरथात्मजः* ।

गृहाणार्घ्यं मया दत्तमदित्या सहितो हरे ॥
स्नानं दानमित्यादि प्राग्वत् ।

*धृगिति ।

तृतीया माधवे शुक्ला रोहिण्यामरुणोदये ।
जमदग्निकुलादित्यो जातो भृगुपतिः स्वयम् ॥
द्वितीयाशेषसंयुक्तां यः कुर्यात्स नराधमः ।
तृतीया गणसंयुक्ता सर्वकामफलप्रदा ॥
जातः क्षत्रवधार्थाय भूभारोत्तारणाय च ।
वृत्तिपालकधर्मज्ञद्विजसंस्थापनाय च ॥
परित्राणाय साधूनां जातो भृगुपतिः स्वयम् ।
गृहाणार्घ्यं मया दत्तं रेणुकासहितो हरे ॥
उपवासव्रतं तत्र श्राद्धं शेषं नरोत्तमैः ।
यत्किञ्चिद्दीयते दानं तद्दानं मेरुणा समम् ॥

*दशरथात्मज इति ।

चैत्रशुक्लनवम्यां च जातो रामः स्वयं हरिः ।
पुनर्वस्वृक्षसंयोगे सा तिथिः सर्वकामदा ॥
सैव मध्याह्नयोगेन महापुण्यतमा भवेत् ।
नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः ॥
तत्रोपवासं कुर्वीत विष्णुसायुज्यमाप्नुयात् ।
दशाननवधार्थाय भूभारोत्तारणाय च ॥
दानवानां विनाशाय दैत्यानां निधनाय च ।
परित्राणाय साधूनां जातो रामः स्वयं हरिः ॥
गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितोऽनघ ।
स्नानं दानं प्रकुर्वन्ति पितॄनुद्दिश्य तर्पणम् ॥

नभस्ये तु द्वितीयायां बलभद्रोऽभवद्धरिः* ॥
श्रावणे बहुलेऽष्टम्यां कृष्णोऽभूल्लोक*रक्षकः ।
*ज्येष्ठशुक्लद्वितीयायां बौद्धः कल्की भविष्यति ॥

यत्किञ्चिद्दीयते दानं स्नानं मेरुणा समम् । इति ।

*हरिरिति । बलभद्रकृष्णयोरभेदेन गणनायां भेदः ।
बलभद्र एवावतार इति स्वाभिप्रायः ।

*रक्षक इति ।

अर्द्धरात्रे च रोहिण्यां या तिथिः सर्वकामदा ॥
अर्द्धरात्रेऽष्टमी पुण्या पूर्वा वा यदि वा परा ।
रोहिणीसहिता प्रोक्ता मुक्तिदा सर्वजन्तुषु ॥
तत्रोपवासं कुर्वीत नात्र कार्या विचारणा ।
उपोषणं जागरणं विशेषेण प्रशस्यते ॥

स्नानं दानमित्यादिश्लोकः ।

जातः कंसवधार्थाय भूभारोत्तारणाय च ॥
दानवानां वधार्थाय दैत्यानां निधनाय च ।
परित्राणाय साधूनां जातः कृष्णः स्वयं हरिः ॥
गृहाणार्घ्यं मया दत्तं देवक्या सहितो हरे ।

*ज्येष्ठ इति ॥ भाद्रे बौद्धः, ज्येष्ठे कल्किरित्याहुः ।

भाद्रशुक्लद्वितीया च हस्तनक्षत्रसंयुता ॥
चन्द्रोदये समुत्पन्नो बौद्धरूपोऽभवद्धरिः ।
नन्दायुक्ता न कर्तव्या द्वितीया विष्णुतत्परैः ॥
कामान्मोहात्प्रकुर्वीत दुष्टानां विजयो भवेत् ।
तस्मात्सर्वप्रयत्नेन गौरीयुक्ता प्रशस्यते ॥
तत्रोपवासं कुर्वीत विष्णुसायुज्यमाप्नुयात् ।
जातः कारुण्यमायाय दुष्टानां निधनाय च ॥
परित्राणाय साधूनां जातो बौद्धः स्वयं हरिः ।
गृहाणार्घ्यं मया दत्तं श्रीदेव्या सहितो हरे ॥

इति। कोङ्कणास्तु वाराहपुराणस्थत्वेन वाक्यानि पठन्ति—

'आषाढे शुक्लपक्षे तु एकादश्यां महातिथौ।
जयन्ती मत्स्यनाम्नीति तस्यां कार्यमुपोषणम्॥
नभोमासि तृतीयायां हरिः कमठरूपधृक्।
नभस्यशुक्लपञ्चम्यां वराहस्य जयन्तिका॥
वैशाखे तु चतुर्दश्यां नृसिंहः समपद्यत।
मासि भाद्रपदे शुक्लैकादश्यां वामनो हरिः॥
वैशाखे शुक्लपक्षे तु तृतीयायां भृगूद्वहः।
चैत्रे नवम्यां रामोऽभूत्कौशल्यायां परः पुमान्॥
श्रावणे बहुलेऽष्टम्यां वासुदेवो जनार्दनः।
पौषशुक्ले तु सप्तम्यां कुर्याद् बौद्धस्य पूजनम्॥
माघशुक्लतृतीयायां कल्किनः पूजनं हरेः।
प्रातः प्रातस्तु मध्याह्ने सायं सायं तथा निशि॥
मध्याह्ने मध्यरात्रे च सायंप्रातरनुक्रमात्॥

इति। तदत्र समूलत्वनिर्णये सति कल्पभेदेन व्यवस्था द्रष्टव्या। एताश्च तदुपासकानां नित्याः, अन्येषां तु काम्याः। जन्माष्टम्यादौ तु विशेषं वक्ष्यामः॥

स्नानं दानमित्यादि।
ज्येष्ठे शुक्लद्वितीया च पुनर्वसुसमन्विता॥
सूर्योदये समुत्पन्ने कल्की विष्णुस्तदाऽभवत्।
द्वितीया गौरिसंयुक्ता उपपन्ना व्रतादिषु॥
नन्दायुक्ता न कर्तव्या विष्णुसायुज्यमिच्छता।
स्नानं दानं च यत्किञ्चित्तदक्षयमुदाहृतम्॥
जातो म्लेच्छवधार्थाय दुष्टानां निधनाय च।
परित्राणाय साधूनां धर्मसंस्थापनाय च॥

*चैत्रशुक्लपञ्चमी कल्पादिः । तदुक्तं हेमाद्रौ मात्स्ये—
ब्रह्मणो या दिनस्यादिः कल्पादिः सा प्रकीर्तिता ।
वैशाखस्य तृतीया या कृष्णा या फाल्गुनस्य च ॥
पञ्चमी चैत्रमासस्य तस्यैवान्त्या* तथा परा ।
शुक्ला त्रयोदशी माघे कार्तिकस्य तु सप्तमी ॥
नवमी मार्गशीर्षस्य*सप्तैताः संस्मराम्यहम् ।
कल्पानामादयो ह्येता दत्तस्याक्षयकारकाः ॥

गृहाणार्घ्यं मया दत्तं कृपाचार्येण ते हरे । इति ।
*चैत्रशुक्लेति । ब्राह्मे—
शुक्लायामथ पञ्चम्यां चैत्रमासि शुभानना ।
श्रीब्रह्मलोकान्मानुष्यं संप्राप्ता केशवाज्ञया ॥
ततस्तां पूजयेत्तत्र यस्तं लक्ष्मीर्न मुञ्चति । इति ॥
*अन्त्या=अमावास्या ॥ *सप्तेति । त्रिंशदमी कल्पादयः ।
अथ कल्पादयो राजन् कथ्यन्ते तिथयः शुभाः ॥
यासु श्राद्धे कृते तृप्तिः पितॄणामक्षया भवेत् ।
चैत्रशुक्लप्रतिपदि श्वेतकल्पः पुराऽभवत् ॥
तस्य शुक्लत्रयोदश्यामुदानः समजायत ।
कल्पस्तु नारसिंहाख्यः कृष्णायां प्रतिपद्यभूत् ॥
अथ कृष्णत्रयोदश्यां गौरीकल्पोऽप्यकल्पत ।
वैशाखस्य तृतीयायां शुक्लायां नीललोहितः ॥
चतुर्दश्यां तु शुक्लायां संजातो गारुडाभिधः ।
समानस्तु तृतीयायां कृष्णायामुदपद्यत ॥
माहेश्वरश्चतुर्दश्यां कृष्णपक्षे समागमत् ।
ज्येष्ठशुक्लतृतीयायां वामदेवस्य संभवः ॥
पौर्णमास्यां तु तत्रैव कूर्मः प्रवर्तते नृप ।

कृष्णपक्षे तृतीयायामाग्नेयः समगच्छत ॥
पञ्चदश्यां तु कृष्णायां पितृकल्पः समागमत् ।
शुक्लां चतुर्थीमाषाढे प्राप्य नारायणोऽभवत् ॥
चतुर्दश्यां तस्य कृष्णायां सोमकल्पःसमापतत् ।
श्रावणे शुक्लाष्टम्यां रौद्रः समवर्तत ॥
तस्यैव कृष्णपञ्चम्यां मानवः प्रत्यपद्यत ।
षष्ठीं भाद्रपदे शुक्लां प्राप्य प्राणाभिधोऽभवत् ॥
सितेतरायां षष्ठ्यां तु तस्य तत्पुरुषाह्वयः ।
बृहत्कल्पस्तु सप्तम्यां शुक्लायामाश्विनस्य च ॥
कृष्णायामपि वैकुण्ठः प्रविवेश विशांपते ।
कार्त्तिकस्य सिताष्टम्यां कल्पः कन्दर्पसंज्ञकः ॥
असितायां पुनर्जज्ञे लक्ष्मीकल्पस्य कल्पना ।
मार्गशुक्लनवम्यां तु कल्पास्त्योऽभ्यवर्तत ॥
असितायां च सावित्रीकल्पः प्रारम्भमभ्यगात् ।
पौषे दशम्यां शुक्लायामीशानः प्रादुरासह ॥
असितायामघोरस्य कल्पस्योपक्रमोऽभवत् ।
एकादश्यां तु शुक्लायां माघे ध्यानः प्रजज्ञिवान् ॥
तस्यामेव तमिस्रायां वाराहः प्राप भूपते ।
सारस्वतस्तु द्वादश्यां शुक्लायां फाल्गुनस्य ह ॥
कृष्णायामपि वै राज्ञां विरराज महामनाः ।
इति त्रिंशदमी कल्पास्तिथयः परमेष्ठिनः ॥
आरम्भतिथयस्तासु शुक्लाः पुण्यतमा मताः ।
आसु श्राद्धं कृतं पुण्यमाकल्पस्यापि कल्पते ॥ इति ॥

दीपिकाऽपि—

'स्युः पक्षद्वयगाः क्रमात्प्रतिपदाद्याश्चैत्रमासक्रमात्
भूतो माधवगौ मघौ तु मदनौ ज्येष्ठस्थिते पर्वणी ।

अत्र सर्वोऽपि निर्णयो *मन्वादिवज्ज्ञेयः । हेमाद्रौ ब्राह्मे—

शुक्लायामथ पञ्चम्यां चैत्रे मासि शुभानना ।
श्रीर्ब्रह्मलोकान्मानुष्यं संप्राप्ता केशवाज्ञया ॥
ततस्तां पूजयेत्तत्र यस्तं लक्ष्मीर्न मुञ्चति ॥

चैत्रशुक्लाष्टम्यां भवान्या उत्पत्तिः । तत्र नवमीयुता ग्राह्या ।

अष्टमी नवमीयुक्ता नवमी चाष्टमीयुता ।

इति युग्मवचनात् । अत्र भवानीयात्रोक्ता काशीखण्डे—

भवानीं यस्तु पश्येत शुक्लाष्टम्यां मधौ नरः ।
न जातु शोकं लभते सदानन्दमयो भवेत् ॥ इति ।

अत्रैवाशोककलिकाप्राशनमुक्तं हेमाद्रौ लैङ्गे—

अशोककलिका ह्यष्टौ ये पिबन्ति पुनर्वसौ ।
चैत्रे मासि सिताष्टम्यां न ते शोकमवाप्नुयुः ॥

प्राशनमन्त्रस्तु—

त्वामशोक नराभीष्ट मधुमाससमुद्भव ।
पिबामि शोकसन्तप्तो मामशोकं सदा कुरु ॥ इति ।

अत्र विशेषः पृथ्वीचन्द्रोदये ज्ञेयः—

श्राद्धे त्रिंशदमी शुभाः शुभतराः कल्पादयः शुक्लगाः' ॥ इति ।

*मन्वादिवदिति । आरम्भतिथित्वेनास्या युगमन्वारम्भतिथिसादृश्यलाभादिति भावः । युगान्ताश्च ब्राह्मे—

सूर्यस्य सिंहसंक्रान्तावन्तः कृतयुगस्य तु ।
अथ वृश्चिकसंक्रान्तावन्तस्त्रेतायुगस्य तु ॥
ज्ञेयस्तु वृषसंक्रान्त्यां द्वापरान्तस्तु संख्यया ।
तथा च कुम्भसंक्रान्तावन्तः कलियुगस्य तु ॥ इति ।

पुनर्वसुबुधोपेता चैत्रे मासि सिताष्टमी ।
प्रातस्तु विधिवत्स्नात्वा वाजपेयफलं लभेत् ॥ इति ।

तीर्थतत्त्वे कालिकापुराणे—

चैत्रे मासि सिताष्टम्यां यो नरो नियतेन्द्रियः ।
स्नायाल्लौहित्यतोयेषु स याति ब्रह्मणः पदम् ॥
चैत्रं तु सकलं मासं शुचिः प्रयतमानसः ।
लौहित्यतोये यः स्नायात्स कैवल्यमवाप्नुयात् ॥

*लौहित्यो ब्रह्मपुत्रः । मन्त्रस्तु—

'ब्रह्मपुत्र महाभाग शन्तनोः कुलसम्भव ।
अमोघागर्भसंभूत पापं लौहित्य मे हर ॥'

चैत्रशुक्लनवमी रामनवमी । तदुक्तमगस्त्यसंहिता-
याम्—

'चैत्रे नवम्यां *प्राक्पक्षे दिवा पुण्ये पुनर्वसौ ।
*उदये *गुरुगौरांशे स्वोच्चस्थे ग्रहपञ्चके ॥
मेषं पूषणि संप्राप्ते लग्ने कर्कटकाह्वये ।
आविरासीत्स कलया कौसल्यायां परः पुमान् ॥
तस्मिन् दिने तु कर्तव्यमुपवासव्रतं सदा ।
तत्र जागरणं कुर्याद्रघुनाथपरो भुवि* ॥ इति ।

इयं च मध्याह्नयोगिनी ग्राह्या ।

चैत्रशुक्ले तु नवमी पुनर्वसुयुता यदि ।
सैव मध्याह्नयोगेन महापुण्यतमा भवेत् ॥

---

*लौहित्य इति ।
लोहितास्सरसो जातो लौहित्याख्यस्ततोऽर्थवत् ।
इति कालीपुराणात् ।

*प्राक्पक्षे=शुक्लपक्षे । *उदये=लग्ने । पुण्ये इत्यन्वयः ।
*गुरुगौरांशे=गुरुनवांशे । गौरांशोरिति पाठे गौरांशुश्चन्द्रः । *स्व-

इति तत्रैवोक्तेः । तथा—

चैत्रमासे नवम्यां तु जातो रामः स्वयं हरिः ।
*पुनर्वस्वृक्षसंयुक्ता सा तिथिः सर्वकामदा ॥
श्रीरामनवमी प्रोक्ता कोटिसूर्यग्रहाधिका ।

तथा

*केवलापि सदोपोष्या नवमीशब्दसंग्रहात् ।
तस्मात्सर्वात्मना सर्वैः कार्यं वै नवमीव्रतम् ॥

पूर्वेद्युरेव मध्याह्नयोगे *कर्मकालव्याप्तेः सैव ग्राह्या । दिनद्वये मध्याह्नव्याप्तौ तदव्याप्तौ वा पूर्वदिने पुनर्वसुयुक्तामपि त्यक्त्वा परैव कार्या । तदुक्तं माधवीयेऽगस्त्यसंहितायाम्

नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः ।
उपोषणं नवम्यां च दशम्यां चैव पारणम् ॥ इति ।

चैत्रेति । स्कन्दादिवाक्योक्तिः । *पुनर्वस्विति प्राशस्त्यार्थम् ।

तिथिः शरीरं देवस्य तिथौ नक्षत्रमाश्रितम् ।
तस्मात्तिथिं प्रशंसन्ति न नक्षत्रं तिथिं विना ॥

इति वाक्यात् ॥

*केवलाऽपीति । तिथेरेव निर्णायकत्वान्न ऋक्षापेक्षा ।

*कर्मकालेति । कर्मकालव्याप्तिपक्षे अष्टमीविद्धानिषेधानां दौर्बल्यात् ।

नवीनास्तु दिनद्वये मध्याह्नव्याप्त्यव्याप्त्येकदेशस्पर्शित्वे वा एकदिने पुनर्वसुमती "पुनर्वसुयुता यदि । सैव मध्याह्नयोगेन" इत्युक्तेः । दिनद्वये पुनर्वसुयुता या तादृशी सा मध्याह्ने तद्युतैव । तारतम्यानुरोधेन ततस्तथैव प्रतीतेः । यदि च दिनद्वये मध्याह्ने पुनर्वसुमती तद्रहिता वा मध्याह्नव्यापिनी तदेकदेशस्पृग्वा तदैव परा 'नवमी चाष्टमीविद्धा' इति वाक्यादिति प्राहुः ॥

अष्टमीविद्धा सन्नक्षत्राऽपि नोपोष्येति माधवः।
रामार्चनचन्द्रिकायामपि —

विद्धैव चेदृक्षयुक्ता व्रतं तत्र कथं भवेत्।
विद्धानिषेधश्रवणान्नवमी चेति वाक्यतः॥
वैष्णवानां विशेषात्तु तत्र विष्णुपरैरपि।
दशम्यादिषु वृद्धिश्चेद्विद्धा त्याज्यैव वैष्णवैः॥
तदन्येषां च सर्वेषां व्रतं तत्रैव निश्चितम्॥ इति।

अत्र 'दशम्यादिषु वृद्धिश्चेत्'इति 'तदन्येषाम्'इति वचनात्(१)यदा प्रातस्त्रिमुहूर्ता नवमी, दशमी च क्षयवशात्सूर्योदयात्प्रागेव समाप्यते, तदा स्मार्तानां तत्रैव एकादशीनिमित्तोपवासात् नवमीव्रताङ्गपारणालोपः स्यात्। अतोऽष्टमीविद्धैव स्मार्तैः कार्या। वैष्णवानां त्वरुणोदयविद्धैकादश्या हेयत्वान्न पारणालोपप्रसङ्ग इति द्वितीयैव तैः कार्येति*सूचयति। दशमीवृद्ध्यभावेऽष्टमीविद्धाया एव मध्याह्नव्यापित्वे क्षये च वैष्णवैरपि विद्धैवोपोष्येत्यर्थसिद्धम्। इदं च व्रतं *संयोगपृथ-

---

*सूचयतीति। इदं तु चिन्त्यम्। विष्णुपरायणैः साग्निभिरिदं व्रतं कार्यमित्युपदेशमात्रेणैवोपपत्तेर्वैष्णवानामष्टमीविद्धाप्राप्त्यापादककर्तृविशेषणत्वानङ्गीकारात्।

पारणं तु पूर्वविद्धोपवासे नवमीमतिक्रम्यैव। "दशम्यामेव पारणम्" इत्युक्तेः। *संयोगेति। "एकस्य तूभयत्वे संयोगपृथक्त्वम्"(जै० सू० ४-३-५)इति सूत्रम्। अत्र काम्यत्वमनित्यत्वम्। अकामे हेयत्वात्। एककर्मणो नित्यत्वकाम्यत्वाभ्यां द्वैरूप्ये नित्यानित्यसंयोगविरोध इत्यत्रैकस्येति। "खादिरो यूपो

---

(१) 'तदन्येषाम्' इति च वदन्' इति मुम्बापुरीस्थमुद्रितपुस्तके पाठः॥

क्रत्वन्वयाभावेन काम्यं नित्यं च। तदुक्तं हेमाद्रावगस्ति-संहितायाम्—

उपोषणं जागरणं पितृनुद्दिश्य तर्पणम्।
तस्मिन् दिने तु कर्तव्यं ब्रह्मप्राप्तिमभीप्सुभिः॥
सर्वेषामप्ययं धर्मो भुक्तिमुक्त्येकसाधनः।
अशुचिर्वापि पापिष्ठः कृत्वेदं व्रतमुत्तमम्॥
पूज्यः स्यात्सर्वभूतानां यथा रामस्तथैव सः।
यस्तु रामनवम्यां तु भुङ्क्ते मोहाद्विमूढधीः॥
कुम्भीपाकेषु घोरेषु पच्यते नात्र संशयः॥

तथा—

भवति'इति क्रत्वर्थो नित्यः खादिरो विधीयते। "खादिरं वीर्यकामस्य यूपं कुर्वीत"इति काम्यः।

तत्र प्रमाणद्वयसत्त्वाद् द्वैरूप्यं, तद्वद्व्रतानामपि द्वैरूप्यमङ्गीकार्यम्। यदि तु खादिरस्य क्रत्वर्थतया नित्यत्वं पुरुषार्थतया काम्यत्वम्, इह तु पुरुषार्थतयोभयथापि वैषम्यं मन्यते, तदा 'यावज्जीवमग्निहोत्रं जुहोति' "अग्निहोत्रं जुहुयात्स्वर्गकामः"इत्यादौ पुरुषार्थस्यैव द्वैरूप्यं न त्वेतत्क्रत्वर्थोपन्युदाहरणं वाच्यम्। सूत्रकृताऽपि प्रमाणद्वयस्यैव द्वैरूप्यसाधकत्वमुक्तम्-एकस्य तूभयत्वे संयोग-पृथक्त्वमिति।

नन्वस्त्वग्निहोत्रस्य द्वैरूप्यं प्रमाणभेदात्। न च काम्याग्निहोत्रे कालाकाङ्क्षायां यावज्जीवनवाक्येन तत्समर्पणाद् गुणविधिमात्रं न तु नित्यं तदस्तीति वाच्यम्। यावज्जीवशब्दस्य प्राणधारणमात्रवाचित्वं न तु कालवाचित्वमिति तस्य पुरुषधर्मत्वान्निमित्तत्वम्। ततश्च शब्दान्तरादीनां कर्मभेदहेतूनामसत्त्वेऽपि अग्निहोत्रस्य जीवननिमित्तकप्रयोगात्कामनानिमित्तकप्रयोगो भिद्यते। प्रकृते तु तदभावात्कथं भेद इति चेत्। यथा "तमेतं वेदानुवचनेन

अकृत्वा रामनवमीव्रतं सर्वव्रतोत्तमम् ।
व्रतान्यन्यानि कुरुते न तेषां फलभाग्भवेत् ॥
प्राप्ते श्रीरामनवमीदिने मर्त्यो विमूढधीः ।
उपोषणं न कुरुते कुम्भीपाकेषु पच्यते ॥

अत्र केचित्तूपासकानामेवेदं व्रतं नित्यं;*न त्वन्ये

ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" इत्यादौ गृहस्थाद्याश्रमधर्माणां नित्यानां यज्ञादीनाम् आत्मविविदिषायां विधानात्प्रयोजनभेदात्तु भेदः, तद्वदुपवासेऽपीति । तत्र काम्यप्रयोगेण प्रसङ्गतो नित्यसिद्धिः ।

काम्येऽपि नित्यसिद्धिः स्यात्प्रसङ्गेनोभयात्मिका ।

इति स्मृतेः । श्राद्धे निमन्त्रितब्राह्मणस्यैकस्मादेव भोजनादन्यकर्तृकश्राद्धसिद्धिः प्रसङ्गेन स्वतृप्तिवत् ब्रह्मविद्यार्थमनुष्ठितेन यज्ञादिना नित्यतत्सिद्धिवच्च । एतेन काम्यं परित्यज्य केवलं नित्यमनुष्ठातुं शक्यं न तु नित्यं परित्यज्य काम्यमिति कथं प्रयोगभेद इत्यपाकृतम् । नन्वेवमपि सकृदनुष्ठानेन कथमनेकार्थसिद्धिः । दर्शपूर्णमासयोः षण्णां प्रधानानां मध्ये त्रींस्त्रीन्प्रति सकृत्प्रयाजादिनाऽङ्गेनोपकारवन्नित्यं काम्यं चोपवासं प्रति सकृत्सकृदङ्गानुष्ठानस्य न्याय्यत्वादिति चेन्न । प्रसङ्गस्वीकारात् । यथा पश्वर्थमनुष्ठितेन प्रयाजादिना तत्प्रयोगमध्यपातिपशुपुरोडाशोपकारवदिति भावः ।

*न त्वन्येषामिति । विष्णुपरायणैरित्यत्र विष्णुशब्दस्य प्रकृतरामात्मकविष्णुपरत्वात् तत्परायणाः तन्मन्त्रदीक्षिताः तैः, नित्यव्रतं तेषामेव,

तस्मिन्दिने तु कर्तव्यमुपवासव्रतं सदा ।

इति नित्यप्रयोगविधौ सदाशब्देन तदन्वयात् ।

सूर्यग्रहे कुरुक्षेत्रे महादानैर्मुहुर्मुहुः ।
तत्फलं समवाप्नोति श्रीरामनवमीव्रतात् ॥

इति काम्यप्रयोगश्च सर्वेषाम् । न च तद्विधौ विष्णुपरायणैरि-

कौसल्यामन्त्रस्तु—

रामस्य जननी चासि रामरूपमिदं जगत्।
अतस्त्वां पूजयिष्यामि लोकमातर्नमोऽस्तु ते॥
नमो दशरथायेति पूजयेदितरं ततः॥

अत्र *दशावरणपक्षे आवरणादिपूजाऽन्यत्र ज्ञेया।

उच्चस्थे ग्रहपञ्चके सुरगुरौ सेन्दौ नवम्यां तिथौ
लग्ने कर्कटके पुनर्वसुदिने मेषं गते पूषणि।
निर्दग्धुं निखिलाः पलाशसमिधो मेध्यादयोध्यारणे-
राविर्भूतमभूदपूर्वविभवं यत्किञ्चिदेकं महः॥

इति जन्मभावनां कृत्वाक्षतान् वादयेत्।

इन्द्राग्निश्च यमश्चैव नैर्ऋतो वरुणोऽनिलः।
कुबेर ईशो ब्रह्मादिदिक्पालाः स्नापयन्तु ते॥

इति स्नानमन्त्रः। * दशावरणेत्यादि।

अथ प्रयोगः। आदौ प्रणवः सर्वत्र शूद्रवर्ज्यम्। तत्र षट्कोणे पूर्वादितः रां हृदयाय नमः, रीं शिरसे स्वाहा, रूं शिखायै वषट्, रैं कवचाय हुं, रौं नेत्रत्रयाय वौषट्, रः अस्त्राय फट्॥

दयाब्धे त्राहि संसारसर्पान्मां शरणागतम्।
भक्त्या समर्पये त्वाऽहं प्रथमावरणार्चनम्॥

इति पठेत्। द्वितीयावरणार्चनानन्तरं पाठे 'द्वितीयावरणार्चनम्'इत्यादिः। इति प्रथमावरणम्। अथाऽष्टाब्जमूले—ॐ आत्मने नमः, (प्रणवानन्तरं 'सर्वविद्याक्षरं' सर्वत्रावर्तते) निवृत्त्यै अन्तरात्मने, प्रतिष्ठायै परमात्मने, विद्यायै ज्ञानात्मने शान्त्यै इति द्वितीयम्। अथ तत्पत्रे वासुदेवाय श्रियै, संकर्षणाय शान्त्यै, प्रद्युम्नाय प्रीत्यै, अनिरुद्धाय रत्यै इति तृतीयम्। पत्राग्रे हनुमते सुग्रीवाय, भरताय विभीषणाय, लक्ष्मणाय अङ्गदाय, शत्रुघ्नाय जाम्बवते इति चतुर्थम्। अथ द्वितीयाष्टपत्रपत्रेषु धृष्टये जयन्ताय, विजयाय सौराष्ट्रवर्द्ध-

नाय सौराष्ट्राय अकोपाय धर्मराजाय सुमन्ताय इति पञ्चमम् ॥ अथ द्वादशपत्रपत्रेषु वसिष्ठाय वामदेवाय जाबालये गौतमाय भरद्वाजाय कौशिकाय वाल्मीकाय नारदाय सनकाय सनन्दनाय सनातनाय सनत्कुमाराय इति षष्ठम् । अथ षोडशपत्रपत्रेषु नीलाय नलाय सुषेणाय मैन्दाय शरभाय द्विविदाय वन्दनाय गवाक्षाय किरीटाय कुण्डलाय श्रीवत्साय कौस्तुभाय शङ्खाय चक्राय गदायै पद्माय इति सप्तमम् । अथ द्वात्रिंशत्पत्रपत्रेषु ध्रुवाय धराय सोमाय अद्भ्यः अनिलाय अनलाय प्रत्यूषाय प्रभासाय वीरभद्राय शम्भवे गिरीशाय अजैकपदे अहिर्बुध्न्याय पिनाकिने भुवनाधीश्वराय कपालिने दिक्पतये स्थाणवे भगाय वरुणाय सूर्याय वेदान्ताय भानवे इन्द्राय रवये गभस्तिने यमाय हिरण्यरेतसे दिवाकराय मित्राय विष्णवे धात्रे इत्यष्टमम् । अथ भूपुरे ॐ लँ इन्द्राय सुराधिपतये सायुधाय सवाहनाय सपरिवाराय सशक्तिकाय नमः ॥ ॐ रँ अग्नये तेजोऽधिपतये इत्यादि पूर्ववत् । एवमग्रेऽपि । यँ यमाय प्रेताधिपतये । क्षँ निर्ऋतये रक्षोऽधिपतये । वँ वरुणाय जलाधिपतये । शँ वायवे प्राणाधिपतये । सँ सोमाय नक्षत्राधिपतये । ईँ ईशानाय विद्याधिपतये आँ ब्रह्मणे लोकाधिपतये पूर्वेशानयोर्मध्ये । ह्रीं विष्णवे भूताधिपतये निर्ऋतिपश्चिमयोर्मध्ये इति नवमं तद्बहिः । वज्राय शक्त्यै दण्डाय खड्गाय पाशाय ध्वजाय गदायै शूलाय अम्बुजाय चक्राय इति दशमम् । तदुक्तं रामार्चनचन्द्रिकायाम्—

'षट्कोणे प्रथमावृत्तिः स्याद्ब्रह्महृदयादिभिः ।
द्वितीयाऽऽत्मादिभिर्देवैरष्टाब्जस्य तु मूलके ॥
तृतीया वासुदेवाद्यैरष्टपत्रे तथैव च ।
चतुर्थी वायुपुत्राद्यैः पत्राग्रे पूर्वतः क्रमात् ॥
सुग्रीवाद्यैः पञ्चमावृत्तिर्द्वितीयाष्टदले तथा ।
षष्ठी द्वादशपत्रे तु वसिष्ठाद्यैर्महर्षिभिः ॥

*अशोककुसुमैर्युक्तमर्घ्यं दद्याद्विचक्षणः ।
दशाननवधार्थाय धर्मसंस्थापनाय च ॥
राक्षसानां विनाशाय दैत्यानां निधनाय च ।
परित्राणाय साधूनां जातो रामः स्वयं हरिः ॥
गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितोऽनघ ।
पुष्पाञ्जलिं पुनर्दत्त्वा यामे यामे प्रपूजयेत् ॥
दिवसं विधिवत्कृत्वा रात्रौ जागरणं ततः ।
ततः प्रातः समुत्थाय स्नानसंध्यादिकाः क्रियाः ॥
समाप्य विधिवद्रामं पूजयेद्विधिवन्मुने ।
ततो होमं प्रकुर्वीत मूलमन्त्रेण मन्त्रवित् ॥
पूर्वोक्तपद्मकुण्डे वा स्थण्डिले वा समाहितः ।
लौकिकाग्नौ विधानेन शतमष्टोत्तरं ततः ॥

सप्तमी षोडशाद्यन्ते स्यान्नीलाद्यैः कपिपुङ्गवैः ।
धृष्टाद्यैरष्टमी ज्ञेया द्वात्रिंशद्दलपत्रके ॥
इन्द्राद्यैर्भूगृहे बाह्ये नवमावरणं भवेत् ।
तदस्त्रैर्वज्रशक्त्याद्यैर्दशमावरणं भवेत् ॥' इति ।
अत्र पूज्यपूजकयोर्मध्ये प्राची ।
'देवा ये स्वस्य चाग्रे प्राची प्रोक्ता विचक्षणैः ।
प्राच्येव प्राची नोद्दिष्टा मुक्त्वा देवस्य पूजनम् ॥
इति रामार्चनचन्द्रिकावचनात् । तत्राशक्तस्य पञ्चावरणपूजा भवति । सापि तत्रैव ।
पूर्वं षट्कोणकोणेषु हृदयादीनि षट्क्रमात् ।
दले हनूमत्प्रमुखान् धृष्ट्यादीन् दलमध्यतः ॥
दलाग्रे लोकपालांश्च तदस्त्राणि ततो बहिः । इति ।
अर्थो रामार्चनचन्द्रिकायां द्रष्टव्यः । *अशोकेति* ।
'दत्त्वा पुष्पाञ्जलिं पूर्वं गृहीत्वा सकुसुमम् ।

साउयेन पायसेनैव स्मरन् राममनन्यधीः।
ततो भक्त्या सुसन्तोष्य आचार्यं पूजयेन्मुने॥
ततो रामं स्मरन् दद्यादेवं मन्त्रमुदीरयन्।
'इमां स्वर्णमयीं रामप्रतिमां समलंकृताम्॥
चित्रवस्त्रयुगच्छन्नां रामोऽहं राघवाय ते।
श्रीरामप्रतिमं दास्ये तुष्टो भवतु राघवः॥'
इति दत्वा विधानेन दद्याद्वै दक्षिणां भुवम्*।
ब्रह्महत्यादिपापेभ्यो मुच्यते नात्र संशयः'॥ इति।
इयं मलमासे न कार्या।
'सुजन्मप्रत्यजन्म स्यात्सोपवासः कृतो भवेत्'। इति,
'न कुर्यान्मलमासे तु महादानव्रतानि च।'
इति च माधवीये सङ्ग्रहवचनात्। ननु रामनवमीव्रतस्य नित्यत्वादेकादशीवन्मलमासेऽपि कर्तव्यता स्यादिति चेत्, अत्र ब्रूमः—

फलपुष्पाम्बुसंपूर्णं युक्तं च तुलसीदलैः॥'
इत्यादि॥
भुवमिति।
विप्रान्संभोज्य विधिवत् साचार्यः पारयेद्व्रतम्।
इति बोध्यम्। अथ दुर्दशाग्रस्तानां दशादित्यव्रतं हेमाद्रौ। तत्र—
आदित्यवारयुक्तायामेव शुक्लदशम्यां कार्यम्।
'रविवारेण युक्तायां दशम्यां पूजयेद्दशाः।'
इत्युक्तेः। तिथिश्च मध्याह्नव्यापिनी। दिनद्वये तत्सत्त्वेऽसत्त्वे च परा, एकदेशव्याप्तौ तु महत्त्वाल्पत्वाभ्यां निर्णयः। विधिश्च रविवारे तादृशतिथियोगे। तत्प्रयोगः-तिथिवारकीर्तनान्ते 'मम दुर्दशानिवृत्तिपूर्वकसुदशाप्राप्त्यर्थं दशादित्यव्रतमहं करिष्ये'इति सङ्कल्प्य तदङ्गतया गणपतिपूजापुण्याहवाचनवृद्धिश्राद्धान्तं कृत्वा

नैकादश्युपवासस्य व्रतत्वेन प्राप्तिः । किन्तु

'एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ।'

इत्यादिनिषेधस्य मलमासेऽपि पालनीयत्वात् कृ-
ष्णैकादश्यां पुत्रवद्गृहिणा इतरार्थोपवासः प्रसज्यते।
न त्विह तथेति व्रतत्वेन प्राप्तिर्वाच्या । सा च निषिद्धे-
त्यप्रसङ्गः ।

स्पष्टमासविशेषाख्याविहितं वर्जयेन्मले ।

इति निषेधाच्च । एवं जन्माष्टम्यादावपि बोद्धव्यम् ।
इति रामनवमी ॥

चैत्रशुक्लैकादश्यां दोलोत्सव उक्तो ब्राह्मे-

'चैत्रमासस्य शुक्लायामेकादश्यां तु वैष्णवैः ।

आन्दोलनीयो देवेशः सलक्ष्मीको महोत्सवैः ॥' इति।

चैत्रशुक्लद्वादश्यां दमनोत्सवः ।

'द्वादश्यां चैत्रमासस्य शुक्लायां दमनोत्सवः ।

बौधायनादिभिः प्रोक्तः कर्तव्यः प्रतिवत्सरम् ॥

इति रामार्चनचन्द्रिकोक्तेः ।

सूर्य पञ्चोपचारैः सम्पूज्य प्राङ्मुखो बहिर्देशे गोमयोपलिप्ते
इङ्गालिलिखिता दशदुर्दशापुत्रिकाः पूजयेत् । ताश्च—

'दुर्मुखा दीनवदना मलिनाऽसत्यवादिनी ।

दुर्बुद्धिदायिनी हिंस्रा क्रुद्धा मित्रविरोधिनी ॥

उच्चाटनकरी नाम बहुचिन्ताप्रदायिनी ।'

एताश्चतुर्थ्यन्तनामभिः एकैकपुत्रिकायामावाह्य षोडशोपचारैः
पूज्याः, फलानि दश, दश वराटिका दक्षिणेति । ततः—

'नित्यं पापरते पापे देवद्विजविरोधिनि ।

गच्छतां दुर्दशे देवि नीतिशास्त्रविरोधिनि ॥'

इति प्रत्येकं विसर्जयेत् । ततः शीतोदकेन स्नायात् । अत्र-

*ऊर्जे व्रतं मधौ दोला श्रावणे तन्तुपूजनम् ।
चैत्रे च दमनारोपमकुर्वाणो व्रजत्यधः ॥'

इति तत्रैव पाद्मवचनाच ।

शिवभक्तादिभिस्तु चतुर्दश्यादौ कार्यम् ।
'तत्र स्यात्सर्वार्यतिथिषु वह्न्यादेर्दमनार्पणम् ।'

इति तत्रैवोक्तेः । (ज्योतिःप्रकाशेऽपि—

स्वस्वदेवप्रतिष्ठायां मन्त्रसंग्रहणे तथा ।
पवित्रदमनारोपे ग्राह्या तत्तत्तिथिर्बुधैः ॥)(१)

तिथयस्तु—

वह्निर्विरिञ्चिर्गिरिजा गणेशः

त्वौ हस्तौ पादौ च प्रक्षालयेत् ॥ ततः शुचि शुभ्रं वस्त्रं परिधाय गृहं प्रविशेत् । ततो भित्तौ काष्ठफलकेन अष्टदलं लिखित्वा तत्र सुगन्धिचन्दनादिना दशपुत्रिका लिखेत् । ताश्च—

सद्बुद्धिदा सुखकरी सर्वसम्पत्प्रदायिनी ।
इष्टभोगप्रदा लक्ष्मीः कीर्तिदा सुखदायिनी ॥
पुत्रप्रदा च विजया दशमी धर्मदायिनी । इति ॥

लिखितसुदशापुत्रिकाणां पुरः दशग्रन्थियुतं पट्टदोरकं सूत्रदोरकं वा प्रतिष्ठाप्य तत्र रविं पूजयेत् । षोडशोपचारैः पूजां कृत्वा

'अशेषसम्पदां दात्रे भर्त्रे त्रिजगतां सदा ।
जगतः कामदात्रे च जगत्पूज्याय ते नमः ॥'

इति विसर्जयेत् । ततश्चतुर्थ्यन्तनामभिर्दश सुदशाः तासु पुत्रिकासु पूजयेत्, दश मधुरफलानि टकुकादिदक्षिणा, नात्र विसर्जनम् । दशभिर्मोदकैर्वायनं, भुञ्जीयात्तैलवर्जितम् । इति संक्षिप्तो दशादित्यव्रतप्रयोगः ॥

*ऊर्जे इति नित्यत्वम् ।

१–कंसान्तर्गतः पाठो लिखितपुस्तके नास्ति ।

फणी विशाखोऽर्को दिनकृन्महेशः ।
दुर्गाऽन्तको विश्वहरिः स्मरश्च
शर्वः शशी चेति तिथीषु पूज्याः ॥

इत्युक्ताः ।

अथागमोक्तदीक्षावतां दमनारोपणविधौ रामार्चनचन्द्रिकायाम् । तत्रैकादश्यां—

'क्रियालोपविघातार्थं यत्त्वया विहितं प्रभो ।
न मे विघ्नो भवेदत्र कुरु नाथ दयां मयि ॥
सर्वथा सर्वदा विष्णो मम त्वं परमा गतिः ।
उपवासेन त्वां देव तोषयामि जगत्पते ॥
कामक्रोधादयोऽप्येते न मे स्युर्व्रतघातकाः ।
अद्यप्रभृति देवेश यावद्वैशेषिकं दिनम् ॥
तावद्रक्षा त्वया कार्या सर्वस्यास्य जगत्पते ।

इति देवं संप्रार्थ्य दमनमादाय पञ्चगव्येन प्रोक्ष्य वारिणा प्रक्षाल्याशोकमूले देवाग्रे वा—

'अशोकाय नमस्तुभ्यं कामस्त्रीशोकनाशन ।
शोकार्तिं हर मे नित्यमानन्दं जनयस्व मे ॥

इत्यशोकम्,

'त्रुट्यादिकालपर्यन्तः कालरूपो महाबलः ।
कलते चैव यः सर्वं तस्मै कालात्मने नमः ॥'

इति कालम्,

'वसन्ताय नमस्तुभ्यं वृक्षगुल्मलताश्रय ।
सहस्रमुखसंवास कामरूप नमोऽस्तु ते ॥'

इति वसन्तम्,

'कामभस्मसमुद्भूत रतिबाष्पपरिप्लुत ।
ऋषिगन्धर्वदेवादिविमोहक नमोऽस्तु ते ॥

इति दमनं च संपूज्य—

'नमोऽस्तु पञ्चबाणाय जगदाह्लादकारिणे ।
मन्मथाय जगन्नेत्रे रतिप्रीतिप्रियाय ते ॥'

इति दमनमुपस्थाप्य 'ॐ कामाय नमः' इति संपूज्य निशायां देवताग्रे पञ्चवर्णैः चन्दनेन वा अष्टदलं कृत्वा बहिश्चतुरस्रं तद्बहिर्वर्तुलत्रयं तद्बहिस्त्र्यस्रं चतुरस्रं च कृत्वा तत्र कुम्भं संस्थाप्योपरि वस्त्रेऽष्टदले दमनं पूजयित्वा—

'पूजार्थं देवदेवस्य विष्णोर्लक्ष्मीपते प्रभो ।
दमन त्वमिहागच्छ सांनिध्यं कुरु ते नमः ॥'

'ॐ क्लीं कामदेवाय नमः' 'ॐ ह्रीं रत्यै नमः' इत्यावाह्य दिक्षु पूर्वादितः क्लीं कामाय नमः (बीजादिनमोऽन्तं सर्वत्र) भस्मशरीराय० अनङ्गाय० मन्मथाय० वसन्तसखाय० स्मराय० इक्षुचापाय० पुष्पास्त्राय० इति पूजयित्वा— 'ॐ तत्स्वरूपाय विद्महे कामदेवाय धीमहि । तन्नोऽनङ्गः प्रचोदयात् ॥' इत्यष्टोत्तरशतं संमन्त्र्य पूजयित्वा 'ह्रीं नमः' इति पुष्पाञ्जलिं दत्त्वा—

'नमोऽस्तु पुष्पबाणाय जगदाह्लादकारिणे ।
मन्मथाय जगन्नेत्रे रतिप्रीतिप्रियाय ते ॥'

इति नत्वा—

'आमन्त्रितोऽसि देवेश पुराणपुरुषोत्तम ।
प्रातस्त्वां पूजयिष्यामि सांनिध्यं कुरु केशव ।
क्षीरोदधिमहानागशय्यावस्थितविग्रह ।
प्रातस्त्वां पूजयिष्यामि सन्निधौ भव ते नमः ॥
निवेदयाम्यहं तुभ्यं प्रातर्दमनकं शुभम् ।
सर्वदा सर्वथा विष्णो नमस्तेऽस्तु प्रसीद मे ॥'

इति देवं संप्रार्थ्य पुष्पाञ्जलिं दत्त्वा अस्त्रेण चक्रमन्त्रेण वा रक्षां कुर्यात् । ततः प्रातर्नित्यपूजां कृत्वा पुनर्देवं संपूज्य गन्धदूर्वाक्षतयुक्तं दमनमादाय मूलमन्त्रं

पठित्वा—

'देवदेव जगन्नाथ वाञ्छितार्थप्रदायक ।
हृदिस्थान्पूरयेः कामान्मम कामेश्वरीप्रिय ॥
इदं दमनकं देव गृहाण मदनुग्रहात् ।
इमां साम्वत्सरीं पूजां भगवन्परिपूरय ॥'

इति मन्त्रान्ते पुनर्मूलमन्त्रेण देवं समर्पयेत् । ततोऽङ्गदेवताभ्यः स्वस्वमन्त्रेण दत्त्वा प्रार्थयेत्—

'मणिविद्रुममालाभिर्मन्दारकुसुमादिभिः ।
इयं सांवत्सरी पूजा तवाऽस्तु गरुडध्वज ॥
वनमालां यथा विष्णो कौस्तुभं सततं हृदि ।
तद्वद्दामनकीं मालां पूजां च हृदये वह ॥
जानताऽजानता वाऽपि न कृतं यत्तवार्चनम् ।
तत्सर्वं पूर्णतां यातु त्वत्प्रसादाद्रमापते ॥
जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश महापुरुषपूर्वज ॥'

'मन्त्रहीनम्' इति च संप्रार्थ्य पञ्चोपचारैः पुनः संपूज्य नीराज्य पारयेदिति । दीक्षारहितानां तु नास्त्येव समर्पणम् । अत्र च द्वादशीमतिक्रम्य कृत्वा पारणाहो ग्राह्यः ।

'पारणाहे न लभ्येत द्वादशी घटिकाऽपि चेत् ।
तदा त्रयोदशी ग्राह्या पवित्रदमनार्पणे' ॥

इति तत्रैवोक्तेः । गौणोऽपि काल उक्तस्तत्रैव—

'*हरौ न दमनारोपः स्यान्मधौ विघ्नतो यदि ।
वैशाखे श्रावणे वाऽपि तत्तिथौ स्यात्तदर्पणम् ॥'

---

*हरौ=द्वादश्याम् ।

'श्रावणाद्यभि शुक्लास्तं कर्तव्यमिति नारदः।'

इति पाठान्तरम्। इदं च मलमासे न कार्यम्।

'उपाकर्मोत्सर्जनं च पवित्रदमनार्पणम्।'

इति कालादर्शे मलमासवर्ज्येषु परिगणनात्।

'उपाकर्म च हव्यं च कव्यं पर्वोत्सवं तथा।

उत्तरे नियतं कुर्यात्पूर्वे तन्निष्फलं भवेत्॥

इति माधवीये प्रजापतिवचनाच्च। शुक्लास्तादौ तु कार्यमेव। पूर्वोक्तवचनात्।

'उपाकर्मोत्सर्जनं च पवित्रदमनार्पणम्।

ईशानस्य बलिं विष्णोः शयनं परिवर्तनम्।

कुर्याच्छुक्रस्य च गुरोर्मौढ्येऽपीति विनिश्चयः॥

इति ज्योतिर्निबन्धे वृद्धगार्ग्यवचनाच्च।

इति दमनारोपः॥

चैत्रशुक्लत्रयोदश्यामनङ्गव्रतं (हेमाद्रौ भविष्ये—

'चैत्रोत्सवे सकललोकमनोविनोदे

कामं त्रयोदशतिथौ च वसन्तयुक्तम्।

पत्न्या सहार्च्य पुरुषप्रवरोऽथ योषित्

सौभाग्यरूपसुतसौख्ययुतः सदा स्यात्॥')(१)

तत्र सा *पूर्वा ग्राह्या।

*पूर्वेति।

'कृष्णाष्टमी बृहत्तपा सावित्री वटपैत्रिकी।

कामत्रयोदशी रम्भा उपोष्याः पूर्वसंयुताः॥'

इति वचनात्।

'त्रयोदशी मकर्तव्या भवेद्या चापराण्हिकी।'

इति स्कान्दन्तु शुक्लत्रयोदशी पौर्वाण्हिकी उत्तराविद्धा न

१—अत्रायं चतुश्चिह्नान्तर्गतो भागो बहुग्रन्थानुपलब्ध्या प्रक्षिप्त इति गम्यते

'त्रयोदश्यादितिथिः पूर्वः मितः' इति दीपिकोक्तेः । चैत्रशुक्लचतुर्दशी *पूर्वा ग्राह्या ।

'नभोः श्रावणमासस्य शुक्ला या तु चतुर्दशी ।
सा रात्रिव्यापिनी ग्राह्या नान्या शुक्ला कदाचन ॥'

इति हेमाद्रौ बौधायनोक्तेः ।

*'परा पूर्वाह्णगामिनी' इति वा पाठः । अत्र केचिद्यथाश्रुतमेवार्थं वर्णयन्ति ।

'निशि भ्रमन्ति भूतानि शक्तयः शूलभृद्यतः ।
अतस्तत्र चतुर्दश्यां सत्यां तत्पूजनं भवेत् ॥'

इति ब्रह्मवैवर्तात् । हेमाद्रिमाधवादीनामप्येवम् । संप्रदायविदस्त्वाहुः—

'चतुर्दशी तु कर्तव्या त्रयोदश्या युता विभो ।

इति स्कान्दमुत्सर्गः । तदपवादश्च—

तृतीयैकादशी षष्ठी शुक्लपक्षे चतुर्दशी ।
पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुता ॥'

इति नारदीयवचनं, तदपवादश्च—'नभोः श्रावणमासस्य' इति, तत्र 'अपवादाभावे पुनरुत्सर्गस्य स्थितिः' । इति न्यायेन*पूर्वविद्धैव ग्राह्येति सिध्यति । ब्रह्मवैवर्तं तु सामान्यरूपमन्यत्र सावकाशमिति । तेन पूर्व-

---

ग्राह्या किन्तु आपराह्णिकी पूर्वविद्धेत्यर्थ इति केचित् । परे तु सायाह्नव्यापिनी आपराह्णिकी चेदिति सामान्यतो निर्णयः । अतस्त्रयोदशी तु अनापराह्णव्यापिनी सायाह्नव्यापिनीति वाक्यद्वयं सार्थकमित्याहुः ॥ *पूर्वेति* । दमनपवित्रारोपादौ इति शेषः । *परा=मासान्तरवर्तिनी शुक्ला पूर्वाह्णगामिनी उत्तरविद्धेत्यर्थः । *पूर्वविद्धैवेति* । पूर्वविद्धात्वस्य रात्रिव्यापित्व-

दिने मुहूर्तत्रयगत्वेऽपि पूर्वा अन्यथोत्तरेति ॥

चैत्रपूर्णिमा सामान्यनिर्णयात्परैव । अत्र विशेषो निर्णयामृते विष्णुस्मृतौ–'चैत्री चित्रायुता चेत्स्यात्तस्यां चित्रवस्त्रप्रदानेन सौभाग्यमाप्नोति' इति ।' तथा ब्राह्मे—

'मन्दे वाऽर्के गुरौ वाऽपि वारेष्वेतेषु चैत्रिका ।
तत्राश्वमेधजं पुण्यं स्नानश्राद्धादिभिर्लभेत् ॥' इति ।

अत्र सर्वदेवानां दमनकपूजोक्ता तत्रैव वायवीये-

संवत्सरकृतार्चायाः साफल्यायाखिलान् सुरान् ।
दमनेनार्चयेच्छ्यां विशेषेण सदाशिवम् ॥ इति ।

अत्र स्वतिथ्या समुच्चय इति केचित् । *स्वीयतिथ्यामकरणेऽत्र दमनपूजनमित्यन्ये । दीक्षितनदिनरविषयत्वेन व्यवस्थेत्यपरे । इयं मन्वादिरपि । सा च पूर्वमुक्ता ॥

*चैत्रकृष्णत्रयोदश्यां महावारुणीसंज्ञो योगो गौ-

ण्याप्यत्वात्तथोक्तम् । एतेन 'पूर्वाह्णव्याप्तित्वस्यापि विधाने वाक्यभेदः । मधुश्रावणशुक्लचतुर्दशीभिन्नानां पूर्वाह्णगानां ग्रहणस्याप्राप्तेरनुवादकत्वासंभवात्'इत्यपास्तम् । *स्वीयेति ॥ 'तत्र स्यात्स्वीयतिथिषु'इत्युक्तेः ॥

*चैत्रकृष्णेति । तिथिकृत्यत्वात्कृष्णादिर्मासो न तु शुक्लादिः । चित्रातः शतभिष एकादशत्वेन पक्षह्रासेऽपि चैत्रोत्तरत्रयोदश्या असम्भवात् । गङ्गास्नानं च रात्र्यादावपि कार्यम् ।

'दिवा रात्रौ च संध्यायां गङ्गायां च प्रसङ्गतः ।
(प्रसङ्गतश्चेत्यन्वयः ।)
स्नात्वाऽश्वमेधजं पुण्यं गृहेऽप्युद्धृतजलैः ॥'

इति ब्रह्माण्डात् । एवं महानिशायामपि ।

'महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम् ।

देषु प्रसिद्धः । तदुक्तं वाचस्पतिकृतौ शूलपाणौ च स्कान्दे—

'वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी ।
गङ्गायां यदि लभ्येत सूर्यग्रहशतैः समा ॥
शनिवारसमायुक्ता सा महावारुणी स्मृता ।
गङ्गायां यदि लभ्येत कोटिसूर्यग्रहैः समा ॥
शुभयोगसमायुक्ता शनौ शतभिषा यदि ।
महामहेति विख्याता त्रिकोटिकुलमुद्धरेत् ॥'

तत्रैव ज्योतिषे—

'चैत्रासिते वारुणऋक्षयुक्ता
त्रयोदशी सूर्यसुतस्य वारे ।
योगे शुभे सा महती महत्या
गङ्गाजलेऽर्कग्रहकोटितुल्या ॥' इति ।

त्रिस्थलीसेतौ ब्रह्माण्डपुराणे-

'वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी ।
गङ्गायां यदि लभ्येत शतसूर्यग्रहैः समा ॥' इति ।

कल्पतरौ ब्राह्मे—

'मधौ कृष्णत्रयोदश्यां शनौ शतभिषायुता ।
वारुणीति समाख्याता शुभे तु महती स्मृता' ॥

तत्र स्नानं न कर्तव्यं काम्यनैमित्तिकादृते ॥'
इति देवलोक्तेः । यत्तु-

'त्रयोदश्यां तृतीयायां दशम्यां च विशेषतः ।
शूद्रविट्क्षत्रियाः स्नानं नाचरेयुः कथं च न ॥'
'स्नानं कुर्वन्ति या नार्यश्चन्द्रे शतभिषाकृते ।
सप्त जन्म भवेयुस्ता दुर्भगा विधवा ध्रुवम् ॥'
इति निषेधद्वयन्तु भोगार्थस्नानपरम् ।

*चैत्रकृष्णचतुर्दश्यां विशेषः पृथ्वीचन्द्रोदये । पुलस्त्यः—

'चैत्रकृष्णचतुर्दश्यां यः स्नायाच्छिवसन्निधौ ।
न प्रेतत्वमवाप्नोति गङ्गायां तु विशेषतः' ॥ इति ।

अत्र पूर्वा ग्राह्या कृष्णपक्षस्थत्वात् । गौडैस्त्वेतदेव शुक्लचतुर्दश्यामित्येवं देवलीयत्वेन पठितम् ॥

इति श्रीरामकृष्णभट्टसूरिसूनुकमलाकरभट्टकृते कालनिर्णयसिन्धौ चैत्रमासः ॥

मेषसंक्रमे प्रागपरा दश दश घटिकाः पुण्यकालः । रात्रौ तु प्रागुक्तम् । अत्र धर्मघटादिदानमुक्तं पृथ्वीचन्द्रोदये पाद्मे—

'तीर्थे चानुदिनं स्नानं तिलैश्च पितृतर्पणम् ।
दानं धर्मघटादीनां मधुसूदनपूजनम् ॥
माधवे मासि कुर्वीत मधुसूदनतुष्टिदम् ॥'

अथ वैशाखस्नानम् । तत्र पृथ्वीचन्द्रोदये विष्णुस्मृतिपाद्मयोः—

'तुलामकरमेषेषु प्रातःस्नानं विधीयते ।
हविष्यं ब्रह्मचर्यं च महापातकनाशनम्' ॥

इति सौरमास उक्तः । अन्यत्पक्षत्रयमुक्तं तत्रैव पाद्मे—

'भोगाय क्रियते यत्तु स्नानं यादृच्छिकं नरैः ।
तन्निषिद्धं दशम्यादौ नित्यनैमित्तिके न तु ॥'

इत्युक्तेः । संकल्पे च वारुण्यादिशब्दैस्तन्मासतिथ्यादिग्रहेऽपि मासादीनामधिकरणत्वेनोल्लेखः । मासादिशब्दैश्च वारुण्यादियोगग्रहेऽपि निमित्तत्वेन तत्तद्योगानाम् । दशहरादिष्वप्ययमेव ।

*चैत्रकृष्णेति । पूर्णिमान्तमानेन तिथिकृत्यत्वात् ॥

इति चैत्रः ॥

'मधुमासस्य शुक्लायामेकादश्यामुपोषितः ।
पञ्चदश्यां च भो वीर मेषसंक्रमणे तु वा ॥
वैशाखस्नाननियमं ब्राह्मणानामनुज्ञया ।
मधुसूदनमभ्यर्च्य कुर्यात्संकल्पपूर्वकम्' ॥

तत्र मन्त्रः—

'वैशाखं सकलं मासं मेषसंक्रमणे रवेः ।
प्रातः सनियमः स्नास्ये प्रीयतां मधुसूदनः ॥
मधुहन्तुः प्रसादेन ब्राह्मणानामनुग्रहात् ।
निर्विघ्नमस्तु मे पुण्यं वैशाखस्नानमन्वहम् ॥
माधवे मेषगे भानौ मुरारे मधुसूदन ।
प्रातःस्नानेन मे नाथ फलदो भव पापहन्' ॥ इति।

तीर्थविशेषोऽपि तत्रैवोक्तः—

'मेषसंक्रमणे भानोर्माधवे मासि यत्नतः ।
महानद्यां नदीतीर्थे नदे सरसि निर्झरे ॥
देवखातेऽथवा स्नायाद्यथा प्राप्ते जलाशये ।
दीर्घिकाकूपवापीषु नियतात्मा हरिं स्मरन् ॥' इति।

सङ्कल्पे च *तत्तत्तीर्थनाम ग्राह्यम् । अज्ञाने तु विष्णुतीर्थमिति वदेत् ।

'यदा न ज्ञायते नाम तस्य तीर्थस्य भो द्विजाः ।
तत्रेत्युच्चारणं कार्यं विष्णुतीर्थमिदं त्विति ॥
तीर्थस्य देवता विष्णुः सर्वत्रापि न संशयः ॥

इति तत्रैवोक्तेः ।

---

*तत्तत्तीर्थनामेति । अपिः पूरणीयः । तेन विष्णुतीर्थसमुच्चयात्तत्तीर्थनाम विष्णुतीर्थमिति चेत्यर्थः । 'तीर्थस्य देवता विष्णुः सर्वत्रापि' इति सर्वत्रपदात् । एवं 'नद्यां नद्यन्तरस्मृतिः' इति निषेधो गङ्गास्मरणे न प्रवर्तते ।

तथाऽन्योऽपि विशेषस्तत्रैव पाद्मे—

'तुलसी कृष्णगौराख्या तयाऽभ्यर्च्य मधुद्विषम् ।
विशेषेण तु वैशाखे नरो नारायणो भवेत् ॥
माधवं सकलं मासं तुलस्या योऽर्चयेन्नरः ।
त्रिसंध्यं मधुहन्तारं नास्ति तस्य पुनर्भवः' ॥

तथा—

'प्रातः स्नात्वा विधानेन माधवे माधवप्रियम् ।
योऽश्वत्थमूलमासिञ्चत्तोयेन बहुना सदा ॥
कुर्यात्प्रदक्षिणं तं तु सर्वदेवमयं ततः ।
पितृदेवमनुष्यांश्च तर्पयेत्सचराचरम् ॥
योऽश्वत्थमर्चयेद्देवमुदकेन समन्ततः ।
कुलानामयुतं तेन तारितं स्यान्न संशयः ॥
कण्डूयं पृष्ठतो गां तु स्नात्वा *पिप्पलतर्पणम् ।
कृत्वा गोविन्दमभ्यर्च्य न दुर्गतिमवाप्नुयात्' ॥

तथा—

'एकभक्तमथो नक्तमयाचितमतन्द्रितः ।
माधवे मासि यः कुर्यात्तु भवेत्सर्वमीप्सितम् ॥
वैशाखे विधिना स्नानं देवनद्यादिके बहिः ।
हविष्यं ब्रह्मचर्यं च भूशय्या नियमस्थितिः ॥

'स्नानकालेऽन्यतीर्थेषु कीर्त्यते जान्हवी जलैः ।
विना विष्णुपदीमन्यत्समर्थं नावशोधने ॥'

इति स्कान्देनान्यतीर्थे भागीरथीस्मरणकार्यताबोधनात् । केचित्तु गंगायमुनाशतद्रुसरस्वतीनां स्मरणे न दोषः । 'इमं मे गङ्गे यमुने सरस्वती'इति मन्त्रेणाघमर्षणोक्तेरिति प्राहुः । भागीरथ्यामन्यतीर्थस्मरणं न कार्यम् । प्रयागादिमणिकर्णिकादेः स्मरणं कुर्वन्ति । *पिप्पलतर्पणम्=अश्वत्थसेचनम् ।

व्रतं दानं दमो देवि मधुसूदनपूजनम्।
अपि जन्मसहस्रोत्थं पापं दहति दारुणम्'॥

मदनरत्ने स्कान्दे—

'प्रपा कार्या च वैशाखे देवे देया *गलन्तिका।
उपानद्व्यजनच्छत्रसूक्ष्मवासांसि चन्दनम्॥
जलपात्राणि देयानि तथा पुष्पगृहाणि च।
पानकानि च चित्राणि द्राक्षारम्भाफलान्यपि'॥

निबन्धे—

'ददाति यो हि मेषादौ सक्तूनम्बुघटान्वितान्।
पितॄनुद्दिश्य विप्रेभ्यः सर्वपापैः प्रमुच्यते'॥ इति।

तथा—

'वैशाखे यो घटं पूर्णं सभोज्यं वै द्विजन्मने।
ददाति सुरराजेन्द्र स याति परमां गतिम्॥'

एवं सम्पूर्णस्नानाशक्तौ त्र्यहं वा स्नायात्। तदुक्तं तत्रैव पाद्मे—

त्रयोदश्यां चतुर्दश्यां वैशाख्यां वा दिनत्रयम्।
अपि सम्यग्विधानेन नारी वा पुरुषोऽपि वा॥
प्रातःस्नानः सनियमः सर्वपापैः प्रमुच्यते॥

यदा तु वैशाखे मलमासो भवति तदा काम्यानां तत्र समाप्तिनिषेधात्* मासद्वयं स्नानं तन्नियमाश्च कर्तव्याः। मासोपवासचान्द्रायणादि तु मलमासे एव समापयेत्। तदुक्तं दीपिकायाम्—

'नियतत्रिंशद्दिनत्वाच्छुभे मास्यारभ्य समापयेत् मलिने मासोपवासव्रतम्' इति।

---

*गलन्तिका=सन्ततपतद्धारमुदकपात्रम्(१)। *निषेधादिति।

(१) 'अलिञ्जरः स्यान्मणिकः कर्कर्यालुर्गलन्तिका'। इत्यमरात्।

अत्र दानविशेष उक्तोऽपरार्के वामनपुराणे—

'गन्धाश्च माल्यानि तथा वैशाखे सुरभीणि च ।
देयानि द्विजमुख्येभ्यो मधुसूदनतुष्टये ॥'

एवं स्नाने कृते तस्योद्यापनं कार्यम् । तदुक्तं तत्रैव—

मासमेवं बहिः स्नात्वा नद्यादौ विमले जले ।
एकादश्यां च द्वादश्यां पौर्णमास्यामथापि वा ॥
उपोष्य नियतो भूत्वा कुर्यादुद्यापनं बुधः ।
मण्डलं कारयेदादौ कलशं तत्र विन्यसेत् ॥
निष्केण वा तदर्धेन तदर्धार्धेन वा पुनः ।
शक्त्या वा कारयेद्देवं सौवर्णं लक्षणान्वितम् ॥
लक्ष्मीयुक्तं जगन्नाथं पूजयेदासने बुधः ।
भूषणैश्चन्दनैः पुष्पैर्दीपैर्नैवेद्यसंचयैः ॥
एवं संपूज्य विधिवद्रात्रौ जागरणं चरेत् ।
प्रभाते कृत*मैत्रोऽथ ग्रहवेद्यां ग्रहान्यजेत् ॥
होमं कुर्यात्प्रयत्नेन पायसेन विचक्षणः ।
तिलाज्येन यवैर्वाऽपि सर्वैर्वाऽपि स्वशक्तितः ॥
अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा ।
प्रतद्विष्णु(१)रनेनैव इदं विष्णुरनेन वा ॥

आरब्धं कर्म यत्किञ्चित्तत्तु कार्यम्मलिम्लुचे ।

इत्यनुष्ठानवचनाद्वेत्यपि द्रष्टव्यम् । *मैत्रं=मित्रदेवताकं सन्ध्यादि । सर्वभूतसौहार्दमिति केचित् ।

---

(१) स तु मन्त्रो-ऋग्वेदसंहितायां द्वितीयाष्टके द्वितीयाध्याये—'प्र तद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा' ॥ इति । अस्यार्थः—'स महानुभावो विष्णुः वीर्येण स्वकीयेन वीरकर्मणा पूर्वोक्तरूपेण प्रस्तवते प्रकर्षेण स्तूयते सर्वैः । वीर्येण स्तूयमानत्वे दृष्टान्तः—मृगो न=

व्रतसंपूर्तिसिद्ध्यर्थं धेनुमेकां पयस्विनीम् ।
पादुकोपानहौ छत्रं गुरवे व्यजनं तथा ॥
शय्यां सोपस्करां दद्याद्दीपिकां दर्पणं तथा ।
ब्राह्मणान्भोजयित्वा तेभ्यो दद्याच्च दक्षिणाम् ॥
कलशाञ्जलसम्पूर्णांस्तेभ्यो दद्याद्यवांस्तथा ।
एवं कृते माधवस्य व्रतस्नानविधौ शुभे ॥
फलमाप्नोति सकलं विष्णुसायुज्यमाप्नुयात् ॥'

एतावदशक्तौ तत्रैवोक्तम्—

'वैशाख्यां विधिना स्नात्वा भोजयेद्ब्राह्मणान्दश ।
कृसरं सर्वपापेभ्यो मुच्यते नात्र संशयः' ॥ इति ॥

वैशाखशुक्लतृतीया अक्षय्यतृतीयोच्यते । सा*पूर्वा-

*पूर्वाह्णव्यापिनी=परविद्धा । गौरीव्रते तु द्वितीयावेधः कलाकाष्ठादिरूपोऽपि त्याज्यः ।

तत्र स्वल्पाऽपि परा । यदा परा न लभ्यते तदा द्वितीयाविद्धापि ग्राह्या उक्तवाक्यात् । तदलाभे पूर्वा ।

सिंहादिरिव । यथा [illegible] मृगादीनां सिंहो भीमो=भीतिजनकः कुचरः=कुत्सितहिंसादिकर्ता, कुगमनप्रदेशगन्ता वा । गिरिष्ठाः=पर्वताद्युन्नतप्रदेशस्थायी सर्वैः स्तूयते, तद्वदयमपि मृगः=अन्वेष्टा शत्रूणां, भीमः=भयानकः, सर्वेषां भीत्युत्पादनभूतः । तथा च श्रुतिः—'भीषाऽस्माद्वातः पवते' इत्यादिश्रुतिषु प्रसिद्धम् । किञ्च कुचरः=शत्रुवधादिकुत्सितकर्मकर्ता, कुषु सर्वासु भूमिषु लोकत्रयेषु संचारी वा । तथा गिरिष्ठाः=गिरिवदुच्छ्रितलोकस्थायी । यद्वा गिरि=मन्त्रादिरूपायां वाचि सर्वदा वर्तमानः । ईदृशोऽयं स्वमहिम्ना स्तूयते । किञ्च यस्य विष्णोरुरुषु=विस्तीर्णेषु त्रिषु=त्रिसंख्याकेषु विक्रमणेषु=पादप्रक्षेपेषु विश्वा=सर्वाणि भुवनानि=भूतजातानि अधिक्षियन्ति=आश्रित्य निवसन्ति, स विष्णुः स्तूयते' । इति श्रीसायणाचार्यैर्भाष्ये उक्तः । इममर्थं मनसि निधाय कर्मानुष्ठेयं श्रद्धालुभिरिति तद्बोधनार्थमेतावानर्थो निवेदित इति ज्ञेयम् ।

ह्नव्यापिनी ग्राह्या । दिनद्वयेऽपि तद्व्याप्तौ परैव । तदुक्तं निर्णयामृते नारदीये—

'वैशाखे शुक्लपक्षे तु तृतीया रोहिणीयुता ।
दुर्लभा बुधवारेण सोमेनापि युता तथा ॥
रोहिणीबुधयुक्तापि *पूर्वविद्धा विवर्जिता ।
भक्त्या कृताऽपि मांधात: पुण्यं हन्ति पुराकृतम् ॥
गौरी विनायकोपेता रोहिणीबुधसंयुता ।
विनापि रोहिणीयोगात्पुण्यकोटिप्रदा सदा' ॥ इति ॥

इयं युगादिरपि । सा चोक्ता रत्नमालायाम्—

'माघे पञ्चदशी *कृष्णा नभस्ये च त्रयोदशी ।
तृतीया माधवे शुक्ला नवम्यूर्जे युगादयः' ॥ इति ।

यत्तु गौडाः—

'माघस्य पौर्णमास्यां तु घोरं कलियुगं स्मृतम् ।'

इति ब्राह्मोक्तेः,

'वैशाखमासस्य च या तृतीया
नवम्यसौ कार्तिकशुक्लपक्षे ।
नभस्यमासस्य तमिस्रपक्षे
त्रयोदशी, पञ्चदशी च माघे ॥'

इति विष्णुपुराणे चकारेण तमिस्रपक्षानुषङ्गेऽपि पूर्वानुरोधात्पौर्णमास्येव ज्ञेया । 'द्वे शुक्ले' इत्यादिकं तु निर्मूलमित्याहुः । तन्न ।

'एकादशी तृतीया च षष्ठी चैव त्रयोदशी ।
पूर्वविद्धाऽपि कर्तव्या यदि न स्यात्परेऽहनि ॥'

इत्युक्तवासिष्ठात् । *पूर्वविद्धेति । द्वितीयावेधस्त्रिमुहूर्तः । परदिने च त्रिमुहूर्तैव ग्राह्या ।

*कृष्णेति । काकाक्षिन्यायेनोभयान्वयि । एवं शुक्लेत्यत्रापि ।

'दर्शे तु माघमासस्य प्रवृत्तं द्वापरं युगम् ।'
इति *भविष्यविरोधात् ।

एतेन प्राच्यानुसारात्पूर्णिमायामेव युगादिश्राद्धं वदन् शूलपाणिः परास्तः । *अनेन कल्पभेदाद्युगभेदाद्वा व्यवस्थेति तत्त्वम् । एतेन—

'कार्तिके नवमी शुक्ला माघमासे च पूर्णिमा ।'
इति बृहन्नारदीयं व्याख्यातम् । *निर्मूलत्वोक्तिर्नारदीयाज्ञानकृता । अत्र श्राद्धमुक्तं मात्स्ये—

'कृतं श्राद्धं विधानेन मन्वादिषु युगादिषु ।
हायनानि द्विसाहस्रं पितॄणां तृप्तिदं भवेत् ॥' इति ।
भारतेऽपि
'या मन्वाद्या युगाद्याश्च तिथयस्तासु मानवः ।
स्नात्वा हुत्वा च दत्त्वा च जप्त्वाऽनन्तफलं लभेत् ॥'
इति ।

श्राद्धेऽपि पूर्वाह्णव्यापिनी ग्राह्या ।
'पूर्वाह्णे तु सदा कार्याः शुक्ला मनुयुगादयः ।
दैवे कर्मणि पित्र्ये च कृष्णे चैवापराह्णिकाः ॥'
इति पाद्मोक्तेः ।
'द्वे शुक्ले द्वे तथा कृष्णे युगादी कवयो विदुः ।
शुक्ले पौर्वाह्णिके ग्राह्ये कृष्णे चैवापराह्णिके ॥'

---

*भविष्येति ।
'नवम्यां शुक्लपक्षस्य कार्तिके निरगात्कृतम् ।
त्रेता सिततृतीयायां वैशाखे समपद्यत ॥'
इति पूर्वेण—
'कलिः कृष्णत्रयोदश्यां नभस्ये मासि निर्गतः ॥'
इत्युत्तरेण च वचनेन संश्लिष्टकालत्वादिति भावः । दर्श-पूर्णिमायां वा युगादित्वं व्यवस्थापयति—*तेनेति । *निर्मूल-

इति हेमाद्रौ नारदीयवचनाच्च । दीपिकाऽपि—

'कर्मतिथयः पूर्वाह्णिकाः स्युः सिते विज्ञेया अपराह्णिकाश्च बहुलं' इति । स्मृत्यर्थसारेऽपि मन्वादिश्राद्धेषु शुक्लपक्षे उदयव्यापिनी तिथिर्ग्राह्या, कृष्णपक्षेऽपराह्णव्यापिनी' इति ।

दिवोदासीये गोभिलः—

'वैशाखस्य तृतीयां यः पूर्वविद्धां करोति वै ।
हव्यं देवा न गृह्णन्ति कव्यं च पितरस्तथा ॥' इति ॥

गोविन्दार्णवेऽप्येवम् । तेनेयं पूर्वाह्णव्यापिनी । दिनद्वये तत्त्वे *परैवेति धर्मतत्त्वविदो हेमाद्र्यादयः । अनन्तभट्टस्तु—

'सर्वे धृतिव्यतीपातौ युगमन्वादयस्तथा ।
सन्मुखा उपवासे स्युर्दानादावन्तिमाः स्मृताः ॥'

इत्याह । दानादावित्यत्र *श्राद्धसंग्रहः । उपवासस्त्वग्रे वक्ष्यते । हेमाद्रावप्येवम् । माधवस्तु व्यतीपातः श्राद्धेऽपराह्णव्यापी ग्राह्य इत्याह । स्मृत्यर्थसारे तु कुतुपकालयोगोऽत्युक्तम् । यत्तु मार्कण्डेयः—

'शुक्लपक्षस्य पूर्वाह्णे श्राद्धं कुर्याद्विचक्षणः ।
कृष्णपक्षापराह्णे हि रोहिणं तु न लङ्घयेत् ॥'

रोहिणो=नवमो मुहूर्तः,

*अत्र शुक्लपक्षयुगादिश्राद्धं *पूर्वाह्णे कार्यमिति शूल-

पाण्योक्तिरिति । ग्राह्यस्येत्यादि । *परैवेति । कर्मकालशास्त्रं बाधित्वेत्यादि । *श्राद्धेति । पौर्वाह्णिकत्वेऽप्यपराह्णावच्छेदेन कार्यमिति भावः । सिद्धान्तमाह—*अत्रेति । *पूर्वाह्ण इति । "शुक्लपक्षस्य" इति मार्कण्डेयवाक्येन कृष्णपक्षे श्राद्धारम्भ इव शुक्लपक्षश्राद्धसमाप्तौ रोहिणस्यैवोक्तेः ॥

दिगर्थस्तु कामाचारीणः । निर्णयामृतादयस्तु कालादर्शो-ऽमापराह्णिकमुक्त्वा–'एवं मन्वन्तरादीनां विनिर्णयः' इत्युक्तत्वात् ''वैशुक्ले' इत्यादिवचनं विष्णुपूजनविषयम् । श्राद्धं त्वापराह्णिकमेवेति व्यवस्थां जगुः । सेयं पूर्वोक्तानेकवचोविरोधात् 'पूर्वाह्णे दैविकं कुर्यात्' इत्यादिवचनादेव सिद्धे वचनवैयर्थ्याच्च स्वाकूतव्याविलसितमात्रमित्युपेक्षणीया । किञ्च कालादर्शोक्तिर्न्यायमूला वचोमूला वा ? । नाद्यः । युगादिश्राद्धस्यामाश्राद्धविकृतित्वेन न्यायतोऽपराह्णव्याप्तावपि वचनेन तस्य बाधात् । नान्त्यः । अतिदेशादेवापराह्णप्राप्तेर्वचनवैयर्थ्यात् । 'अप्राप्ते शास्त्रमर्थवत्' इति न्यायात् । तेन यदि कालादर्शोक्तेः कथञ्चिच्छ्रद्धाजाड्येन समाधित्सा, तर्हि न्यायप्राप्तकृष्णपक्षयुगादिविषयत्वेन सा व्यवस्थापनीयेति दिक्* ।

पूर्वाह्णस्तत्र द्वेधाभक्तदिनपूर्वार्धः ।

'द्वेधाभक्तदिनांशकोऽत्र गदितः प्राह्णापराह्णौ' इति दीपिकोक्तेः । माधवादयोऽप्येवम् ।

अत्र विशेषो हेमाद्रौ भविष्ये—

'वैशाखे शुक्लपक्षे तु तृतीयायां तथैव च ।
गङ्गातोये नरः स्नात्वा मुच्यते सर्वकिल्बिषैः ॥
तस्यां कार्यो यवैर्होमो यवैर्विष्णुं समर्चयेत् ।
यवान्दद्यात् द्विजातिभ्यः प्रयतः प्राशयेद्यवान् ॥' इति ।

अत्र दानविशेषस्तत्रैव भविष्ये इमां प्रकृत्य—

दिगर्थस्तु दर्शोऽश्रद्धेय एव । 'द्वे शुक्ले' इति वाक्ये युगादिशब्दे प्रसरन्ती वृत्तिर्युगादिकार्यत्वेनैव प्रसरन्तीति श्राद्धस्यापि क्रोडीकारात् । सर्वग्रन्थेषु अमावस्याहादिपार्थक्येन युगादिश्राद्धतिथिनिर्णयादमातिष्यतिदेशे मानाभावादित्यप्याहुः ।

'उदकुम्भान्सकनकान्सान्नान्सर्वरसैः सह।
यवगोधूमचणकान्सक्तुदध्योदनं तथा॥
ग्रैष्मिकं सर्वमेवात्र सस्यं दाने प्रशस्यते॥' इति।

देवीपुराणेऽपि—
'तृतीयायां तु वैशाखे रोहिण्यृक्षे प्रपूज्य तु।
उदकुम्भप्रदानेन शिवलोके महीयते॥'

मन्त्रस्तु—
'एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः।
अस्य प्रदानात्तृप्यन्तु पितरोऽपि पितामहाः॥
गन्धोदकतिलैर्मिश्रं सान्नं कुम्भं फलान्वितम्।
पितृभ्यः सम्प्रदास्यामि अक्षय्यमुपतिष्ठतु॥' इति।

अत्र च पिण्डरहितं श्राद्धं कुर्यात्।
'अयनद्वितये श्राद्धं विषुवद्वितये तथा।
युगादिषु च सर्वासु पिण्डनिर्वपणादृते॥'
इति हेमाद्रौ पुलस्त्यवचनात्। अत्र रात्रिभोजने प्रायश्चित्तमुक्तं विधाने—
'रात्रौ भुक्ते वत्सरे तु मन्वादिषु युगादिषु।
(१)अभित्यवृष्णिं मन्त्रं च जपेत्तत्र न पातकम्॥' इति।

(१)—"अभि स्ववृष्टिं मदे अस्य युध्यतो रघ्वीरिव प्रवणे सस्रुरूतयः। इन्द्रो यद्वज्री धृषमाणो अन्धसाऽभिनद्वलस्य परिधींरिव त्रितः॥" इति। ऋ० अ० १ अ० ४। अस्य व्याख्या—'ऊतयो मरुतः मदे = सोमपानेन हर्षे सति अस्य = इन्द्रस्य युध्यतो = वृत्रेण सह युध्यमानस्य पुरतः स्ववृष्टिं = स्वभूतवृष्टिमन्तं वृत्रम्, अभि = आभिमुख्येन सस्रुः = जग्मुः। [कथंभूताः] रघ्वीरिव प्रवणे। यथा गमनस्वभावा आपः निम्नदेशे गच्छन्ति। यद् = यदा अन्धसा = सोमलक्षणेनान्नेन पीतेन धृषमाणः = प्रगल्भः सन् वज्री = वज्रवानिन्द्रः वलस्य = संवृण्वतः एतत्संज्ञमसुरम् अभिनत् व्यदारयत्, अवधीदित्यर्थः। तत्र दृष्टान्तः—त्रितः परिधीनिव। देवानां हविर्लेपनिघर्षणाय अग्नेः सकाशादप्सु एकतो द्वितस्त्रित इति त्रयः

अपरार्के यमः—

'कृतोपवासाः सलिले ये युगादिदिनेषु च ।
दास्यन्त्यन्नादिसहितं तेषां लोका महोदयाः ॥' इति ।
वैशाखे मलमासे सति तत्रैव युगादिः कार्या । तथा-
च हेमाद्रौ ऋष्यशृङ्गः—

'दशहरासु नोत्कर्षश्चतुर्ष्वपि युगादिषु ।
उपाकर्मणि चोत्सर्गे ह्येतदिष्टं वृषादिनः ॥' इति ।
एतद्दशहरादिकं वृषादिसंक्रान्ते इष्टम् । 'कन्याचन्द्रे वृषे
रवौ' इत्यादिना सौरमासोक्तेरित्यर्थः । कालादर्शेऽपि—

अब्दादिकृष्णपक्षादिमहालययुगादिषु* ।

इति मलमासकर्तव्येषु परिगणनात् । महालयशब्देन
मघात्रयोदश्युक्तम् इति माधवः । स्मृतिचन्द्रिकायां
तु मासद्वयं कर्तव्यमित्युक्तम् ।

ननु ज्येष्ठशुक्लदशम्यादिदशहराश्चान्द्रा एव मुख्याः तत्कथमनुक्त-
पौक्तिरित्यत आह एतदिति । यद्यपि 'वृषे रवौ' इति सौरमुपजी-
व्यैव दशहरा न तु युगादिस्तथाऽपि 'एतदिष्टं वृषादिनः' इति सि-
द्धवद्धेतुनिर्देशादेव युगादिस्वरूपेऽपि सौर एव मासो ग्राह्य इति
भावः । *युगादिष्विति मन्वाद्युपलक्षणम् । युगादिकार्यं च
युगादितिथिमध्य एव कार्यम् ।

पुत्रा जज्ञिरे । तथा च तैत्तिरीयैः समाम्नातम्—'सोऽङ्गारेणाप अभ्यपात-
यत्, तत एकतोऽजायत, स द्वितीयमभ्यपातयत् ततो द्वितोऽजायत,'
इति । तत्र उदकपानार्थं प्रवृत्तस्य कूपे पतितस्य त्रितस्य भ्रातृभ्यामसुरैः परि-
धयः परिधायकाः कूपस्याच्छादकाः स्थापिताः । तानन्यथा सोऽभिन-
त्त्रत् ।' इति श्रीमत्सायणाचार्याणाम् । अत्र यत्र यत्र मन्त्रास्तेषामर्थाश्च
निर्दिष्टाः तत्र मन्त्रनिर्देशप्रयोजनं स्फुटमेव । विवरणतोऽर्थनिर्देशप्रयो-
जनं च जपकाले तत्तन्मन्त्रार्थज्ञानं तावदवश्यमपेक्षितम् । अन्यथा ज-
पस्य न सम्यक् फलनिष्पत्तिरिति तज्जपस्तदर्थभावनम्' इति श्रीमत्प-
तञ्जलिकृतयोगसूत्रादवगम्यत इति ज्ञेयम् ।

'यौगादिकं मासिकं च श्राद्धं चापरपक्षिकम् ।

'मन्वादौ च युगादौ च ग्रहणे चन्द्रसूर्ययोः ।
व्यतीपाते वैधृतौ च तत्कालव्यापिनी क्रिया ॥'

इति स्कान्दात् । माधवश्च इत्यरुचिः । महालयश्राद्धं कन्याप्रयुक्तमेव । तत्रैव—

'हंसे कन्यासु वर्षास्थे शाकेनापि गृहे वसन् ।
पञ्चम्योरन्तरे दद्यादुभयोरपि पक्षयोः ॥'

इति विधानात् ।

'सूर्ये कन्यास्थिते श्राद्धं यो न कुर्याद् गृहाश्रमी ।
शाकेनापि दरिद्रोऽपि सोऽन्त्यजत्वमुपैष्यति ॥'

इत्यादिनिषेधाच्च । तथा च यदा सिंहोपक्रमः कन्यासमाप्यः प्रथमः पक्षः, कन्योपक्रमस्तुलासमाप्यश्चरमस्तदा पूर्वत्र पञ्चम्यादिपक्षेण परत्र वा सकृत्पक्षेण कन्याभागे श्राद्धम् । यदा तु दर्शान्त्यभाग एव कन्यासंक्रमः तदनन्तरदर्शातिक्रमेण प्रतिपदि तुलासंक्रान्त्या कन्यायामाधिमासस्तदा दर्शश्राद्धवेलां यावासिंहव्याप्तेरधिकमास एव कन्यायां येन केनापि पक्षेण श्राद्धम् । "रोगे चालभ्ययोगेऽपि" इति वचनात् । तथा च महालयशब्दस्य तत्परत्वसम्भवेऽलं मघात्रयोदशीपरत्वेन । यत्तु—

'मासः कन्यागते भानावसंक्रान्तो भवेद्यदि ।
दैवं पित्र्यं तदा कर्म तुलास्थे कर्तुरक्षयम् ॥'

इति वचनं, तन्नोत्कर्षं विधत्ते मानाभावात् । किन्तु पित्र्यमिति सामान्यतः श्रवणात् व्रीहिपाकादिश्राद्धविषयम् । तस्य शरदि विधानेनाश्विनेऽप्राप्तेरिति । महालयपदं तीर्थविशेषपरमिति केचित् । महालयविधावाश्विनादिशब्दानां चान्द्रपरत्वात्तत्पदं चिन्त्यमेवेत्यन्ये ॥

मन्वादिकं नैमित्तिकं च कुर्यान्मासद्वयेऽपि च* ॥' इति।
अपरपक्षः कृष्णपक्षो न तु मलमासः । तस्य तत्र निषेधात् । मदनरत्नेऽपि मरीचिः—

'प्रतिमासं मृताहे च श्राद्धं यत्प्रतिवत्सरम् ।
मन्वादौ च युगादौ च तन्मासोरुभयोरपि ॥' इति।

प्रतिवत्सरं क्रियमाणं कल्पादिश्राद्धमिति स एव तत्त्वाचरणौ ।

अत्र श्राद्धाकरणे प्रायश्चित्तमुक्तं स्मृतिभागे—

(१)'नयस्येत्यादिमन्त्रं च शतवारं तदा जपेत् ।
युगादयो यदा न्यूनाः कृतं नैव चापि यः ॥' इति।

अत्र समुद्रस्नानं प्रशस्तम् । तदुक्तं पृथ्वीचन्द्रोदये सौरपुराणे-

---

*मासद्वयेऽपीति । फलविशेषार्थितया मले, तत्कालावच्छिन्नजीवनरूपनिमित्तवशाच्च शुद्धे इत्यर्थः । उपवासोऽप्युक्तः ।

'कृतोपवासाः सलिलं ये युगादिदिनेषु तु ।
दास्यन्त्यक्षादिसहितं तेषां लोका महोदयाः ॥'

इति यमोक्तेः । सान्नम् -सलिलपूर्णकुम्भादिदानम् । श्राद्धा-

(१) "न यस्य द्यावापृथिवी अनु व्यचो न सिन्धवो रजसो अन्तमानशुः । नोत स्ववृष्टिं मदे अस्य युध्यत एको अन्यच्चकृषे विश्वमानुषक् ॥" इति । ऋ० अ० १ अ० ४ । 'यस्येन्द्रस्य व्यचो व्यापनं द्यावापृथिवी द्यावापृथिव्यौ नान्वानशाते प्राप्तुमसमर्थे बभूवतुः, तथा रजसोऽन्तरिक्षलोकस्य उपरि सिन्धवः स्यन्दनशीला आपः यस्येन्द्रस्य तेजसोऽन्तमवसानं नानशुः न प्रापुः । उत अपि च सोमपानेन मदे हर्षे सति स्ववृष्टिं स्वीकृतवृष्टिं वृत्रादिं युध्यतः युध्यमानस्यास्येन्द्रस्य बलस्यान्तं वृत्रादयो न प्रापुः । अतः हे इन्द्र एकस्त्वम् अन्यत् त्वद्व्यतिरिक्तं विश्वं सर्वं भूतजातम् आनुषक् अनुषक्तं चकृषे । सकलमपि भूतजातं त्वदधीनमभूदिति भावः' इति । अनेन च एवमपरिमितपराक्रमेश्वरस्त्वमस्माकं विहितकर्माकरणरूपं दोषं परिहर्तुमपि समर्थोऽसीति भावोऽवसेयः ।

'युगादौ तु नरः स्नात्वा विधिवल्लवणोदधौ ।
गोसहस्रप्रदानस्य कुरुक्षेत्रे फलं हि यत् ॥
तत्फलं लभते मर्त्यो भूमिदानस्य च ध्रुवम् ॥' इति ।
अयं निर्णयः सर्वयुगादिषु बोद्धव्यः ॥ इति युगादि-
निर्णयः ॥

इयमेव तृतीया परशुरामजयन्ती । सा प्रदोषव्या-
पिनी ग्राह्या । तदुक्तं भार्गवार्चनदीपिकायां स्कान्दभ-
विष्ययोः—

'वैशाखस्य सिते पक्षे तृतीयायां पुनर्वसौ ।
निशायाः प्रथमे यामे रामाख्यः समये हरिः ॥
स्वोच्चगैः षड्ग्रहैर्युक्ते मिथुने राहुसंस्थिते ।
रेणुकायास्तु यो गर्भादवतीर्णो हरिः स्वयम् ॥' इति ।

दिनद्वये तद्व्याप्तावंशतः समव्याप्तौ च परा, अन्य-
था पूर्वैव । तदुक्तं तत्रैव भविष्ये—

'शुक्ला तृतीया वैशाखे शुद्धोपोष्या दिनद्वये ।
निशायाः पूर्वयामे चेदुत्तराऽन्यत्र पूर्विका ॥' इति ।

वैशाखशुक्लसप्तम्यां गङ्गोत्पत्तिः । तदुक्तं पृथ्वीचन्द्रो-
दये ब्राह्मे —

'वैशाखे शुक्लसप्तम्यां जह्नुना जाह्नवी पुरा ।
क्रोधात्पीता पुनस्त्यक्ता कर्णरन्ध्रात्तु दक्षिणात् ॥
तां तत्र पूजयेद्देवीं गङ्गां गगनमेखलाम् ॥' इति ।

अत्र शिष्टाचारान्मध्याह्नव्यापिनी ग्राह्या । दिनद्वये
तद्व्याप्तावव्याप्तावेकदेशव्याप्तौ वा पूर्वा । युग्मवाक्यात् ॥

वैशाखशुक्लद्वादश्यां योगविशेषो हेमाद्रौ ज्योतिः-
शास्त्रे—

करणे तर्पणं ब्राह्मणभोजनं चार्थः । पृथक्वचनान्यन्यत्र । उपवा-

'पञ्चाननस्थौ गुरुभूमिपुत्रौ
मेषे रविः स्याद्यदि शुक्लपक्षे ।
पाशाभिधाना करभेण युक्ता
तिथिर्व्यतीपात इतीह योगः ॥
अस्मिंस्तु गोभूमिहिरण्यवस्त्र-
दानेन सर्वं परिहाय पापम् ।
सुरत्वमिन्द्रत्वमनामयत्वं
मर्त्याधिपत्यं लभते मनुष्यः ॥' इति ।

पञ्चाननः=सिंहः, पाशाभिधाना तिथिः=द्वादशी । करभः=हस्तः ॥

वैशाखशुक्लचतुर्दशी नृसिंहजयन्ती । सा*प्रदोषव्यापिनी ग्राह्या । तदुक्तं हेमाद्रौ नृसिंहपुराणे—

'वैशाखे शुक्लपक्षे तु चतुर्दश्यां निशामुखे ।
मज्जन्मसम्भवं पुण्यं व्रतं पापप्रणाशनम् ॥
वर्षे वर्षे तु कर्तव्यं मम सन्तुष्टिकारणम् ॥' इति ।

दिनद्वयेऽपि तद्व्याप्तावंशतः समव्याप्तौ च परा* । विषमव्याप्तौ त्वधिकव्याप्तिमती । दिनद्वयेऽव्याप्तौ परा । परदिने*गौणकालव्याप्तेः सत्त्वात्पूर्वदिने च तदभावात् । यत्तु—

से तु पूर्वा ।

सवैधृतिर्व्यतीपातो युगमन्वादयस्तथा ।
सन्मुखा उपवासे स्युर्दानादावन्तिमाः स्मृताः ॥

इति वचनात् । *प्रदोषेति ।

'अवतारो नृसिंहस्य प्रदोषसमये द्विजाः ।'

इति स्कान्दात् । जयन्तीषु जन्मकालस्यैव पूजारूपकर्मकालत्वात् । *परेति । संकल्पकाले सत्त्वात् । *गौणकालेति ।

'ततो मध्याह्नवेलायां नद्यादौ विमले जले'।

इत्युपक्रम्य—

'परिधाय ततो वासो व्रतकर्म समारभेत्'।

इति तत्रैवोक्तं, तत्संकल्परूपव्रतोपक्रमविषयम्। न त्वेतावता मध्याह्नव्यापिनी ग्राह्येति भ्रमितव्यम्। पूर्वोक्तवचनविरोधात्।

'वैशाखस्य चतुर्दश्यां सोमवारेऽनिलर्क्षके।
अवतारो नृसिंहस्य प्रदोषसमये द्विजाः'॥

इति टोडरानन्दे स्कान्दात्। "कूर्मः सिंहो बौद्धकल्की च सायम्" इति पूर्वोक्तपुराणसमुच्चयवचनाच्चेति केचित्। तत्त्वं तु पूर्ववचसामनाकरत्वेन निर्मूलत्वात्, हेमाद्रौ नृसिंहपुराणे—

'मज्जन्मसम्भवं पुण्यं व्रतं पापप्रणाशनम्'।

इत्युपक्रम्य—

स्वातिनक्षत्रयोगे च शनिवारे तु मद्व्रतम्।
सिद्धयोगस्य संयोगे वणिजे करणे तथा॥
पुंसां सौभाग्ययोगेन लभ्यते दैवयोगतः।
सर्वैरेतैस्तु संयुक्तं हत्याकोटिविनाशनम्॥
एतदन्यतरे योगे मद्दिनं पापनाशनम्।
केवलेऽपि प्रकर्तव्यं मद्दिने व्रतमुत्तमम्॥
अन्यथा नरकं याति यावच्चन्द्रदिवाकरौ॥'

इत्युक्त्वा—

यत्तु नृसिंहपुराणे—

'वैशाखशुक्लपक्षस्य चतुर्दश्यां विवस्वति।
अस्तंगामिनि सर्वेषां पुरस्तात्स्तम्भमध्यतः॥

'ततो मध्याह्नवेलायां नद्यादौ विमले जले ।'

इत्यादिना मध्याह्न एव व्रतविधानाच्चतुर्दश्युत्तरार्धे वणिजे करणे मध्याह्ने च स्पष्टं जन्म प्रतीयते । संध्यायां जन्म तु काप्यनुक्रमोक्तिकर्तृकं, तत्रत्यनिर्णयश्च हेय एवेति । (१)इयमेव योगविशेषेणातिप्रशस्ता । तदुक्तं तत्रैव—

'स्वातिनक्षत्रयोगे च शनिवारे च मद्व्रतम् ।
सिद्धयोगस्य संयोगे वणिजे करणे तथा ॥
पुंसां सौभाग्ययोगेन लभ्यते दैवयोगतः ।
एभिर्योगैर्विनापि स्यान्मद्दिनं पापनाशनम् ॥
सर्वेषामेव वर्णानामधिकारोऽस्ति मद्व्रते ।
मद्भक्तैस्तु विशेषेण कर्तव्यं मत्परायणैः ॥'

तथा—

'सिंहःस्वर्णमयो देयो मम सन्तोषकारकः ।'

तथा—

'विज्ञाय मद्दिनं यस्तु लङ्घयेत्पापकृन्नरः ।
स याति नरकं घोरं यावच्चन्द्रदिवाकरौ ॥

इदं च संयोगपृथक्त्वन्यायेन नित्यं काम्यं च । अथा-

यत्र भूत महाविष्णुर्नरसिंहाकृतिर्नृप ।
तस्यां व्रतं नरैः कार्यं महाविष्णोरतिप्रियम् ॥'

विवस्वत्यस्तगामिनीति सायाह्नलाभः । भविष्ये च—

'अवतारो नृसिंहोऽभूत् त्रेतायां चादिकल्पके ।
सायंकाले सदसतो रक्षोदमनकारणात् ॥' इति ।

स गौणः । प्रदोषस्य मुख्यकालत्वेन तत्पूर्वस्य सायाह्नस्यैव बहुषु गौणत्वदर्शनात् । वस्तुतस्तु—

---

(१) क्वचित्पुस्तके 'तथा' इत्यधिकम् ।

अत्र विशेषः—मध्याह्ने मृद्गोमयतिलामलकस्नानं कृत्वा—

'नृसिंह देवदेवेश तव जन्मदिने शुभे ।
उपवासं करिष्यामि सर्वभोगविवर्जितः ॥'

इति मन्त्रेण संकल्पं कृत्वा आचार्यं वृत्वा सायंकाले—

'हैमी तु तत्र सन्मूर्तिः स्थाप्या*लक्ष्म्यास्तथैव च ।
पलेन वा तदर्धेन तदर्धार्धेन वा पुनः ॥
यथाशक्ति तथा कुर्याद्वित्तशाठ्यविवर्जितः ॥'

इत्युक्तां नृसिंहमूर्तिं शक्त्या कृतां सुवर्णसिंहं च कलशोपरि सम्पूज्य रात्रौ जागरणं कृत्वा प्रातः पुनः सम्पूज्य—

त्रिमुहूर्तं प्रदोषः स्याद्भानावस्तङ्गते सति ।

इत्युक्तः प्रदोषः । भविष्ये च सायंकालो न तु सायाह्नः । स च—

'नक्षत्रदर्शनात्संध्या सायं तत्परतः स्थितम् ।'

इति लक्षितः । नक्षत्रदर्शनं च घटीत्रयात्मकः कालः ।

'सायंसंध्या त्रिघटिका अस्तादुपरि भास्वतः ।'

इत्युक्तेः । अस्तङ्गामिनीत्यस्यापि अयमेवार्थः । एवं च प्रदोषसायंकालशब्दाभ्यां सायंसंध्योर्ध्वं घटीत्रयं जन्मकालः तत्पूर्वः सायान्हस्तु पूर्वोक्तयुक्त्या गौणकाल इति । *लक्ष्म्या इति । लक्ष्मीनृसिंहाभिप्रायम् । प्रातःकृत्यानन्तरं सूर्यादिभ्यो जन्माष्टम्यां वक्ष्यमाणेन मन्त्रेण व्रतं निवेद्याचम्य प्राणानायम्य सजलं ताम्रपात्रं गृहीत्वा संकल्पं कुर्यात् ।

'नियमं च प्रकुर्वीत दन्तधावनपूर्वकम् ।'

इति नारसिंहात् । दन्तधावनशब्दः प्रातःकृत्योपलक्षणम् । दन्तधावनं च तृणपर्णादिना द्वादशगंडूषैर्वा कार्यम् । उपवासदिने काष्ठनिषेधात् । व्रतिना च मिथ्याभाषणपाखण्ड्यादिसंभाषणं नि-

'नृसिंहाच्युत देवेश लक्ष्मीकान्त जगत्पते ।
अनेनार्घ्यप्रदानेन सफलाः स्युर्मनोरथाः ॥'

इत्यनार्घ्यं दत्त्वा—

'मद्वंशे ये नरा जाता ये जनिष्यन्ति चापरे ॥
तांस्त्वमुद्धर देवेश दुस्तराद्भवसागरात् ।
पातकार्णवमग्नस्य व्याधिदुःखाम्बुवारिभिः ।
तीव्रैश्च परिभूतस्य महादुःखगतस्य मे ॥
करावलम्बनं देहि शेषशायिन् जगत्पते ।
श्रीनृसिंह रमाकान्त भक्तानां भयनाशन ॥
क्षीराम्बुनिधिवासिंस्त्वं चक्रपाणे जनार्दन ।
व्रतेनानेन देवेश भुक्तिमुक्तिप्रदो भव ॥'

राकार्यम् ।

'व्रतस्थेन न कर्तव्या संगतिः पापिभिः सह ।'

इति वचनात् । संकल्पमन्त्रश्च—

'श्रीनृसिंह महोग्रस्त्वं दयां कृत्वा ममोपरि ।
अद्याहं च विधास्यामि व्रतं निर्विघ्नतां नय ॥' इति ।

ततो मध्याह्ने नद्यादौ मृद्गोमयतिलामलकैः स्नात्वा नित्यकृत्यं कृत्वा गृहमागच्छेत् ।

मध्याह्ने संकल्पलिखनं चानुकल्पः । अन्यथा 'नियमं च प्रकुर्वीत' इत्यादिना संकल्पमभिधाय व्रतस्थेनेत्यादिना मिथ्यालापादिवर्जनं च प्रदर्श्य ततो मध्याह्नवेलायामित्यस्याभिधानविरोधात् । 'नित्यकर्म समाचरेत्' इति पाठे नित्यं=मध्याह्नसंध्यादि । ततो गोमयेनोपलिप्तेऽष्टदलं कृत्वा तत्र कलशं संस्थाप्य प्रतिमां हैमीं पलतदर्धतदर्धमितां संस्थाप्य नूतनायामग्न्युत्तारणप्राणप्रतिष्ठे कृत्वा मूलमन्त्रेण वैदिकेन नाम्ना वाऽऽवाहनादि कृत्वा पञ्चामृतेन शुद्धोदकेन च संस्नाप्य यज्ञोपवीतवस्त्रे दत्त्वा आचमनं दद्यात् ।

'स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनीयकम् ।'

इत्युक्तेः ।

'चन्दनं शीतलं दिव्यं चन्द्रकुंकुममिश्रितम् ।
ददामि तव तुष्ट्यर्थं नृसिंह परमेश्वर ॥'

चन्दनम् ।

'कालोद्भवानि पुष्पाणि तुलस्यादीनि वै प्रभो ।
पूजयामि नृसिंह त्वां लक्ष्म्या सह नमोऽस्तु ते ॥'

पुष्पम् ।

'कालागुरुमयं धूपं सर्वदेवसुवल्लभम् ।
करोमि ते महाविष्णो सर्वकामसमृद्धये ॥'

धूपम् ।

'दीपः पापहरः प्रोक्तस्तमोराशिविनाशनः ।
दीपेन लभ्यते तेजस्तस्माद्दीपं ददामि ते ॥'

दीपम् ।

'नैवेद्यं सुखदं चारु भक्ष्यभोज्यसमन्वितम् ।
ददामि ते रमाकान्त सर्वपापक्षयं कुरु ॥'

नैवेद्यम् । ततः फलं ताम्बूलं दक्षिणां च दद्यात् । ततोऽर्घ्यम् ।
तत्र मन्त्रः—

'नृसिंहाच्युत देवेश लक्ष्मीकान्त जगत्पते ।
अनेनार्घ्यप्रदानेन सफलाः स्युर्मनोरथाः ॥'

ततो नीराज्य पुष्पाञ्जलीन्दत्वा स्तोत्रादिना स्तुत्वा प्रार्थयेत् ॥
तत्र मन्त्रः—

'पीताम्बर महाबाहो प्रल्हादभयनाशकृत् ।
यथाभूतेनार्चनेन यथोक्तफलदो भव ॥'

ततो रात्रौ गीतवाद्यपुराणश्रवणादिभिर्जागरणं कृत्वा पुनः प्रातः संपूज्य ब्राह्मणान्तदुद्दिश्य भोजयित्वा मूर्तिं ब्राह्मणाय दद्यात् । मन्त्रः—नृसिंहाच्युतेति ग्रन्थे । गोभूतिलाहिरण्यशय्यादि

इति प्रार्थयेदिति संक्षेपः* ॥

वैशाखपौर्णमास्यां विशेषोऽपरार्के जाबालिनोक्तः—

'शुक्लाम्बुदकुम्भं च वैशाख्यां च विशेषतः ।
निर्दिश्य धर्मराजाय गोदानफलमाप्नुयात् ॥
सुवर्णतिलयुक्तैस्तु ब्राह्मणान्सप्त पञ्च वा ।
तर्पयेदुदपात्रैस्तु ब्रह्महत्यां व्यपोहति ॥' इति ।

उदकुम्भदानमन्त्रस्त्वक्षय्यतृतीयाप्रकरणे उक्तः ।

भविष्येऽपि—

'वैशाखी कार्तिकी माघी तिथयोऽतीव पूजिताः ।
स्नानदानविहीनास्ता न नेयाः पाण्डुनन्दन ॥'

अत्र कृष्णाजिनदानं कार्यम् । तथा च विष्णुः—

'कृष्णाजिने तिलान्कृत्वा हिरण्यं मधुसर्पिषी ।
ददाति यस्तु विप्राय सर्वं तरति दुष्कृतम् ॥' इति ।

इति श्रीरामकृष्णभट्टसूरिसूनुकमलाकरभट्टकृते कालनिर्णयसिन्धौ वैशाखमासः समाप्तः ॥

दत्त्वा प्रार्थयेत् 'मद्वंशे ये नरा' इत्यादि । एवं प्रार्थ्य ततो देवं विसृज्य च यथाविधि उपहारादिकं सर्वमाचार्याय निवेदयेत् ।

'दक्षिणाभिः सुसंतोष्य ब्राह्मणांस्तु विसर्जयेत् ।
मध्याह्ने तु समायुक्तो नरो भुञ्जीत बन्धुभिः ॥' इति ॥

यत्तु मध्याह्ने नृसिंहजन्म, जयन्तीषु तत्काल एव पूजाकालः, तत्कालीना च तिथिरिति, तदसत् । मध्याह्नः प्रातरेव वा व्रतोपक्रमकालः मध्याह्नस्तु व्रताङ्गस्नानविशेषकाल इत्यभिप्रायेणाह—*संक्षेप इति । नृसिंहजयन्तीनवरात्रं महोदधौ—

'षष्ठ्यामारम्भणं कार्यं चतुर्दश्यां समापनम् ।
नवरात्रमिति प्रोक्तं नृसिंहस्य रमापतेः ॥' इति ।

इति वैशाखः ।

वृषसंक्रान्तौ पूर्वाः षोडश घटिकाः पुण्यकालः । रात्रौ संक्रमे सति प्रागेवोक्तम् ॥

ज्येष्ठशुक्लतृतीयायां रम्भाव्रतमुक्तं माधवीये भविष्ये-

'भद्रे कुरुष्व यत्नेन रम्भाख्यं व्रतमुत्तमम् ।

ज्येष्ठशुक्लतृतीयायां स्नाता नियमतत्परा ॥' इति ।

सा पूर्वविद्धा ग्राह्या ।

'*बृहत्तपा तथा रम्भा*सावित्री*वटपैतृकी ।

*कृष्णाष्टमी च भूता च कर्तव्या*संमुखी तिथिः ॥'

इति स्कान्दोक्तेः ॥

*ज्येष्ठशुक्लदशमी दशहरा । तदुक्तं हेमाद्रौ ब्राह्मे—

ज्येष्ठशुक्लप्रतिपदि दशाश्वमेधस्नानम् ।

'ज्येष्ठे मासि सिते पक्षे प्राप्य प्रतिपदं तिथिम् ।

दशाश्वमेधके स्नात्वा मुच्यते सर्वपातकैः ।'

इतिकाशीखण्डात् । *बृहत्तपा=श्रावणकृष्णद्वितीया । *सावित्री=तद्व्रतसंबन्धिपूर्णिमा । *वटपैतृकी=तद्व्रतसंबन्ध्यमावास्या । *कृष्णाष्टमी=कृष्णपक्षाष्टमी । *सम्मुखी=सायाह्नव्यापिनी । त्रिमुहूर्ताभावे तु परा ।

*ज्येष्ठेति । दशम्याः श्रीगङ्गायाश्च क्रमेण दशहरात्वमुक्तम् । दशपापानि मनुनोक्तानि —

'पारुष्यमनृतं चैव पैशुन्यं चापि सर्वशः ।

असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् ॥

अदत्तानामुपादानं हिंसा चैवाविधानतः ।

परदारोपसेवा च कायिकं त्रिविधं स्मृतम् ॥

परद्रव्येष्वभिध्यानं मनसाऽनिष्टचिन्तनम् ।

वितथाऽभिनिवेशश्च मानसं त्रिविधं स्मृतम् ॥' इति ।

'ज्येष्ठे मासि सिते पक्षे दशमी हस्तसंयुता ।
हरते दश पापानि तस्माद्दशहरा स्मृता ॥' इति ।

वाराहेऽपि —

'दशमी शुक्लपक्षे तु ज्येष्ठे मासि कुजेऽहनि ।
अवतीर्णा यतः स्वर्गाद्धस्तर्क्षे च सरिद्वरा ॥
हरते दशपापानि तस्माद्दशहरा स्मृता ॥' इति ।

स्कान्दे तु दशयोगा उक्ताः ।

*'ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः ।
व्यतीपाते*गरानन्दे कन्याचन्द्रे वृषे रवौ ॥
दशयोगे नरः स्नात्वा सर्वपापैः प्रमुच्यते' ॥ इति ।

अत्र बुधभौमयोः कल्पभेदेन व्यवस्था । इयं च यत्रैव योगबाहुल्यं सैव ग्राह्या । योगाधिक्ये फलाधिक्यात् । ज्येष्ठे मलमासे सति तत्रैव दशहरा कार्या न तु शुद्धे ।

---

*ज्येष्ठे इति । ज्येष्ठश्चान्द्रमानेन न तु सौरमानेन । 'वृषे रवौ' इत्यनेन पौनरुक्त्यापातात् । 'वृषे रवौ' इति पुण्यतमत्वार्थम् । नन्वेवं 'दशहरासु' इत्यनुष्ठानवाक्यस्य का गतिः ? दशहरास्वरूपस्य सौराद्यदिनत्वादिति चेन्न । अधिमासे दशहरासु तत्तन्नक्षत्रयोगस्यैव वृषस्थरवेरपि लाभात्तत्रापि सा कार्येत्यर्थात् । अत एव दशहरास्विति अनेकसमुदायाभिप्रायं बहुवचनम् । अन्यथा तद्गतदशसंख्या एकत्वात्तदनुपपत्तेः । एतच्च राशिविशेषस्थरवियोगघटितान्ययोगस्य महाषष्ठीपदं तदितरान्ययोगस्य युगादिपदं च मन्वादीनामुपलक्षणम् । न च बुधहस्तयोग एवानन्द इति कथं पृथक्तदुक्तम्, एवं हस्तस्य दिननक्षत्रस्य कन्याचन्द्राविनाभाव एवेति वाच्यम् । प्रवृत्तिनिमित्तभेदेन तद्भेदात् । बुधनक्षत्रयोः प्रवृत्तिनिमित्तमेकैकमात्रवृत्ति आनन्दपदन्तूभययोरिति । एवं हस्तस्य शुक्लपक्षाविनाभावेऽपि । *अत्रं कल्पभेदः । 'कुजेऽहनि' इत्युक्तेराह — *अत्रेति । *न तु शुद्धे इति ।

'दशहरासु नोत्कर्षश्चतुर्थ्यपि युगादिषु' ।
इति हेमाद्रौ कृष्णशृङ्गोक्तेः । तथा स्कान्दे—
'यां*कांश्चित्सरितं प्राप्य दद्याद्दर्भ तिलोदकम् ।
मुच्यते दशभिः पापैः स महापातकोपमैः' ॥
अत्र विशेषः काशीखण्डे—
'ज्येष्ठे मासि सिते पक्षे प्राप्य प्रतिपदं तिथिम् ।
दशाश्वमेधके स्नात्वा मुच्यते सर्वपातकैः ॥
एवं सर्वासु तिथिषु क्रमस्नायी नरोत्तमः ।
आशुक्लपक्षदशमीं प्रतिजन्माघमुत्सृजेत् ॥'
तथा—
'लिङ्गं दशाश्वमेधेशं दृष्ट्वा दशहरातिथौ ।
दशजन्मार्जितैः पापैस्त्यज्यते नात्र संशयः ॥'
तथा भविष्योत्तरकाशीखण्डयोः—
'निशायां जागरं कृत्वा समुपोष्य च भक्तितः ।
पुष्पैर्गन्धैश्च नैवेद्यैः फलैश्च दशसङ्ख्यया ॥
तथा दीपैश्च ताम्बूलैः पूजयेच्छ्रद्धयाऽन्वितः ।
स्नात्वा भक्त्या तु जाह्नव्यां दशकृत्वो विधानतः ॥
दशप्रसृतिकृष्णांश्च तिलान्सर्पिश्च वै जले ।
सक्तुपिण्डान् गुडपिण्डान्दद्याच्च दशसङ्ख्यया ॥
ततो गङ्गातटे रम्ये हेम्ना रूप्येण वा तथा ।
गङ्गायाः प्रतिमां कृत्वा वक्ष्यमाणस्वरूपिणीम् ॥
संस्थाप्य पूजयेद्देवीं तदलाभे मृदाऽपि च ।
अथ तत्राप्यशक्तश्चेच्छित्वोत्पिष्टेन वै भुवि ॥
वक्ष्यमाणेन मन्त्रेण कुर्यात्पूजां विशेषतः ।

शुद्धेऽपि'इति तु कृत्यरत्नावली । *यां कांचिदिति । श्रीगङ्गा-
या असत्त्वे ।

नारायणं महेशं च ब्रह्माणं भास्करं तथा ॥
भगीरथं च नृपतिं हिमवन्तं नगेश्वरम् ।
गन्धपुष्पादिभिः सम्यग्यथाशक्ति प्रपूजयेत् ॥
दशप्रस्थांस्तिलान्दद्याद्दशविप्रेभ्य एव च ।
दशप्रस्थान्यवान्दद्याद्दशसङ्ख्यागवांस्तथा ॥'

प्रस्थः=षोडशपलानि । पलं तु 'मुष्टिमात्रं पलं स्मृतम्' इति महार्णवे उक्तम् ।

'मत्स्यकच्छपमण्डूकमकरादिजलेचरान् ।
हंसकारण्डवबकचक्रटिट्टिभसारसान् ॥
कारयित्वा यथाशक्ति स्वर्णेन रजतेन वा ।
तदभावे पिष्टमयानभ्यर्च्य कुसुमादिभिः ॥
गङ्गायां प्रक्षिपेद्राजन्नुपवासांश्च कारयेत् ।
पुष्पाद्यैः पूजयेद्गङ्गां मन्त्रेणानेन भक्तितः ॥
'ॐ नमः शिवायै नारायण्यै दशहरायै गङ्गायै नमो नमः ।'
इति मन्त्रं तु यो मर्त्यो दिने तस्मिन्दिवानिशम् ।
जपेत्पञ्चसहस्राणि दशधर्मफलं लभेत्' ॥

काशीखण्डे त्वन्यो मन्त्र उक्तः—

'नमः शिवायै प्रथमं नारायण्यै पदं ततः ।
दशहरायै पदमिति गङ्गायै मन्त्र एव वै ॥
स्वाहान्तः प्रणवादिश्च भवेद्विंशाक्षरो मनुः ।
पूजा दानं जपो होमस्तेनैव मनुना स्मृतम् ।' इति ।

अत्र गङ्गास्तोत्र(१)पाठमपि दशवारं कुर्यात् । तदुक्तं

१—तच्च स्तोत्रं तत्पाठविधिश्च उक्तो धर्मसिन्धौ । यथा—'ब्रह्मोवाच-नमः शिवायै गङ्गायै शिवदायै नमो नमः । नमस्ते रुद्ररूपिण्यै शाङ्कर्यै ते नमो नमः ॥ नमस्ते विश्वरूपिण्यै ब्रह्ममूर्त्यै नमो नमः । सर्वदेवस्वरूपिण्यै नमो भेषजमूर्तये ॥ सर्वस्य सर्वव्याधीनां भिषक्श्रेष्ठ्यै नमोऽस्तु ते । स्थाणुजङ्गमसम्भूतविषहन्त्र्यै नमो

भविष्ये—

'तस्यां दशम्यामेतच्च स्तोत्रं गङ्गाजले स्थितः ।
यः पठेद्दशकृत्वस्तु दरिद्रो वाऽपि चाक्षमः ॥
सोऽपि तत्फलमाप्नोति गङ्गां संपूज्य यत्नतः ॥' इति ।

नमः । भोगोपभोगदायिन्यै भोगवत्यै नमो नमः । मन्दाकिन्यै नमस्तेऽस्तु स्वर्गदायै नमः सदा ॥ नमस्त्रैलोक्यभूषायै जगद्धात्र्यै नमो नमः । नमस्त्रिशुक्लसंस्थायै तेजोवत्यै नमो नमः ॥ नन्दायै लिङ्गधारिण्यै नारायण्यै नमो नमः । नमस्ते विश्वमुख्यायै रेवत्यै ते नमो नमः ॥ बृहत्यै ते नमस्तेऽस्तु लोकधात्र्यै नमो नमः । नमस्ते विश्वमित्रायै नन्दिन्यै ते नमो नमः ॥ पृथ्व्यै शिवामृतायै च सुवृषायै नमो नमः । शान्तायै च वरिष्ठायै वरदायै नमो नमः ॥ उस्रायै सुखदोग्ध्र्यै च सञ्जीविन्यै नमो नमः । ब्रह्मिष्ठायै ब्रह्मदायै दुरितघ्न्यै नमो नमः ॥ प्रणतार्तिप्रभञ्जिन्यै जगन्मात्रे नमोऽस्तु ते । सर्वापत्प्रतिपक्षायै मङ्गलायै नमो नमः ॥ शरणागतदीनार्तपरित्राणपरायणे । सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥ निर्लेपायै दुर्गहन्त्र्यै दक्षायै ते नमो नमः । परात्परतरे तुभ्यं नमस्ते मोक्षदे सदा ॥ गङ्गे ममाग्रतो भूया गङ्गे मे देवि पृष्ठतः । गङ्गे मे पार्श्वयोरेहि त्वयि गङ्गेऽस्तु मे स्थितिः ॥ आदौ त्वमन्ते मध्ये च सर्वं त्वं गां गते शिवे । त्वमेव मूलप्रकृतिस्त्वं हि नारायणः परः ॥ गङ्गे त्वं परमात्मा च शिवस्तुभ्यं नमः शिवे । य इदं पठति स्तोत्रं भक्त्या नित्यं नरोऽपि यः ॥ शृणुयात् श्रद्धया युक्तः कायवाक्चित्तसम्भवैः । दशधा संस्थितैर्दोषैः सर्वैरेव प्रमुच्यते ॥ सर्वान्कामानवाप्नोति प्रेत्य ब्रह्मणि लीयते । ज्येष्ठे मासि सिते पक्षे दशमी हस्तसंयुता ॥ तस्यां दशम्यामेतच्च स्तोत्रं गङ्गाजले स्थितः । यः पठेद्दशकृत्वस्तु दरिद्रो वापि चाक्षमः ॥ सोऽपि तत्फलमाप्नोति गङ्गां संपूज्य यत्नतः । अदत्तानामुपादानं हिंसा चैवाविधानतः ॥ परदारोपसेवा च कायिकं त्रिविधं स्मृतम् । पारुष्यमनृतं चैव पैशुन्यं चापि सर्वशः ॥ असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् । परद्रव्येष्वभिध्यानं मनसाऽनिष्टचिन्तनम् ॥ वितथाभिनिवेशश्च मानसं त्रिविधं स्मृतम् । एतानि दश पापानि हर त्वं मम जाह्नवि ॥ दशपापहरा यस्मात्तस्माद्दशहरा स्मृता । त्रयस्त्रिंशच्छतं पूर्वान् पितॄनथ पितामहान् ॥ उद्धरत्येव संसारान्मन्त्रेणानेन पूजिता ॥ नमो भगवत्यै दशपापहरायै गङ्गायै नारायण्यै रेवत्यै शिवायै दक्षायै अमृ-

स्तोत्रं च प्रतिपदादिदशम्यन्तं दिनवृद्धिसंख्यया पठनीयमिति शिष्टाः। अत्र सर्वोऽपि विस्तरः स्तोत्रादि च भट्टकृतत्रिस्थलीसेतोरवगन्तव्यः। विस्तरभीतेस्तु न लिख्यते। एवं कुर्वतः फलमुक्तं काशीखण्डे—

'एवं कृत्वा विधानेन वित्तशाठ्यविवर्जितः।
उपवासी वक्ष्यमाणैर्दशपापैः प्रमुच्यते ॥
सर्वान्कामानवाप्नोति प्रेत्य ब्रह्मणि लीयते ॥' इति।

अस्यां सेतुबन्धरामेश्वरस्य प्रतिष्ठादिनत्वाद्विशेषेण पूजा कार्या। तदुक्तं स्कान्दे सेतुमाहात्म्ये—

'ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः।
गरानन्दे व्यतीपाते कन्याचन्द्रे वृषे रवौ ॥
दशयोगे सेतुमध्ये लिङ्गरूपधरं हरम्।
रामो वै स्थापयामास शिवलिङ्गमनुत्तमम् ॥' इति।

इति दशहरा ॥

ज्येष्ठशुक्लैकादशी निर्जला। तत्र निर्जलमुपोष्य विप्रेभ्यो जलकुम्भान्दद्यादिति निर्णयामृते उक्तम्। मदनरत्ने स्कान्दे—

'ज्येष्ठे मासि नृपश्रेष्ठ या शुक्लैकादशी शुभा।
निर्जलं समुपोष्यात्र जलकुम्भान्सशर्करान् ॥
प्रदाय विप्रमुख्येभ्यो मोदते विष्णुसन्निधौ।'

तापि विश्वकार्पण्यं नाशिन्यै ते नमो नमः॥ सितमकरनिषण्णां शुभ्रवर्णां त्रिनेत्रां करधृतकलशोद्यत्सोत्पलामभ्यभीष्टाम्। विधिहरिहररूपां सेन्दुकोटीरजुष्टां कलितसितदुकूलां जाह्नवीं तां नमामि॥ आद्यावादिपितामहस्य नियमव्यापारपात्रे जलं पश्चात्पन्नगशायिनो भगवतः पादोदकं पावनम्। भूयः शम्भुजटाविभूषणमणिर्जह्नोर्महर्षेरियं देवी कल्मषनाशिनी भगवती भागीरथी दृश्यते॥ गङ्गा गङ्गेति यो ब्रूयाद्योजनानां शतैरपि। मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति॥' इति॥

ज्येष्ठपौर्णमास्यां सावित्रीव्रतम् । तदुक्तं स्कान्दभविष्ययोः—

'ज्येष्ठे मासि सिते पक्षे द्वादश्यां रजनीमुखे ।'

इत्युपक्रम्य—

'व्रतं त्रिरात्रमुद्दिश्य दिवारात्रिं स्थिरा भवेत् ।'

इति अन्तेऽप्युपसंहृतम् ।

'ज्येष्ठे मासि सिते पक्षे पूर्णिमायां तथा व्रतम् ।
चीर्णं पुरा महाभक्त्या कथितं ते मया नृप ॥' इति ।

दाक्षिणात्याश्चैतदेवाद्रियन्ते । एतच्चामावास्यायामप्युक्तं निर्णयामृते भविष्ये—

'अमायां च तथा ज्येष्ठे वटमूले महासती ।
त्रिरात्रोपोषिता नारी विधिनाऽनेन पूजयेत् ॥'

मदनरत्ने त्विदं वाक्यम्—'पञ्चदश्यां तथा ज्येष्ठे' इति पठित्वा ज्येष्ठपौर्णमास्यामुक्तम् ।

'अशक्तौ तु त्रयोदश्यां नक्तं कुर्याज्जितेन्द्रिया ।
अयाचितं चतुर्दश्याममायां समुपोषणम् ॥' इति ।

तत्तु पाश्चात्या आद्रियन्ते । हेमाद्रिसमयोद्द्योतादिषु तु भाद्रपदपूर्णिमायामुक्तम् । तत्तु नेदानीं प्रचरति ।

गौडास्तु—

'मेषे वा वृषभे वापि सावित्रीं तां विनिर्दिशेत् ।
ज्येष्ठशुक्लचतुर्दश्यां सावित्रीमर्चयन्ति याः ॥
वटमूले सोपवासा न ता वैधव्यमाप्नुयुः ॥

इति पराशरोक्तेश्चतुर्दश्यां प्रदोषे व्रतम् । दिनद्वये तद्व्याप्तौ परैवेत्याहुः । तन्निर्मूलम् । अत्र पूर्णिमामावास्ये पूर्वविद्धे ग्राह्ये ।

'भूतविद्धा न कर्तव्या अमावास्या च पूर्णिमा ।

वर्जयित्वा नरश्रेष्ठ सावित्रीव्रतमुत्तमम् ॥'
इति ब्रह्मवैवर्तात् । स्कान्देऽपि—

'भूतविद्धा सिनीवाली न तु तत्र व्रतं चरेत् ।
वर्जयित्वा तु सावित्रीव्रतं तु शिखिवाहन ॥' इति ।
मदनरत्ने ब्रह्मवैवर्तेऽपि

'प्रतिपत्पञ्चमी भूतसावित्री *वटपूर्णिमा ।
नवमी दशमी चैव नोपोष्याः परसंयुताः ॥' इति ।
यदा त्वष्टादशघटिका चतुर्दशी तदा परा ग्राह्या ।
'पूर्वविद्धैव सावित्रीव्रतं पञ्चदशी तिथिः ।
नाड्योऽष्टादश भूतस्य स्युश्चेत्सा परेऽहनि ॥
इति माधवः । *वस्तुतस्तु—

'भूतोऽष्टादशनाडीभिर्दूषयत्युत्तरां तिथिम् ।'
इत्यस्य व्रतान्तरे सावकाशत्वाद्विशेषप्रवृत्तपूर्वविद्धा-

---

*सावित्री=तद्व्रतसंबन्ध्यमावास्या । *वटपूर्णिमा=तद्व्रतसंबन्धिपूर्णिमा ॥ नन्वेवं षण्मुहूर्तपरिमितपञ्चमीवेधवत्यां षष्ठ्यां स्कन्दव्रतमपि न स्यात् । 'नागो द्वादशनाडीभिः' इति वाक्येन षण्मुहूर्तमितपञ्चम्या दूषकत्वात् । किंच स्कन्दव्रते तिथिक्षये पूर्वेति माधवादिग्रन्थोऽसंगतः । त्रिमुहूर्ताऽधिकक्षयाभावेनोत्तरदिने तादृशविद्धायास्त्रिमुहूर्तसत्त्वावश्यकभावेन

एकादशी तृतीया च षष्ठी चैव त्रयोदशी ।
पूर्वविद्धाऽपि कर्तव्या यदि न स्यात्परेऽहनि ॥
इति वासिष्ठवचनाविषयत्वादित्यत आह—*वस्तुतस्त्विति ॥ 'नागो द्वादश' इत्यादेर्दूषकताऽनुवादेन नाडीविशेषाविधायकत्वं लाघवात् । वेधविशिष्टदूषकताविधाने गौरवात् । तथा च यत्र व्रते पञ्चमीविद्धा षष्ठी निषिद्धा तद्विषयकमेतत् । स्कन्दव्रते पञ्चमीवि-

विधायकवचनेन तस्य याधादष्टादशनाडीवेधेऽपि पूर्वैवे-त्ययं पन्थाः साधुः । *अत्र पूर्णिमानुरोधेनैव यथा त्रि-रात्रसंपत्तिर्भवति तथा त्रयोदश्यादि ग्राह्यम् । तस्याः प्रधानत्वात्* । अयं निर्णयोऽमायामपि ज्ञेयः । पारणं तु द्धाया ग्राह्यत्वात् तत्र पञ्चमीवेधस्यादूषकत्वात् । षण्मुहूर्तपञ्चमी-युतायामपि तत्कर्तव्यमेव तद्वत् । यत्र व्रते चतुर्दशीविद्धा निषिद्धा तद्विषयकतया सावित्रीव्रते च—

बृहत्तपा तथा रम्भा सावित्री वटपैतृकी ।
कृष्णाष्टमी च भूता च कर्तव्या संमुखी तिथिः ॥

इति पूर्वविद्धाविधानेन तस्या ग्राह्यत्वात्तत्र चतुर्दशीवेधो न दूषक इत्यर्थः ॥ उक्तवासिष्ठं च परेऽह्नि एकभक्तादिकाले मध्याह्नादौ षष्ठ्याद्यभावे सामान्यतो निषिद्धाया नागविद्धायाः प्रतिप्रसवार्थ-मिति स्मर्तव्यम् । ननु केचन सोपपदाः त्रिरात्रादिशब्दाः । यथा सावित्रीत्रिरात्र–बिल्वत्रिरात्र–गोत्रिरात्र–दुर्गानवरात्रादिमध्यगाः । तानि कर्मनामधेयान्येव तत्तद्देवतातत्कालसंबन्धयोः प्रमाणान्तर-गोचरत्वेन प्रवृत्तिनिमित्तसंभवात् । ननु निरुपपदास्त्रिरात्रनवरात्रादि-शब्दाः । बहुव्रीहौ समासान्ताऽसंभवेनावश्यकसमाहारत्वेन 'न त्रिरा-त्रमुपवसेत् नवरात्रे विशेषतः' इत्यादौ अत्यन्तसंयोगार्थकाद्वितीयया सप्तम्या वा गुणविधौ संभवति लक्षणया नामधेयत्वानौचित्यात्, त्रयोदश्यादिवाक्यानि च प्राप्ते त्रिरात्रादिसामान्ये विशेषविधयः गुणविधित एव त्रिरात्रादिशब्दे रात्रिशब्दस्तिथिपरः । एवं च यत्र चरमतिथिकृत्यमेव प्रधानं तिथ्यन्तरकृत्यं त्वङ्गं तत्र साङ्गप्रधानप्रयोगः । तावत्कालिक इति प्रधान-तिथ्यनुरोधेनेतरतिथिग्रहोऽयुक्तः । पूर्वापरतिथिकृत्याङ्गकैकादशी-व्रतादौ तु त्रिरात्रादिव्यवहारविरहस्त्वनादेस्तस्यापर्यनुयोज्यत्वा-त् । प्रकृते तु तिथित्रयकृत्यं प्रधानमतः कथमित्यत्राह—*अत्रेति । *प्रधानत्वादिति । यद्यपि तिथित्रयकृत्यं प्रधानं तथाऽपि वट-

पूर्णिमान्ते कार्यम् ॥

अत्र व्रतेषु विशेषः परिभाषायामुक्तः । अत्र विशेषो भविष्ये—

'गृहीत्वा वालुकां पात्रे प्रस्थमात्रां युधिष्ठिर ।
ततो*वंशमये पात्रे वस्त्रयुग्मेन वेष्टितं ॥
सावित्रीप्रतिमां कुर्यात्सौवर्णीं वापि मृन्मयीम् ।
सार्धं सत्यवता साध्वीं फलैर्नैवेद्यदीपकैः ॥
रजन्या कण्ठसूत्रैश्च शुभैः कुङ्कुमकेसरैः ॥'

पूजयेदिति शेषः । रजनी=हरिद्रा । कण्ठसूत्रं=सौभाग्यतन्तुः ।

'सावित्र्याख्यानकं चापि वाचयीत द्विजोत्तमैः ।
रात्रौ जागरणं कृत्वा प्रभाते विमले ततः ॥
तामपि ब्राह्मणे दत्त्वा प्रणिपत्य क्षमापयेत् ॥'

मन्त्रस्तु—

'सावित्रीयं मया दत्ता सहिरण्या महासती ।
ब्रह्मणः प्रीणनार्थाय ब्राह्मण प्रतिगृह्यताम् ॥
अनेनानेन राजेन्द्र वैधव्यं नाप्नुयात्क्वचित् ॥' इति ॥

ज्येष्ठपौर्णमास्यां विशेष आदित्यपुराणे—

'ज्येष्ठे मासि तिलान्दद्यात्पौर्णमास्यां विशेषतः ।
अश्वमेधस्य यत्पुण्यं तत्प्राप्नोति न संशयः ॥'

विष्णुरपि—

पूर्णिमा वटपैतृकीत्यादिसमाख्यया त्रयोदशीचतुर्दश्योरुपवासानुकल्पविधानं च पूर्णिमादेर्निर्णयोपजीव्यत्वरूपं प्राधान्यं द्योतयति । तथा निर्णीतपूर्णिमादेरव्यवहितपूर्वतिथ्योरनुकल्पवाक्ये त्रयोदश्यादिशब्देन ग्रह इत्यर्थः । *वंशमये पात्रे । पात्रं च सप्तधान्यपूर्णं कार्यम् । 'सप्तधान्यभृतं कार्यम्' इति कथायामुक्तेः ॥

'ज्यैष्ठी ज्येष्ठायुता चेत्स्यात्तस्यां छत्रोपानत्प्रदानेन नरो नराधिपत्यमाप्नोति' इति ।

हेमाद्रौ ज्योतिषे—

'ऐन्द्रे गुरुः शशी चैव प्राजापत्ये रविस्तथा ।
पूर्णिमा ज्येष्ठमासस्य महाज्येष्ठी प्रकीर्तिता ॥' इति ।

इयं मन्वादिरपि । सा पौर्वाह्णिकी ग्राह्या । विशेषस्तु चैत्रे उक्तः । तथाऽपरार्के वामनपुराणे—

'उदकुम्भाम्बुदानं च *तालवृन्तं सचन्दनम् ।
त्रिविक्रमस्य प्रीत्यर्थं दातव्यं ज्येष्ठमासि तु ॥' इति ।

इति कमलाकरभट्टकृते निर्णयसिन्धौ ज्येष्ठमासः ॥

मिथुनसंक्रान्तौ पराः षोडश घटिकाः पुण्यकालः । रात्रौ तु प्रागेवोक्तम् । आषाढशुक्लद्वितीयायां रथोत्सवः । तदुक्तं तिथितत्त्वे स्कान्दे—

'आषाढस्य सिते पक्षे द्वितीया पुष्यसंयुता ।
तस्यां रथे समारोप्य रामं वै *भद्रया सह ॥
यात्रोत्सवं प्रवर्त्याथ प्रीणयेत द्विजान्बहून् ॥'

तथा—

'ऋक्षाभावे तिथौ कार्या यात्राऽसा प्रीयते मम ॥'

'इहामुत्रातपत्राणां कुरु मे केशव प्रभो ।
छत्रं त्वत्प्रीतये दत्तं ब्राह्मणाय मया सह ॥'

छत्रमन्त्रः ।

'उपानहौ प्रदास्यामि कण्टकादिनिवारणे ।
सर्वस्थानेषु सुखदे अतः शान्तिं प्रयच्छ मे ॥'

उपानन्हमन्त्रः ।

*तालवृन्तं=तालव्यजनः ॥

इति ज्येष्ठः ॥

आषाढशुक्लदशमी पौर्णमासी च मन्वादिः । सा च पूर्वाह्णव्यापिनी ग्राह्येति प्रागुक्तम् । आषाढशुक्लद्वादश्यामनुराधायोगरहितायां पारणं कुर्यात् । तदुक्तं भविष्ये—

'आभाकासितपक्षेषु मैत्रश्रवणरेवती* ।
सङ्गमे न हि भोक्तव्यं द्वादशी द्वादशीर्हरेत् ॥'

'आषाढभाद्रपदकार्तिकशुक्लद्वादशीष्वनुराधाश्रवणरेवतीयोगे पारणं न कुर्यादिति । अत्र यद्यप्येतावदेवोक्तं तथाप्यनुराधाप्रथमपाद एव वर्ज्यः । तदुक्तं विष्णुधर्मे-

'मैत्राद्यपादे स्वपितीह विष्णुः,
पौष्णान्त्यपादे प्रतिबोधमेति ।
श्रुतेश्च मध्ये परिवर्तमेति
सुप्तिप्रबोधपरिवर्तनमेव वर्ज्यम् ॥' इति ।

वस्तुतस्तु पूर्ववचनमिदं च निर्मूलमेव ॥

अत्रैव विष्णुशयनोत्सव उक्तो हेमाद्रौ ब्राह्मे—

*एकादश्यां तु शुक्लायामाषाढे भगवान्हरिः ।

---

*भद्रा=सुभद्रा ॥ *आभाकेति । गद्यं 'संगवे' इति पाठं वदताम् । रेवतीति लुप्तषष्ठीकम् । संगवे न भोक्तव्यं, प्रातर्मध्याह्नयोस्तु तद्भवत्येवेति तदर्थः । यत्र दिने व्याप्यानुराधा द्वादशी च तत्र प्रातरेव पारणं 'सर्वेषामुपवासानाम्' इत्युक्तेः ॥ *वस्तुतस्त्विति । महानिबन्धेष्वदर्शनात् । *एकादश्यामिति । शयनादीनि निशादिवेलायां कार्याणीति ।

'निशि स्वापो दिवोत्थानं संध्यायां परिवर्तनम्' ।

इत्युक्तेः । तत्तन्नक्षत्रयोगस्तु नापेक्षितः तदनुक्तेः । स्वापविधिर्भविष्ये—

'महापूजां ततः कुर्याद्देवदेवस्य चक्रिणः ।
जातीकुसुममालाभिर्मन्त्रेणानेन पूजयेत् ॥

भुजङ्गशयने शेते क्षीरार्णवजले सदा ॥' इति।

कल्पतरौ यमः—

*'क्षीराब्धौ*शेषपर्यङ्के आषाढ्यां संविशेद्धरिः।
निद्रां त्यजति कार्त्तिक्यां तयोः सम्पूजयेत्सदा॥
ब्रह्महत्यादिकं पापं क्षिप्रमेव व्यपोहति।
हिंसात्मकैस्तु किं तस्य यज्ञैः कार्यं महात्मनः॥
प्रस्वापे च प्रबोधे च पूजितो येन केशवः।

टोडरानन्देऽपि स्कान्दे—

आषाढशुक्लैकादश्यां कुर्यात्स्वप्नमहोत्सवम्।'

अयं द्वादश्यामप्युक्तः

'आभाकासितपक्षेषु मैत्रश्रवणरेवती।
आदिमध्यावसानेषु प्रस्वापावर्तनोत्सवाः॥

'सुप्ते त्वयि जगन्नाथ जगत्सुप्तं भवेदिदम्।
विबुद्धे च विबुध्येत प्रसन्नो मे भवाच्युत॥' इति।

भाद्रशुक्लैकादश्यां विष्णोः परिवर्त्तनमुक्तं भविष्ये—

'मासे भाद्रपदे मासि एकादश्यां दिने सिते।
कटिदानं भवेद्विष्णोर्महापातकनाशनम्॥'

कटिदानम्=अङ्गपरिवर्त्तनम्। तत्र महापूजां कृत्वा परिवर्त्तनं प्रार्थयेत्

'परिवर्त्तस्व देवेश केशवाच्युत भो प्रभो।
त्वयैवैकादशी देव हितार्थं निर्मिता पुरा॥' इति।

कार्त्तिकशुक्लैकादश्यां विष्णोरुत्थापनं पाद्मे—

'एकादश्यां तु शुक्लायां कार्त्तिके मासि केशवम्।
प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वितः॥' इति।

*क्षीराब्धाविति। कल्पतरुकृतामयमाशयः। 'नक्षत्रेण युक्तः काल:'इति प्रत्ययः। पूर्णिमायामेवेति न नियमः कालमात्रग्रह-

निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्तनम् ।
अन्यत्र पादयोगेऽपि द्वादश्यामेव कारयेत् ॥
आभाकादिषु मासेषु *मिथुने माधवस्य च ।
द्वादश्यां शुक्लपक्षे च प्रस्वापावर्तनोत्सवाः ॥'
इति भविष्योक्तेः ।

णात् पूर्णिमायां तन्नक्षत्रयोगस्य प्रायिकत्वाच्च । न च तदत्यन्तायोगव्यावृत्त्या योगः मानाभावात् । तस्मादिह कथंचिल्लक्षणया एकादश्यपि ग्राह्या इति । अत्राहुः अस्तु तथा माघी सप्तमी प्रौष्ठपदी अष्टकेत्यादौ मघायुक्तः काल:=माघी यत्र मासे स माघः । मासस्येयं माघी सप्तम्यन्वयानुरोधात् । प्रथमतो नक्षत्राण् ततो मासाण् ततः शौक्काण् कर्तव्यः । एवं प्रौष्ठपदीत्यत्रापि अष्टकान्वयाऽनुरोधात् । पठन्ति च ।

'नक्षत्राणां च मासाणां कृत्वा प्रौष्ठपदीपदम् ।
विशेष्यं चाष्टकारूपं शौक्काणां प्रबोधयेत् ॥'इति ।

इह तु आषाढी कार्तिकी च अत्यन्तायोगव्यावृत्त्याऽऽषाढादियुक्तैव नक्षत्राणैव अनुरोधविशेषविरहात् । पौर्णमासीलाभस्तु

'आषाढशुक्लपक्षान्ते भगवान्मधुसूदनः ।
भोगिभोगे निजां मायां योगनिद्रां समाप्नुयात् ॥'

इत्युक्तेः । *मिथुने इति ॥ आषाढमात्रान्वयि । अन्यत्र बाधात् । यद्वादश्यां शयनायुक्तं तन्मिथुनार्के एवेत्यर्थ इति मयूखः । उत्सवो=जागरः ।

'आषाढशुक्लद्वादश्यां सर्वशान्तिकरं शुभम् ।
य एतेन विधानेन ज्ञात्वा वै कर्म कारयेत् ॥
स पुमान्न भवत्येव संसारेषु युगे युगे ॥'

तथा—

'इयं च द्वादशी देवप्रबोधार्थं तु निर्मिता ।

त्वयैषा सर्वलोकानां हितार्थं शेषशायिना ॥' इति ॥

परिवर्त्तनेऽपि द्वादश्येव ग्राह्या । एतासां रात्रिदिनसन्ध्यादिषु अनुराधाश्रवणरेवतीनां क्रमेणादिमध्यान्तभागे प्रस्वापादि कार्यम् ।

'आभाकासितपक्षेषु मैत्रश्रवणरेवती ।
आदिमध्यावसानेषु प्रस्वापावर्त्तनोत्सवाः ॥'

इति भविष्यात्,

'मैत्राद्यपादे स्वपितीह विष्णुः
श्रुतेश्च मध्ये परिवर्त्तमेति ।
पौष्णावसाने च सुरारिहन्ता
प्रबुध्यते मासचतुष्टयेन ॥'

इतिनारदीयाच्च ।

'निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्त्तनम् ।'

इत्युक्तेः निशादौ नक्षत्रपादयोगाभावे नक्षत्रमात्रयोगो ग्राह्यः ।

'पादयोगो यदा न स्यात् ऋक्षेणापि तदा भवेत् ।'

इति वाराहात् ।

'विष्णुर्दिवा न स्वपिति न च रात्रौ प्रबुध्यते ।
द्वादश्यामृक्षसंयोगे पादयोगो न कारणम् ॥'

इति विष्णुधर्मोत्तरात् । द्वादश्यामेकदेशेनापि नक्षत्रयोगाभावे एकादश्यां त्रयोदश्यां वा तदृक्षभाग एव निशादिवेलानादरेणैव प्रस्वापादि कार्यम् ।

'अमासे द्वादशीमृक्षे उत्थानशयने हरेः ।
पादयोगेन कर्त्तव्ये नाहोरात्रं विचिन्तयेत् ॥'

इति जीमूतवाहनोदाहृतवचनात् । उत्थानशयने इति परिवर्त्तनोपलक्षणम्, अहोरात्रमिति संध्यादिवेलायाः । एवं च द्वादश्यां निशाद्यादरे अन्यतिथौ च नक्षत्रपादयोगादरे च नियते सति यदा द्वादशीषु निशादेरन्यत्र तत्तदृक्षभागयोगः अन्यतिथौ च तद्-

'द्वादश्यां*सन्धिसमये नक्षत्राणामसम्भवे ।
आभाकाशितपक्षेषु शयनावर्तनादिकम् ॥'

इति वाराहोक्तेश्च । द्वादश्यामित्यत्रापि पारणाऽहो-मात्रं विवक्षितम् ।

'*पारणाऽहे पूर्वरात्रे घण्टादीन्वादयन्मुहुः ।'

इति रामार्चनचन्द्रिकोक्तेः । *अत्रैकादशीद्वादश्यो-र्देशभेदेन व्यवस्था ।

तत्तनक्षत्रस्यैव योगः तदा द्वादशीषु संध्यायां प्रस्वापादि कार्य-मित्याह—*द्वादश्यामिति । निशादौ नक्षत्रयोगाभावे सति शयनावर्तनप्रबोधाः संधिसमये=संध्यासमय एव, न तु तत्र नक्षत्रभागयोगे ।

'रेवत्यन्तो यदा रात्रौ द्वादश्यां च समागतः ।
तदा विबुध्यते विष्णुर्दिनान्ते प्राप्य रेवतीम् ॥'

इति वचनात् । रेवत्यन्तविशेषग्रहणं चोपलक्षणम् । न चैतस्य श्रीरामविषयत्वमस्तु तत्र तत्र विष्णुरिति श्रवणात् । अत्र मैत्राद्यपादे इति नानावाक्येषु चतुर्थभागार्थकपादशब्दात् अनूराधारेवत्यौ चतुर्द्धा विभज्याऽऽद्यान्त्यपादयोरेव स्वापप्रबोधौ कार्यौ श्रवणं तु त्रेधा विभज्य तन्मध्यभागे परिवर्तनं कार्यम् । श्रुतेश्च मध्ये परि-वर्त्तमेतीति मध्यपदात् । *पारणाहे इति । वैष्णवैः पारणाह एव प्रस्वापादि क्रियते इत्यपरः पक्षः । अत्र द्वादशीपदमस्त्वेकादशी-परमित्यत्राह-*अत्रेति । "धनदश्च रमा गौरी"इत्यादिपवि-त्रारोपणप्रकरणस्थवाक्यानन्तरम्

'यस्य यस्य च देवस्य यन्नक्षत्रं तिथिस्तथा ।
तस्य देवस्य तस्मिंस्तु शयनावर्त्तनादिकम् ॥'

इति वाक्यात्पवित्रारोपणदेवप्रस्वापादेर्द्वादश्यामप्यौचित्यादतो व्यवस्थेत्यर्थः । आषाढकार्त्तिकपौर्णमास्योरपि स्वापप्रबोधौ दर्शितौ

इदं च मलमासे न कार्यम् ।

'ईशानस्य बलिर्विष्णोः शयनं परिवर्त्तनम् ।'

इति कालादर्शे निषेधात् । यदपि—

'एकादश्यां तु शुक्लायां संक्रान्तौ *कर्कटस्य वा ।

आषाढ्यां वा नरो भक्त्या चातुर्मास्यव्रतक्रियाम् ॥'

इति हेमाद्रौ ब्रह्मवैवर्त्ते, तदपि मलमासेऽसति द्रष्टव्यम् ।

*'मिथुनस्थो यदा भानुरमावास्याद्वयं स्पृशेत् ।

द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे ॥'

इति तत्रैव मोहचूलोत्तरोक्तेः ॥

"क्षीराब्धौ शेषपर्यङ्क" इत्यादि । एकादशीमारभ्य पञ्चाहमपि प्रस्वापादि पुराणान्तरे तद्विस्तरः । *कर्कटस्येति । प्रस्वापतत्तदुत्तरकर्त्तव्यस्य चातुर्मास्यव्रतस्य मिथुन एव न्याय्यत्वात्कथमेतदित्यभिमानः । मलमासे मिथुनेऽधिकमासे न । तथा च हरिशयने मिथुने द्वादशीस्थाने कर्के द्वादशी लभ्यते तदुत्तरकर्त्तव्यचातुर्मास्यव्रते सैव संक्रान्तौ कर्कटस्येत्यनेन धर्त्तव्येत्यर्थः । वस्तुतस्तु चातुर्मास्यव्रतारम्भे चत्वारः पक्षाः । आषाढ-शुक्लैकादशी-तद्द्वादशी-तत्पौर्णमासी-कर्कसंक्रान्तिभेदात् । "एकादश्यान्तु शुक्लायाम्" इति वाक्यात् ।

'आषाढशुक्लद्वादश्यां पौर्णमास्यामथाऽपि वा ।

चातुर्मास्यव्रतारम्भं कुर्यात्कर्कटसंक्रमे ॥'

इति वाराहात् । *मिथुनस्थ इति ।

'माधवाद्येषु यद्येकमासि दर्शद्वयं यदा ।

द्विराषाढः स विज्ञेयः शेते कर्कटकेऽच्युतः ॥'

इति द्विराषाढकथनं तु व्यवस्थार्थम् ।

'मेषादिमिथुनान्तेषु यदा दर्शद्वयं भवेत् ।

अब्दान्तरे तदावश्यं मिथुनार्के हरिः स्वपेत् ॥

*अत्रैव चातुर्मास्यव्रतारम्भ उक्तो भारते—

'आषाढे तु सिते पक्ष एकादश्यामुपोषितः।
चातुर्मास्यव्रतं कुर्याद्यत्किंचिन्नियतो नरः॥' इति।

अस्य नित्यत्वं तत्रैवोक्तम्—

'वार्षिकांश्चतुरो मासान्वाहयेत्केनचिन्नरः।
व्रतेन नोचेदाप्नोति किल्बिषं वत्सरोद्भवम्॥
असम्भवे तुलार्केऽपि कर्तव्यं तत्प्रयत्नतः॥' इति।

तेनाषाढशुक्लैकादश्यां द्वादश्यां पौर्णमास्यां वाऽऽरम्भः। समाप्तिस्तु कार्तिकशुक्लद्वादश्यामेव। तदुक्तं हेमाद्रौ भारते—

'चतुरो वार्षिकान्मासान्... चातुर्मास्यव्रतं नरः।
कार्तिके शुक्लपक्षे तु द्वादश्यां तत्समापयेत्॥' इति।

अस्यारम्भः शुक्रास्तादावपि कार्यः।

'न दौर्बल्यं न मौढ्यं च शुक्रगुर्वोर्न वा तिथिः।
खण्डत्वं चिन्तयेदादौ* चातुर्मास्यविधौ नरः॥'

इति हेमाद्रौ वृद्धगार्ग्योक्तेः। *इदं च द्वितीयाद्यारम्भविषयम्। प्रथमारम्भस्तु न भवत्येव। आशौचमध्येऽपि द्वितीयाद्यारम्भो भवति।

'अशुचिर्वा शुचिर्वापि यदि स्त्री यदि वा पुमान्।

कर्कटादित्रिके वापि यदा दर्शद्वयं भवेत्।
अब्दान्तरे तदावश्यं मिथुनार्के हरिः स्वपेत्॥'

इति स्पष्टमुक्तेः। *अत्रैवेति। आषाढशुक्लद्वादश्यामित्यादिवाक्याद्यत्वारः पक्षा अनुपदमुक्ताः। एकादश्यां सूतकादिना प्रतिबन्धे द्वादश्यादयः सर्वत्रापि प्रतिबन्धे त्वनारम्भ एव। 'आरब्धे सूतकं न स्यात्' इति वाक्यात्। *आदौ=आरम्भे। *इदं चेति। निषिद्धस्यास्तादेरसामान्यतः प्रतिप्रसवे गौरवात् द्वितीयारम्भपरत्वमित्य-

व्रतमेतन्नरः कृत्वा मुच्यते सर्वपातकैः ॥'

इति भार्गवार्चनदीपिकायां स्कान्दोक्तेः ।

'आरब्धे सूतकं न स्यादनारब्धे तु सूतकम् ।'

इति विष्णुवचनाच्च ।

यत्तु—

'*असंक्रान्तं तथा मासं दैवे पित्र्ये च कर्मणि ।
*मलमासमशौचं च वर्जयेन्मतिमान्नरः ॥'

इति हेमाद्रौ चातुर्मास्यव्रतप्रकरणे भविष्यवचनं, तत *पूषानुमन्त्रणमन्त्रवद्‌मन्यर्कं मध्ये पठितमिति ज्ञेयम् । *अन्यथा पित्र्यस्य पूर्वोक्तस्य विवाहादेश्च चातुर्मास्यव्रते कः प्रसङ्गः । *प्रकरणनिवेशोऽपि वा प्रथमारम्भविषयं ज्ञेयम् । केचित्तु प्रतिवर्षं चातुर्मास्यव्रतप्रयोगाणां भिन्नत्वादाशौचादिपाते द्वितीयादिप्रयोगो न भवत्येवेत्याहुः । तन्न ।

'*प्रतिवर्षं च यः कुर्यादेवं वै संस्मरन् हरिम् ।
देहान्तेऽतिप्रदीप्तेन विमानेनार्कवर्चसा ॥

र्थः । वस्तुतस्तु वर्षभेदेऽपि व्रतैक्ये मानाभावात्सर्वेऽपि प्रथमारम्भा एवेति । अत एव बहुषु पुस्तकेष्विदं चेत्यादिपाठो न दृश्यते । *असंक्रान्तम्=अधिकम् । *मलमासं=क्षयमासम् । *पूषेति । दर्शपूर्णमासप्रकरणे 'पूष्णोऽहं देव प्रजया पशुभिश्च जनिषीय' इति पूषानुमन्त्रणमन्त्रः पठितोऽपि स तत्र न विनियुज्यते तत्र तद्देवताविरहेण प्रकरणस्य दौर्बल्यात् विनियोज्यस्वरूपसामर्थ्यमनपेक्ष्य विनियोगाभावात् । अतः स पूषयागे नेतव्य इत्यर्थः ॥ प्रकरणदौर्बल्यमाह—*अन्यथेति । दैवविवाहादि चातुर्मास्यव्रते दैवमिति मत्वाह—*प्रकरणेति । *प्रतिवर्षं चेति । वस्तुतस्त्विदं फलविशेषार्थावृत्तिबोधकं प्रयोगैक्यपक्षे मानाभावात् । चातुर्मास्यव्र-

मोदते विष्णुलोकेऽसौ यावदाभूतसंप्लवम् ॥'

इति हेमाद्रौ भविष्यवचनादित्यास्तां विस्तरः।

इदं च शिवभक्तादिभिरपि कार्यम्।

'शिवे वा भक्तिसंयुक्तो भानौ वा गणनायके।
कृत्वा व्रतस्य नियमं यथोक्तफलभाग्भवेत् ॥'

इति ब्रह्मवचनात्। व्रतग्रहणप्रकारस्तु हेमाद्रौ भविष्ये—

*'महापूजां ततः कुर्याद्देवदेवस्य चक्रिणः।
जातीकुसुममालाभिर्मन्त्रेणानेन पूजयेत् ॥
सुप्ते त्वयि जगन्नाथे जगत्सुप्तं भवेदिदम्।
विबुद्धे च विबुध्येत प्रसन्नो मे भवाच्युत ॥
एवं तां प्रतिमां विष्णोः पूजयित्वा स्वयं नरः।
प्रभाषेताग्रतो विष्णोः कृताञ्जलिपुटस्तथा ॥
चतुरो वार्षिकान्मासान्देवस्योत्थापनावधि।
इमं करिष्ये नियमं निर्विघ्नं कुरु मेऽच्युत ॥
इदं व्रतं मया देव गृहीतं पुरतस्तव।
निर्विघ्नं सिद्धिमायातु प्रसादात्तव केशव ॥
गृहीतेऽस्मिन्व्रते देव पञ्चत्वं यदि मे भवेत्।
तदा भवतु संपूर्णं त्वत्प्रसादाज्जनार्दन ॥
गृहीतेऽस्मिन्व्रते देव यद्यपूर्णे मृतो ह्यहम्।
तन्मे भवतु संपूर्णं त्वत्प्रसादाज्जनार्दन ॥' इति।

तत्र भार्गवार्चनदीपिकायां नृसिंहपरिचर्यायां च भविष्ये—

'श्रावणे वर्जयेच्छाकं दधि भाद्रपदे तथा।
दुग्धमाश्वयुजे मासि कार्तिके द्विदलं त्यजेत् ॥' इति।

स्कान्देऽपि चातुर्मास्यकल्पे—

तारम्भः शयनोत्सवं कृत्वा कार्य इति सूचयितुं—*महापूजामिति।

'चत्वार्येतानि नित्यानि चतुराश्रमवर्णिनाम् ।
प्रथमे मासि कर्तव्यं नित्यं *शाकव्रतं नरैः ॥
द्वितीये मासि कर्तव्यं दधिव्रतमनुत्तमम् ।
पयोव्रतं तृतीये तु चतुर्थेऽपि निशामय ॥
द्विदलं बहुबीजं च वृन्ताकं च विवर्जयेत् ।
नित्यान्येतानि विप्रेन्द्र व्रतान्याहुर्मनीषिणः ॥
जम्बीरं राजमाषांश्च मूलकं रक्तमूलकम् ।
कूष्माण्डं चेक्षुदण्डं च चातुर्मास्ये त्यजेद् बुधः ॥'

तथा—

'विशेषाद्बदरीं धात्रीं कूष्माण्डं तिन्तिणीं त्यजेत् ।
जीर्णधात्रीफलं ग्राह्यं कथञ्चित्कायशोधनम् ॥' इति ।

तीर्थसौख्ये स्कान्दे—

'वार्षिकांश्चतुरो मासान्प्रसुप्ते वै जनार्दने ।
मञ्चखट्वादिशयनं वर्जयेद्भक्तिमान्नरः ॥
अनृतौ वर्जयेद्भार्यां मांसं मधु परौदनम् ।
पटोलं मूलकं चैव वृन्ताकं च न भक्षयेत् ॥
अभक्ष्यं वर्जयेद् दूरान्मसूरं सितसर्षपम् ।
राजमाषान्कुलित्थांश्च आशुधान्यं च सन्त्यजेत् ॥
शाकं दधि पयो माषान् श्रावणादिषु सन्त्यजेत् ॥'

अत्र त्यजेदिति वर्जनसङ्कल्परूपः पर्यु(१)दासो ज्ञेयः व्रतोपक्रमात् । अत्र केचित्—

'शाकाख्यं पत्रपुष्पादि' इत्यमरकोशस्य 'शक्यतेऽ

*शाकव्रतं=शाकवर्जनसंकल्पः । बहुबीजव्रतं च मासचतुष्टये । राजमाषाः=चवल्या इति महाराष्ट्राः । मधु=क्षौद्रम् । पटोलं द्वयमपि । आशुधान्यम्='आशुव्रीहिः पाटलः स्यात्' इति

(१) पर्युदासो निषेधः ।

शितुमनन्तेति शाकः' इति क्षीरस्वामिना व्याख्यानात् व्यञ्जनमात्रस्य निषेधमाचक्षते। अन्ये तु शाकशब्दस्य पत्रादिदशविधशाके योगरूढत्वात् योगाद्*रूढेर्बलीयस्त्वात् सूपादीनामपि त्यागापत्तेश्च तत्प्रत्याचक्षते। तेन

'*मूलपत्रकरीराग्रफलकाण्डाधिरूढकाः।
त्वक् पुष्पं कवचं चेति शाकं दशविधं स्मृतम्॥'

इति क्षीरस्वामिनोक्तस्य शाकस्य निषेध इति। अधिरूढकाः=अङ्कुराः। वस्तुतस्तु

*तत्तत्कालोद्भवाः शाका वर्जनीयाः प्रयत्नतः।
बहुबीजमबीजं च विकारि च विवर्जयेत्॥

इति भविष्यवचनात्तत्कालोत्पन्नानां दशविधशाकानां निषेधः। तत्र *तत्कालो(१)द्भवजातीयत्वं विवक्षितम्। तेनातपादिशोषितानां वर्षान्तरोद्भवानामपि निषे-

---

कोशानुक्तत्वान्यम् । *योगादिति । केवलयौगिकत्वापत्ते । *मूलेति । मूलं कन्दोऽपि बोध्यः । करीरं=वंशाङ्कुरः । अग्रं=पल्लवः । काण्डं=दण्डः । कवचं=छत्राकमस्तकम् । अङ्कुर इति क्षेत्रोत्थितफलमूलादेः, स्वेदोद्भवोऽङ्कुर इति केचित् । अत्र फलपत्रेत्यादेः सर्वस्य न निषेधः किन्तु फलमूलादेरेव । तेषां व्यञ्जनत्वेन भूयो लोकव्यवहारादिति केचित् । तत्रान्यत्रापि तद्व्यवहारभूयस्त्वादित्यपरे । *तत्तदिति । 'यत्र काले मृतं तस्य तदन्यस्य च' इत्येवं वर्षाकाललाभात् । एतेन तत्तत्कालेति संवत्सरलाभे तत्कालोत्पन्नानामित्यग्रिमग्रन्थविरोधः । इतरथा वीप्सावैयर्थ्यमिति समाहितम् । *तत्कालेति तत्तत्कालेत्यभिधानरूपं द्वितीयतच्छब्दस्याप्यनुवादः । एतच्च वर्षाकालोद्भवशाकपरमित्याभिप्रायेण । शाकसामा-

(१) क स्थले 'तत्तत्कालोद्भवजातित्वं विवक्षितम्' इति पाठः।

धः । *अत्र तत्कालोद्भवा इति वीप्सावशात्स्वस्वकालोद्भवानां सर्वेषां निषेध इति निष्कर्षः । बहुबीजमित्यनेकबीजमिति केचित् । इतरावयवापेक्षया बीजावयवा यत्र बहवस्तदित्यन्ये । अबीजं कदलादि* । वस्तुतस्तु इदं महानिबन्धेष्वभावान्निर्मूलमेव । आचारप्रदीपे—

'वृन्ताकं च कलिङ्गं च बिल्वोदुम्बरभिःसटाः ।
उदरे यस्य जीर्यन्ति तस्य दूरतरो हरिः ॥'

तथाऽपरार्के देवलः—

'ब्रह्मचर्यं तथा शौचं सत्यमामिषवर्जनम् ।
व्रतेष्वेतानि चत्वारि वरिष्ठानीति निश्चयः ॥'

आमिषाणि चोक्तानि रामार्चनचन्द्रिकायां पाद्मे—

'प्राण्यङ्गचूर्णं चर्माम्बु जम्बीरं बीजपूरकम् ।
अयज्ञशिष्टमाषादि यद्विष्णोरनिवेदितम् ॥
दग्धमन्नं मसूरं च मांसं चेत्यष्टधाऽऽमिषम् ।
रुच्यं तत्तद्देशलभ्यं सुप्ते देवे विवर्जयेत् ॥'

पाद्मे कार्तिकमाहात्म्ये—

'गोच्छागीमहिषीदुग्धादन्यद् दुग्धादि चामिषम् ।
धान्यं मसूरिकाः प्रोक्ता अन्नं पर्युषितं तथा ॥
द्विजक्रीता रसाः सर्वे लवणं भूमिजं तथा ।

न्यवृतमित्याशयेनाह *अत्रेति । *कदलामिति । अनुदरा कन्येतिवत् अत्यल्पबीजामित्यर्थादाम्रफलामिति । भिःसटा=दग्धान्नम् । भीःसटेति पाठे 'भीःसटं श्लेष्मान्तकम्'इति धन्वन्तरिनिघण्टुः ॥ प्राण्यङ्ग=मौक्तिकशुक्त्यादि । रुच्यं=राचिकादि । धान्यं=कुस्तुम्बुरुः । अन्नं पर्युषितम्—

'अन्नं पर्युषितं भोज्यं स्नेहाक्तं चिरसंस्थितम् ।
अस्नेहा अपि गोधूमयवगोरसविक्रियाः ॥'

*'ताम्रपात्रस्थितं गव्यं जलं पल्वलसंस्थितम्।
*आत्मार्थं पाचितं चान्नमामिषं तत्स्मृतं बुधैः॥'

तथा—

*'निष्पावान् राजमाषांश्च मसूरं संधितानि च।
वृन्ताकं च कलिङ्गं च शुक्तं देवे विवर्जयेत्॥'
संधितानि=लवणशाकादीनि।

तत्रैव विष्णुधर्मे—

'चतुर्ष्वपि हि मासेषु हविष्याशी न पापभाक्।'

हविष्याणि तु पृथ्वीचन्द्रोदये भविष्ये

*'हैमन्तिकं सितास्विन्नं धान्यं मुद्गा यवास्तिलाः।
कलायकङ्गुनीवारा वास्तूकं हिलमोचिका॥
षष्टिका कालशाकं च मूलकं केमुकेतरत्।
कन्दः सैन्धवसामुद्रं गव्ये च दधिसर्पिषी॥

इत्याद्युक्तम्। आरनालादि च द्विजक्लीनाः। *ताम्रेति।

'यज्ञपात्रे तथा दोहे पाके च परिवेषणे।
स्नानतर्पणदानेषु ताम्रं गव्यं न दुष्यति॥'

इत्युक्तम्। *आत्मार्थमिति। 'परपाकरतश्च यः, तावुभौ पापकर्माणौ' इति निषेधेऽपि दोषाधिक्यार्थं विप्रभोजनवैश्वदेवाद्यर्थ-पाकहीनः परपाकनिरतः। *निष्पावा पावटे इति महाराष्ट्राः।

'यच्चोत्कोचादिना प्राप्तं पतितादुपार्जितम्।
कन्याविक्रयतो लब्धं शुक्तं देवे विवर्जयेत्॥'

इत्यादीनि स्मृतिदोषार्थानि। *हैमन्तिकं=हेमन्तोद्भवम्। सितं श्वेतमस्विन्नम्=अनूष्णकं किंचिदग्निपाकेन जातस्वेदं स्विन्नं तद्भिन्नं तेन पृथुकादिनिषेधः। धान्यं=तण्डुलाः। कलायः=सतीनकः, मटरी इति प्रसिद्धम्। वास्तुकं बथुवा इति प्रसिद्धः शाकः। हिलमोचिका=गौड-देशे। कालशाकम्=तद्देशे। मूलकं स्वार्थे कः मूलानि न तु मूलशाकः

*पयोऽनुद्धृतसारं च *पनसाम्रहरीतकी ।
पिप्पली जीरकं चैव नागरङ्गं च तिन्तिणी ॥
कदलीलवलीधात्रीफलान्यगुडमैक्षवम् ।
*अतैलपक्वं मुनयो हविष्याणि प्रचक्षते ॥' इति ।

सितास्विन्नम्=अनुष्णपक्वम् । धान्यं=तण्डुलादि* । केमुकं केमुताइति प्राच्येषु प्रसिद्धः कन्दः 'कलायस्तु सतीनकः' इत्यमरः 'मटुरी' इति प्रसिद्धं धान्यम् । मदनरत्नेऽप्येवम् । अगस्त्यसंहितायां हैमन्तायुक्त्वा—

'नारिकेलफलं चैव कदली लवली तथा ।
आम्रमामलकं चैव पनसं च हरीतकी ॥
व्रतान्तरप्रशस्तं च हविष्यं मन्यते बुधाः ॥'

अन्यान्यपि व्रतान्युक्तानि हेमाद्रौ भविष्ये—

'स्त्री वा नरो वा मद्भक्तो धर्मार्थं सुदृढव्रतः ।
गृह्णीयान्नियमानेतान्दन्तधावनपूर्वकान् ॥
तेषां फलानि वक्ष्यामि तत्कर्तॄणां पृथक् पृथक् ।
मधुरस्वरो भवेद्राजन् पुरुषो गुडवर्जनात् ॥
तैलस्य वर्जनाद्राजन् सुन्दराङ्गः प्रजायते ।
कटुतैलपरित्यागाच्छत्रुनाशः प्रजायते ॥
योगाभ्यासी भवेद्यस्तु स ब्रह्मपदमाप्नुयात् ।

तस्य व्रते मदिरोपमत्वात् । केमुकेतरत्=केमुकं केमुता इति प्राच्येषु प्रसिद्धं मूलं तद्भिन्नम् इतोऽपि च न मूलशाकः अन्यावर्त्तकत्वेन एतदन्वयात् । कन्दः यद्यपि 'अर्शोघ्नः सूरणः कन्दः' इत्युक्तस्तथापि तस्य निषिद्धत्वात्तदन्यो ग्राह्यः ॥ *अनुद्धृतसारमिति । दध्यपि बोध्यम् । *पनसेत्यादि । 'फले लुक्' । नारङ्गं=नारिङ्गम् । नागरमिति पाठे शुण्ठी । *अतैलपक्वमिति कथितहविष्याणामेव विशेषणम् ।

ताम्बूलवर्जनाद्भोगी रक्तकण्ठश्च जायते ॥
घृतत्यागात्सु लावण्यं सर्वस्निग्धतनुर्भवेत् ।
शाकपत्राशनाद्भोगी अपक्वादोऽमलो भवेत् ॥
भूमौ प्रस्तरशायी च विप्रो मुनिवरो भवेत् ।
एकान्तरोपवासेन ब्रह्मलोके महीयते ॥
धारणान्नखरोम्णां च गङ्गास्नानफलं लभेत् ।
मौनव्रती भवेद्यस्तु तस्याज्ञाऽस्खलिता भवेत् ॥
भूमौ भुङ्क्ते सदा यस्तु स पृथिव्याः पतिर्भवेत् ।
प्रदक्षिणाशतं यस्तु करोति स्तुतिपाठकः ॥
हंसयुक्तविमानेन स च विष्णुपुरं व्रजेत् ।
अयाचितेन प्राप्नोति पुत्रान्भक्त्याविशंकितः ॥
षष्ठान्नकालभोक्ता यः कल्पस्थायी भवेद्दिवि ।
पर्णेषु यो नरो भुङ्क्ते कुरुक्षेत्रफलं लभेत् ॥
गुडवर्जी नरो दद्यात्तद्युतं ताम्रभाजनम् ।
सहिरण्यं नरश्रेष्ठ लवणत्यागिनां विधिः ॥
सुप्ते देवे तु यो विष्णोः शिवस्याङ्गणमर्चयेत् ।
पञ्चवर्णैस्तु यो नित्यं स्वस्तिकैः पद्मकैस्तथा ॥
स याति रुद्रलोकं हि गाणपत्यमवाप्नुयात् ॥'

अथैषां समासो कार्तिक्यां दानानि । 'एकभक्तव्रते* दम्पती संपूज्य धेनुर्देया, नक्ते वस्त्रयुगं, एकान्तरोपवासे गौः, भूशयने शय्या, षष्ठकालभोजने गौः, व्रीहिगोधूमादित्यागे हैमधान्यादि, कृच्छ्रे गोयुग्मं, शाकाशने गौः

---

*एकभक्तव्रते इति । विहितदानानन्तरं
"चतुरो वार्षिकान् मासान्नियमो येन यः कृतः ।
कथयित्वा द्विजेभ्यस्तं दद्याच्छक्त्या सदक्षिणाम् ॥
दत्त्वा विसर्जयेद्विप्रांस्ततो भुञ्जीत वाग्यतः ।"

पयोव्रते च, दधिमधुघृतव्रतेषु वासो गौश्च, ब्रह्मचर्ये स्वर्णमूर्तिः, ताम्बूलव्रते वासोयुगं, मौने घृतकुम्भो वस्त्रयुगं घण्टा च, देवाग्रे रङ्गमालिकाकरणे धेनुर्हेम चं च, दीपिकाव्रते दीपिका वासोयुगं च, भूमिभोजने पर्णभोजने च कांस्यपात्रं गौश्च, चतुष्पथदीपे गोग्रासे च गोवृषौ, प्रदक्षिणाशने वस्त्रम्, *अनुक्तेषु स्वर्णं गौश्च' इत्यादि हेमाद्रौ ज्ञेयम् । तथाच भार्गवार्चनदीपिकायां पाद्मे-

'शयनीबोधिनीमध्ये शमीदूर्वापमार्गकैः ।
भृङ्गराजेन देवांस्तु नार्चयीत कदाचन ।'

हेमाद्रौ पाद्मे—

'आषाढादिचतुर्मासानभ्यङ्गं वर्जयेन्नरः ।
समाप्तौ च पुनर्दद्यात्तिलतैलयुतं घटम् ॥
आषाढादिचतुर्मासं वर्जयेन्नखकृन्तनम् ।
वृन्ताकं गृञ्जनं चैव मधु सर्पिर्घटान्वितम् ॥
कार्तिक्यां तत्पुनर्हेमं ब्राह्मणाय निवेदयेत् ।

'अन्यान्यपि (१)केशकर्तनादिवर्जनसंकल्पानुरूपाणि पृथ्वीचन्द्रोदये ज्ञेयानि । टोडरानन्दे स्कान्दे—

'एकान्तरं त्र्यन्तरं वा कुर्यान्मासोपवासकम् ।
अन्नोदनं फलाहारं नक्तव्रतमथापि वा ॥'

अत्रैव तप्तमुद्राधारणमुक्तं रामार्चनचन्द्रिकायां भविष्ये—

इत्युक्तेर्व्रतसमापनं कार्यम् । *वस्त्रमिति । सन्ध्याकाले दीपदाने सुवर्णयुतां दीपिकां दद्यात् । *अनुक्तेष्विति । चातुर्मास्यव्रतं कृत्वा 'व्रतान्ते गोप्रदः'इति वाक्याद्धेनुं वा दद्यात् । व्यासः—

---

(१) आदर्शपुस्तके 'केशकर्तनादि' इति नास्ति ।

'शागन्तां चैव योगिन्यां चक्रनार्थे तथैव च ।
शङ्खचक्रविधानेन बाहुमूले भवेन्नरः ॥' इति ।

(१)'अतप्ततनूर्न तदामो अश्नुते' इति ऋग्वेदात्, 'स होवाच याज्ञवल्क्यस्तस्मात्पुमानात्महिताय हरिं भजेत्। सुदर्शनाकमौलिर्विमणिपङ्क्तदग्रेना संदधते' इति शतपथश्रुतेः, 'प्रतप्तर्णां भक्तजनस्य सुपत्स जन्माम्भोधिं *तरीतवे *चर्षणीन्द्राः । मूले बाहोर्दधते ये पुराणा लिङ्गान्यङ्गे तावकायार्पयन्ति' इति सामवेदात् ।

'योऽधीते भारतं पुण्यं ब्राह्मणो नियतव्रतः ।
चतुरो वार्षिकान् मासान् सर्वपापैः प्रमुच्यते ॥
तस्मान्नियमसंयुक्तैः श्रोतव्यं ब्राह्मणैरिदम् ।
कृष्णप्रोक्तामिमां पुण्यां भारतीमुत्तमां कथाम् ॥
श्रावयिष्यन्ति ये विप्रा ये च श्रोष्यन्ति मानवाः ।
सर्वथा वर्तमाना वै न ते शोच्याः कृताकृते ॥' इति ।

नियमाः ब्रह्मचर्यहविष्याशनभूशय्यादयः । एवं सङ्कल्पपूर्वकं श्रुत्वा समाप्तौ सति सामर्थ्ये पर्वसमाप्तौ वाचकं पायसेन भोजयेत्तस्मै रत्नकाञ्चनगोभूगृहवस्त्रादि दद्यात् ततो द्विजान् भोजयित्वा तेभ्यो दक्षिणां दद्यादेवं सर्वपुराणश्रवणविधिरिति । *तरीतवे=तरितुम् । *चर्षणीन्द्राः=ज्ञानपूर्णाः ।

---

(१) इयं श्रुतिर्वैष्णवैः स्वमतपरतया व्याख्याता । अस्या वास्तवार्थस्तु—'तत् पवित्रं अतप्ततनूः पयोव्रतादिना असन्तप्तगात्रः आमः अपरिपक्वो नाश्नुते न व्याप्नोति' इति श्रीमत्सायणाचार्यैः ऋक्संहिताभाष्ये उक्तः । एवमन्यान्यपि श्रुतिवाक्यानि वस्तुतो भिन्नार्थानि बलादाकृष्य व्याख्यातानि सन्ति । सार्वजनीनं तु ग्रन्थकृदग्रे वक्ष्यति-'यस्तु संतप्तशङ्खादि' इति ।

'अग्निहोत्रं यथा नित्यं वेदस्याध्ययनं यथा ।
ब्राह्मणस्य तथैवेदं तप्तमुद्रादिधारणम् ॥'

इति पद्मपुराणाच्चेति ।

'ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा यदि वेतरः ।
शङ्खचक्राङ्कितनुस्तुलसीमञ्जरीधरः ॥
गोपीचन्दनलिप्ताङ्गो दृष्टश्चेत्तदघं कुतः ॥'

इति काशीखण्डात् । तत्प्रकारस्तु रामार्चनचन्द्रिकातो ज्ञेयः ।

पृथ्वीचन्द्रोदयादयस्तु —

'यस्तु संतप्तशङ्खादिलिङ्गचिह्नतनुर्नरः ।
स सर्वयातनाभोगी चण्डालो जन्मकोटिषु ॥
द्विजं तु तप्तशङ्खादिलिङ्गाङ्कितनुर्नरः ।
संभाष्य रौरवं याति यावदिन्द्राश्चतुर्दश ॥'

इति बृहन्नारदीयोक्तेः ।

शङ्खचक्राद्यङ्कनं च गीतनृत्यादिकं तथा ।
एकजातेरयं धर्मो न जातु स्याद्द्विजन्मनः ॥
शङ्खचक्रं मृदा यस्तु कुर्यात्तप्तायसेन वा ।
स शूद्रवद्बहिः कार्यः सर्वस्माद्द्विजकर्मणः ॥
यथा श्मशानजं काष्ठमनर्हं सर्वकर्मसु ।
तथा चक्राङ्कितो विप्रः सर्वकर्मसु गर्हितः ॥'

तथा—

'शिवकेशवयोरङ्काञ्छूलचक्रादिकान्द्विजः ।
न धारयेत मतिमान्वैदिके वर्त्मनि स्थितः ॥'

इति विष्णवाश्वलायनादिवचनात् ऋग्वेदादिश्रुतीनाम*न्यार्थत्वादन्यश्रुतीनां चासत्त्वाच्चक्रादिधारणं शूद्र-

---

*अन्यार्थत्वात्=तप्तादिपदस्य कृच्छ्रचान्द्रायणादिपरत्वात् ।

त्रिपक्षमित्यन्ये । 'मत्स्यं बादरार्धं निषिद्धम्' इति श्रीधरस्वामी ।

यद्यपि निबन्धेषु प्रागुक्तवाक्यात्पक्षत्रयं विना च तद्योगानुपपत्तिविरोधेन 'न तां पत्नीं करोति' इति विकल्पो युक्तस्तथापि 'एकजातिरयं धर्मः' इत्यनेन(१) सामान्यवाक्यानामुपसंहाराद्विशेषनिषेधो नित्यानुवाद इति तदाशयः । अत्र शिष्टाचार एव संकल्पादिनिःसरणपर्यन्तोऽपि संक्षेपः । आषाढपौर्णमास्यां कोकिलाव्रतमुक्तं हेमाद्रौ भविष्ये

'आषाढपौर्णमास्यां तु सन्ध्याकाले ह्युपस्थिते ।
संकल्पयेन्मासमेकं श्रावणे प्रत्यहं ह्यहम् ॥
स्नानं करिष्ये नियता ब्रह्मचर्ये स्थिता सती ।
भोक्ष्यामि नक्तं भूशय्यां करिष्ये प्राणिनां दयाम् ॥'

इति ।

अस्य नक्तव्रतत्वात् *सायाह्नव्यापिनी (२)ग्राह्या । अत्रैव शिवशयनोत्सव उक्तो हेमाद्रौ वामनपुराणे—

'पौर्णमास्यामुमानाथः स्वपते चर्मसंस्तरे ।
वैयाघ्रे च जटाभारं समुद्ग्रथ्याहिवर्ष्मणा ॥'

---

*आषाढेति । अधिकाषाढपौर्णमास्यामारम्भः ।

'आषाढौ द्वौ यदा स्यातां कोकिलाव्रतमाचरेत् ।'

इत्युक्तेः । अधिकाषाढपौर्णमासीविरहे तु तत्प्रतिनिधिभूतं श्रावणाधिक्येऽपि शुद्धे कार्यम् । *सायाह्नव्यापिनीति=स-

---

(१) मुद्रितपुस्तके 'बाधवाक्यानाम्' इति पाठः ।

(२) 'आषाढौ द्वौ यदा स्यातां कोकिलाव्रतदर्शनम् । तथा या कुरुते नारी न सा वैधव्यमाप्नुयात् ॥ शृणु देवि प्रवक्ष्यामि मन्त्रैः पौराणिकैर्युतम् । मलमासे त्वतिक्रान्ते शुद्धाषाढे समागते ॥' इतिव्रतराजवराहोक्तिस्तु मलमासे प्राप्ते सति शुद्धमास एव व्रतनिर्णयपरा । न तु आषाढेऽधिमासे सत्येव तद्व्रतकरणनियमपरेति बोध्यम् ।

मदनरत्नेऽप्येवम् । इयं च *प्रदोषव्यापिनी । अत्रैव व्यासपूजोक्ता । तत्र त्रिमुहूर्ता चेत् परैवेति(१) संन्यासपद्धतौ ।

'त्रिमुहूर्ताधिकं ग्राह्यं पर्व क्षौरप्रणामयोः ।'

इति वचनात् ॥

इति श्रीरामकृष्णभट्टात्मजदिनकरभट्टानुजकमलाकरभट्टकृते निर्णयसिन्धौ आषाढः समाप्तः ॥

कर्कसंक्रान्तौ पूर्वं त्रिंशद्दण्डाः पुण्यकालः । सूर्यो-

न्ध्याकालव्यापिनीति मयूखे । *प्रदोषेति । स्वापस्य प्रदोषकालीनत्वात् । आषाढपूर्णिमायां किञ्चिदेयम् ।

'आषाढी कार्त्तिकीमाघीतिथयः पुण्यसम्भवाः ।
अप्रदानव्रतो यान्तु यस्यार्थोऽनुमतो गतः ॥'

इति भरतशपथेपूक्तेः ।

'आषाढीकार्त्तिकीमाघीतिथयोऽतीव पावनाः ।
स्नानदानविहीनास्ता न नेयाः पाण्डुनन्दन ॥' इति,

'आकाभावे त्वनन्तकम्' इति च वाक्यात् ।

इत्याषाढः ॥

---

(१) संन्यासिनां चातुर्मास्याऽऽवाससंकल्पाङ्गत्वेन क्षौरव्यासपूजादिकं विहितम् । तत्रादौ क्षौरं विधाय द्वादश मृत्तिकास्नानानि प्राणायामादिविधिं च कृत्वा व्यासपूजां कुर्यात् । पूजान्ते 'असति प्रतिबन्धे चतुरो वार्षिकान्मासानिह वसामि' इति मनसा संकल्प्य—'अहं तावन्निवत्स्यामि सर्वभूतहिताय वै । प्रायेण प्रावृषि प्राणिसंकुलं वर्त्म दृश्यते ॥ अतस्तेषामहिंसार्थं पक्षान्वै श्रुतिसंश्रयान् । स्थास्यामश्चतुरो मासानत्रैवासति बाधके ॥' इति वाचिकसंकल्पं कुर्यात् । ततो गृहस्थाः प्रतिब्रूयुः—'निवसन्तु सुखेनात्र गमिष्यामः कृतार्थताम् । यथाशक्ति च शुश्रूषां करिष्यामो वयं मुदा ॥' इति । अन्योऽपि सविस्तरविधिर्धर्मसिन्धुतोऽवगन्तव्यः ।

दयोत्तरं संक्रमे तु परत एव पुण्यम् । रात्रौ तु निशीथात्प्राक् परतश्च संक्रमेऽपरार्कहेमाद्र्यनन्तभट्टादिमते पूर्वोत्तरदिनयोः पञ्च नाड्यः पुण्यकालः ।

'धनुर्मीनावतिक्रम्य कन्यां च मिथुनं तथा ।
पूर्वापरविभागेन रात्रौ संक्रमते रविः ॥
दिनान्ते पञ्च नाड्यस्तु तदा पुण्यतमाः स्मृताः ।
उदयेऽपि तथा पञ्च दैवे पित्र्ये च कर्मणि ॥'

इति स्कान्दोक्तेः । 'पूर्वापरविभागेनेति मकरकर्कभिन्नसंक्रान्तिपरम् । वक्ष्यमाणवचोविरोधात्' इत्युक्तं मदनरत्ने । तेनायमर्थः-रात्रौ पूर्वभागे मकरे उदये पञ्च नाड्यः पुण्यकालः । रात्रावपरभागे कर्कटे दिनान्ते पञ्च नाड्यः पुण्यकालः । मिथुने तु पूर्वदिने पश्चादपरदिने च पञ्चेति वाक्यान्तरानुरोधात् । तेन हेमाद्रिमाधवयोः सर्ववचनानां चाविरोधः । माधवमते तु—

'अर्धरात्रे तदूर्ध्वं वा संक्रान्तौ दक्षिणायने ।
पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविः ॥'

इति वृद्धगार्ग्योक्तेः ।

'मिथुनात्कर्कसंक्रान्तिर्यदि स्यादंशुमालिनः ।
प्रभाते वा निशीथे वा तदा पुण्यं तु पूर्वतः ॥'

इति भविष्योक्तेश्च पूर्वदिन एव पुण्यम् । दाक्षिणात्यास्त्वेतदेवाद्रियन्ते । अत्र रात्रावपि स्नानादि भवतीत्युक्तं प्राक् । अत्र दानोपवासादि पूर्वमुक्तम् । तथा कर्के *केशादिकर्तनं* निषिद्धम् ।

'कुम्भे कर्कटके चापि कन्यायां कार्मुके रवौ ।

---

*केशादीति । 'नखानामनुक्तत्वात्तत्खण्डने न दोषः' इत्याहुः । *कर्तनमिति । वपनस्यापि न ग्रहः 'रोमखण्डम्' इति

रोमखण्डं *गृहस्थस्य पितॄन्प्राशयते यमः ॥'
इति सुमन्तुवचनादित्युक्तं जीवत्पितृकानिर्णये गुरुभिः ॥
अथ नदीनां रजोदोषः । हेमाद्रावात्रिः—
*'सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः ।
न स्नानादीनि* कर्माणि तासु कुर्वीत मानवः ॥'
इदं च क्षुद्रनदीषु ।
'सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः ।
तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगाः ॥'
इति व्याघ्रोक्तेः । मात्स्ये त्वगस्त्योदयावधित्वमुक्तम् ।
'यावन्नोदेति भगवान्दक्षिणाशाविभूषणः ।
तावद्रजो महानद्यः करतोयाः प्रकीर्तिताः ॥'
करतोयाः=अल्पतोयाः । तथा कात्यायनः—
'याः शोषमुपगच्छन्ति ग्रीष्मे कुसरितो भुवि ।
तासु प्रावृषि न स्नायादपूर्णे दशवासरे ॥'
इदं चापदि । स्मृतिसङ्ग्रहे—
'धनुःसहस्राण्यष्टौ तु गतिर्यासां न विद्यते ।
नता नदीशब्दवहा गर्तास्ताः परिकीर्तिताः ॥'
महानदीषु तु भविष्ये उक्तम्—

सामान्येनोक्तेः । *गृहस्थस्येति वर्ण्यादिव्युदासः । जीवत्पितृकस्यापि व्युदास इति केचित् । उपरते लक्षणापत्त्या तस्य न व्युदास इत्यन्ये ।

'धनुःकुम्भौ द्विधा कृत्वा पूर्वभागं परित्यजेत् ।
कर्कटस्यान्तिमं भागं कन्यां तु सकलां त्यजेत् ॥'

इत्यपि केचित् । नद्यो द्विविधाः—अल्पाः, महत्यश्च । तदन्या गर्तास्तत्राद्यायामाह—*सिंहेति । *स्नानादीनीति । आदिना तर्पणादिग्रहः । तदुक्तम्—

'आदौ तु कर्कटे देवि महानद्यो रजस्वलाः ।
त्रिदिनं च चतुर्थेऽह्नि शुद्धाः स्युर्जाह्नवी*यथा ॥

महानद्यश्च ब्राह्मे —

'गोदावरी भीमरथी तुङ्गभद्रा च वेणिका ।
तापी पयोष्णी विन्ध्यस्य दक्षिणे तु प्रकीर्तिताः ॥
भागीरथी नर्मदा च यमुना च सरस्वती ।
विशोका च वितस्ता च विन्ध्यस्योत्तरसंस्थिताः ।
द्वादशैता महानद्यो देवर्षिक्षेत्रसंभवाः ॥'

मदनरत्ने पुराणान्तरं —

'महानद्यो देविका च कावेरी वञ्जरा तथा ।
रजसा तु प्रदुष्टाः स्युः कर्कटादौ त्र्यहं नृप ॥'

कात्यायनः—

'कर्कटादौ रजोदुष्टा गोमती वासरत्रयम् ।
चन्द्रभागा सती सिन्धुः सरयूर्नर्मदा तथा ॥'

इदं गङ्गाव्यतिरिक्ताविषयम् ।

'रजोदुष्टेऽम्भसि स्नानं वर्ज्यं नद्यादिषु द्विजैः ।
कदर्थितं रजस्तेषां सन्ध्योपासितश्च तर्पणम् ॥ इति ।

कदर्थितं=निन्दितम् । एतच्चादृष्टार्थकर्मसामान्यपरम् । "ग्राम-भोगो न दुष्यति" इति वचनात् । *जाह्नवीति । यथा जाह्नवी सर्वकाले शुद्धा, तथा तदन्या । त्रिदिनानन्तरमित्यर्थः । अत्र प्रायश्चित्तमुक्तम्–

'काले नभस्यशुद्धं स्यात् त्रिरात्रं तु नवोदकम् ।
अकाले तु दशाहं स्यात्पीत्वा नाद्यादहर्निशम् ॥' इति

स्नानपानोभयकरणे तु त्रिरात्रं कृच्छ्रो वा बोध्यः ।

'गङ्गा च यमुना चैव *प्लक्षजाता सरस्वती ।
रजसा नाभिभूयन्ते ये चान्ये नदसंज्ञिताः ॥
शोणसिन्धुहिरण्याख्याः कोकलोहितघर्घराः ।
शतद्रुश्च नदाः सप्त पावनाः* परिकीर्तिताः ॥'

इति देवलोक्तेः । यत्तु—

'प्रथमं कर्कटे देवि त्र्यहं गङ्गा रजस्वला ।'

इत्यादि वचनं तज्जाह्नवीभिन्नगोदावर्यादिगङ्गान्तरपरमिति मदनरत्ने । अन्ये त्वन्तर्गतरजोविषयम् ।

'गङ्गा धर्मद्रवः पुण्या यमुना च सरस्वती ।
अन्तर्गतरजोदोषाः सर्वावस्थासु चामलाः ॥'

इति निगमोक्तेः । तीरवासिनां तु रजोदोषो नास्ति । 'न तु तत्तीरवासिनाम्' इति निगमोक्तेः । रजोदुष्टमपि जलं गङ्गाजलयोगे पावनम् ।

'गङ्गाम्भसा समायोगाद् दुष्टमप्यम्बु पावनम् ।'

इति मात्स्योक्तेः । नूतनकूपादौ तु योगियाज्ञवल्क्यः-

'अजा गावो महिष्यश्च ब्राह्मणी च प्रसूतिका ।
भूमेर्नवोदकं*चैव दशरात्रेण शुध्यति ॥' इति ।

क्वचित्त्वदोषमाह व्याघ्रपादः—

'अभावे कूपवापीनामनपायिपयोभृताम् ।
रजोदुष्टेऽपि पयसि ग्रामभोगो न दुष्यति ॥'

गौडास्तु—'अन्येनापि समुद्धृते' इति द्वितीयपादे पाठः ।

---

*प्लक्षजाता=कुरुक्षेत्रस्था । *पावना इति । रजोदोषहीनत्वं नदत्वमित्याशयः । 'नदाः कृष्णा च वेणिका' इति विवेचने चतुर्थपादः ।

*नवोदकं=नवखानितकूपाद्युदकम् । एतच्च प्रसङ्गादुपात्तम् ।

तेनोद्भूते न दोषः। तथा च 'तासु स्नानं नेति प्रागुक्तम्' इत्याहुः। वसिष्ठोऽपि—

'उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च।
चन्द्रसूर्यग्रहे चैव रजोदोषो न विद्यते॥' इत्यलं विस्तरेण॥

श्रावणशुक्लतृतीया मधुस्रवाख्या गुर्जरेषु प्रसिद्धा। *सा परयुता ग्राह्येति दिवोदासः। श्रावणशुक्लचतुर्थी पूर्वयुता*। 'मातृविघ्नौ गणाधिपः' इत्यादिवचनात्। श्रावणशुक्लपञ्चमी नागपूजादौ परैवेति सामान्यनिर्णय उक्तम्। चमत्कारचिन्तामणौ—

'पञ्चमी नागपूजायां कार्या षष्ठीसमन्विता।
तस्यां तु तुषिता नागा इतरा सचतुर्थिका॥' इति।
'श्रावणे पञ्चमी शुक्ला संप्रोक्ता नागपञ्चमी।
तां परित्यज्य पञ्चम्यश्चतुर्थीसहिता हिताः॥'

इति मदनरत्नेऽभिधानाच्च। तेन परैवेति। अत्र विशेषो हेमाद्रौ भविष्ये—

'श्रावणे मासि पञ्चम्यां शुक्लपक्षे नराधिप।
द्वारस्योभयतो लेख्या गोमयेन विषोल्बणाः॥
पूजयेद्विधिवद्वीर दधिदूर्वाङ्कुरैः कुशैः।
गन्धपुष्पोपहारैश्च ब्राह्मणानां च तर्पणैः॥
ये तस्यां पूजयन्तीह नागान् भक्तिपुरःसराः।
न तेषां सर्पतो वीर भयं भवति कुत्रचित्॥' इति।

---

*सेति 'अस्या मधुस्रावणिका' इत्यग्रिमवचनात्। 'रम्भाख्यां वर्जयित्वा' इत्युक्तेश्च। *पूर्वयुतेति। मध्याह्नव्यापिनीति नव्याः।

श्रावणशुक्लद्वादश्यां(१) दधिव्रतं प्रागुक्तम् । तक्रादीनां तन्निषेधः । तत्र दधिव्यवहाराभावादिति वक्ष्यते(२) ।

अत्रैव विष्णोः पवित्रारोपणमुक्तं हेमाद्रौ विष्णुरहस्ये—

श्रावणस्य सिते पक्षे कर्कटस्थे दिवाकरे ।
द्वादश्यां वासुदेवाय पवित्रारोपणं स्मृतम् ॥
द्वादश्यां श्रावणे मासि पञ्चम्यामथ वा द्विज ।
आनुकूल्येषु कर्तव्यं पञ्चदश्यामथापि वा ॥' इति ।

शिवे तु तत्रैव कालान्तरं—

'आषाढान्ते चतुर्दश्यां नभस्यनभसोस्तथा ।
अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोः समम् ॥' इति ।

अन्यदेवतानां तु वक्ष्यते । अधिवासनं दीपिकायाम्—

'गोदोहान्तरिते काले पूर्वेद्युर्वाऽधिवासनम् ।' इति ।

गौणकालो रामार्चनचन्द्रिकायाम्—

'पवित्रारोपणं विप्राच्छ्रावणे न भवेद्यदि ।
कार्तिक्यवधि*शुक्रास्ते कर्तव्यमिति नारदः ॥
हेमरौप्यताम्रक्षौमैः सूत्रैः कौशेयपद्मजैः ।

---

*शुक्रास्ते=शुक्रास्तेऽपि । 'शुक्रार्के'इति पाठे शुक्लद्वादश्या-

---

(१) चातुर्मास्ये भक्ष्याभक्ष्यविचारे 'द्वितीये मासि कर्तव्यं' दधिव्रतम्—'इत्यादिनेत्यर्थः । अस्यामेव द्वादश्यां मासं कृतस्य शाकवर्जनव्रतस्य साङ्गतार्थं 'ब्राह्मणाय शाकदानं करिष्ये' इति संकल्प्य ब्राह्मणं संपूज्य—'उपायनमिदं देव व्रतसंपूर्तिहेतवे । शाकं तु द्विजवर्याय सहिरण्यं ददाम्यहम् ॥' इत्यादिमन्त्रेण पक्वमामं वा शाकं दद्यात् । ततो—'दधि भाद्रपदे मासि वर्जयिष्ये सदा हरे ।' इत्येतच्च संकल्पयेत् । इति धर्मसिन्धुः ।

(२) भाद्रपदमासनिर्णये शुक्लद्वादश्यां दुग्धव्रतविचारे 'एवं दधिव्रते न तक्रादीनां निषेधः' इत्यादिनेत्यर्थः ।

कुशैः काशैश्च कार्पासैर्ब्राह्मण्या कर्तितैः शुभैः* ॥
कृत्वा त्रिगुणितं सूत्रं त्रिगुणीकृत्य शोधयेत्* ।
तथोत्तमं पवित्रं तु षष्ट्या सह शतैस्त्रिभिः ॥
सप्तत्या सहितं द्वाभ्यां शताभ्यां मध्यमं स्मृतम् ।
साशीतिना शतेनैव कनिष्ठं तत्समाचरेत् ॥
साधारणपवित्राणि त्रिभिः सूत्रैः समाचरेत् ।
उत्तमं तु*शतग्रन्थि पञ्चाशद्ग्रन्थि मध्यमम् ॥
कनिष्ठं तु पवित्रं स्यात्षट्त्रिंशद्ग्रन्थिशोभनम् ।
षट्त्रिंशच्च चतुर्विंशद्द्वादशेति च केचन ॥
चतुर्विंशद्द्वादशाष्टावित्येके मुनयो विदुः ॥

हेमाद्रौ विष्णुरहस्ये स्वल्पमध्योक्तम्—
'अष्टोत्तरशतं कुर्याच्चतुःपञ्चाशदेव वा ।
सप्तविंशतिरेवाथ ज्येष्ठमध्यकनीयसम् ॥
अधमं नाभिमात्रं स्यादूरुमात्रं विनीतकम् ।
प्रलम्बितं जानुमात्रं प्रतिमायां निगद्यते ॥'

शिवपवित्रं तु तत्रैव शैवागमे—
'एकाशीत्यथवा सूत्रैस्त्रिंशता वाष्टयुक्तया ।
पञ्चाशता वा कर्तव्यं तुल्यग्रन्थ्यन्तरात्मकम् ॥

मित्यर्थः । *शुभैरिति ।
कन्यया वा पवित्रं स्यान्न पुंश्चल्यादिभिः कृतम् ।
इति पाठः । *शोधयेदिति । पृथक्पृथक् पञ्चगव्योदकादिना ।
'पृथक्पृथक्पञ्चगव्यैरद्भिः प्रक्षालयेत्ततः ।
मूलेनाष्टोत्तरशतं गायत्र्या रामसंज्ञया ॥
शङ्खोदकेनाभिमन्त्र्य पवित्राणि विनिर्मयेत् ।'
इत्युक्तेः । *शतग्रन्थीति । ग्रन्थिप्रमाणं तत्रैव-
'अङ्गुष्ठपर्वमात्रं तु कुर्याद्ग्रन्थिमथोत्तमं ।

द्वादशाङ्गुलमानानि ह्यासादष्टाङ्गुलानि वा।
लिङ्गविस्तारमानानि चतुरङ्गुलकानि च ॥' इति।

हेमाद्रौ कालोत्तरे युगधर्मे—

'कृते मणिमयं कार्यं त्रेतायां हेमसम्भवम्।
पट्टजं द्वापरे प्रोक्तं कार्पासं तु कलौ स्मृतम् ॥'

अधिकारिणोऽपि तत्रैव विष्णुरहस्ये—

'ब्राह्मणः क्षत्रियो वैश्यस्तथा स्त्री शूद्र एव च।
स्वधर्मावस्थिताः सर्वे भक्त्या कुर्युः पवित्रकम् ॥'

तथा—

'अतोदेवेति मन्त्रेण द्विजो विष्णौ निवेदयेत्।
शूद्रस्य मूलमन्त्रो वा येन वा पूजयेद्धरिम् ॥'

एतच्च नित्यम्।

'न करोति विधानेन पवित्रारोपणं तु यः।
तस्य सांवत्सरी पूजा निष्फला मुनिसत्तम ॥
तस्माद्भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः।
वर्षे वर्षे प्रकर्तव्यं पवित्रारोपणं हरेः ॥'

इति तत्रैवोक्तेः। देवताविशेषे तिथयोऽपि तत्रैव—

'धनदश्च रमा गौरी गणेशः सोमराड् गुहः।
भास्करश्चण्डिकाऽम्बा च वासुकिश्च तथर्षयः ॥
चक्रपाणिरनङ्गश्च शिवो ब्रह्मा तथैव च।
प्रतिपत्प्रभृतिष्वेताः पूज्यास्तिथिषु देवताः ॥
यथोक्ताः शुक्लपक्षे तु तिथयः श्रावणस्य च ॥' इति।

तथा हेमाद्रौ कालोत्तरे—

चतुर्दश्यामथाष्टम्यां सर्वसाधारणं तु तत्। इति।

तत्प्रकारस्तु रामार्चनचन्द्रिकायां यथा—

'*ततस्तानि पवित्राणि वैणवे पटले शुभे ।
संस्थाप्य शुचिवस्त्रेण पिधाय पुरतो न्यसेत् ॥
अरत्निसंमितां वेणीं कुर्यात्षट्त्रिंशता कुशैः ।
क्रियालोपविघातार्थं यत्त्वया विहितं प्रभो ॥
मयैतत्क्रियते देव तव तुष्ट्यै पवित्रकम् ।
न मे विघ्नो भवेद्देव कुरु नाथ दयां मयि ।
सर्वथा सर्वदा विष्णो मम त्वं परमा गतिः ॥
उपवासेन देव त्वां तोषयामि जगत्पते ।
कामक्रोधादयो ह्येते न मे स्युर्व्रतघातकाः ॥
अद्यप्रभृति देवेश यावद्वैशेषिकं दिनम् ।
तावद्रक्षा त्वया कार्या सर्वस्यास्य नमोऽस्तु ते ॥'

इति देवं संप्रार्थ्य कुम्भं संस्थाप्य तत्र वंशपात्रे–

'ॐ सांवत्सरस्य यागस्य पवित्रीकरणाय भोः ।
विष्णुलोकात्पवित्राद्य आगच्छेह नमोऽस्तु ते ॥'

अनेन मूलेन चायाद्योत्तममध्यमकनिष्ठेषु विष्णुब्रह्मरुद्रान्, सत्त्वरजस्तमांसि, *देवत्रयं, वनमालायां

तदर्धेन तदर्धेन मध्यमे च कनिष्ठके ॥' इति ।

*तत इति । पवित्रेषु कुङ्कुमगोरोचनादिनाऽङ्कनमुत्तम–मध्यमा–ऽधमानां तेषां क्रमेण द्वादशाक्षरमन्त्रेण त्रिर्द्विःसकृदभिमन्त्रणं चोक्तं, तत इत्यर्थः । *देवत्रयं=ब्रह्म–विष्णु–रुद्रान् । वनमालालक्षणं तत्रैव–

'आरभ्य मुकुटं यावत्सूत्रैर्विरचिता शुभा ।
आपादलम्बिनी माला वनमाला प्रकीर्तिता ॥' इति(१) ।

---

(१) अन्यत्र—तुलसीकुन्दमन्दारपारिजाताम्बुजैस्तु या । पञ्चभिर्ग्रथिता माला वनमाला प्रकीर्तिता ॥' इति ।

प्रकृतिं चावाह्य त्रिसूत्र्यां ब्रह्मविष्णुरुद्रान् ग्रन्थिषु—क्रिया, पौरुषी, वीरा, विजया, ईशा, अपराजिता, मनोन्मनी, जया, भद्रा, मुक्तिश्चेत्यावाह्य सम्पूज्य ।

'ॐ संवत्सरकृतार्चायाः संपूर्णफलदोऽपि यत् ।
पवित्रारोपणायैतत्कुरु कन्धर ते नमः ॥
विष्णुतेजोद्भवं रम्यं सर्वपातकनाशनम् ।
सर्वकामप्रदं देव तवाङ्गे धारयाम्यहम् ॥'

इति देवकरे मङ्गलसूत्रं बद्धा देवं संपूज्य निमन्त्रयेत्-

'आमन्त्रितोऽसि देवेश पुराणपुरुषोत्तम ।
प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव ॥
क्षीरोदधिमहानागशय्यावस्थितविग्रह ।
प्रातस्त्वां पूजयिष्यामि सन्निधौ भव ते नमः ॥
निवेदयाम्यहं तुभ्यं प्रातरेतत्पवित्रकम् ।
सर्वथा सर्वदा विष्णो नमस्तेऽस्तु प्रसीद मे ॥'

ततः पुष्पाञ्जलिं दत्वा रात्रौ जागरणं कुर्यादिति अधिवासनम् । प्रातर्नित्यपूजां कृत्वा गन्धदूर्वाक्षतयुतं पवित्रमादाय—

'ॐदेवदेव नमस्तुभ्यं गृहाणेदं पवित्रकम् ।
पवित्रीकरणार्थाय वर्षपूजाफलप्रदम् ॥
पवित्रकं कुरुष्वाद्य यन्मया दुष्कृतं कृतम् ।
शुद्धो भवाम्यहं देव त्वत्प्रसादान्महेश्वर ॥'

मूलसंपुटितेनानेन दत्वाऽङ्गदेवताभ्यो नाम्ना समर्प्य महानैवेद्यं दत्वा नीराज्य-'मणिविद्रुममालाभिः' इत्यादिभिर्दमनारोपणोक्तमन्त्रैः प्रार्थयित्वा गुरवे ब्राह्मणेभ्यश्च दत्वा स्वयं धारयेत् । तथा—

'मासं पक्षमहोरात्रं त्रिरात्रं धारयेत्तथा ।

देवे तं सूत्रसंदर्भं देशकालविवर्जिता ॥'

अकरणे तु तत्रैव—

'पवित्रारोपणं काले न करोति कथंचन ।
तदाऽयुतं जपेन्मन्त्रं स्तोत्रं वाऽपि समाहितः ॥'
इत्युक्तम् ॥

इति पवित्रारोपः ।

श्रावणशुक्लचतुर्दशी पूर्वयुता ग्राह्या । अत्र वक्तव्यो विशेषश्चतुर्दश्यामुक्तः । अथोपाकर्म* । तत्र बह्वृचानां प्रयोगपारिजाते शौनकः—

'अथातः श्रावणे मासि श्रवणर्क्षयुते दिने ।
श्रावण्यां श्रावणे मासि पञ्चम्यां हस्तसंयुते ॥
दिवसे विदधीतैतदुपाकर्म यथोदितम् ।
अध्यायोपाकृतिं कुर्यात्त्रीणामनवाह्निना ॥'

इति । अत्र पौर्णमास्युपसंहारन्यायेन यजुर्वेदिपरेति हेमाद्रिः* । अत्र हस्तयुक्ता पञ्चम्युक्ता । कारिकाऽपि—

'तन्मासे हस्तयुक्तायां पञ्चम्यां वा तदिष्यते ।' इति ।

---

*उपाकर्मेति कर्मनामधेयम् । अध्यायोपाकरणमित्यादेस्तु अधीयते यः सोऽध्यायो=वेदः, तस्योपाकरणम्=उपक्रम इत्यर्थः ।

*हेमाद्रिरित्यरुचिः । श्रावण्यामित्यस्य यजुर्वेदिपरत्वे शौनकोक्तौ तद्वैयर्थ्यं स्यात् । तस्मात्तद्बह्वृचानां पौर्णमासी विषये इत्येव वाच्यम् । पर्वद्वये च श्रवणं निर्णायकम् । 'पर्वण्यौदयिके' इत्युपक्रम्य 'बह्वृचाः श्रावणं कुर्युः' इत्युक्तेः । तदलाभे शुक्लपञ्चम्याम् । तस्माच्छ्रवणयुक्ते दिने तद्युक्तायां पूर्णिमायामित्यनयोः पक्षयोराचाराद्व्यवस्थेति प्रतियन्ति । तन्मासे इति कारिकोक्तमतम् । एतन्मते ये यजुषामपि यत्सूत्रे हस्तपञ्चम्यामुक्ते, तेषामपि हस्तयुक्तप-

*केवलपञ्चम्यां *हस्तयुतेऽन्यस्मिन् दिने इति तु हेमाद्रिः । उपासनवह्निर्नाग्नि तु—

'कर्मत्रयमिदं केचिल्लौकिकाग्नौ प्रकुर्वते ।'

इति कारिकोक्तलौकिकाग्निना विकल्पते । तत्र 'अध्य*ध्याप्यैरन्वारब्धः' इति सूत्रात् साशिष्यस्य कर्तृत्वे तदधिकारिकस्यानार्यस्याग्नौ नान्यस्याग्नावन्यो जुहुया-दितिनिषेधाल्लौकिक एव । तदभावे तु स्मार्ते* इति निगर्वः । यत्रापि दीपिकायां—

श्चम्येव बोध्या । अनुक्तपञ्चमीकैस्तु प्रौष्ठपदी ग्राह्येत्यग्रे । *के-वलपञ्चम्यामिति ।

स्यादुपाकरणं शुक्लपञ्चम्यां श्रावणस्य तु ।

इत्याग्निमवचनात् । *हस्तयुते इति । 'प्रौष्ठपदीं हस्तेनोपाकर्म' इति गोभिलीये केवलहस्तस्याप्युपादानात्तद्विशिष्टपञ्चमीलक्षणायां मानाभावात् ।

'अध्यायानामुपाकर्म श्रावण्यां श्रवणेन वा ।

हस्तेनौषधिभावे वा पञ्चम्यां श्रावणस्य तु ॥'

इति याज्ञवल्क्येन श्रावणीविकल्पितश्रवणयोरिव व्यवधानेन हस्तपञ्चम्योरुक्तेश्च । *अध्याप्यैरिति । चतुःपञ्चाव-त्तादिभेदेन भिन्नकल्पानामपि तेषामधिकारः । 'अध्यजामदग्न्यो जामदग्न्यमामन्त्र्य कुर्यात्'इति सत्याषाढोक्तेः । 'दातृपु-रोहितौ सायुज्यकामौ यजेयाताम्'इति विहितकुलाययागवत् । तत्र तुल्यकल्पानामेवाधिकार इत्यस्य अपवादाधिकरणे वसिष्ठशुनकाऽ-त्रिवध्यश्वराजन्यानां नाराशंसो द्वितीयः प्रयाजः । तनूनपादन्ये-षां नाराशंसाद्द्वितीयप्रयाजवद्राज्ञः तनूनपाद्द्वितीयप्रयाजवत्पुरोहित-स्य चोभयोरधिकार इति शाबरस्वामिनोक्तेः । *स्मार्ते

'वेदोपाकृतिरोषधिप्रजनने पक्षे सिते श्रावणे'
इति शुक्लपक्षोऽपि सर्वेषां मुख्यकालत्वेनोक्तः *वक्ष्यमाणगार्ग्यवचनेन छन्दोगान्प्रति विहितस्याविरोधिनः सर्वान्प्रति प्रशस्तश्च । तथापि श्रावणमाससम्बन्धस्य *सूत्रोक्तत्वात्कृष्णपक्षेऽपि कार्यमिति वृद्धाः। तथाच सूत्रम्—'अथातोऽध्यायोपाकरणमोषधीनां प्रादुर्भावे श्रवणेन श्रावणस्य पञ्चम्यां हस्तेन वा'। अत्र श्रावणी मुख्याऽन्ये गौणाः *तस्य प्राथम्यात् । तस्याहर्क्षयोगे हेमाद्रौ व्यासः—

'धनिष्ठासंयुतं कुर्याच्छ्रावणं कर्म यद्भवेत् ।
तत्कर्म सफलं ज्ञेयमुपाकरणसंज्ञितम् ॥
श्रवणेन तु यत्कर्म उत्तराषाढसंयुतम् ।

इति । शिष्याभावेऽपि स्मार्तोत्सवे लौकिको बोध्यः । *वक्ष्यमाणगार्ग्यवचनेनेति । कात्यायनवचनेनेति त्वपपाठः । तथा कात्यायनस्याग्रेऽदर्शनात् । *सूत्रोक्तत्वादिति । सूत्रानुक्तशुक्लत्वस्य नान्वय इत्याशयः । पञ्चम्यामिवेहापि सूत्रानुक्तावपि शुक्लत्वान्वय इत्यन्ये । *अन्ये गौणा इति । स च श्रावणशुक्लपञ्चमीहस्तयुक्तं दिनं भाद्रशुक्लश्रवणः । तद्गतशुक्लपञ्चमी एवमादि । येषां श्रावणपञ्चमी हस्तयुक्ता, तेषां भाद्रपञ्चमी तादृशीति केचित् । एवमेव यजुर्वेदिनां श्रावणहस्तपञ्चम्यां, भाद्रपदपौर्णमासीतद्गतहस्तपञ्चम्यौ वा । अत्र—"पूर्वेद्युरुत्तराषाढयोगे, परेद्युः श्रवणाभावे घटिकाद्वयन्यूने वा पञ्चम्यादौ कार्यं, न तु पूर्वविद्धायां सङ्गवमात्रे । अपवादाभावात् । किञ्च परेद्युः सङ्गवास्पर्शे निषिद्धपूर्वग्रहणे किं मानम् ?, सङ्गववाक्यं श्रवणवाक्यं चेति चेत्तर्हि व्रीहिवाक्याद्यवशाकवाक्याच्च माषमिश्राणामप्युपादानं स्यात् । निषेधानुमेयशास्त्रै-

संवत्सरकृतोऽध्यायस्तत्क्षणादेव नश्यति ॥' इति ।

प्रयोगपारिजाते गार्ग्योऽपि—

'उदयव्यापिनी त्वेव विष्णवर्क्षे घटिकाद्वयम् ।
तत्कर्म सफलं ज्ञेयं तस्य पुण्यं त्वनन्तकम् ॥' इति ।

पूर्वेद्युरुत्तराषाढयोगे परेद्युः श्रवणाभावे घटिकाद्वयन्यूने वा पञ्चम्यादौ कार्यम्, न तु पूर्वविद्धायां संगवमात्रे। अपवादाभावात् । किञ्च परेद्युः संगवास्पर्शे निषिद्धपूर्वाग्रहणे किं मानम् ?। संगववाक्यं श्रवणवाक्यं चेति चेत् तर्हि व्रीहिवाक्यादश्वशफवाक्याच्च माषामिश्राणामप्युपादानं स्यादिति महत्पाण्डित्यम् । निषेधानुप्रवेशान्नैरपेक्ष्यबाधान्नेति चेदिहापि तुल्यम् । एतेन पर्वाप्यौदयिकं व्याख्यातम् । निषेधानुप्रवेशस्योभयत्र तुल्यत्वात् ॥

रपेक्ष्यबाधान्नेति चेदिहापि तुल्यम् । एतेन पर्वाप्यौदयिकं व्याख्यातम् । "निषेधानुप्रवशस्योभयत्र तुलयत्वात्"इति पाठः । स च सुगम एव। परं तु श्रवणेन श्रावणस्येति कात्स्न्येन श्रवणसम्बन्धः प्रतीयते । स चान्तिमक्षणसम्बन्धः। तद्धत्त्वं च पौर्णमास्यां दिनान्तरे वा । तदुक्तम्—'धनिष्ठामतिपद्युक्तम्' इत्यादि । तेन यत्रोदयात्पूर्वं प्रवृत्तः श्रवणः परेऽह्नि उदयोत्तरं किञ्चिद्वर्तते । तत्र परेऽह्नि धनिष्ठायोगात् ग्राह्यत्वे प्रसक्तेऽपि तत्र कर्मकालव्याप्तिर्नास्ति । पूर्वेद्युश्चान्त्यक्षणेऽभावेनाग्राह्यत्वात् पञ्चम्यादि ग्राह्यम् । यत्र तूत्तराषाढसंयुक्तश्रवणः क्षयवशान्न परेद्युः, तदा धनिष्ठायुक्तश्रवणस्य मुख्यकालस्यासत्त्वादुत्तराषाढयुक्तेऽपि तद्दिन एव कार्यम् । उत्तराषाढयोगनिन्दावाक्यं तु न हि निन्दान्यायग्रस्तम् । स्वतो निषिद्धत्वाभावादेव न निषिद्धमाषग्रहणापत्तिविभीषिकाऽपि। द्विती-

अत्र गार्ग्यादिने *संक्रान्त्यादौ तु—
उपाकर्म न कुर्वीत क्रमात्सामयजुर्विदः।
ग्रहसंक्रान्तियुक्तेषु हस्तश्रवणपर्वसु॥
इति हेमाद्रौ निषेधात्। पञ्चम्यादयो ग्राह्याः। मदनरत्नेऽपि
*यदि स्याच्छ्रावणं पर्व ग्रहसंक्रान्तिदूषितम्।
स्यादुपाकरणं शुक्लपञ्चम्यां श्रावणस्य तु॥
स्मृतिमहार्णवे—
'संक्रान्तिग्रहणं वाऽपि यदि पर्वणि जायते।
तन्मासे हस्तयुक्तायां पञ्चम्यां वा तदिष्यते॥'
यद्दिने च कर्मकालव्यापिश्रवणस्तद्दिने, अन्यथा तु पञ्चम्यादाविति। यत्तु श्रवणं आर्द्रा प्रत्यनुराधाभिजिन्नक्षत्रांशः स त्याज्य इति स्मृत्यर्थसारे उक्तं, तन्निष्प्रमाणकमिति प्राहुः। अभिरूपश्च।

*संक्रान्त्यादाविति। सूतकादिमृतकाद्यपि द्रष्टव्यम्।
'संक्रान्तौ ग्रहणे वाऽपि सूतके मृतकेऽथ वा।
गणस्नानं न कुर्वीत नारदस्य वचो यथा॥'
इत्युक्तेः। न च सूतकादौ प्राप्त्यभावात्कथं निषेध इति वाच्यम्। गृह्याग्नेः श्रौतत्वात् उपाकर्मणश्च वैतानत्वात्। *यदीति। याजुषान्मते 'परतश्चेन्न दोषकृत्' इति, 'परतश्चेत्परेऽहनि' इति पाठे परेऽहनि न कुर्वीतेत्यर्थः। श्रावण्यामिति पञ्चम्यादेरुपलक्षणम्। अत्र पर्वश्रवणगतयोरेव ग्रहणसङ्क्रान्त्योर्निषेधः।
'ग्रहसङ्क्रान्तियुक्तेषु हस्तश्रवणपर्वसु।' इति॥
तत्सामानाधिकरण्यात् न तिथ्यन्तरनक्षत्रान्तरगतयोरपि। तेन प्रतिपदि धनिष्ठादौ वा ग्रहणसङ्क्रमयोः पर्वणि श्रवणे चोपाकर्म कार्यम्। अन्ये तु ग्रहसङ्क्रान्तिदिने येषामुपाकर्म प्राप्तं, तैस्तत्र

तत्रापि प्रयोगपारिजाते वृद्धमनुकात्यायनौ—
　‘*अर्धरात्रादधस्ताच्चेत्संक्रान्तिर्ग्रहणं यदा ।
　उपाकर्म न कुर्वीत परतश्चेन्न दोषकृत् ॥’ इति ।
मदनरत्ने गार्ग्योऽपि—
　‘यद्यर्धरात्रादर्वाक्तु ग्रहः संक्रम एव वा ।
　नोपाकर्म तदा कुर्याच्छ्रावण्यां श्रवणेऽपि वा ॥’
एतेन ग्रहसंक्रान्तिकाले श्रवणसत्त्वे एव निषेधो नार्वागिति मूर्खशङ्का परास्ता । ग्रहविशिष्टानां हस्तश्रवणपर्वणां प्रत्येकं निषेधे तद्युतोपाकर्मनिषेधे च विशिष्टोद्देशे वाक्यभेदात् पञ्चम्यां संक्रान्तौ निषेधाभावापत्तेश्च । तेनार्धरात्रात्पूर्वं ग्रहसंक्रमसत्त्वे एवोपाकर्मनिषेधो न तद्योगे एव । हेमाद्रौ निगमः—
　‘ग्रहयोगो गुरुं हन्ति संक्रान्तिः शिष्यघातिनी ।
　तयोर्हन्त्युत्तराषाढा उपाकर्मणि वैष्णवे ॥’
यत्तु—
　‘प्रतिपन्मिश्रिते नैव नोत्तराषाढसंयुते ।
　श्रवणे श्रावणं कुर्युर्ग्रहसंक्रान्तिवर्जिते ॥’
इति प्रतिपन्मिश्रानिषेधकं वचनं, तन्निर्मूलम् ।
अत्र च—
　‘*वेदोपाकरणे प्राप्ते कुलीरे संस्थिते रवौ ।

न कार्यमित्यर्थः । अन्यथा ग्रहादिविशिष्टपर्वाद्युद्देशेनोपाकर्मनिषेधे विशिष्टोद्देशे वाक्यभेदापत्तेरित्याहुः । *अर्धरात्रादिति । यद्दिने उपाकर्म तद्दिनार्धरात्रात्पूर्वमेव ग्रहसङ्क्रान्तियोगो दूषको, नोत्तरत इत्यर्थः ।

　*वेदेति । चैत्रादेर्मीनादिरूपत्वात्तत्क्रमेण श्रावणः कर्कः ।

उपाकर्म न कर्तव्यं कर्तव्यं सिंहयुक्तके ॥'

इति वचनं *देशान्तरविषयम् ।

'नर्मदोत्तरभागे तु कर्तव्यं सिंहयुक्तके ।

कर्कटे संस्थिते भानावुपाकुर्यात्तु दक्षिणे ॥'

इति बृहस्पतिवचनादिति प्रयोगपारिजातेनोक्तम् । पराशरमाधवीयेऽप्येवम् । सामगानां हि सिंहस्थरवावुक्तस्तद्विषय इदं *पुरोडाशन्यायेनोपसंह्रियते ।

तत्र चाधिक एवोपाकर्मणां सिंहश्रावणविधानम् । *देशान्तरेति । नेदं सामगविषयम् । तेषां कर्कभास्वभावेन व्यवस्थाया अनुपपत्तेः । किन्तु तदितरविषयम् । तेषां च श्रावणशब्देनोपाकर्मकालोऽभिहितः । श्रावणश्च सौरः ।

'उपाकर्ममहापात्युत्सर्गाष्टकादिषु सौरादितः ।'

इत्युक्तेः । स च 'मीनमेषयोर्मेषवृषभयोर्वा वसन्तः' इति क्रमेण चैत्रादिरिव द्वेधेति कर्कसिंहयोरप्यव्यवस्थाप्राप्तौ व्यवस्थाविधिरर्थवान् । नच चैत्रादिर्मीनादिरूपत्वात्तत्क्रमेण श्रावणः कर्क एवेति वाच्यम् । न्यायस्य सामर्थ्यान्मार्गेण व्यवस्थापनात् । अन्यथा न्यायेन सुमहत्त्वानुपेक्ष्य विसदृशपूर्णिकानियमविधानानुपपत्तेः । कथं तर्हि नर्मदोत्तरभागस्थानामार्यावर्तनिवासिनां शिष्टानामृग्यजुरादीनां कर्कटस्थेऽपि रवावुपाकर्मानुष्ठानम् ? । प्राच्यनिबन्धादावेतद्वाक्यस्यालिखितत्वेनानाश्वासात् । *पुरोडाशेति । यथा 'पुरोडाशं चतुर्धा करोति' इत्यस्य 'आग्नेयं चतुर्धा करोति' इत्यनेनोपसंहारः ।

'सामान्यविधिरस्पष्टः संह्रियेत विशेषतः' ।

इत्युक्तेः । तथा 'वेदोपाकरणे' इत्यस्य 'सिंहे रवौ' इत्यग्रिमेणोपसंहार इत्यर्थः । 'नर्मदोत्तरभागे' इति देशभेदेन कर्कसिंहव्यवस्थाऽपि सामगान् प्रत्येव । अयं हि तदर्थः—यत्सिंहे कार्यं तन्नर्मदोत्तरभागे इति । तर्हि सामगैर्दक्षिणभागे कदा कार्यमित्यपे-

तेषामेव देशव्यवस्था न तु बह्वृचादिपरम्। तेषां सूत्रे चान्द्रश्रावणोक्तेः। सौरे पञ्चम्ययोगात् इति तु वयं पश्यामः सामान्येन सौत्रविशेषस्य बाधायोगाच्च। यत्तु कालादर्शे—

'अध्यायानामुपाकर्म श्रावण्यां तैत्तिरीयकाः।
बह्वृचाः श्रवणे कुर्युः सिंहस्थोऽर्को भवेद्यदि॥
*सहस्तशुक्लपञ्चम्यां वा तद्ग्रहणसंक्रमे।
असिंहार्के प्रौष्ठपद्यां श्रवणेन व्यवस्थया॥' इति।

क्षायां कर्कटे इति विधिः। एककोटिसिंहमात्रप्राप्तावपि कात्यन्तरकर्कटाप्राप्त्यव्यवस्थाविधिः सङ्गच्छत एव। पाठतो द्वितीयस्थाने तनूनपात्प्रयाजस्य प्राप्तौ नाराशंसस्य चाप्राप्तौ वासिष्ठादीनां नाराशंसो द्वितीयः प्रयाजः, तनूनपादन्येषाम्' इतिवत्। बह्वृचादीन्प्रति तु नेदं प्रवर्तते, अप्राप्तसिंहादिविधौ गौरवात्। 'श्रवणेन श्रावणस्य' इति सूत्रे हि चान्द्र एव श्रावण उक्तः। नतु सौरः पञ्चम्यनन्वयापत्तेः। न चोभयपरता। वृत्तिद्वयविरोधात् लक्षणापत्तेश्च। न च बह्वृचसूत्रेण श्रावणश्रवणे विहितमपि सिंहार्कविरहे भाद्रश्रवणे उत्कृष्यते इत्येव किं न स्यादिति वाच्यम्। ऋग्यजुःसामवेदिविशेषाश्रवणेन बह्वृचान्प्रत्येव स्वातन्त्र्येण प्रवर्तमानसूत्रबोध्यचान्द्रश्रावणश्रवणादेः कर्कार्के सम्भवे परित्यागायोगात्। किंचमूलेति। बह्वृचान्प्रतीत्यादिः। वेदोपाकरणे इत्यादेः सामगपरत्वादिति भावः। वस्तुतस्तु कालादर्शो नासङ्गतः। 'भवेद्यदि' इति यदि पदस्य पाक्षिकाभिप्रायत्वात्। तदभावेऽपि श्रवणस्यैव लाभात्। तत्र ग्रहणादौ त्वाह— *सहस्तेति। प्रौष्ठपद्यां=पञ्चम्याम्। *श्रवणे=भाद्रश्रवणे इत्यर्थः।

ननु मूलाभिधानमयुक्तम्। सूत्रे हि श्रवणेन श्रावणकर्मेति चान्द्रमास एवोक्तो न सौरः तस्य पक्षद्वयाभावात्। तिथिनक्षत्राभ्यामुभयपरत्वे श्रुतिसिद्धान्तविरोधाच्च। तेन सिंहस्थेऽर्के भावो यदि तदा कर्केऽपि ग्रहणसंक्रमे सति असिंहार्के शुक्लपञ्चम्यां श्रावणे वा बह्वृचाः पौष्ठपद्यां तैत्तिरीया इति व्याख्येयम्। तेषां सौरमासाभावात्। श्रावणे ग्रहसंक्रमादौ तु बह्वृचपरिशिष्टे-

'*अवृष्ट्या ग्रहसंक्रान्त्या तन्मासे तु न भवन्ति चेत्।
तदा भाद्रपदे मासि श्रवणेन तदिष्यते॥' इति।

तत्राप्यनुक्रमे तु—

*'कुर्याद्वा तद्वार्षिकमित्याचक्षते' इति सूत्रात्। वर्षर्तौ भवं वार्षिकम्। एतच्च शुक्रास्तादावपि कार्यम्।

'उपाकर्मोत्सर्जनं च पवित्रदमनार्पणम्।'

इति दमनारोपे लिखितवचनात्।

'नित्यं नैमित्तिकं जप्यं होमं यज्ञक्रियास्तु च।
उपाकर्माणि चोत्सर्गं ग्रहवेधो न विद्यते॥'

इति प्रयोगपारिजाते संग्रहोक्तेः। पर्वणि ग्रहणे सति पूर्वं त्रिरात्रादिवेधाभावं वक्तुमिदम्। तेन पर्वणि ग्रहणेऽपि चतुर्दश्यां श्रवणे कार्यमिति हेमाद्रिः। अस्ते प्रथमारम्भस्तु न भवति।

'गुरुभार्गवयोर्मौढ्ये बाल्ये वा वार्धकेऽपि वा।

---

*अवृष्ट्येति। ग्रहणसंक्रान्तिसूतकादिवशाच्छ्रवणाद्यतिक्रमोऽपि द्रष्टव्यः। *कुर्याद्वेति। भाद्रश्रवणे तच्छुक्लपञ्चम्यादौ वा। तत्रापि प्रतिबन्धे तु उपाकर्म लुप्यत एव अशक्तवत्। यजुर्वेदिनां तूक्तम्। 'शुक्रास्तादावपि' इत्यादिना ग्रहवेधग्रहः। अधिमाससंसर्परूपौ मलमासौ। नतु मलमासः क्षयः तस्य कार्तिकादित्रयनैय-

तथाधिमाससंसर्पमलमासादिषु द्विजे ॥
प्रथमोपाकृतिर्न स्यात्कृतं कर्म विनाशकृत् ॥'

इति तत्रैव कश्यपोक्तेः । अत्र प्रथमारम्भे *वृद्धिश्राद्धं कुर्यादिति नारायणवृत्तौ । एतच्चाधिमासे न कार्यम् ।

'उपाकर्मतथोत्सर्गः प्रसवाहोत्सवाष्टकाः ।
मासवृद्धौ परे कार्या वर्जयित्वा तु पैतृकम् ॥'

इति ज्योतिः पराशरोक्तेः ।

'उत्कर्षः कालवृद्धौ स्यादुपाकर्मादिकर्मणि ।
अभिषेकादिवृद्धीनां न तूत्कर्षो युगादिषु ॥'

इति कात्यायनोक्तेश्च । यत्तु—

'उपाकर्माणि चोत्सर्गे यतादिष्टं वृषादितः ।' इति क-

त्याद तत्रोपाकर्मप्रसक्तेः । आदिना सिंहस्थगुरुवक्रातिचारादिग्रहः ।

'गुरुशुक्रतिरोधाने वर्जयेच्छ्रुतिचोदितम् ।'

इत्याह भगवानत्रिः 'श्रावणं तु विशेषतः ।' इत्यपि प्रथमोपाकर्म परमेव ।

'यज्ञोपवीतं धर्तव्यं श्रावणे गुरुशुक्रयोः ।
मौढ्येऽपि वार्धके बाऽल्पे नित्यवत्कर्मचोदितम् ॥'

इति स्मृतिसारे । तदनुष्ठानस्यापि तत्रोक्तेः । यज्ञोपवीतधारणं चोपाकर्म । तत्र यज्ञोपवीतधारणस्याग्रे स्पष्टत्वात् अधिमासादिग्रहणं च प्रत्यवायातिशयज्ञापनार्थम् । वचनान्तरेण सर्वसाधारण्येन निषेधस्य सिद्धत्वात् । श्रावणश्रवणस्य गुरुशुक्रास्तबाल्याद्याक्रान्तत्वे च तत्र प्रथमोपाकृत्यभावाद्यथासम्भवं श्रावणपञ्चम्यां भाद्रश्रवणपञ्चम्योर्वा कार्यम् । *वृद्धिश्राद्धमिति ।

'नानिष्ट्वा तु पितॄन् श्राद्धे कर्म किंचित्समारभेत्' ।

ऽध्यग्रकृत्वनं तत्समाप्तिपर्यन्तम् । *तेषां मितार्के एवोक्तः । एतच्चापराह्णे कार्यम् ।

'उपाकर्मापराह्णे स्यादुत्सर्गः प्रातरेव तु ।' इति ।

'अध्यायानामुपाकर्म कुर्यात्कालेऽपराह्णिके ।

इत्युक्तेः । तथा यद्यध्ययनाध्यापनार्थमयमुक्तम् । तदा संस्कारस्याचार्यनिष्ठत्वादाचार्यः स्वपित्रादिभ्यो नान्दीश्राद्धं दद्यात् । यदि त्वध्ययनं विनैव तत्संस्कारार्थमुपाकरणं तदा माणवकस्य तत्संस्कारार्थं जीवन् पिता स्वपित्रादिभ्यो दद्यात् । मृतश्चेत्तदा बटुरेव स्वपित्रादिभ्यो दद्यात् ।

'स्वपितृभ्यः पिता दद्यात्सुतसंस्कारकर्मसु ।
पिण्डानोद्वाहनात्तेषां तस्याभावे तु तत्क्रमात् ॥'

इति वचनात् । तस्य पितुरभावे तत्क्रमात्=पितृक्रमादित्यर्थः । तस्य पितुरभावे तत्क्रमात्संस्कार्यपितृक्रमात् इत्यर्थे तु आचार्य एव तत्पित्रादिभ्यो दद्यात् ।

नान्दीश्राद्धान्ते च निवीतिना ऋषयः पूजनीयाः । 'नव-ग्रन्थे नोत्सृष्टानामुपाकर्म' इति 'उपाकृतानामुत्सर्ग' इति मतद्वयं लिखितम् । प्रसवाहोत्सवो=जातकर्मादिः । नर्पापनं वा न तु जातकर्म तस्य तत्रैव कर्तव्यत्वात् । परं=उत्तरं मासि । कालवृद्धाविति । संसर्पे च नैतत्प्रवर्तते कालवृद्ध्यभावात् । उपाकर्माणि भाद्रश्रावणौ विना कालाभावाच्च । प्रथमस्य तु तत्र वचनान्निषेधः । 'अभिषेकादिवृद्धीनामपि' । उत्कर्ष इति वचने ।'

'वर्षवृद्ध्यभिषेकादि कर्तव्यमधिके न तु ।

इत्युक्तेः । 'नोत्कर्षो युगादिषु' इतिच्छेदः, युगादेरुभयत्र प्राशस्त्यात् । उपाकर्ममहाषष्ठ्यादीति ।

'दशहरासु नोत्कर्षश्चतुर्ष्वपि युगादिषु ।'

इति पूर्वार्धम् । *तेषामिति । अयमर्थः युगादितिथिषु

'पूर्वाह्णे तु विसर्गः स्यादिति वेदविदो विदुः ॥'

इति च हेमाद्रौ गोभिलोक्तेः । वस्तुतस्तु—

'भवेदुपाकृतिः पौर्णमास्यां पूर्वाह्ण एव तु ।'

इति प्रचेतसो वचनात् पूर्ववाक्यं सामगविषयम् । तेषाम् *अपराह्ण एवोक्तेरित्यनुपदं वक्ष्यते । दीपिकापि— 'अस्य तु विधेः पूर्वाह्णकालः स्मृतः' इति । *याजुषास्तु पर्वणि कुर्युः । तच्चापस्तम्बैरौदयिकं ग्राह्यमन्यैस्तु पूर्ववत् ।

'पर्वण्यौदयिके कुर्युः श्रावणं तैत्तिरीयकाः ।
बह्वृचाः श्रवणे कुर्युर्ग्रहसंक्रान्तिवर्जिते ॥'

इति गार्ग्योक्तेः ।

'संप्राप्ते श्रावणस्यान्ते पौर्णमास्यां दिनोदये ।
स्नात्वा...'

'संप्राप्तश्रावणश्चान्त्यदिने...'

इति कालिकापुराणाच्च ।

'अथ चेद्दोषसंयुक्ते पर्वणि स्यादुपाक्रिया ।
दुःखशोकामयग्रस्ता राष्ट्रे तस्मिन् द्विजातयः ॥'

उपाकर्मविधौ च मासानां सौरत्वं सममेव । इयांस्तु विशेषः-युगादयः सर्वान् प्रति विधीयन्ते । उपाकर्म तु छन्दोगान्प्रत्येव तद्विषयकतयैवोपपत्तेः । सर्वान् प्रति श्रावणादिपदस्य सौरपरत्वद्योतनेऽसामर्थ्यात् । 'हस्तदिष्टं वृषादितः' इति सिद्धस्यैव हेतुभावात्, सामर्थ्येऽपि क्षयाच्च । अत एव तेषामेवाधिमासे तत्र प्रथमोपाकर्मनिषेधः सार्थकः। अन्येषां चान्द्रश्रावणादेरेवोपादानादुत्कर्षेण तत्राप्राप्तेरिति तेषां तत्र लोपः । आशौचाशक्त्यादिना प्रतिबन्धो द्वितीयप्रयोगस्येनेति । *'अपराह्ण इति' । द्वेधा विभागेन । तद्वाक्ये पूर्वाण्हापराण्हयोर्द्वयोरेव ग्रहणात् । मुख्यानुकल्पभावेन तु पञ्चधा चतुर्धा त्रेधा द्वेधा वा।*याजुषास्त्विति । मैत्रायणीयानां

इति मदनरत्नहेमाद्र्यादौ गार्ग्येण दोषोक्तेः । अत्र शिङ्गाभट्टीये विशेषः —

'श्रवणः श्रावणं पर्व सङ्क्रमस्पृग्यदा भवेत् ।
तदैवौदयिकं कार्यं नान्यदौदयिकं भवेत् ॥'

पराशरमाधवीयेऽपि गार्ग्यः

'श्रावणी पौर्णमासी तु सङ्क्रान्त्यपरतो यदि ।
तदैवौदयिकी ग्राह्या नान्यदौदयिकी भवेत् ॥'

कर्मकालमाह — कालादर्शे निगमः —

'श्रावण्या प्रौष्ठपद्या वा प्रतिपत्षण्मुहूर्तकैः ।
विद्धा स्याच्छन्दसां तत्रोपाकर्मोत्सर्जनं भवेत् ॥'

अत्र पौर्णमासीश्रवणहस्तयोरुपलक्षणम् । *तेन तावपि सङ्क्रमस्पृशौ ।

'उदये सङ्गवस्पर्शी श्रुतौ पर्वणि चार्कभे ।
कुर्युर्नभस्युपाकर्म ऋग्यजुःसामगाः क्रमात् ॥'

इति पृथ्वीचन्द्रः । *तेनोदयसङ्क्रमोभयव्यापिनी

पूर्व श्रवणस्येत्युक्तेस्तदन्यं याजुषा ग्राह्याः । *पूर्वमिति । कात्यायनादीनां नित्यादिनाऽग्रे स्पष्टम् । अत्रोदयव्यापित्वं घटिकाद्वयव्यापित्वमुदयसङ्क्रमोभयस्पर्शित्वम्, प्रातःसङ्क्रमोभयात्मकषण्मुहूर्तव्यापित्वं चेति मतत्रयम् । तत्राद्यं ग्रन्थकृन्मतम् । तत्र सङ्क्रमस्पर्शित्वादिवाक्यानि घटिकाद्वयमुपोद्बलयन्ति । द्वितीयं पृथ्वीचन्द्रोदयमतम् । तत्र घटिकाद्वयवाक्यमवयुत्याऽनुवादः । सङ्क्रमात्परतः षण्मुहूर्तकैरिति तु मुख्यत्वार्थम् । तृतीयं हेमाद्र्यादेर्मयूखविवेचनकृतोश्च मतम् । सङ्क्रमात्परतो यदि षण्मुहूर्तकैरित्येतद्यथाश्रुतकल्पम् सङ्क्रमस्पर्शित्वादिकमनुवादः । सुदर्शनभाष्ये त्वेतद्विशेषः *तत्राद्यं मतं मयाश्रितम्, तृतीयं तु न विवृतम् । द्वितीयं मतमाह—*तेनेति । हस्तश्रवणयोरपि ग्रहणमित्यर्थः । *तेन=

सङ्गवस्पर्शश्रवणेन । *मुख्येति । अन्यथा 'सङ्गवात्परतः' इत्यादेर्नैयर्थ्यात् । केचित्तु कर्मकालः प्रातःसङ्गवरूपषण्मुहूर्तरूपः, येषां तावत्साध्यमुपाकर्म तत्पराणि 'सङ्गवात्परतः'इत्यादीनि । सङ्गवस्पर्शः सर्वावयवावच्छेदेन विवक्षित इति तद्वाक्यमपि तत्परमेव । एवं सङ्गवस्पर्शे एकदेशावच्छेदेनेति यथाश्रुतार्थोऽपि विवक्षितः । येषां न्यूनकालसाध्यमुपाकर्म तत्परं च । तेन घटिकाद्वयवाक्यं तु सङ्गवात्पूर्वावयवप्रशंसाद्वारा सङ्गवस्तावकम् । ईदृशरीत्या सर्ववाक्यानामर्थसम्भवादनुवादत्वे मानाभावः । नाप्यष्टदोषग्रस्तो विकल्प इति भाष्यानुसारिणाहुः । सामगानां त्वपराह्णः कर्मकाल इत्यपराह्णोपाकर्मिणामुदये सङ्गवस्पर्शे इत्यादिवचनात्तत्कालव्यापिनमपि पूर्वहस्तं बाधित्वोत्तरादिन एव तदनुष्ठानम् । न च दिनद्वयेऽपराह्णव्याप्तौ तदस्पर्शे वा परग्रहोऽस्त्विति वाच्यम् । सङ्गवस्पर्शित्वमात्रेण ग्राह्यत्वाविधानानुपपत्तेः । केचित्तु येषां सामगानामौदयिकः कर्मकालः, तत्परं वचनमित्याहुः । तादृशः सामगो नास्त्येवेत्यपरेत्याहुः । (१) (केचित्तु कर्मकालः प्रातःसङ्गवरूपषण्मुहूर्तात्मकः । तद्व्यापित्वं हेमाद्र्यादिभिर्मुख्यत्वविवेचनादिकृद्भिश्चादृतम् । तत्राद्यं मपाश्चिनम् । एतन्मते 'सङ्गवस्पृक्' 'सङ्गवात्परतः' इति चानुवादकम् । द्वितीयमभिप्रेत्याह *तेनेति । हस्तश्रवणयोरपि ग्रहणेत्यर्थः । षण्मुहूर्तव्याप्यत्वं मदर्थः । सङ्गवस्पर्शः सर्वावयवावच्छेदेनेति प्रातःसङ्गवोभयस्य षण्मुहूर्तकैरिति षण्मुहूर्तस्पृक्त्वलाभात् । एतच्च येषामुपाकर्म षण्मुहूर्तसाध्यं तत्परम् । एवं संगवस्पर्शः एकदेशावच्छेदेन । एतच्च येषामुपाकर्म ऊनकालसाध्यं तत्परं 'त्रिष्वर्क्षे घटिकाद्वयम्' इति तु सङ्गवात्पूर्वावयवप्रशंसाद्वारा सङ्गवस्तावकम् । ईदृशरीत्या सर्ववाक्यानामर्थसम्भवे एकदेशानुवादत्वे मानाभावः, नाप्यष्टदोषग्रस्तो विकल्प इत्याहुः । सामगानामपराह्णः

(१) कंसान्तर्गतः पाठः क्वचिदादर्शपुस्तकेऽधिको दृश्यते ।

तु निषिद्धे । न हि व्रीह्यलाभे निषिद्धमाषग्रहणं युक्तम् । अत एव परेद्युः सङ्क्रान्त्यासौ पूर्वविद्धानिषेधः । तदभावे तु नेति सूर्यव्याख्यास्थाप्ययुक्ता, विधिवैषम्यात् । माषनिषेधेऽपि तथापत्तेश्च । *पूर्वविद्धावचनमत्त्वे हि सा युज्यते । एवं श्रवणेऽपि ज्ञेयम् । तन्न । 'विष्णवर्क्षे घटिकाद्वयम्' इति पूर्वोक्तविरोधात् । तेन प्राशस्त्यमात्रपरमिदम् । तत्त्वं तु एतच्छुद्धाधिकपरम् । तेन यथाग्निहोत्रादौ सायंप्रातःकालबाधे सामान्ये जीवनावच्छिन्नकाले *दर्शादौ वाऽनुष्ठानम्, यथा वा व्रीह्यश्वशफाद्यभावे यागाक्षिप्तनिषिद्धवर्जद्रव्येण, तथाऽत्र सङ्क्रवाभावे निषिद्धवर्जकर्मपर्याप्तौदयिके कालान्तरे वाऽनुष्ठानं न तु कदाऽपि निषिद्धे । अपवादाभावे

मित्तको यस्तदपवादः पूर्वविद्धाग्राह्यत्ववादः, तस्याभावादित्यर्थः ।) विधिवैषम्यं विवृणोति *पूर्वविद्धावचनेति । इदं तु चिन्त्यम् ।

'अतो भूतदिने तस्मिन्नोपाकरणमिष्यते ।'

इति न निषेधः । हेतुपूर्वमेव 'नेष्यते' इत्यभिधानात् ।

तस्मात्सङ्क्रान्त्यासौ परा, अन्यथा पूर्वेति मतं सम्यक् । अत्र "तत्त्वं त्वेतच्छुद्धाधिकपरम् । तेन यथाऽग्निहोत्रादौ सायंप्रातःकालबाधे सामान्ये जीवनावच्छिन्नकाले दर्शादौ वाऽनुष्ठानम्, यथा वा व्रीह्यश्वशफाद्यभावे यागाक्षिप्तनिषिद्धवर्जद्रव्येण, तथाऽत्र सङ्क्रवाभावे निषिद्धवर्जकर्मपर्याप्तौदयिके कालान्तरे वाऽनुष्ठानं, न तु कदाऽपि निषिद्धे । अपवादाभावे उत्सर्गस्यैव प्राप्तेः" इति क्वचित् पाठः । 'एतत्कर्मपर्याप्तं चेत् परमेव' इति सुदर्शनभाष्यम् । एतन्मते सङ्क्रवो न नियामक इत्याशयः । अत्रापि 'अतो भूतदिने' इत्यस्य न निषेधत्वमिति स्मर्तव्यम् । 'तैत्तिरीया' इति पदोपादानफलं स्पष्टयति—*दर्शादाविति । यदि सामान्यकालेऽपि प्रतिबन्ध-

उत्सर्गेणैव प्राप्तेः । *कात्यायनादीनां तु दिनद्वये पूर्वाह्ण-व्याप्तौ एकदेशस्पर्शे वा पूर्वैवेति हेमाद्रिः । यदपि—

'श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी ।
पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दिनम् ॥'

इति ब्रह्मवैवर्तम्, तदुपाकर्मभिन्नश्रवणाकर्मादिदैव-कर्मविषयमिति हेमाद्रिः । अत एव यजनात्कुलधर्मत्व-नादावपि पूर्वैव । मदनरत्नेऽप्येवम् । मदनपारिजाते पूर्व-विद्धायां श्रावण्यां वाजसनेयिनामुपाकर्मेत्युक्तम् ।

मदनरत्ने तु—

'पर्वण्यौदयिके कुर्युः श्रावणं तैत्तिरीयकाः ।'

इति बह्वृचपरिशिष्टे बह्वृचानामपि कर्मविधानार्थं प्रवृत्ते तत्र तैत्तिरीयककर्मविधानायोगात् पूर्वोक्तकालिका-पुराणादौ सामान्येन औदयिकपर्वप्राप्तेस्तन्निषेधेन बह्वृ-चानां श्रवणविधानार्थं तैत्तिरीयकपदमनुवादत्वात् तस्य च प्राप्त्यर्थानन्तरं प्राप्तेश्च यजुर्वेदमात्रपरत्वात्सर्वयजु-र्वेद्युपलक्षणार्थम्, अवयुत्यानुवादो[१] वा, न तु विधा-यकम् । *येन त्रिशाखिनोपसंहारः स्यात् । अनुवा-दत्वाल्लक्षणया न दोषः । अन्यथा त्वौदयिकपर्वविशिष्टो-

---

ऽन्यदा कालान्तरमेवेत्यत्र दृष्टान्तः । *कात्यायनादीनां त्विति । सर्वं वाक्यमेवानुवादः तैत्तिरीयकपदमात्रं वा ?, आद्ये कालिका-पुराणादिति । अन्त्ये कुर्युरिति । कालिकापुराणादौ प्रत्यक्षतो विधिप्रत्ययाश्रवणेन यावद्विधिः कल्प्यते तावता प्रागेव कुर्युरिति प्रत्यक्षविधिना तैत्तिरीयान् प्रत्येव तद्विधिरुपपद्यते, उपस्थितिलाघ-वादिति भावः ।

*येनेति । तैत्तिरीयकसम्बन्धिधर्मविधानार्थं प्रवृत्तेन सूत्रेन

---

(१) अवयुत्य = पृथक्कृत्य अनुवादो वा ॥

पाकर्मोद्देशेन कर्तृविधौ कर्तृविशिष्टे वा औदयिकपर्व-विधौ वाक्यभेदापत्तेः। तस्मात्तैत्तिरीयकपदाविव-क्षया सर्वयजुर्वेदिनामौदयिकमेव पर्वेत्युक्तम्। तन्न। न तावत्परिशिष्टे बह्वृचानप्रत्येव विधिः।

'धनिष्ठाप्रतिपद्युक्तं त्वाष्ट्रर्क्षसमन्वितम्।'

इत्यादिनदुदाहृते एव परिशिष्टे वेदान्तरधर्मविधीनां दर्शनात्। नाप्यनुवादोऽयं कालिकापुराणाद्बह्वृचादी-नामपि तदापत्तेः। कुर्युरित्यस्य विधित्वेन तस्यैवार्थवा-दत्वेनैतत्प्रमाणानुवादित्वाच्च। न च तैत्तिरीयकाणां गृह्ये तद्विधिरस्ति, येनानुवादः स्यात्। न च वाक्यभेदः। तैत्तिरीयकमात्रस्य कर्ममात्रस्य वा उद्देश्यत्वायोगेन *हविरार्तिवत्, 'अष्टवर्षं ब्राह्मणमुपनयीत' इतिवच्चाग-त्या विशिष्टस्योद्देश्यत्वात्। *अन्यथोत्तरार्धे बह्वृचपद-स्याप्यविवक्षापत्त्या श्रवणस्य सर्वसाधारण्यापत्तेः। *तस्मात् हेमाद्रिमतमेव युक्तमिति दिक्। इदं च शि-ष्यानध्यापयत आवसथ्येऽग्नौ, अनध्यापयतो नाधिकार इति कर्कः। श्रावण्यामपि ग्रहणादिदुष्टायां कातीयभिन्नैः

तल्लाभे पुनस्तदुपादानमिति शेषः। *हविरिति। हविरार्त्यादे-रुद्देश्यस्वरूपानन्तःप्रवेश उद्देश्यत्वस्यायोगात्। 'तैत्तिरीयकमात्रस्य' इत्यत्राष्टवर्षमिति दृष्टान्तः। ब्राह्मणमात्रस्योद्देश्यत्वायोगात्। 'कर्म-मात्रस्य' इत्यत्र हविरिति दृष्टान्तः। आर्तिमात्रस्योद्देश्यत्वायोगात्।

नन्वेवं वाक्यभेदपरिहारेऽपि तुल्यकक्षाणामेव समभिव्याहा-राद्याजुषसामान्यं लभ्यते। न हि क्षत्रियैरिदं कर्म कर्तव्यं वैश्यै-रिदं कठैरिदमिति भवति, भवति तु ब्राह्मणैरिदमितीत्यत्राह— *अन्यथेति। समभिव्याहारस्य तैत्तिरीयकपदधर्मत्वेन तस्यैवा-विवक्षायां बह्वृचपदस्याप्यविवक्षापत्तिरिति भावः। *तस्मादि-

*प्रौष्ठपद्यां कार्यम् । तैस्तु श्रावणपञ्चम्यां—

'संक्रान्तिग्रहणं वाऽपि पौर्णमास्यां यदा भवेत् ।
उपाकृतिस्तु पञ्चम्यां कार्या वाजसनेयिभिः ॥'

इति स्मृतिमहार्णवे वाजसनेयिग्रहणादिति हेमाद्रिः ।(१)[इदं च सूत्रोक्तकालासंभवादुक्तपरमपि । सामगास्तु हस्ते कार्यम् । आपस्तम्बाथर्वणोश्च प्रौष्ठपद्याम् ।] यत्तु बौधायनः—'श्रावण्यां पौर्णमास्यामाषाढ्यां वोपाकृत्य' इत्युक्तं, तत्र प्रौष्ठपद्यामपि दोषे आषाढ्यां कार्यमित्युक्तमर्थे, *तच्छाखीयविषयं वा ।

सामगास्तु श्रावणे हस्ते कुर्युः ।

'बह्वृचाः श्रवणे चैव हस्तर्क्षे सामवेदिनः ।'

इति निर्णयामृते गार्ग्योक्तेः । सोऽप्युत्तरः ।

ति । 'धनिष्ठाप्रतिपद्युक्तम्' इत्यादौ यजुःपदस्य तैत्तिरीयपरत्वादिति भावः । दिग्गजैस्तु कार्त्तिकापुराणमपि तैत्तिरीयकपरमेवेति । विवेचनं तु हेमाद्रिमतं त्यक्तम् । *प्रौष्ठपद्यामिति । 'श्रावण्यां प्रौष्ठपद्यां वा' इत्युक्तेः । यत्तु येषां गृह्ये श्रावण्यसम्भवे श्रावणहस्तपञ्चम्यादुक्ते तैस्तत्र कार्यम् । तयोरप्यसम्भवे भाद्रपौर्णमास्यां तद्धस्तपञ्चम्योर्वा कार्यम्, येषां गृह्ये ते नोक्ते तैर्भाद्रपद्येव ग्राह्या वाजसनेयिभिरिति ।

अत्राहुः अत्र वाजसनेयिभिरेवेति नार्थः । बह्वृचानां पञ्चम्यनापत्तेः । किं तु येषां वाजसनेयिनां सूत्रे पञ्चम्युक्ता तेषां पर्वदोषे पञ्चमी, अन्येषां तु प्रौष्ठपद्येवेति । एवं च मैत्रायणीयानां पौर्णमास्येव न । तद्गृह्ये श्रवणस्यैवोक्तेरिति द्रष्टव्यम् । *तच्छाखीयेति । बौधायनोक्तवार्षिकसमाख्यां बाधित्वाऽऽषाढी ग्राह्येत्यर्थः । एवं च—

---

(१) कंसान्तर्गतो ग्रन्थ आदर्शपुस्तके नास्ति ।

'धनिष्ठाप्रतिपद्युक्तं त्वाष्ट्रऋक्षसमन्वितम् ।
श्रावणं कर्म कुर्वीरन् ऋग्यजुःसामपाठकाः ॥'
इति मदनरत्ने परिशिष्टोक्तेः । गार्ग्योऽपि—
'सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्णे*ऽविचरे बहिः ।
छन्दोगा मिलिताः कुर्युरुत्सर्गं स्वस्वछन्दसाम् ॥
*शुक्लपक्षे तु *हस्तेन उपाकर्मापराह्णिकम् ॥' इति ।
अविचरे=ग्रहादिदोषहीने । विचरादिति पाठोऽज्ञानकृतः । (१)(पुष्यर्क्षे*पूर्वाह्णे उत्सर्गः । अपराह्णिकमुपाकर्मेत्यन्वयः ।) उपाकरणं नाम पक्षद्वयेऽपि स्वाध्यायपाठस्य स्वीकारः । तथा च सूत्रम्-'षण्मासानधीयीत' इति । एवं च यथागृह्यमुपाकर्म कृत्वा सार्धांश्चतुरः पञ्च षड् वा मासानुत्सर्जनकालवशाद् व्यवस्थया स्मृतिसिद्धानध्यायपरिहारेण शुक्लकृष्णपक्षयोः स्वाध्यायमधीयीरन्, अनध्यायेष्वङ्गानि । उत्सर्जनं च यथापूर्वं पक्षद्वयेऽपि स्वाध्यायपाठस्य त्यागः । उत्सर्जनोत्तरं शुक्लपक्षेष्वेव वेदाध्ययनविधानात् । तथा च मनुः—
'यथाशास्त्रं तु कृत्वैवमुत्सर्गं छन्दसां बहिः ।
विरमेत् पक्षिणीं रात्रिं यद्वाऽप्येकमहर्निशम् ॥

'श्रावणस्य तु मासस्य पौर्णमास्यां द्विजोत्तमाः ।
आषाढ्यां प्रोष्ठपद्यां वा वेदोपाकरणं मतम् ॥'
इति कमवाक्यमपि बौधायनपरमेवेति भावः । *अविचरे=सङ्क्रान्त्यादिदोषहीने । विचरादिति पाठोऽज्ञानकृतः । *शुक्लपक्षे त्विति । सिंहे रवाविति वर्तते । *हस्तेनेति । 'प्रौष्ठपदीं हस्तेन' इत्यादौ सौरप्रौष्ठपदोपादानेन तन्मासस्थां हस्तयुक्तां कां च न तिथिं प्राप्नोति सम एवार्थः । *पुष्यर्क्षे इति । एतेन हस्ता-

(१) कंसान्तर्गतो ग्रन्थ आदर्शपुस्तके नास्ति ।

अकृत्वा वेदजप्येन फलं नाप्नोति मानवः ॥'

सर्वथा लोपे तु कृच्छ्र उपवासश्च । 'वेदोदितानां नित्यानाम्' इति मनुनाऽभोजनोक्तेः । एवमुत्सर्गेऽपि ।

अथ प्रसङ्गादत्रैवोत्सर्जनमुच्यते । तच्च पौषमासे रोहिण्यां तत्कृष्णाष्टम्यां वा कार्यम् ।

'पौषमासस्य रोहिण्यामष्टकायाम*थापि वा ।
जलान्ते छन्दसां कुर्यादुत्सर्गं विधिवद्बहिः ॥'

इति याज्ञवल्क्योक्तेः । *श्रावण्यां प्रौष्ठपद्यां वोपाकृतौ क्रमेण पौषशुक्लप्रतिपदि माघशुक्लप्रतिपदि वा का-

---

'अध्येष्यमाणोऽध्यापयैरन्वारब्धः' इति । अध्येष्यमाणः=अध्यापयिष्यमाणः । अध्याप्यपदसमभिव्याहारात् । अध्यापनम्=धारणाध्ययनरूपमिति तेनैव रूपेण लटोपाकर्म प्रति शेषित्वप्रतीतिः । वेदजप्येनेत्यपि धारणाध्ययनाङ्गत्वसूचकम् । एवं च तत्समर्थस्याध्याप्यैर्विनाऽप्युपाकर्मादि आवश्यकम् । उपाकृतानां चोत्सर्गः । ततश्चानयोर्नित्यत्वात्तल्लोपे प्रायश्चित्तं सर्वथा इति कृच्छ्रः । पाकयज्ञलोपे कृच्छ्रविधानात् ।

'वेदोदितानां नित्यानां कर्मणां समतिक्रमे ।
स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम् ॥' इति ।

*अथापि वेति ।

'जलान्ते छन्दसां कुर्याद्बहिरुत्सर्जनं द्विजः ।'

इत्युत्तरार्धे ग्रामाद्बहिरित्यर्थः । *श्रावण्यामिति ।

'पुष्ये तु च्छन्दसां कुर्याद्बहिरुत्सर्जनं द्विजः ।
माघशुक्लस्य सम्प्राप्ते पूर्वाह्णे प्रथमेऽहनि ॥'

इति मानवात् । पुष्ये=पौषे मासि । शुक्लपक्षादेरप्यन्वयः । यदा श्रावण्यामुपाकर्म तदा पौषशुक्लप्रतिपदि, यदा भाद्र्यां तदा-

'पुष्ये तूत्सर्जनं कुर्यादुपाकर्मदिनेऽथ वा ।'

इति हेमाद्रौ स्मार्दिगृह्योक्तेः ।

*यदा सिंहस्थे सूर्ये सति तन्मध्यस्थहस्तनक्षत्रात्प्राक् पुष्यः कर्कटस्थो भवति तदा तस्मिन्पुष्ये उत्सर्गं कृत्वा तदुत्तरहस्ते उपाकर्म सामगाः कुर्युः ।

'मासे प्रौष्ठपदे हस्तात्पुष्यः पूर्वो भवेद्यदा ।

तदा च श्रावणे कुर्यादुत्सर्गं छन्दसां द्विजः ॥'

इति तत्रैव परिशिष्टोक्तेः । अत्र द्वावपि सौरौ मासौ ज्ञेयौ* । तेषां सौरस्यैवोक्तेः ।

अत्र *विशेषमाह कार्ष्णाजिनिः—

'उपाकर्मणि चोत्सर्गे यथाकालं समेत्य च ।

त्यनेनोपाकर्मोत्सर्गयोर्नक्षत्रयोः हस्तपुष्ययोः सिंहस्थत्वमुक्तं तत्रोत्सर्गनक्षत्रपुष्यस्य यत्र कर्कस्थत्वं तत्र तल्लोपापत्तिः सिंहस्थत्वाभावादित्यत्राह—*यदेति । तत्र 'उपाकर्मोत्सर्जनं भवेत्'इति प्रोक्तवचनाच्च । आषाढ्यामुपाकृत्य माघशुक्लप्रतिपद्युत्सर्गे तु सार्धपञ्चाध्ययनमपि बोध्यम् । कर्कस्थः=कर्कस्थ एव न तु सिंहस्थः । सिंहस्थे पुष्ये तु तत्रैवेत्यर्थः । *ज्ञेयाविति । अन्यथा यत्र चान्द्रप्रौष्ठपदे एव सौरश्रावणे पुष्यः, सौरभाद्रपदे च हस्तः तदाऽपि चान्द्रश्रावणग्रहणं स्यात् । *विशेषमिति । अत्र चेदं द्रष्टव्यम् ।

'ऋक्शाखी नैव कुर्वीत स्वकीयं परशाखया ।

प्रमादाद्यदि कुर्वीत पुनः संस्कारमर्हति ॥

यत्र नास्ति स्वशाखोक्तमृक्शाखोक्तं समाचरेत् ।

पुनर्नार्हति संस्कारमन्यदाऽर्हति चेत् पुनः ॥

यजुःशाखाविधानेन बह्वृचैर्यदि कर्म तत् ।

कृतं चेत्तर्हि तत्कर्म पुनः कुर्याद्यथाविधि ॥

कार्यान्तर्भिमगान्कृत्वा पूजयेत्तर्पयेत्ततः ॥' इति ।

'उपाकर्मण्युत्सर्गे च त्रिरात्रं पक्षिणीमहोरात्रं वाऽनध्यायः' इति मिताक्षरायामुक्तम् । अत्र नदीनां रजोदोषो नास्ति ।

'उपाकर्मणि चोत्सर्गे रजोदोषो न विद्यते ।'
इति गार्ग्योक्तेः ।

अत्रैव रक्षाबन्धनमुक्तं हेमाद्रौ भविष्ये

(१)('संप्राप्ते श्रावणस्यान्ते पौर्णमास्यां दिनोदये ।
स्नानं कुर्वीत मतिमान श्रुतिस्मृतिविधानतः ॥
उपाकर्मादिकं प्रोक्तमृषीणां चैव तर्पणम् ।
शूद्राणां मन्त्ररहितं स्नानं दानं च शस्यते ।)
उपाकर्मणि कर्तव्यमृषीणां चैव पूजनम् ॥
ततोऽपराह्णसमये रक्षापोटलिकां शुभाम् ।
कारयेदक्षतैः शस्तैः सिद्धार्थैर्हेमभूषितैः ॥' इति ।

अत्रोपाकर्मानन्तर्यस्य पूर्णिमातिथ्यार्थिकस्यानुवादो न तु विधिः । गौरवात् प्रयोगविधिभेदेन क्रमायोगाच्छूद्रादौ तदयोगाच्च । तेन परेद्युरुपाकरणेऽपि पूर्वेद्युरपराह्णे तत्करणं सिद्धम् । इदं भद्रायां न कार्यम् ।

'भद्रायां द्वे न कर्तव्ये श्रावणी फाल्गुनी तथा ।
ऋक्शाखाविधिना कर्म यदि स्यादन्यशाखिनाम् ।
न तत्कर्म पुनः कुर्यादिति यज्ञविदो मतम् ॥' इति ।

ननु—

'उपाकर्मादिकं प्रोक्तमृषीणां चैव तर्पणम् ।'

इत्याद्युपक्रम्य 'ततोऽपराह्णसमये' इत्यादि उक्तम् । ततश्च वक्ष्यमाणदोषो दुर्वार इत्यत्राह—अत्रेति । अपराह्णः कर्मकालः ।

(१) कंसान्तर्गतो ग्रन्थ आदर्शपुस्तके नास्ति ।

श्रावणी नृपतिं हन्ति ग्रामं दहति फाल्गुनी ॥'

इति संग्रहोक्तेः । *तत्सत्त्वे तु रात्रावपि तदन्ते कुर्यादिति निर्णयामृते । (१) इदं प्रतिपद्युतायां न कार्यम् ।

'नन्दायां दर्शने रक्षा बलिदानं दशासु च ।
भद्रायां गोकुलक्रीडा देशनाशाय जायते ॥'

इति मदनरत्ने ब्रह्मवैवर्तात् । भविष्ये—

'उपलिप्ते गृहमध्ये दत्तचतुष्कं न्यसेत्कुम्भम् ।
पीठे तत्रोपविशेद्राजाऽमात्यैर्युतश्च सुमुहूर्ते ॥
तदनु पुरोधा नृपते रक्षां बध्नीत मन्त्रेण ॥'

इदं रक्षाबन्धनं नियतकालत्वाद्भद्रावर्ज्यग्रहणदिनेऽपि कार्यं होलिकावत् । ग्रहसंक्रान्त्यादौ रक्षानिषेधाभावात् ।

'सर्वेषामेव वर्णानां सूतकं राहुदर्शने ।'

इति तत्कालीनकर्मपर एव न त्वन्यत्र । अन्यथा होलिकायां का गतिः । अत एव—

'नित्ये नैमित्तिके जप्ये होमे यज्ञक्रियासु च ।
उपाकर्मणि चोत्सर्गे ग्रहवेधो न विद्यते ॥'

इति नियतकालीने तदभाव इति दिक् । उपाकर्मणि तद्दिनभिन्नपरं तत्र तन्निषेधादित्युक्तं प्राक् । मन्त्रस्तु—

*'येन बद्धो बली राजा दानवेन्द्रो महाबलः ।
तेन त्वामपि बध्नामि रक्षे मा चल मा चल ॥

दिनद्वयव्याप्तौ पूर्वा 'श्रावणी दुर्गनवमी' इति वाक्यात् । *तत्सत्त्वे त्विति । भद्रां विना चेदपराह्णे तदा परा । तत्सत्त्वे तु रात्रावपीत्यर्थः । *येन=रक्षाबन्धनाभावेन हेतुना । तेनेत्यस्यापि

---

(१) तत्कालमात्रनिषेधाच्च 'त्रयोदश्यादितो वर्ज्यं दिनानां नवकं ध्रुवम् । माङ्गल्येषु समस्तेषु ग्रहणे चन्द्रसूर्ययोः ॥' इति यो निषेधः सोऽप्यनित्य इति विशेषः कस्मिंश्चित्पुस्तके ।

श्रावणादिमासचतुष्टयकृष्णपक्षद्वितीयासु अशून्य-शयनव्रतम् । तत्र *चन्द्रोदयव्यापिनी, दिनद्वये तस्त्वे *परेति निर्णयामृते ॥ इति कमलाकरभट्टकृते निर्णय-सिन्धौ श्रावणमासः ॥

*सिंहे पराः षोडशघटिकाः पुण्यकालः । अन्यत्पूर्व-वत् । अत्र गोप्रसवेऽद्भुतसागरे नारदः—

'भानौ सिंहगते चैव यस्य गौः संप्रसूयते ।
मरणं तस्य निर्दिष्टं षड्भिर्मासैर्न संशयः ॥
तत्र शान्तिं प्रवक्ष्यामि येन संपद्यते शुभम् ।
प्रसूतां तत्क्षणादेव तां गां विप्राय दापयेत् ॥
ततो होमं प्रकुर्वीत घृताक्तै राजसर्षपैः ।
आहुतीनां घृताक्तानामयुतं जुहुयात्ततः ॥
[व्याहृतिभिश्चायं होमः ।]

एतच्च श्रवणाकर्मसर्पबल्याश्वयुजीकर्माग्रयणप्रत्यवरोहणेषु प्रव-र्तेत । तत्र प्रायश्चित्तान्तरादर्शनात् । *चन्द्रोदयेति ।

'एकभक्ते दिवानक्ते निशि चन्द्रोदयव्रते ।
तिथिस्तात्कालिकी ग्राह्या पारणे त्वपरा तिथिः ॥'

इति स्मृतिसङ्ग्रहात् । इदं च चन्द्रोदयव्रतम् ।

'चन्द्राय वाऽर्घ्यो दातव्यो दध्यक्षतविभूषितः ।'

इति चन्द्रोदये चन्द्रार्घ्यदानविधानात् । *परेति ।

'चतुर्ष्वसितपक्षेषु मासेषु श्रावणादिषु ।
अशून्याख्यं व्रतं कुर्याज्जायया तु फलाधिकम् ॥'

इत्युक्तेः । अत एव दिनद्वये तदभावेऽपि परा ।
मासश्च पूर्णिमान्तः । हेमाद्रिणा तथा व्याख्यानात् ।

इति श्रावणः ॥

*सिंहे परा इति । पूर्वा इत्यपपाठः ।

सोपवासः प्रयत्नेन दद्याद्विप्राय दक्षिणाम् ।' इति ।
तथा—

'सिंहराशौ गते सूर्ये गोप्रसूतिर्यदा भवेत् ।
पौषे च महिषी सूते दिवा चाश्वतरी तथा ॥
तदाऽनिष्टं भवेत्किंचित्तच्छान्त्यै शान्तिकं चरेत् ।
अस्यवामेति सूक्तेन तद्विष्णोरिति मन्त्रतः ॥
जुहुयाच्च तिलाज्येन शतमष्टोत्तराधिकम् ।
मृत्युंजयविधानेन जुहुयाच्च तथायुतम् ॥
श्रीसूक्तेन ततः स्नायाच्छान्तिसूक्तेन वा पुनः ।
मध्यरात्रे निशीथे वा यदा गौः क्रन्दते सदा ॥
ग्रामे वा स्वगृहे वापि शान्तिकं पूर्ववदिशेत् ॥'

एवं श्रावणे बहुलाप्रसवो दिवा निषिद्धः । तदुक्तमथर्ववेदिनां गार्ग्यपरिशिष्टे—

'माघे नभे च महिषी श्रावणे बहुला दिवा ।
सिंहे गावः प्रसूयन्ते स्वामिनो मृत्युदायकाः ॥' इति ।

अत्र *तदुक्ताद्भुताख्या शान्तिः कार्या ।

भाद्रकृष्णतृतीया कज्जलीसंज्ञा । सा परा ग्राह्येति दिवोदासीये उक्तम् । *वचनं तु हरितालिकाप्रकरणे वक्ष्यामः । *भाद्रकृष्णचतुर्थी बहुलाख्या मध्यदेशे

---

*तदुक्ता=अथर्वोक्ता । कज्जलीव्रतं पूर्णिमान्तश्रावणकृष्णतृतीयायां कार्यमिति मतं निरसितुमाह *वचनं त्विति । चतुर्थीमिश्रिता' इत्युपक्रम्य 'भाद्रस्य कज्जली कृष्णा' इत्युक्तेः ।

*भाद्रकृष्णेति । अमान्तमानेन श्रावणकृष्णोपादानं प्रमादात् । पूर्णिमान्तमानेन श्रावणकृष्णं द्रष्टव्यम् । भाद्रपदकृष्णचतुर्थ्यां संकष्टचतुर्थीव्रतं स्कान्दे—

'श्रावणे बहुले पक्षे चतुर्थ्यां तु विधूदये ।

प्रसिद्धा । सा *सायाह्नव्यापिनी ग्राह्या । दिनद्वये तत्त्वे पूर्वा ग्राह्या ॥

*'गौर्याश्चतुर्थी *वटधेनुपूजा *दुर्गार्चनं दुर्भरहोलिके च ।
*वत्सस्य पूजा शिवरात्रिरेताः परान्विता घ्नन्ति नृपं सराष्ट्रम् ॥'

इति दिवोदासीये वचनात् । 'अत्र वत्सपूजायाः पृथगुपादानात् धेनुपूजाशब्देन बहुलाख्या गृह्यते' इति स एव व्याचख्यौ । मदनरत्नेऽप्येवम् । अत्र गोपूजा-यवान्नाशनं च तत्रैवोक्तम् । भाद्रकृष्णषष्ठी हलषष्ठी । सा सप्तमीयुतेति दिवोदासः । भाद्रकृष्णसप्तम्यां शी-तलाव्रतम् । तत्र *पूर्वा ग्राह्येति हेमाद्रौ ।

अथ जन्माष्टमी । सा च *कृष्णादिमासेन भाद्रप-

गणेशं पूजयित्वा तु चन्द्रायार्घ्यश्च दीयते ॥' इति ।

श्रावणोऽमान्तः 'व्रते शुक्लादिमेव च' इत्युक्तेः । इयं चन्द्रो-दययोगिनी ग्राह्या । तत्काले चन्द्रार्घ्यदानोक्त्या चन्द्रोदय-व्रतत्वात् ।

'चन्द्रोदयव्रते चैव तिथिस्तात्कालिकी स्मृता ।'

इत्युक्तेः । दिनद्वये चन्द्रोदये सत्त्वेऽसत्त्वे वा पूर्वं निरूपितये-तत्सामान्यनिर्णये । *सायाह्नेति । गोधूलिकाले गोपूजाद्युक्तेः । *गौर्याः=गौरीव्रतसम्बन्धिनी चतुर्थी ।

*वटेति । वटसम्बन्धिनी पञ्चदशी । *दुर्गार्चनं=दुर्गानवमी । दुर्भरः+ ॥ *वत्सस्य पूजा=वत्सद्वादशी । *पूर्वेति । नव्यास्तु हलषष्ठ्यां शीतलाव्रते च मध्याह्नव्यापिनी ।

'पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथिः ।'

इत्युक्तेः । दिनद्वये सत्त्वेऽसत्त्वे वा पूर्वा युग्मवाक्यादित्याहुः ॥

*कृष्णादीति । 'श्रावणे बहुले पक्षे' इत्यादिकं तु शुक्ला-

दकृष्णाष्टमी ।

'तथा भाद्रपदे मासि *कृष्णाष्टम्यां कलौ युगे ।
अष्टाविंशतिमे जातः कृष्णोऽसौ देवकीसुतः ॥'

इति कल्पतरौ ब्राह्मोक्तेः । अत्रेदं माधवमतम् । अष्टमी द्वेधा—जन्माष्टमी जयन्ती चेति । तत्राद्या केवलाष्टमी ।

'ये न कुर्वन्ति जानन्तः कृष्णजन्माष्टमीव्रतम् ।
ते भवन्ति नराः प्राज्ञ व्याला व्याघ्राश्च कानने ॥'

इति स्कान्दात्,

'दिवा वा यदि वा रात्रौ नास्ति चेद्रोहिणी कला ।
रात्रियुक्तां प्रकुर्वीत विशेषेणेन्दुसंयुताम् ॥'

इति पुराणान्तरात्,

'श्रावणे बहुले पक्षे कृष्णजन्माष्टमीव्रतम् ।
न करोति नरो यस्तु भवति क्रूरराक्षसः ॥'

इति भविष्योक्तेश्च केवलाष्टम्या एवोपोष्यत्वावगतेः । सैव रोहिणीयुक्ता जयन्ती ।

*'कृष्णाष्टम्यां भवेद्यत्र कलैका रोहिणी यदि ।
जयन्ती नाम सा प्रोक्ता उपोष्या सा प्रयत्नतः ॥'

इति वह्निपुराणात् ।

'अष्टमी कृष्णपक्षस्य रोहिणीऋक्षसंयुता ।
भवेत्प्रौष्ठपदे मासि जयन्ती नाम सा स्मृता ॥'

इति विष्णुरहस्यादिवचनाच्च । *ज्योतिरादिवत्सं-

दिमासेनेत्युभाभ्यामेकैव तिथिर्लभ्यते । अन्यथा तिथिभेदापत्त्या मूलश्रुतिभेदापत्तेः । *कृष्णाष्टम्याम्=कृष्णपक्षाष्टम्याम् । कृष्णाष्टम्याम्=कृष्णजन्माष्टम्याम् । *ज्योतिरादिवदिति । यथा "अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरेतेन सहस्र-

ज्ञया कर्मभेदः। रोहिणीयोगश्चाहोरात्रं मुख्यः, निशीथमात्रे मध्यमः, दिवसादावधमः।

'*अहोरात्रं तयोर्योगो ह्यसंपूर्णो भवेद्यदि।
मुहूर्तमप्यहोरात्रे योगश्चेत्तामुपोषयेत् ॥'

इति वसिष्ठसंहितोक्तेः।

'अर्धरात्रे तु योगोऽयं तारापत्युदये सति।
नियतात्मा शुचिः स्नानः पूजां तत्र प्रवर्तयेत् ॥'

इति विष्णुधर्मोक्तेः।

'वासरे वा निशायां वा यत्र स्वल्पाऽपि रोहिणी।
विशेषेण नभोमासे सैवोपोष्या मनीषिभिः ॥'

इति पुराणान्तराच्च। विशेषणोऽभि श्रुते*भाद्रपदेऽपीदम्। 'श्रावणे वा नभस्ये वा' इति वक्ष्यमाणात्। गौडास्तु निशीथ एव रोहिणीयोगे जयन्ती *नान्यथेत्याहुः। तन्न। *'वासरे वा निशायां वा' इति विरोधात्। *योगवि-

---

क्षिणेन यजेत" इत्यत्र प्रकृतनिच्छेदकेनाथशब्देन एतच्छब्दाभ्यां प्रकृतज्योतिष्टोमानुवादासम्भवात्तत्र गुणविशिष्टत्वं न सम्भवतीति ज्योतिष्टोमादिसंज्ञाभिन्नया ज्योतिरादिसंज्ञया कर्मभेदः। तथा जन्माष्टमीसंज्ञाभिन्नया जयन्तीसंज्ञयाऽपीत्यर्थः।

*अहोरात्रमिति। अहोरात्रयोगं प्रत्याय्यैव व्यतिरेकोक्तेः। *भाद्रपदेऽपीति। शुक्लादिमासमभिप्रेत्य। *नान्यथेति। अहोरात्रयोगे निशीथयोगः सम्भवति। मुहूर्तपदं च निशीथाख्यमुहूर्तपरम्। *वासरे वेति। न चेदं स्तावकं, निशीथेनात्यन्तविप्रकर्षात्। केषांचिन्मतमास्कन्दयति—*योगेति। अयमाशयः—रोहिणीयोगस्य जयन्तीति संज्ञा सा नित्यां जन्माष्टमीमाश्रित्य

'रोहिणी च यदा कृष्णपक्षेऽष्टम्यां द्विजोत्तम।

दोषाद्गुणात्फलमित्यन्ये । नेदम् * अकरणे दोषश्रुतेरुपेक्ष्याः ।

तत्र जन्माष्टमीव्रतं नित्यं, पूर्वोक्तवचनेषु अकरणे निन्दाश्रुतेः ।

जयन्ती नाम सा प्रोक्ता सर्वपापहरा तिथिः ॥'

इत्यादिवचनैः फलाय विधीयते । 'दध्नेन्द्रियकामस्य' इत्यनेन नित्यकाम्याग्निहोत्रे फलार्थं दधिवत् । यथा न नित्यकाम्याग्निहोत्रान्य इन्द्रियार्थदधिहोमस्तथा न जन्माष्टमीभिन्ना जयन्तीति । न च रोहिण्याः कालविशेषत्वेनानुपादेयत्वात्कथं विधिः ?, 'वसन्ते ज्योतिषा यजेत' इतिवदनुष्ठानाङ्गत्वेन तत्प्रतीक्षणात् । अन्यथा कालविधिलोपः स्यात् । *अकरणे इति । जयन्त्यकरणे इत्यर्थः । तथा च जयन्त्या अपि नित्यत्वेन स्वतन्त्रव्रतत्वमेव, न तु रोहिण्या जयन्तीति नामेत्यर्थः । किं च जयन्त्यां शूद्रहस्तस्थभोजने 'तत्पापं लभते कुन्ति' इत्युक्तावपि नोपवासमात्रं व्रतशरीरं, किंतु 'जयन्तीविमुखो नरः' इत्यभियोक्तेः पूजाजागरणादिरपि । 'पूजां तत्र प्रवर्तयेत' इत्युक्तेः ।

'मासि भाद्रपदेऽष्टम्यां निशीथे कृष्णपक्षके ।
शशाङ्के वृषराशिस्थे ऋक्षे रोहिणिसंज्ञके ॥
योगेऽस्मिन् वसुदेवाद्धि देवकी मामजीजनत् ।
तस्मान्मां पूजयेत्तत्र शुचिः सम्यगुपोषितः ॥
ब्राह्मणान् भोजयेत्पश्चाच्छक्त्या दद्याच्च दक्षिणाम् ।
हिरण्यं मेदिनीं गावो वासांसि कुसुमानि च ॥
यद्यदिष्टतमं लोके कृष्णो मे प्रीयतामिति ।'

इति भविष्यात् ।

'उपोष्य जन्मचिह्नानि कुर्याज्जागरणं तु यः ।
अर्द्धरात्रयुताष्टम्यां वाजपेयफलं लभेत् ॥'

'वर्षे वर्षे तु या नारी* कृष्णजन्माष्टमीव्रतम्।
न करोति महाप्राज्ञ व्याली भवति कानने॥'
इति स्कान्दे *वीप्साश्रुतेश्च। 'न करोति नरो यस्तु' इति पूर्वमुक्तेरत्र स्त्रीलिङ्गमतन्त्रम्।

इति नारदीयाच्च। जन्माष्टम्यां तूपवासमात्रं व्रतशरीरं नाधिकम्।

'गृध्रमांसं खगं पोतं श्येनं च मुनिपुङ्गव।
मांसं च द्विपदां भुक्तं कृष्णजन्माष्टमीदिने॥
जन्माष्टमीदिने प्राप्ते येन भुक्तं द्विजोत्तम।
त्रैलोक्यसम्भवं पापं तेन भुक्तं न संशयः॥'

इति तदकरणे दोषस्मरणात्। तथा च यथा 'तप्ते पयसि दध्यानयति सा वैश्वदेवी आमिक्षा, वाजिभ्यो वाजिनम्' इत्यत्र प्रकृत एव विश्वेदेवदेवताके वाजोऽन्नमामिक्षारूपं येषां विश्वेषां देवानामिति व्युत्पत्त्याऽपि समुच्चयेन विकल्पेन वा न वाजिनरूपगुणविधिः। उत्पत्तिशिष्टामिक्षारूपगुणावरुद्धतया गुणान्तरानपेक्षणात्, किंतु कर्मभेदः, तथा उपवासरूपतादृशे गुणावरुद्धे जन्माष्टमीव्रते न पूजादिरूपगुणविधिः, किं तु कर्मभेदः। अधिकमन्यतोऽवगन्तव्यम्।

*नारीति स्त्रीत्वमतन्त्रम्। 'न करोति नरः' इति दर्शनात्। *वीप्सेति। न चास्या अकरणे निन्दायामन्तर्भाव इति वाच्यम्। 'वर्षे वर्षे जन्माष्टमी व्रतं कुर्यात्' इति विधौ तात्पर्यात्। कृष्णजन्मव्रताऽकरणे प्रायश्चित्तं च

'प्राणायामशतं कार्यं सर्वपापापनुत्तये।
उपपातकजातानामनादिष्टस्य चैव हि॥'

इत्यादिकम्। विशेषतोऽनुपदिष्टत्वात्। प्रतिनिधिरपि 'उप-

मदनरत्ने स्कान्दे त्वत्र *फलमप्युक्तम् ।

'जन्माष्टमीव्रतं ये वै प्रकुर्वन्ति नरोत्तमाः ।
कारयन्त्यथवा लोके लक्ष्मीस्तेषां सदा स्थिरा ॥
सिध्यन्ति सर्वकार्याणि कृते जन्माष्टमीव्रते ॥' इति ।

जयन्तीव्रतं तु नित्यं काम्यं च ।

'महाजयार्थं कुरुतां जयन्तीं मुक्तयेऽनघ ।
धर्ममर्थं च कामं च मोक्षं च मुनिपुङ्गव ॥
ददाति वाञ्छितानर्थान्ये चान्येऽप्यतिदुर्लभाः ॥'

इति स्कान्दादौ फलश्रुतेः ।

'शूद्रान्नेन तु यत्पापं शावसूतकभोजने ।
तत्पापं लभते कुर्वन् जयन्तीविमुखो नरः ॥
न करोति यदा विष्णोर्जयन्तीसम्भवं व्रतम् ।
यमस्य वशमापन्नः सहते नारकीं व्यथाम् ॥'

इत्यकरणे निन्दाश्रुतेश्च । *यदा च *पूर्वेद्युः परेद्युर्वा रोहिणीयोगस्तदा जन्माष्टमी जयन्त्यामन्तर्भूता ज्ञेया

वासरमपवर्गदं निधं तु भोजयेत् इत्यादिवचनैः । *फलमपीति । एतेन 'जन्माष्टमी नित्यत्वाच्छुद्धा, जयन्ती तु नित्यकाम्यत्वाभ्यां मिश्रा' इति माधवोक्तिखण्डनार्थम् । वस्तुतस्तु स्कान्दात् तत्र फलं न प्रतीयत एव तस्य गुणत्वसंपन्नत्वात् । तस्मात्

'केवलेनोपवासेन तस्मिन् जन्मदिने मम ।
सप्तजन्मकृतात्पापान्मुच्यते नात्र संशयः ॥'

इति वाक्यान्तरोपस्थितेः फलमपि तथा । नन्वेवं यत्र पूर्वेद्युर्जन्माष्टमी परेद्युश्च जयन्ती तत्र पारणाया अकृतत्वाद्भोजनोपवासरूपविरुद्धधर्मद्वयमसंगतम् इत्यत्र माधवाचार्याणां समाधिमाह-*यदा चेति । *पूर्वेद्युरिति दृष्टान्तार्थम् । नन्वेवं तद्व्रतयो-

*न तु जन्माष्टमीव्रतं पृथक्कार्यं विष्णुशृङ्खलवत् । तदुक्तं माधवेनैव—

'यस्मिन्वर्षे जयन्त्याख्यो योगो जन्माष्टमी तदा ।
अन्तर्भूता जयन्त्यां स्यादृक्षयोगः प्रशास्तितः ॥' इति

मदनरत्ननिर्णयामृतगौडमैथिलमतेऽप्येवम् । *हेमाद्रिस्तु -

'रोहिणीसंयुतोपोष्या सर्वाघौघविनाशिनी ।
अर्धरात्रादधश्चोर्ध्वं कलया या यदा भवेत् ॥
जयन्ती नाम सा प्रोक्ता सर्वपापप्रणाशिनी ॥'

इत्यग्निपुराणाद*र्धरात्र एव रोहिणीयोगस्य प्राशस्त्यात् *'मुहूर्तमपि लभ्येत' इत्यादीनां चा*र्धरात्र-

---

रैकयापत्तिरित्यत्राह—*न त्विति । यद्वर्षे जयन्तीयोगो नास्ति तद्वर्षे जन्माष्टमीव्रतं भवत्येव, एवं तु जयन्त्यभावे तन्न स्यादिति भावः । अत्रोपक्रान्तजयन्तीव्रतस्य जन्माष्टमीव्रतं भवत्येव पारणालोपभयाभावस्याग्रे स्फुटीकरणादित्यरुचिः । *हेमाद्रिस्त्विति । इत्यूचिवानित्यनेनान्वयः । *अर्धरात्र एवेति । "अर्धरात्रे तु योगोऽयम्" इतिवाक्योक्तस्येत्यादिः । "पूजां तत्र प्रवर्तयेत्" इति तु "दाक्षायणयज्ञेन स्वर्गकामो यजेत" इतिवज्जन्माष्टमीव्रतस्य प्रकारभेदमात्रमिति भावः । ननु—

'प्राजापत्यर्क्षसंयुक्ता कृष्णा नभसि चाष्टमी ।
मुहूर्तमप्यहोरात्रे योगश्चेत्तामुपोषयेत् ॥'

इतिवचनेऽहोरात्रे तदन्तर्गतयत्किंचिन्मुहूर्ते प्रतीयते ।

'मुहूर्तमप्यहोरात्रे यस्मिन् युक्तं हि लभ्यते ।
अष्टम्यां रोहिणीमृक्षं तां सुपुण्यामुपावसेत् ॥'

इतिविष्णुरहस्यादिति कथं प्रकारभेद इत्यत्राह—*मुहूर्तमपीति । आदिना "कृष्णाष्टम्यां भवेद्यत्र कलैका" इत्यादिवाक्ये

योगेऽप्युपपत्तेर्न जयन्तीव्रतं भिन्नम्* । तत्त्वं तु हेमाद्रिमतेऽपि जयन्तीव्रतं भिन्नमेव । 'उदये चाष्टमी' इत्यस्य तेन जयन्तीपरत्वोक्तेः । *किञ्च—

'रोहिण्यामर्धरात्रे च यदा कृष्णाष्टमी भवेत् ।
तस्यामभ्यर्चनं शौरेर्हन्ति पापं त्रिजन्मजम् ॥'

इति विष्णुधर्मोक्तेः,

'समायोगे तु रोहिण्यां निशीथे राजसत्तम ।
समजायत गोविन्दो बालरूपी चतुर्भुजः ॥
तस्मात्तं पूजयेत्तत्र यथावित्तानुरूपतः ॥'

इति वह्निपुराणाच्चार्धरात्रस्य *कर्मकालत्वमवगम्यते । अतः 'कर्मणो यस्य यः कालः' इत्यादिवचनात्पूर्वेद्युरेव प्राप्तेः परदिने सतोऽपि रोहिणीयोगस्य न प्रयोज-

---

कलादिपदग्रहः । *अर्धरात्रेति । मुहूर्तादिपदं निशीथमुहूर्तकलादिपरम् । वस्तुत ऋक्षयोगस्यावश्यकमिदम् । अपिशब्दवशेन स्वार्थे तात्पर्याभावात् । *न जयन्तीव्रतं भिन्नमिति । एतेन श्रावणकृष्णाष्टमीमाश्रित्य जन्माष्टमीजयन्त्योरुक्तस्त्वाश्रयाश्रयिभावो व्रतैक्यभ्रमहेतुरिति माधवोक्तं प्रत्युक्तम् । वस्तुतो व्रतभेदादिति सूचितम् । ननु गुणविकृतित्वादस्तु कर्मभेदः, उपवाससाम्येऽपि जयन्त्यां पूजादिरूपाधिकगुणसत्त्वात् द्वादशाब्दोत्रकाद्युत्तिष्ठापादु-कल्पाद्वाधिकस्तोत्रश्रवणादिति । अतः पृथक् जयन्त्या गुणप्रयोजकत्वं निराकरोति—*किंचेति । *कर्मकालत्वं=पूजादिरूपकर्मकालत्वम् । तत्र चोपवासस्याङ्गत्वान्न गुणविकृतित्वमित्याशयः । ननु "ये न कुर्वन्ति" इत्याद्युक्तेरुपवासः प्रधानं पूजाऽपि । स्वातन्त्र्येण फलसंबन्धात् । न चैवं प्रयोगभेदापत्तिः । चित्रोद्भिद्वन्निरपेक्षेतिकर्तव्यताया एवान्वयादिति वाच्यम् । तत्तद्वाक्यानां

केवलं फलसंबन्धबोधकत्वं स्वीकृत्य 'श्रावणे बहुले पक्षे' इत्यादि-कालविधिषु कृष्णजन्माष्टम्यादिपदेनोभयोपादानवशाद्दर्शपूर्णमास-राजसूयादिवत् प्रयोगैक्य एव लाघवात्। एवं च

'वासुदेवं समुद्दिश्य सर्वपापोपशान्तये।
उपवासं करिष्यामि कृष्णाष्टम्यां नभस्यहम्॥
अद्य कृष्णाष्टमीं देवीं नभश्चन्द्रसरोहिणीम्।
अर्चयित्वोपवासेन भोक्ष्येऽहमपरेऽहनि॥'

इति संकल्पवाक्ये उपवासपदं पूजोपलक्षणम्। अन्यथोपवासे उद्देश्यानपेक्षणेन 'वासुदेवं समुद्दिश्य'इत्यस्यानन्वयापत्तेः। न च वासुदेवपदे तत्प्रीतौ लक्षणया तदन्वयः। जघन्यतयोपवासपदे एव तस्या न्याय्यत्वात् "सोपवासो हरेःपूजाम्"इत्यादौ उपवासस्य पूजोपसर्जनत्वदर्शनाच्च। ततश्चापर्यायप्रकृतिकाख्यातरूपाच्छब्दा-न्तरादपि कर्मभेदो दुर्वार इति चेन्न। एकपदोपादानस्य "य इष्ट्या पशुना सोमेन"इत्यादिवदप्युपपादयितुं शक्यत्वेनोक्तरीत्या प्रयो-गविधिभेदो दुरुद्धरः स्यादित्यतः फलिसंस्कार एवोपवासः स्वी-कार्यः। "मासि भाद्रपदे" इत्यादौ 'शुचिः सम्यगुपोषितः' इति गुणत्वप्रतीतेः न तु प्रधानम्। पारार्थ्यात्तूपवासवाक्ये फलोल्लेखः पर्णतादिवदर्थवादः। संकल्पवाक्ये उपवासस्य कार्यत्वेनोल्लेखश्च मन्त्रस्य क्रियासंबन्ध्युपवासप्रकाशकत्वेन करणत्वात्। क्रियां क्रियासंबन्धिनं वा प्रकाशयन्मन्त्रः करणत्वं भजते इति न्यायात्। उत्तरार्धे चोपवासेनेति उपलक्षणे तृतीया। पूजाकरणत्वासंभवा-त्। पूजैव नित्या। 'श्रावणे बहुले पक्षे' इति तस्या एव निन्दार्थ-वादात् तत्र व्रतशब्देन पूजाग्रहणात्। एतेन रूपभेदोऽप्यपाकृतः। उत्पत्तिशिष्टगुणस्य वाक्यान्तरेऽश्रवणात्। धात्वर्थभेदस्तु न रूप-भेदः। कर्मभेदकतयाऽऽमिक्षाधिकरणोपन्यासासंगतेः। *न प्रयो-जकत्वमिति। तथा च कथं स कर्म भेदयेत्। एतेन—निमित्तभेदात्

कत्वम्* । अन्यथा बुधवारादेरपि तत्त्वापत्तेः* । *किञ्च जयन्तीशब्दो रात्रिविशेषवचनः ।

'*अभिजिन्नाम नक्षत्रं जयन्ती नाम शर्वरी ।
मुहूर्तो विजयो नाम यत्र जातो जनार्दनः ॥'

इति ब्रह्माण्डपुराणात् । तेन तद्योगिरोहिण्यां *गौणत्वान्न व्रतभेदः । यत्तु 'वासरे वा निशायां वा' इति, तत्कैमुतिकन्यायेन निशीथयोगस्यैव स्तुत्यर्थं पूर्वदिनेऽर्धरात्रयोगाभावे प्राशस्त्यार्थमित्याहुः । अन्ये तु*यद्यपि-

---

कर्मभेदः । जयन्त्या योगानिमित्तकत्वात् जन्माष्टम्या अतथात्वात् । जन्माष्टम्यां तु योगो न निमित्तं जन्माष्टम्या एव प्रधानप्रयोजकत्वात् जन्माष्टमीसमाख्यानात् । न त्वत्र कल्पामात्रोऽपि रोहिणीयोगो मुख्यः । कादाचित्कसंभवस्तु बुधवारादिवदप्रयोजकः । जन्मरोहिणीजन्मयोग इत्याद्यसमाख्यानादित्यपास्तम् । जयन्तीव्रतस्यैवालीकत्वात् । *तत्त्वापत्तेरिति : यत्तु बुधवारस्य न रोहिणीतुल्यत्वं 'दिवा वा' इत्यादि हि रोहिणीप्रापकं दृश्यते न तु बुधप्रापकं किञ्चित् 'किं पुनर्बुधवारेण' इति तु स्पष्टमेव प्राशस्त्यज्ञापकमिति, तत्तुच्छम् । वचनान्तरप्राप्तस्यैव तौल्यमित्यस्याप्रयोजकत्वात् । भवदभिमतस्य नवमीयोगनिर्णायकत्वस्य भङ्गापत्तेः । तथा च सरोहिणीमप्यष्टमीं हित्वा बुधनवमीयुताया एव ग्रहणापत्तेरिति भावः । अथ नाम्ना कर्मभेदमाशङ्क्य जयन्तीति न व्रतनामेति ध्वनयन्नाह *किञ्चेति । अष्टमीरात्रिरेव जयन्तीपदार्थः । रामाद्यवतारप्रादुर्भावतिथिष्वपि जयन्तीपदप्रयोगादिति न संज्ञाभेदः । अत्र मानमाह *अभिजिदिति । *गौणत्वात् गुणवचनायाः प्राशस्त्यार्थत्वात् । एवं च कृष्णाष्टम्यां भवेदित्यादौ रोहिण्या न नामभेदकत्वमिति भावः । यत्कर्मकालशास्त्रप्राबल्यं तत् रोहिणीयोगाभाव एवेति शङ्कते—*यद्यपीति । "दिवा वा" इति दिनावच्छेदेन राज्यवच्छेदेन वा

'दिवा वा यदि वा रात्रौ नास्ति चेद्रोहिणीकला ।
रात्रियुक्तां *प्रकुर्वीत विशेषेणेन्दुसंयुताम् ॥'

इत्यनेन रोहिण्यायोगाभावेऽर्धरात्रव्यासेग्राह्यतोक्ता, तथापि यस्मिन्वर्षे जयन्तीयोगो नास्ति तत्र जयन्तीव्रतलोपे प्राप्ते अष्टमीमात्रेऽपि जयन्तीव्रतं कार्यमित्येवंपरमिदमिति तदाशयः। अत्र हि 'यथायागूर्य विश्वजिता यजेत"

एषामसम्भवे कुर्यादिष्टिं वैश्वानरीं द्विजः ।

इतिवद्रोहिणीयोगाभावे विधानात्तत्कार्यापत्तिः स्पष्टैव। अत एवोक्तं-'जयन्ती नाम शर्वरी' इति । यच्च स्कान्दे—

कलामात्राऽपि चेद्रोहिणी नास्ति तदा रात्रियुक्तां परामिति यावत् । *प्रकुर्वीतेति। दिनद्वये निशीथे अष्टम्यभावे यत्किंचिद्दिने तत्सत्त्वे इन्दुसंयुतामर्धरात्रव्यापिनीं विशेषेण प्रकुर्वीतेत्यर्थः । जयन्तीयोगो माधवाभिमतः। जयन्तीव्रतलोपे प्राप्ते अष्टम्या जयन्तीत्वेऽपि रोहिणीयोगनिबन्धत्वभ्रमेण पूजादिप्रधानलोपप्रसङ्गवारणाय अनेन वचनेन पूजादेरष्टमीनिबन्धनत्वबोधनादिति भावः।

केचित्तु इन्दुः=सोमवारः "सोमेनापि विशेषतः" इत्येकमूलकल्पनालाघवात्। तथा च सोमवारयुक्तां विशेषेणाधिक्येन रात्रियुक्तां प्रकुर्वीतेत्यर्थः। तेन दिनद्वये निशीथास्पर्शे सोमवाराधिकव्याप्तेर्निर्णायकत्वलाभात्कर्मकालशास्त्राबाधेनोपपत्तौ तद्बाधो न कल्प्यते इत्याहुः। परे तु रात्रिपदमाधिकरात्रिपरम् । रोहिणीयोगाभावेऽधिकरात्रिव्यापिनी ग्राह्या । तद्योगे तु तद्युक्तानिशीथगा कार्येत्यर्थ इत्याहुः। अपरे तु रोहिणीयोगाभावेऽधिकनिशीथव्यापिनी ग्राह्या। तद्योगे त्वधिकनिशीथव्यापिनीं विहाय स्वल्पनिशीथगा ग्राह्येत्याहुः-रात्रियुक्तां प्रकुर्वीतेति । नन्वेवं कर्मकालशास्त्र-

'उदये चाष्टमी किञ्चिन्नवमी सकला यदि ।
भवते बुधसंयुक्ता प्राजापत्यर्क्षसंयुता ॥
अपि वर्षशतेनापि लभ्यते वाऽथवा न वा ॥' इति ।

यच्च पाद्मे—

'प्रेतयोनिगतानां तु प्रेतत्वं नाशितं तु तैः ।
यैः कृता श्रावणे मासि अष्टमी रोहिणीयुता ॥
किं पुनर्बुधवारेण सोमेनापि विशेषतः ।
किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदा ॥'

इति, तदप्यनादिविषयम् । उपवासमाश्रवणादित्यनन्तभट्टः*, *जयन्तीपरमिति हेमाद्रिः । *उदये=चन्द्रो-

---

बाधं विनाऽगतिमयम् इति चेन्न । बाधो ह्यनन्यगतिका गतिः । यावद्बाधं विना न गतिस्तावदेव बाधनं इति न्यायात् । अन्यथा व्रीहियवशास्त्रयोरन्योन्यं सार्वत्रिक एव बाधो भवेदित्याहुः ।

अन्ये तु विशेषः=आधिक्यं, वैशिष्ट्यं तृतीया तस्येन्दावन्वयः । तथा चाधिकनिशीथगां रात्रियुक्तां सकुर्वीतेत्यर्थः । एतेन शब्दतो रोहिणीयोगाभावलाभेऽपि शब्दतो दिनद्वये वैषम्येण निशीथस्पर्शलाभात्तद्वाक्यस्य तत्परत्वमिति प्रत्युक्तम् । रात्रियुक्तामिति त्वनुवादः । यत्त्वनुवादत्वपरिजिहीर्षया विशेषपदस्य रात्रिपदेनान्वयं मत्वा रोहिणीयोगाभावेऽधिकरात्रिव्यापिनी ग्राह्येति सार्थक्यकल्पनं, तन्न । यत्र पूर्वेद्युः सार्धप्रहरोत्तरं प्रवृत्ता परेद्युर्निशीथान्तमनुवर्तते तत्र पूर्वपराधिकव्याप्तिग्रहणेऽपसिद्धान्तादित्याहुः । *अनन्तभट्ट इति । अनन्तभट्टेनैवंरीत्या समर्थ्यते इत्यर्थः । एवमग्रेऽपि । *जयन्तीति । जयन्ती=रात्रिस्तत्परमित्यर्थः । उदये अष्टमी=उदयमारभ्य प्रवृत्ताऽष्टमी । सकला=निशीथमारभ्य निशीथान्ता । प्राजापत्यर्क्षसंयुक्ता=रोहिणीयुक्ता उभयेद्युरपि निशीथेऽष्टमीरोहिणीभ्यां युक्तेति यावत् । सा च किञ्चिन्नव-

दय इति केचित् । तन्न । चन्द्रोदयसत्त्वेऽसंदेहान्नवमी*स-
कलेत्ययोगान्मानाभावाच्च । तेन पूर्वेद्युः सप्तमीवेधे पर
दिने सूर्योदये घटिकाऽपि ग्राह्या । पूर्वविद्धाऽष्टमीति पा-
द्मोक्तेः । इति युक्तम् । अतो न व्रतभेदो नाप्यन्तर्भा-
व इत्यूचिवान् ।

गौडास्तु नवमीक्षयपरमिदं वचनम् 'नवमी सकला
यदि' इति विशिष्योक्तेः । *एतत्पूर्वदिने जयन्त्यभाव-

मीति परैव जयन्ती । "अपि वर्षशतेनापि" इत्यर्थवादादस्यादि-
त्यर्थात् । न त्वत्र जयन्तीव्रतं हेमाद्रेर्भिन्नमस्तीति भ्रमः कार्यः ।
*उदये इति । "नाशयत्युदये तथा" इति वाक्यान्तरसंवा-
दात् । यत्त्वेवं सति नवमी सकलेत्यनन्वयः । निशीथोत्तरनवम्याः
साकल्यासम्भवादिति, तत्तुच्छम् । न हि षष्टिदण्डव्यापित्वं सा-
कल्यं सूर्योदये कलाकाष्ठादशमीसत्त्वे तद्बाधात् । उदयमार-
भ्यापरोदयपर्यन्ताया एव सकलत्वात् । किं तु एकाहोरात्र सूर्योद-
येऽष्टम्याः सत्त्वे तदुत्तरकालव्याप्तत्वं साकल्यम् । तच्च चन्द्रोदये
निशीथे अष्टम्यां तदुत्तरनवम्या अप्यक्षतमिति । तथा च दिनद्वये
वैषम्येण निशीथस्पर्शे पूर्वाऽधिकनिशीथगाऽपि न जयन्ती रात्रिः,
किं तु रोहिणीसत्त्वे स्वल्पनिशीथगा परैवेति जयन्तीरात्रिनिर्वचन-
मित्यर्थः । उदये सूर्योदये इति तु नोक्तम् । किञ्चित्सकलपदयो-
र्वैयर्थ्यापत्तेः । *सकलेति । सूर्योदयान्तरास्पर्शित्वरूपसाक-
ल्येनाष्टमीविद्धाया नवम्याः क्षयलाभादिति भावः ।

*एतदिति ।

'सिंहार्के रोहिणीयुक्ता नभः कृष्णाष्टमी यदि ।
रात्र्यर्धपूर्वापरगा जयन्ती कलयाऽपि च ॥'

इत्यादिवचनादर्धरात्र एव रोहिणीयोगे अष्टमी जयन्तीत्युक्तम् ।
तत्र 'जयन्ती शिवरात्रिश्च' इति 'जयन्त्यां पूर्वविद्धायाम्' इत्या-

परमित्याहुः । *जयन्त्यादिसर्वोपवासोऽयमित्याचार्यचूडामणिप्रभृतयः । वयं तु *स्वतन्त्रं व्रतभेदः । लोकास्तु *जन्माष्टमीमेवानुतिष्ठन्ति । *न हि—

> 'श्रावणे वा नभस्ये वा रोहिणीसहिताष्टमी ।
> यदा कृष्णा नरैर्लब्धा सा जयन्तीति कीर्तिता ॥
> श्रावणे न भवेद्योगो नभस्ये तु भवेद् ध्रुवम् ॥'

इति माधवीये वसिष्ठसंहितोक्तावपि भाद्रे जयन्ती केनापि न क्रियते । (अतः पूर्वोक्तरीत्योपवासः) । यथा

दिना पूर्वा न त्वष्टम्या एव पूर्वदिने निशीथे सत्त्वे तदुत्तरं च रोहिण्यादियोगे तत्र जयन्त्यभावात् । किं तु तत्र परा नवम्यां सूर्योदयानन्तरानन्तर्भावनिरूपमाकल्पसत्त्वात् । एतन्मते सहवेध एव वेधः । या तु न विद्धा नापि जयन्ती सा कर्मकालशास्त्रादेव प्राप्नोतीति भावः । अष्टम्या यदा कदाचिद्रोहिणीयोगेऽपि जयन्तीत्वसाधनादरुचिः । *जयन्त्यादीति । 'जयन्त्यां पूर्वविद्धायाम्' इत्यादिविरोधोऽरुचिः । *स्वतन्त्रमिति । उपलभ्यमानस्मृत्यादेरभावेऽप्यनुपलम्भेऽपि 'कृष्णाष्टम्यां भवेद्यत्र' इत्यादिभिन्नवाक्यत्वेन प्रकरणान्तरत्वसम्पादकं "स्योनं ते सदनं कृणोमि" इत्यादिवदित्यभिप्रायः । *जन्माष्टमीमेवेति । एवकारो जयन्तीव्रतव्यावृत्त्यर्थः । तेन जन्माष्टम्या उपवासमात्रेण सिद्धेरभावेन वक्ष्यमाणपूजादि तत्र भवत्येव शिष्टाचारात् । 'शुचिः सम्यगुपोषितः' 'पूजां तत्र प्रवर्तयेत्' इति वचनाद्वा न त्वेतावता तत्र जयन्तीसम्बन्धित्वभ्रमः कार्यः । जयन्तीव्रतं तु मत्स्यादिजयन्तीसाधारण्येनानुष्ठातुमेवेत्यभिप्रायः । अस्तु केवलकृष्णजयन्तीव्रतमपि परं तु तदपि न तदा क्रियते इत्याह— *न हीति । जयन्तीव्रतस्य कदाचिल्लोप इत्येतन्निराकरणाय

*गुणात्फलम्। 'सप्तमे ब्रह्मवर्चसकाममुपनयेत्' इतिवदित्यन्ये। तन्न। *नित्यत्वानुपपत्तेः। अत्र गौणमुख्यचान्द्राभ्यामेक एव *मास इत्यन्ये। तन्न। एकवाक्ये उभयनिर्देशे *वाशब्दद्वयायोगात्। अतो जयन्तीव्रतस्यापि नित्यत्वादुपवासद्वयं कार्यमिति ब्रूमः। अत एव हेमाद्रिमदनरत्नादौ जन्माष्टमीव्रतं *जयन्तीव्रतं च भिन्नमुक्तम्। भिन्नकालत्वात्सर्वथा तावदन्तर्भावो नेति सिद्धम्। यद्यपि पूर्वा परा वाल्पाऽपि रोहिणीयुतैव कार्येति ग्रन्थानां तत्त्वं प्रतीयते तदपि जयन्तीपरमेव। इदं च काम्यमेवेत्यनन्तभट्टः। तद्दूषणं हेमाद्रौ ज्ञेयम्। नित्यं काम्यमिति तु बहवः।

ननु यथा विष्णुशृङ्खलयोगेन श्रवणद्वादशी*वामनजयन्त्यादिसर्वसिद्धिर्यथा वैकादशी स्वल्पापि परा, तथा

'कला काष्ठा मुहूर्तोऽपि यदा कृष्णाष्टमी तिथिः।
नवम्यां सैव ग्राह्या स्यात्सप्तमीसंयुता न हि॥'

इत्यादिवचनादर्धोदयादिवद्योगाधिक्ये फलाधिक्या-

---

*गुणादिति। यथा नित्योपनये फलविशेषार्थः सप्तमवर्षादिरूपकालविधिः, तथा नित्योपवासे जयन्तीविधिरित्यर्थः। *नित्यत्वेति। दृष्टान्ते केवलकाम्यत्वेन नित्यत्वाभावः, दार्ष्टान्तिके तु जयन्त्यप्रसिद्ध्या जन्माष्टम्या आश्रयत्वाभाव इत्यर्थः। *मास इति। तथा च भाद्रे जयन्त्यां प्रमाणाभाव इति भावः। *वाशब्देति। समुच्चयार्थत्वे तु पौनरुक्त्यं स्यात्। 'श्रावणे न भवेत्' इति शेषविरोधोऽपि द्रष्टव्यः। *जयन्तीव्रतं चेति। हेमाद्रिमते दशजयन्तीव्रतान्तरमस्तीति तदभिप्रायेण।

*वामनेति। वामनजयन्तीव्रतं प्रकारभेद इत्याशयेन।

त्परैव जन्माष्टमी युक्तेति चेत्, नानैमात्थ। न हि तत्र व्रतभेदो द्वयोर्नित्यत्वं द्वयोरकरणे दोषो वा श्रुतः। इह त्वे-*तैस्त्रिभिर्हेतुभिः *संज्ञाभेदाद्धर्मभेदात्कालभेदाच्चोपवासभेदः स्पष्ट एव। एकैकव्रतत्वात्कृष्णैकादशीवन्न पारणालोपदोषोऽपि। *अनेन व्रतद्वयमेव युक्तम्। द्वयोरपि नित्यत्वात्*। केचित्तु—

'त्रेतायां द्वापरे चैव राजन्कृतयुगे तथा।
रोहिणीसहिता चेयं विद्वद्भिः समुपोषिता॥
अतः परं महीपाल संप्राप्ते *तामसे कलौ।

---

*एतैरिति। जन्माष्टमीव्रतं श्रावणभाद्रकालकं, योगव्रतं योगवशेन श्रावणभाद्रपदान्यतरकालकमिति व्रतभेदः। नित्यत्वं=नियतत्वम्। साधकान्तरान्यानपि हेतूनाह—*संज्ञेति। धर्मभेदात्=माधवमते जन्माष्टम्यामुपवासः प्रधानं, जयन्त्यां पूजादि। ग्रन्थकृन्मते न तत्र पूजयोरेव भेदः जन्माष्टम्यां पापनाशमात्रं जयन्त्यां तु

'महाजयार्थं कुरुतां जयन्तीं मुक्तयेऽनघ।'

इत्यादिनोक्तफलभेदः। न चैतदुभयत्रापि नित्यकाम्यतया संयोगपृथक्त्वन्यायेन वाच्यं, तच्च न संभवति काम्यत्वे कादाचित्कत्वं नित्यत्वे तदभाव इति विरोधादिति वाच्यम्। कामनाप्रयुक्तात्तदनुष्ठानात्फलसिद्धिरित्येव कामसंयोगफलमित्यविरोधात्। *अनेनेति। रामादिजयन्त्यां कश्चित्तद्व्रतमुपक्रम्य जन्माष्टमीव्रतोत्तरादिने तदाचरणमित्यभिप्रायः। *नित्यत्वात्=अवश्यकर्तव्यत्वात्। *तामसे इति। तथा च जयन्तीव्रतानिषेधाभिकल्पनं न संभवतीत्यर्थः।

"श्रावणे वा नभस्ये वा" इतिवचनं जयन्तीपरमिति मपाश्रि-

'जन्मना वासुदेवस्य भाविता व्रतमुत्तमम् ॥'

इति हेमाद्रौ वह्निपुराणात् कलौ जन्माष्टमीव्रतमेव न जयन्तीव्रतमित्याहुः। तन्न। 'तामसं कलौ' इत्युक्तेः परमश्रेयोहेतोरस्य कलौ पापिनां दुर्लभत्वमुच्यते। तेन कलौ तामसा न करिष्यन्ति किन्तु धन्यास्त एवेत्यर्थः। अन्यथा

'शूद्राश्च ब्राह्मणाचारा भविष्यन्ति युगे कलौ।'

इत्यादौ विधिकल्पनापत्तेः ॥

तम् इदानीं जन्माष्टमीपरमिति दर्शयति—तत्त्वं त्विति। दिनद्वये रोहिणीयोगे तु परैवेति स्पर्तव्यम्। इदं च=जयन्तीव्रतं च। काम्यमेवेति। शूद्रान्नेनेत्यादिपापक्षयरूपफलश्रवणात्। न च तन्मात्रेण नित्यत्वं त्रियुनादियागानामपि तत्त्वापत्तेः। तद्दूषणमिति। अवश्यापेक्षितफलसाधनत्वं=नित्यत्वम्। तच्च पापक्षयस्यावश्यत्वादक्षतम्। अन्यथा नित्यकर्मणामपि काम्यत्वापत्तेरिति। नित्यति। अकरणे प्रत्यवायजनकत्वं=नित्यत्वम्। तच्च शूद्रान्नेनेत्यादिना दर्शितम्। महाजयार्थमिति स्वतन्त्रफलश्रवणात्काम्यत्वम्। वस्तुतस्तु तत्र—

'एनसो मोक्षकामोऽस्मि यद्गोविन्द त्रियोनिजम्'।

इतिपापक्षयकामश्रवणात्काम्यत्वमेव। कामनोपाधौ चोदितत्वात्, न तु केवलनैमित्तिकत्वं कामनोपाधावविहितानां प्रायश्चित्तादीनामेव तथात्वात्। नापि केवलकाम्यत्वम्। यत्र न निमित्तोपाधौ विधानं तत्र केवलकाम्यत्वमिति हि मीमांसकाः। यथा त्रियुनादियागेषु। प्रकृते च न तथा।

'प्राजापत्यर्क्षसंयुक्ता श्रावणस्यासिताष्टमी।
वर्षे वर्षे तु कर्तव्या तुष्ट्यर्थं चक्रपाणिनः ॥'

इति नैमित्तिकत्वेन नित्यत्वावेदकवीप्साश्रवणात्, एतच्च जय-

अत्र *निशीथवेध एव ग्राह्यः । *पूर्वोक्तवचनेषु तस्यैव मुख्यकालत्वोक्तेः ।

न्तीपरमेव । 'प्राजापत्यमृक्ष' इत्युक्तेः ।

नन्वत्राष्टमीविशेषणात्कृष्णजननं निमित्तम् ।
वीप्सायुक्ता तथान्ता हि निमित्तत्वेन गम्यते ॥'

इति न्यायात् । तुष्टिश्च फलमिति उद्देश्यद्वयान्वये वाक्यभेद इति चेन्न । चक्रपाणितुष्ट्यर्थं यद्व्रतं वाक्यान्तरविहितं तद्वर्षे वर्षे कार्यमित्यर्थात् । परे तु एवं सति निमित्तस्य विधेयत्वं स्यादतो यथाश्रुतमेव सम्यक् । तथा हि यथा जातेष्टिविधौ जननं निमित्तं पूतत्वादिकं फलमस्ति तथा प्रकृतेऽपि प्रोक्तमेव निमित्तं फलं च । तत्कस्य हेतोरिति चेत् यत एकरूपमुद्देश्यद्वयं निमित्तरूपं फलरूपं वा एकस्मिन् विधौ नास्तीति एकेनैव नैराकाङ्क्ष्यात् । यस्य पिता पितामह इतिवत्, भिन्नरूपं त्वन्यत्रैव । अस्मिन्नपि अनेनेदं फलं भावयेदिति वचनव्यक्तिसंभवादित्याहुः । निबन्धेषु प्रायशः कृष्णजन्माष्टमीव्रतप्रकरणे एतद्वाक्यस्य दर्शनात्तत्रैव नित्यत्वसाधकत्वं नान्यत्रेत्यपरे ।

ननु प्रायश्चित्तादीनां केवलनैमित्तिकत्वम्, एतद्व्रतस्य तु काम्यत्वमिति कथमिति चेत् ।

'एनसो मोक्षकामोऽस्मि यद्गोविन्द ममाश्रितम् ।'

इत्यतीतप्रत्ययात्कामनोपाधौ चोदितत्वाच्च व्रतस्य काम्यत्वम् । प्रायश्चित्तस्य तु कामनोपाधावचोदितस्य एनोनिवर्तकतया नैमित्तिकत्वमित्याहुः ।

*निशीथवेध एवेति । एवकारोऽप्यर्थकः । तेन वेध्याया अष्टम्या दिवापि वेधः समुच्चीयते । *पूर्वोक्तेति ।

'*अष्टमी शिवरात्रिश्च ह्यर्धरात्रादधो यदि ।
दृश्यते *घटिका या सा पूर्वविद्धा प्रकीर्तिता ॥'
इति माधवीये पुराणान्तरात् ।
'*अर्धरात्रे तु रोहिण्यां यदा कृष्णाष्टमी भवेत् ।
तस्यामभ्यर्चनं शौरेर्हन्ति पापं त्रिजन्मजम् ॥'
इति भविष्योक्तेः ।
'अष्टमी रोहिणीयुक्ता निशयर्धे दृश्यते यदि ।
मुख्यकाल इति ख्यातस्तत्र जातो हरिः स्वयम् ॥'
इति वसिष्ठसंहितोक्तेश्च ॥
तत्राष्टमी द्वेधा । रोहिणीरहिता तद्युता च । आ-

'रोहिणीसंयुतोपोष्या सर्वाघौघविनाशिनी ।
अर्धरात्रादधश्चोर्द्ध्वं कलया वा यदा भवेत् ॥'
इत्यनेन खण्डतिथौ नवमीयुक्तायां रात्रिपूर्वार्धावसानिककला-सद्भावमनूद्य तत्पश्चार्द्धे तद्विधिवत् सप्तमीयुक्तायां रात्रिपूर्वार्द्धा-वसाने कलासद्भावो विधीयते तदुत्तरार्धे तस्य सिद्धत्वादिति तत्र सप्तमीप्रवेशो वेधः । "नक्तादिव्रतयोगेषु" इति सामान्यवाक्याच्च । अस्यातिदुर्लक्ष्यत्वेऽप्याह—*अष्टमीति । *घटिकेति ।
'अर्धरात्रादधश्चोर्ध्वमेकार्धघटिकाऽन्विता ।
रोहिणी चाष्टमी ग्राह्या उपवासव्रतादिषु ॥'
इति स्मृत्यन्तरे एका चार्धघटिका चेति व्युत्पत्त्या पूर्वोत्तर-निशीथांशयोरेकेति घटीद्वयं मुख्यतमः काल इति माधवेनोक्तेः ।
'त्रिकालं पूजयेद्देवं दिवारात्रौ विशेषतः ।
अर्धरात्रावपि तथा पुष्पैर्नानाविधैरपि ॥'
इति भविष्योक्तेः । कालान्तरस्यापि मुख्यत्वमित्यत्राह—*अर्धरात्रे त्विति । मुख्यकालः=मुख्यस्य पूजादिप्रधानस्य कालः, अङ्गकालानुरोधेन तु न वेधो युक्त इति भावः ।

वाऽपि चतुर्धा । *पूर्वेद्युरेव निशीथयोगिनी परेद्युरेवो-भयेद्युर्वानुभयेद्युर्वेति । तत्राद्यायां सन्देह एव कर्मकाल-व्याप्तेः ।

'जन्माष्टमी रोहिणी च शिवरात्रिस्तथैव च ।
*पूर्वविद्धैव कर्तव्या तिथिभान्ते च पारणम् ॥'

इति भृगूक्तेः । *अस्मात्केवलरोहिण्युपवासोऽपि सिद्धः । अन्त्ययोः परैव । प्रातःसङ्कल्पकालव्याप्तेरा-धिक्यात्* ।

'*वर्जनीया प्रयत्नेन सप्तमीसंयुताष्टमी ।'

इति ब्रह्मवैवर्ताच्च । एतदंशतः समव्याप्तावपि ।
विषमव्याप्तौ त्वाधिक्येन*निर्णयः ।
रोहिणीयुतापि चतुर्धा । *पूर्वेद्युरेव निशीथे रोहि-

---

*पूर्वेद्युरेवेति । इयं शुद्धा विद्धा चेति द्वेधा । परं तु तत्र न विशेषः । परेद्युः कर्मकालेऽसत्त्वात् ।

*पूर्वविद्धैवेति । दिनवेध एव, न रात्रिवेधः । केचित्तु रोहिणीपदं जयन्तीपरं जन्माष्टमीरोहिण्यां जयन्तीलाभो वेत्याहुः । तत्र द्वितीयपक्षे केवलाष्टमीपरत्वं नास्तीति तन्निरस्यति *अस्मादिति । 'कृतं वै रोहिणीवचनात्' इत्यादेरुपलक्षणम् । *आधिक्यादिति । आद्ये विशेषणेन्दुसंयुतामिति मुख्यकालव्याप्तेः । अन्त्ये 'रात्रियुक्तां प्रकुर्वीत' इति गौणकालव्याप्तेः । *वर्जनीयेति ।

'विना ऋक्षं न कर्तव्या सप्तमीसंयुताऽष्टमी ।'

इति वचनमपि द्रष्टव्यम् । *आधिक्येन=निशीथेऽष्टम्या आधिक्यव्याप्त्या ।

*पूर्वेद्युरेवेति । इयं च विना निशीथं प्रवृत्तया सप्तम्या विद्धाधिका शुद्धाधिका चेति द्वेधा, न तु विद्धानधिका शुद्धानधि-

णीयुना परेद्युरेवोभयेद्युरनुभयेद्युश्च । अत्राद्ययोः*र-
सन्देहः ।

'कार्या विद्धापि सप्तम्या रोहिणीसहिताष्टमी ।'

इति पाद्मोक्तेः

'जयन्त्यां पूर्वविद्धायामुपवासं समाचरेत् ।'

इति गारुडाच्च ।

'*सप्तमीसंयुताष्टम्यां निशीथे* रोहिणी यदि ।
भविता साष्टमी पुण्या यावच्चन्द्रदिवाकरौ ॥'

इति वाह्निपुराणाच्च । द्वितीयेऽसन्देह एव । तृतीय-
पक्षे परैव ।

का वा परेद्युरष्टम्यभावेनासन्देहात् । *आद्ययोरिति । योग-
वत्या एव ग्राह्यत्वात् ।

'प्राजापत्यर्क्षसंयुक्ता कृष्णा नभसि चाष्टमी ।
मुहूर्तमपि लभ्येत सैवोपोष्या महाफला ॥'

इति वाक्यात् । अत्र वर्जनीया प्रयत्नेनेति निषेधात् प्रतिप्र-
सवमाह—*सप्तमीति । *निशीथे इति । एतेन दिनद्वये रो-
हिणीयोगे यदि पूर्वेद्युर्निशीथे रोहिणी तदा पूर्वेवेति ध्वनितम् ।
द्वितीये तु—

'अविद्धायां तु सर्क्षायां जातो देवकिनन्दन ।'

इति बोध्यम् । तत्र जन्मश्रवणादर्धरात्रे ऋक्षसाहित्यप्रत्ययात् ।
*वर्जनीयेति । इदं च परदिने निशीथे रोहिणीसत्त्वे एव ।
अन्यथा—

'जयन्ती शिवरात्रिश्च कार्ये भद्राजयान्विते ।
कृत्वोपवासं तिथ्यन्ते तदा कुर्याच्च पारणम् ॥'

इति विष्णुधर्मविरोधात् ।

'जयन्त्यां पूर्वविद्धायामुपवासं समाचरेत् ।

विद्धाऽपि सप्तम्या' इति जयन्तीपरम्।

'जयन्त्यां पूर्वविद्धायामुपवासं समाचरेत्।'

इत्येकवाक्यत्वात्। तत्रापि द्वयोर्नित्यत्वात्कालभेदाच्चोपवासद्वयं* भवत्येव। यदा तु केवलाष्टमी शुद्धाधिका तदा त्यागहेतोः सप्तमीवेधस्याभावात्पूर्वैव। यदि वा विद्धन्यूना तदा परदिने ग्राह्यतिथेरभावात्पूर्वैव। एवं सर्वाण्यौदयिकवाक्यानि सप्तमीवेधपराणि। ये तु—

'जन्माष्टमीं पूर्वविद्धां सऋक्षां सकलामपि।
विहाय नवमीं शुद्धामुपोष्य व्रतमाचरेत्॥'

इति व्यासोक्तेर्विद्धायाः क्षये शुद्धनवम्यामुपवासः। दशमीवेधे द्वादश्युपवासवदित्याहुः, ते निर्मूलत्वादुपेक्ष्याः। 'मुहूर्तमपि संयुता' इति रोहिणीयोगे *त्याज्यत्वोक्तेः *तिथ्यन्तपारणवाक्यानां निर्विषयत्वापत्तेः। न च जयन्तीपराणि शुद्धाधिकापराणि वा तानि।

---

*उपवासद्वयम्=पूर्वेद्युर्जयन्तीप्रयुक्तमुत्तरेद्युर्जन्माष्टमीप्रयुक्तम्। औदयिकवाक्यानि—'उदये चाष्टमी किंचित्' इत्यादीनि रोहिणीयोगे इति संयुक्तत्वं च नाष्टम्याः, दिनद्वये रोहिणीराहित्ये परामसङ्गात्, किन्तु रोहिण्या एव अष्टम्यास्तथात्वं त्वार्थिकं पूर्वविद्धाष्टमीत्युक्त्या तल्लाभात्। तथा च तत्कथमष्टम्याः कर्मकालत्वं साधयेदिति भावः। *त्याज्यत्वेति। दिनद्वये जयन्तीयोगे तेन जयन्तीप्रयुक्तोपवासे पूर्वदिने त्याज्यत्वं बोध्यते, न तु ग्राह्यत्वम्। यत्र पूर्वेद्युरेव जयन्ती तत्र 'जयन्त्यां पूर्वविद्धायाम्' इत्यस्य सावकाशत्वादिति भावः। सप्तमीपदस्याष्टमीसंयुक्तार्थत्वे प्रतिकूलमप्याह—*तिथ्यन्तेति। आञ्जस्येनैव तिथ्यन्तलाभात्।

प्राजापत्यं द्वितीयेऽह्नि *मुहूर्तार्धं भवेद्यदि ।
तदाष्टयामिकं पुण्यं प्रोक्तं व्यासादिभिः पुरा ॥'

इति स्कान्दात् ।

'मुहूर्तेनापि*संयुक्ता संपूर्णा साऽष्टमी भवेत् ।
किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदा ॥'

इति पाद्माच्चेति दिक् । निम्बादित्योपासकास्तु जन्माष्टमीरामनवमीशिवरात्र्यादौ पूर्वेऽह्नि कर्मकालीनां तिथिं त्यक्त्वा *द्वित्रिमुहूर्ता परैव तिथिर्ग्राह्या ।

'उदयव्यापिनी ग्राह्या कुले तिथिरुपोषणे ।
निम्बार्को भगवान्येषां वाञ्छितार्थफलप्रदः ॥'

इति (१)हेमाद्रौ मात्स्योक्तमुक्तिसमीवृते भविष्योक्तेरित्याहुः । तन्न ।

'यदि द्वितीये दिवसे तु ऋक्ष
तिथ्योर्युतिः स्यान्न तदोपवासः ।
पूर्वं प्रकुर्याद्दिवसे द्वितीये ।
दिनेशभक्तोऽथ तदा व्रताद्यम् ॥'

इति मात्स्यवाक्येन तत्रैव उपसंहारात्सर्वार्थत्वेन मानाभावात् । ऋक्षतिथ्योः=हस्तसप्तम्योः । अन्यथा

शास्त्राबाधेनोपपत्तेर्न तद्बाधो युक्तः । एवं च यत्र पूर्वेऽह्नि निशीथेऽष्टमी तत्रापि पूर्वैव युक्ता न परेत्यरुचिः । *मुहूर्तार्धमिति । तत्र वाचानिकं संपूर्णत्वमित्याशयः । *संयुक्ता=रोहिण्या । दिगर्थस्तु योगस्त्रिविध उक्तः । तेन शुद्धाधिकाऽपि त्रिविधा रोहिण्याः साम्येन, निशीथात् प्रागारभ्य प्रवृत्त्या, तदुत्तरं प्रवृत्त्या च । तत्र सर्वत्रापि पूर्वैव । आद्ययोर्निशीथे जयन्तीयोगात् अन्त्ये प्रधानीभूताष्टम्याः कर्मकालव्यापित्वादिति । *द्वित्रीति । उदिते

---

(१) 'हेमाद्रौ' इत्यादर्शपुस्तके नास्ति ।

ऽपि षष्ठ्यादौ तदापत्तिः। *शिष्टाचारान्नेति चेत्, न। *तस्य न्यायवचोविरोधेन हेयत्वात्। *इदानीं क्वापि निम्बार्कोपासनाभावाच्चेति संक्षेपः॥

*पारणं तु—

'तिथिरष्टगुणं हन्ति नक्षत्रं च चतुर्गुणम्।
तस्मात्प्रयत्नतः कुर्यात्तिथिभान्ते च पारणम्॥'

दैवतं भानावित्येकवाक्यतयेति केचित्। उदयव्यापिनीत्येव दर्शनात्तदविवक्षितार्थमिति परे। *शिष्टेति। जन्माष्टम्यादौ तु तदाचारोऽस्तीति भावः। *तस्य=जन्माष्टम्यादौ तदाचारस्य। तुष्यत्विति न्यायेन तदेकवाक्यतामुपेत्याप्याह—*इदानीमिति। तद्देश्यानां तदनुपासकानां तदनाचार एव युक्त इत्याशयः। अत्र

'सर्वेष्वेवोपवासेषु पूर्वाह्णे पारणं भवेत्।
अन्यथा तु फलस्यार्धं धर्ममेवोपसर्पति॥'

इति देवलेन पारणं स्मर्यते। तत्रोपवासे व्रतसामान्ये वाऽग्रम्। पारणान्तं व्रतं ज्ञेयमित्यत्र हि व्रतशब्दस्योपवास एव नियम एव वाऽर्थः।

'तिथीनामेव सर्वासामुपवासव्रतादिषु।
तिथ्यन्ते पारणं कुर्याद्विना शिवचतुर्दशीम्॥'

इत्यत्राऽऽदिशब्देनैकभक्तनक्तयोरपि ग्रहात्। यस्यां तिथावेतानि कृतानि परेद्युस्तत्तिथ्यन्ते भोजनस्य पारणत्वात्। न चैवं तथाविधकर्मसमाप्तिलक्षणपारणस्य 'भोक्ष्येऽहम्' इत्यादिलिङ्गाद्भोजननियमात्मकोपवाससमाप्तेश्च भोजनेनैव भावाद्भोजनरूपत्वे च रागप्राप्ततदनुवादेन पूर्वाह्णे विधीयतां किमङ्गत्वेनेति वाच्यम्। उद्यापनादिवच्छास्त्रीयकर्मसमाप्तेः शास्त्रीयत्वावश्यंभावात्। भोजननियमाङ्गीकारे उपवासादौ अद्भिस्तु पारणं कुर्यादित्यादिप्रतिनिधिविध्यनुपपत्तेश्चेति। तत्कालं निरूपयति—*पारणं त्विति।

इति ब्रह्मवैवर्तात्,

'*तिथ्यृक्षयोर्यदा छेदो*नक्षत्रान्तम*थापि वा।

तिथिभान्ते चेति तिथेर्भस्यान्तो यस्मान्निति व्युत्पत्त्या बृहद्रथन्तर-सामेत्यादिवत्तिथिभयोर्विनैवेतरेतरयोगद्वन्द्वं तिथ्युपवासे तिथ्यन्तः नक्षत्रोपवासे नक्षत्रान्तश्च लभ्यत इति जन्माष्टम्युपवासे केवल-रोहिण्युपवासे च स्वस्वान्तसिद्धिः। दर्शितं च जन्माष्टमी रोहिणी चेति स्वतन्त्रं भार्गवम्। एतेन

'तिथिनक्षत्रनियमे तिथिभान्ते च पारणम्।

अतोऽन्यथा पारणायां व्रतभङ्गमवाप्नुयात्॥'

इति व्याख्यानात्।

'पूर्वविद्धासु तिथिषु भेषु च श्रवणं विना।

उपोष्य विधिवत् कुर्यात्तत्तदन्ते च पारणम्॥'

इति तिथीनामेव सर्वासामित्याद्यसमासनिर्देशाच्च तावतैव सरोहिण्यष्टम्युपवासे उभयानुवृत्तावुभयान्त एव लभ्यते। जयन्ती शिवरात्रिश्चेति जयन्तीपदं च जन्माष्टमीपरम्। तथैव तिथ्यन्त-पारणसंपत्तेः। एतेन जन्माष्टमीव्रतमात्रानुष्ठातॄणां परेद्युरष्टमीमध्ये नक्षत्रान्तपारणं चिन्त्यम्। ननु यत्रार्धरात्र एवोभयान्तः तत्र कथं पारणम्? भोजननिषेधात्।

'अन्यातिथ्यागमो रात्रौ तामसस्तैजसो दिवा।

तामसे पारणं कुर्वंस्तामसीं गतिमश्नुते॥'

इति दोषश्रवणाच्चेत्यत्राह—*तिथ्यृक्षयोरिति। *नक्षत्रान्तम्= तिथ्यृक्षयोरेकतरान्तम्।

'रोहिणीसहिता चेयं विद्वद्भिः समुपोषिता।

वियोगे पारणं चक्रुर्मुनयो ब्रह्मवादिनः॥'

इत्युक्तेः।

'सांयोगिके व्रते प्राप्ते यद्येकोऽपि वियुज्यते।

अर्धरात्रेऽथवा कुर्यात्पारणं त्वपरेऽहनि ॥'

इति हेमाद्रौ वचनाच्चार्धरात्रेऽप्युभयान्तेऽन्यतरान्ते चेति मुख्यः पक्षः ।

'सर्वेष्वेवोपवासेषु दिवा पारणमिष्यते ।'

इति ब्रह्मवैवर्ते त्वन्यविषयम् । दिने*मुख्यकालालाभेऽन्यतरान्ते वा ज्ञेयम् । *गौडास्तु—

'न रात्रौ पारणं कुर्यादृते वै रोहिणीव्रतात्* ।
तत्र निश्यपि तत्कुर्याद्वर्जयित्वा महानिशाम् ॥'

इति ब्रह्माण्डपुराणाद्रात्रौ सार्धप्रहरमध्ये कार्यम् ।

'महानिशा तु विज्ञेया मध्यमं मध्ययामयोः ।'

तथा—

'मध्यमप्रहरे रात्रेर्विज्ञेया तु महानिशा ।'

इति स्मृत्यन्तरात् । कल्पतरौ मदनरत्ने चैवम् । कामधेनौ गर्गस्तु—

'महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम् ।'

इत्याह । वृद्धशातातपस्तु—

तत्रैव पारणं कुर्यादिति वेदविदो विदुः ॥'

इति सामान्यत उक्तेश्च । *अर्धेति । प्रतिपदाद्युपवासेत्यर्थः । अन्यतिथ्यागम इत्यपि द्रष्टव्यम् । *मुख्येति । उक्तदिवापारणविधिरात्रिनिषेधयोरेकवाक्यतया दिवान्यतरान्तलाभे तत्रैव अनुकल्पत्वेनानुज्ञातस्य मुख्यतयैवोपादानात् न तूभयान्तप्रतीक्षया रात्रावपीति मदनरत्नादयः । एवमेव दिवान्यतरान्तस्यालाभे महानिशातः प्राक्तल्लाभे तत्रैव, इतरथा महानिशायामपीति द्रष्टव्यम् । तिथ्यृक्षयोरित्यस्य—

'अर्धरात्रे ततः कुर्यात्पारणं त्वपरेऽहनि ।'

इत्युत्तरार्धं वदतां मतमाह—*गौडास्त्विति । *रोहिणी-

'महानिशा द्वे घटिके रात्रौ मध्यमयामयोः।'

इत्याह। वेदपाठपरमे*तदित्यन्ये। *महानिशाया- मन्यतरान्ते तृतीयदिने पारणम्। 'अपरेऽहनि' इति पा- रणोत्तरदिनपरत्वात् उभयान्तापेक्षणादित्याहुः। *तत्त्वं तु महानिशातोऽर्वागन्यतरान्तलाभे महानिशानिषेधः महानिशायामेव लाभे*तत्रैव पारणमिति।

दिवोदासस्तु—

'रजनीप्रहरं यावत्प्रवृत्तिः कर्मणो मता।
पारणं तावदेवेष्टं प्रमादान्न भवेद्यदि॥'

इति स्कान्दादूर्ध्वं निषेधमाह। तन्निर्मूलम्।

अशक्तौ तु वह्निपुराणे—

'भान्ते कुर्यात्तिथेर्वापि शस्तं भारत पारणम्।' इति।

गारुडे विष्णुधर्मे च—

'जयन्त्यां पूर्वविद्धायामुपवासं समाचरेत्।
तिथ्यन्ते वोत्सवान्ते वा व्रती कुर्वीत पारणम्॥'

व्रतादिति। तद्युक्ताष्टमीव्रतादित्यर्थः। *एतदिति। सुबुद्धिदुर्बुद्धि- भेदेन वाक्यद्वयमित्यर्थः। स्वापादिपरमस्तु, प्रकृते तु नैतद्द्वयं प्रवर्तते।

'मुक्ते शशिनि भुञ्जीत यदि न स्यान्महानिशा।'

इत्यादिवदिति भावः। *महानिशायामिति। वर्जयि- त्वा महानिशामिति तत्र भोजननिषेधात्। अत्र तादृशपाठ- कल्पने वर्जयित्वा महानिशामित्येतदेव बीजम्। अर्धरात्रेऽथ- वेति पाठे विरोधात्। तच्चायुक्तं तृतीयदिनपारणेऽनौ- चित्यात्। महानिशातोऽव्यवहितप्राक्क्षणे सन्देहतादवस्थ्याच्च महा- निशोत्तरमन्यतरान्ते तत्रैव पारणं तदुत्तरानिषेधस्य रागप्राप्त- गोचरत्वेन वैधेऽप्रवृत्तेः, महानिशायां तु परेद्युरित्यनौचित्याच्चे- त्यरुचिः। स्वयं विरोधं परिहरति—*तत्त्वं त्विति। *तत्रैवेति।

अर्धरात्रेऽथवेत्युक्तः । तथा च न द्वयोर्विरोध इति भावः । न रात्रौ पारणं कुर्यादिति निर्मूलमेव । दाक्षिणात्यनिबन्धेऽदर्शनात् । अस्तु वा समूलं, तथापि तिथ्यृक्षयोरिति वाक्यार्थो न तद्विरुद्धः ।

'आततायिनमायान्तमपि वेदान्तगं रणे ।'

इत्यादावपिशब्दवत् । अथवापदस्यापि स्वार्थत्यागेनान्यार्थ-तात्पर्यावगमात् । व्रतनिषिद्धरात्रिपारणमनिमित्तवाचित्वेनार्धरात्रेऽपि पारणं सुकरं किमुत ततः प्रागरात्राविति व्याख्येयम् । यदि तु रोहिणीव्रतं नक्षत्रमात्रव्रतं तदाऽपि रात्रौ मुख्यगौणपक्षाश्रयेण पा-रणं कैमुतिकन्यायव्याख्यानात् । महानिशातः प्रागन्यतरान्ता-लाभे तु रात्रिपारणनिषेधातिक्रमस्य निर्बीजत्वात् 'तिथ्यन्ते चो-त्सवान्ते च' इति वाक्याज्जागरान्ते दिवैवेति न द्वयोर्विरोध इति तु केचित् । वस्तुतस्तु रात्रिपारणनिषेधवाक्याविरोधेनैव व्याख्यानं सम्भवति । अर्धरात्रे यदा तिथ्यृक्षयोश्छेदस्तदाऽपरेऽह्नि पारण-मिति ह्यन्वयः । अर्धरात्रेऽपरेऽहनीति तु नान्वयः । एकं पदमेकत्रा-न्वितं विना बलवदनुपपत्तिमन्यत्र नान्वेतीति न्यायात् । "एकैक मन्यांश्चमसांश्चमसिनो भक्षयन्ति अथैतस्य हारियोजनस्य सर्वे एव लिप्सन्ते" इत्यत्र चमसिपदस्य हारियोजनान्वयवारणाय तन्न्या-यस्य तृतीये व्युत्पादितत्वात् । तत्र निश्यपीत्यपिश्च स्वार्थत्यागे-नान्यार्थपरत्वात्कैमुतिकन्यायाद् दिनेव पारणार्थः । वस्तुतो रोहि-णीनक्षत्रमात्रव्रत एव तेन रात्रिपारणा बाध्यते ।

'सर्वेष्वेवोपवासेषु दिवा पारणमिष्यते ।

अन्यथा पुण्यहानिः स्यादृते धारणपारणात् ॥'

इति वचनात् । धारणपारणामिति पाठे आहारं विना शरीर-स्य धारणम्=उपवासः, तदुत्तरादिने चतुर्थकालभोजनविधिना विहितं भोजनं=पारणम् । व्रतविशेष इत्यर्थ इति तु केचित् । ग्रन्थ-स्त्वित्थं योज्यः—परदिने अष्टम्यादिमध्ये पारणाप्राप्तौ 'अतोऽन्य-

अशक्तौ तु—

'तिथ्यन्ते तिथिभान्ते वा पारणं यत्र चोदितम्।
यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणा॥'

स एवोत्सवान्तः—

*'तिथ्यन्ते वो*त्सवान्ते वा व्रती कुर्वीत पारणम्।'

इति कालादर्शोक्तेश्चेति सङ्क्षेपः॥

अष्टम्यां विशेषो हेमाद्रौ भविष्ये—

'*ततोऽष्टम्यां तिलैः स्नातो नद्यादौ विमले जले।

था पारणायाम्' इत्यादिदर्शनादन्तापेक्षायामुभयान्तो मुख्यः। तिथिरष्टगुणमिति वचनात्। अन्यतरान्तस्तु गौणः। 'भान्ते कुर्यात्तिथेर्वापि' इति वचनात् अथ वा यदि वोभयान्तोऽन्यतरान्तो वा रात्रौ तदाऽप्यपरेऽहन्येव दिवैव तिथ्यृक्षयोरिति वचनात्। तत्रार्धरात्रशब्दस्य रात्र्यर्थकत्वात्। तत्रापि यत्रार्धरात्रात्प्रागुभयान्तस्तत्रार्धरात्रवारणाय तथैव व्याख्येयत्वात्। सर्वेष्विति प्रतीकधारणं तेनान्यविषयमित्यस्य दर्शितश्लोकान्तर्गतम् 'ऋते धात्र्क्षपारणम्' इत्येतन्नैतदुपवास विषयं किन्तु केवलरोहिण्युपवासविषयमित्यर्थः। मुख्येति यत्रान्यतरान्ते गौणकाले दिवा उभयान्तो मुख्यकालस्तु रात्रौ तत्रान्यतरान्ते गौणकाले एकवाक्यताद्वारा मुख्यत्वप्रत्ययार्थमित्यर्थः। तच्चं त्वित्यादि तु मतान्तरमिति

*तिथ्यन्ते=अन्यतरान्ते। *उत्सवान्ते=जागरान्ते। एकतराविगमेऽपि शेषविरोधापत्तिवारणाय। एतदेव

'तिथ्यन्ते तिथिभान्ते वा पारणं यत्र चोदितम्।
यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणा॥'

इति गीयते माधवाचार्यैः। उत्सवान्तस्यैव प्रातस्त्वात् यामत्रयेत्यशक्तेर्विवरणाच्च। एतन्निर्मूलमेवेति तु विवेचने।

*तत इति पूर्वेद्युर्नियमाश्च

सुदेशे शोभनं कुर्याद्देवक्याः *सूतिकागृहम् ॥
तन्मध्ये *प्रतिमा स्थाप्या सा चाप्यष्टविधा स्मृता ।

'सप्तम्यां लघुभुक्कुर्याद्दन्तधावनपूर्वकम् ।
उपवासस्य नियमं रात्रौ कृत्वा जितेन्द्रियः ॥'

इत्यादयः । परेद्युः कृतनित्यक्रियः

'सूर्यः सोमो यमः कालः सन्ध्ये भूतान्यहः क्षपाः ।
पवनो दिक्पतिर्भूमिराकाशं खचरा नगाः ॥
ब्राह्मं शासनमास्थाय कल्पध्वमिह सन्निधिम् ॥'

इति पठेत् । एतदेव सूर्यादिदेवताभ्यो व्रतनिवेदनं गीयते । तत आचम्य प्राणानायम्य प्राङ्मुख उदङ्मुखो वा दर्भपाणिः फलपुष्पाक्षतं वारिपूर्णं ताम्रपात्रमादाय मासाद्युल्लिख्य श्रीकृष्णप्रीतये पापक्षयार्थं वा जन्माष्टमीव्रतमहं करिष्ये इति सङ्कल्पयेत् । सङ्कल्पेऽधिकरणतिथ्युल्लेखः । ततः श्लोकचतुष्टयं पठेत् —

'वासुदेवं समुद्दिश्य सर्वपापप्रशान्तये ।
उपवासं करिष्यामि कृष्णाष्टम्यां नभस्यहम् ॥
अद्य कृष्णाष्टमीं देवीं नभश्चन्द्रसरोहिणीम् ।
अर्चयित्वोपवासेन भोक्ष्येऽहमपरेऽहनि ॥
एनसो मोक्षकामोऽस्मि यद्गोविन्दत्रियोनिजम् ।
तन्मे मुञ्चतु मां त्राहि पतितं शोकसागरे ॥
आजन्ममरणं यावद् यन्मया दुष्कृतं कृतम् ।
तत्प्रणाशय गोविन्द प्रसीद परमेश्वर ॥' इति ।

ततः पात्रस्थं जलं क्षिपेत् । तत आह—*ततोऽष्टम्यामिति ।

तिलस्नानं मध्याह्ने प्रातःस्नानस्य वृत्तत्वात् । *सूतिकागृहम्=षष्ठ्या देव्या अधिष्ठितं गृहम् । *प्रतिमेति । प्रतिमायामग्न्युत्तारणसंस्कारं कुर्यात् । स च ऋग्वेदे—'अग्निः सप्तिं वाजंभरं ददाति' इति सूक्तमग्निपदहीनं पठित्वा अग्निपदसहितं पठन् स-

काञ्चनी राजती ताम्री पैत्तली मृन्मयी तथा ॥
वार्क्षी मणिमयी चैव वर्णकैर्लिखिताऽथवा ।
सर्वलक्षणसंपूर्णा पर्यङ्के च पटावृते ॥
देवकीं तत्र चैकस्मिन्प्रदेशे सूतिकागृहे ।

न्ततां जलधारां पातयेदिति । प्रतिमापूजनं चाकृतप्राणप्रतिष्ठाया-स्तस्याः प्राणप्रतिष्ठां कृत्वा कार्यम् ।

'प्रतिमायाः कपोलौ द्वौ स्पृष्ट्वा दक्षिणपाणिना ।
प्राणप्रतिष्ठां कुर्वीत तस्यां देवस्य वा हरेः ॥
अकृतायां प्रतिष्ठायां प्राणानां प्रतिमासु च ।
यथापूर्वं तथा भावः स्वर्णादीनां न देवता ॥
अन्येषामपि देवानां प्रतिमास्वपि पार्थिव ।
प्राणप्रतिष्ठा कर्त्तव्या तस्यां देवत्वसिद्धये ॥
वासुदेवस्य बीजेन तद्विष्णोरित्यनेन च ।
तथैव हृदयेऽङ्गुष्ठं दत्त्वा शश्वच्च मन्त्रवित् ॥
एभिर्मन्त्रैः प्रतिष्ठां तु हृदयेऽपि समाचरेत् ।
अस्मै प्राणाः प्रतिष्ठन्तु अस्मै प्राणाः क्षरन्तु च ॥
अस्मै देवत्वसङ्ख्यायै स्वाहेति यजुरीरयेत् ।
अङ्गमन्त्रैरङ्गिमन्त्रैर्वैदिकैरित्यनेन च ॥
प्राणप्रतिष्ठां सर्वत्र प्रतिमासु समाचरेत् ।'

बीजेन=मूलमन्त्रेण ।

'प्रणवादिनमोऽन्तं च चतुर्थ्यन्तं च सत्तम ।
देवतायाः स्वकं नाम मूलमन्त्रः प्रकीर्तितः ॥'

इति तल्लक्षणम् । यदा स्वहृदये पूजा क्रियते तदा हृदयेऽङ्गुष्ठं द-त्त्वा मन्त्राः पठनीयाः । प्रतिमायां तु कपोलौ स्पृष्ट्वेति विशेषः । एतच्च श्रीकृष्णमभिप्रेत्य देवक्यादिप्रतिमासु अग्न्युत्तारणान्तरं तत्तन्मूलमन्त्रान् वैदिकमन्त्रांश्च पठेत् । अस्मैइत्यस्य स्थाने चतु-

*प्रसूतां च प्रसुप्तां च स्थापयेन्मञ्चकोपरि ॥
*मां तत्र बालकं सुप्तं पर्यङ्के स्तनपायिनम् ।
यशोदां तत्र चैकस्मिन्प्रदेशे सूतिकागृहे ॥
तद्वच्च कल्पयेत्पार्थ प्रसूतवरकन्यकाम् ।
कश्यपो वसुदेवोऽयमदितिश्चैव देवकी ॥
शेषो वै बलभद्रोऽयं यशोदा क्षितिरप्यभूत् ।
नन्दः प्रजापतिर्दक्षो गर्गश्चापि चतुर्मुखः ॥
*गौर्धेनुः कुञ्जरश्चैव दानवाः शस्त्रपाणयः ।
लेख्यनागाश्च तत्रैव कालियो यमुनाह्रदे ॥
*इत्येवमादि यत्किञ्चिज्जन्मने चरितं मम ।
लेखयित्वा प्रयत्नेन *पूजयेद्भक्तितत्परः ॥
मन्त्रेणानेन कौन्तेय देवकीं पूजयेन्नरः ।

पर्यन्तं तत्तद्देवतानामयुक्तं स्वाहान्तं मन्त्रं पठन् प्राणप्रतिष्ठां कुर्यात् । प्रसूतां=देवकीम् । *प्रसुप्तां=संजातक्षीराम् । *मां तत्रेति । ध्याने उपयोगः ।

*गौरिति । एते च मोहितास्तत्र लेख्याः ।

'तत्र कंसनियुक्ताश्च मोहिता योगनिद्रया ।'

इति वाक्यदर्शनात् । गोपादयस्त्वमोहिता लेख्या इत्यर्थः । लेखश्च काष्ठचन्दनादिप्रतिमाभिर्विकल्पते प्रतिमात्वात् । पूर्वोक्तस्यावश्यकत्वमाह *इत्येवमादीति । *पूजयेदिति । पूजा च प्राणप्रतिष्ठोत्तरं कार्या । ताम्बूलदक्षिणान्तपूजासाद्गुण्याय विनोद्वासनमुपचारान्निवेदयेत् । उद्वासनं तु परेऽह्नि कार्यम् । तत्र देवकीं वसुदेवं यशोदां नन्दं सुतश्रीकृष्णं बलदेवं चण्डिकां च पृथक्पृथङ्नाममन्त्रेण पर्यङ्कादेः प्रतिमादेशासक्तौ फलेषु अक्षतपुञ्जेषु वा पूजयेत् ।

'कुर्यात्पूजां विधिज्ञश्च सर्वपापापनुत्तये ।
देवक्यै वसुदेवाय वासुदेवाय चैव हि ॥

*गाथाद्भिः किन्नराद्यैः सततपरिवृता वेणुवीणानिनादैः
शृङ्गारादर्शकुम्भप्रवरवृतकरैः किंकरैः सेव्यमाना।
पर्यङ्के स्वास्तृते या मुदिततरमुखी पुत्रिणी सम्यगास्ते,
सा देवी देवमाता जयति सुतनया देवकी कान्तरूपा॥
पादौ संवाहयन्ती श्रीर्देवक्याश्चरणान्तिके।
निषण्णा पङ्कजे पूज्या नमो देव्यै श्रियै इति॥

बलदेवाय नन्दाय यशोदायै पृथक् पृथक्॥'

इति भविष्योत्तरात्। श्रियं च 'नमो देव्यै श्रियै' इति मन्त्रेण। अन्येषां तु विशिष्यमन्त्रानुक्तावपि 'गर्गाद्यावाहितदेवताभ्यो नमः' इति मन्त्रेणापि। *गार्गाद्भिरिति ध्यानम्। भविष्ये एकवचनमन्त्रा दर्शिताः।

'विध्यन्तरमपीच्छन्ति केचिदत्रैव सूरयः'।

इत्युक्त्वा

'योगेश्वराय देवाय योगानां पतये विभो।
योगोद्भवाय नित्याय गोविन्दाय नमो नमः॥'

इति स्नाने,

'यज्ञेश्वराय यज्ञाय तथा यज्ञोद्भवाय च।
यज्ञानां पतये नाथ गोविन्दाय नमो नमः॥'

इति धूपादौ,

'विश्वेश्वराय विश्वाय तथा विश्वोद्भवाय च।
विश्वस्य पतये तुभ्यं गोविन्दाय नमो नमः॥'

इति नैवेद्ये, गारुडे तु 'यज्ञाय यज्ञेश्वराय यज्ञपतये यज्ञसम्भवाय गोविन्दाय नमो नमः' इत्यर्घ्ये 'धर्माय धर्मेश्वराय धर्मपतये धर्मसम्भवाय गोविन्दाय नमो नमः' इति स्वाहान्तास्तिलहोमे, 'सोमाय सोमेश्वराय सोमपतये सोमसम्भवाय नमो नमः' इति चन्द्र-

*अर्धरात्रे वसोर्धारां पातयेद् गुडसर्पिषा।
*नाडीच्छेदनं षष्ठी नामादेः करणं मम॥
*ततो मन्त्रेण वै दद्याच्चन्द्रायार्घ्यं समाहितः।
शङ्खे तोयं समादाय सपुष्पकुशचन्दनम्॥
जानुभ्यां धरणीं गत्वा चन्द्रायार्घ्यं निवेदयेत्॥
क्षीरोदार्णवसंभूत अत्रिगोत्रसमुद्भव।
गृहाणार्घ्यं शशाङ्केदं रोहिण्या सहितो मम॥
ज्योत्स्नापते नमस्तुभ्यं नमस्ते ज्योतिषां पते।
नमस्ते रोहिणीकान्त अर्घ्यं नः प्रतिगृह्यताम्॥
यथा पुत्रं हरिं लब्ध्वा प्राप्ता ते निर्वृतिः परा।
तामेव निर्वृतिं देहि सुपुत्रं दर्शयस्व मे॥'

इति देवक्यर्घ्यः।

'ततः पुष्पाञ्जलिं दत्त्वा नाम्ने नाम्ने प्रपूजयेत्।
प्रभाते ब्राह्मणान् शक्त्या भोजयेद्भक्तिमान्नरः॥'
'ॐ नमो वासुदेवाय गोब्राह्मणहिताय च।
शान्तिरस्तु शिवं चास्तु इत्युक्त्वा मां विसर्जयेत्॥'

इदं प्रतिमासकृष्णाष्टम्यामप्युक्तं मदनरत्ने वह्निपुराणे

पूजायां मन्त्रा उक्ताः। *अर्धरात्रे इति। ततो गव्यघृतेनाग्नौ वसोर्धारां कुर्यात्। क्वचिद्गुडसर्पिषेति पाठः। *नाडीति। जातकर्मनालच्छेदनषष्ठीपूजानामकर्मादीनि संक्षेपेण। *तत इति। चन्द्रोदये भक्तिमान् रोहिणीसहितं चन्द्रं सम्पूज्य 'जानुभ्यां धरणीं गत्वा' शङ्खे तोयमित्यादिचन्द्रार्घ्योत्तरं च

'ज्योत्स्नायाः पतये तुभ्यं ज्योतिषां पतये नमः।
नमस्ते रोहिणीकान्त सुधावास नमोऽस्तु ते॥
नमो मण्डलदीपाय शिरोरत्नाय धूर्जटेः।

कलाभिर्वर्धमानाय नमश्चन्द्राय चारवे' ॥

इति मन्त्राभ्यां प्रणमेत्, देवक्यर्घ्योत्तरं देवकीं च प्रणमेत्। देवक्यर्घ्यो नावश्यक इति केचित्। ततः—

'अनघं वामनं शौरिं वैकुण्ठं पुरुषोत्तमम्।
वासुदेवं हृषीकेशं माधवं मधुसूदनम् ॥
वाराहं पुण्डरीकाक्षं नृसिंहं दैत्यसूदनम्।
दामोदरं पद्मनाभं केशवं गरुडध्वजम् ॥
गोविन्दमच्युतं कृष्णमनघं चापराजितम्।
अधोक्षजं जगद्वीजं सर्गस्थित्यन्तकारणम् ॥
अनादिनिधनं विष्णुं त्रिलोकेशं त्रिविक्रमम्।
नारायणं चतुर्बाहुं शङ्खचक्रगदाधरम् ॥
पीताम्बरधरं नित्यं वनमालाविभूषितम्।
श्रीवत्साङ्कं जगत्सेतुं श्रीकृष्णं श्रीधरं हरिम् ॥
प्रपद्येऽहं सदा देवं सर्वकामप्रसिद्धये।
प्रणमामि सदा देवं वासुदेवं जगत्पतिम् ॥

इति मन्त्रैः स्वनामकीर्तनपूर्वकं प्रणम्य

त्राहि मां सर्वलोकेश हरे संसारसागरात्।
त्राहि मां सर्वपापघ्न दुःखशोकार्णवात्प्रभो ॥
सर्वलोकेश्वर त्राहि पतितं मां भवार्णवे।
देवकीनन्दन श्रीश हरे संसारसागरात् ॥
त्राहि मां सर्वदुःखघ्न रोगशोकार्णवाद्धरे।
दुर्गतांस्त्रायसे विष्णो ये स्मरन्ति सकृत् सकृत् ॥
सोऽहं देवातिदुर्वृत्त त्राहि मां शोकसागरात्।
पुष्कराक्ष निमग्नोऽहं मायाविज्ञानसागरे ॥
त्राहि मां देव देवेश त्वत्तो नाऽन्योऽस्ति रक्षिता।
यद्वाल्ये यच्च कौमारे यौवने यच्च वार्धके।

तत्पुण्यं वृद्धिमायातु पापं हर हरे प्रभो ॥'

इति प्रार्थ्य रात्रिशेषं स्तोत्रपुराणश्रवणादिभिरतिवाहयेत् । ततः परदिने प्रातः स्नानादिनित्यकृत्यं कृत्वा पुनः सपरिवारं श्रीकृष्णं यथाविभवं संपूज्य यथाविभवं चण्डिकामहोत्सवं कृत्वा यथाशक्ति ब्राह्मणान्संपूज्य भोजयित्वा तेभ्यः सुवर्णमेदिनीधेनुवस्त्रादि यथेष्टं तत्कृष्णो मे प्रीयतामिति दत्त्वा मां प्रति

यं देवं देवकी देवी वसुदेवादजीजनत् ।
भौमस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः ॥
ॐ नमो वासुदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

शान्तिरस्तु शिवं चास्तु इत्युक्त्वा ब्राह्मणान् विसृज्य इष्टैः सह स्वयं पारणं कुर्यादिति शेषः । सुजन्म वासुदेवायेति पाठान्तरम् । अत्र देवताविसर्जनं कार्यम् । श्रीकृष्णप्रतिमादिदानं तु विसर्जनमकृत्वैव । एवं श्रीकृष्णप्रतिमाया अभावेऽपि 'ॐ कृष्णाय नमः' इति मन्त्रेण 'ॐ वासुदेवाय' इति मन्त्रेण वा तद्विसर्जनमपि । उद्यापनं तु नैतस्यानुक्तत्वात् ।

'यदि चोद्यापनं नोक्तं व्रतानुगुणतश्चरेत् ।'

इत्यादिप्रयुक्तत्वादुद्यापनमावश्यकमिति स्मार्ताः । व्रतभङ्गे-तूक्तमथवा सम्पूर्णतानुष्ठानं कार्यम् । युधिष्ठिर उवाच—

संपूर्णतामनुष्ठानं व्रतानां च जनार्दन ।
कुरुप्रसादं सुव्यक्तमेतन्मे वक्तुमर्हसि ॥

श्रीकृष्ण उवाच—

साधु साधु महाबाहो कुरुराज युधिष्ठिर ।
रहस्यानां रहस्यं ते कथयामि व्रतं तव ॥
किञ्चिद्भग्नं प्रमादेन यद् व्रतं व्रतिनां व्रतम् ।
तत्संपूर्णं भवेत्सर्वं कृतेनानेन पाण्डव ॥

काञ्चनं रूप्यकं वाऽथ शिल्पिना तु घटापयेत् ।
भग्नव्रतस्य यो देवस्तत्स्वरूपं विनिर्मितम् ॥
द्विभुजं पङ्कजारूढं सौम्यं प्रहसिताननम् ।
द्विभुजमितिचतुर्भुजादेरुपलक्षणम् ॥
निष्पादितं शिल्पिना च तस्मिन्नेव दिने पुनः ।
तन्मासे तु पुनः प्राप्ते ब्राह्मणो विधिना गृहे ॥
स्नापयेत्पयसा दध्ना घृतक्षौद्ररसाम्बुभिः ।
गन्धचन्दनपुष्पैश्च पूजां कुर्यात्समाहितः ॥
पूजा चाग्न्युत्तारणप्राणप्रतिष्ठानन्तरं कार्येत्युक्तम् ।
अर्घ्यं प्रदद्यात्तन्नाम्ना मन्त्रेणानेन पाण्डव ।
शरणं वः प्रपन्नोऽस्मि कुरुष्वाद्य दयां पुनः ॥
प्रसन्नो भवभीतस्य भिन्नचर्यव्रतस्य च ।
कुरु प्रसादं सम्पूर्णं व्रतं संजायतां मम ॥
तपश्छिद्रं जपाच्छिद्रं यच्छिद्रं यज्ञकर्मणि ।
तत्सर्वं त्वत्प्रसादेन संपूर्णं जायतां मम ॥
पूर्वदक्षिणपश्चात्सु उत्तरे च बलिं हरेत् ।
उपर्यधस्तात्सर्वेभ्यो दिक्पालेभ्यो नमो नमः ॥
इदमर्घ्यमिदं पाद्यं तेभ्यस्तेभ्यो नमो नमः ।
पादौ च जानुनी चैव कटिं शीर्षं च वक्षसि ॥
कुक्षिं तु हृदयं पृष्ठं बाह्वक्षुश्च शिरोरुहान् ।
पूजयित्वाऽस्य देवस्य ततः पश्चात् क्षमापयेत् ॥
पूजितस्त्वं यथाशक्त्या नमस्तेऽस्तु सुरोत्तम ।
ऐहिकामुष्मिकीं देव कार्यसिद्धिं दिशस्व मे ॥
एवं क्षमापयित्वा तु देवं साष्टाङ्गमानमेत् ।
तन्मूर्तिं चापि विप्राय विधिवत् प्रतिपादयेत् ॥
स्थित्वा पूर्वमुखो विप्रो गृह्णीयाद्दर्भपाणिना ।
दर्भयुक्तेन पाणिनेत्यर्थः ।

*प्रतिमासं च ते पूजामष्टम्यां यः करिष्यति ।
विप्रहस्ते प्रयच्छेत दाता चैवोत्तरामुखः ॥
मन्त्रेणानेन कौन्तेय गोपवासः प्रयत्नतः ।
इदं व्रतं मया खण्डं कृतमासीत्पुरा द्विज ॥
तत्सर्वं पूर्णमेवास्तु तव मूर्तिवरानन ।
वाक्यं पूर्णमतो ब्रूयात् व्रतेनानेन ते पुरा ॥
सम्पूर्णं स्यात्प्रसादेन तव पूर्णा मनोरथाः ।
ब्राह्मणा यत्प्रभाषन्ते मन्यन्ते तद्दिवौकसः ॥
सर्वदेवमया विप्रा न तद्वचनमन्यथा ।
जलधिः क्षारतां नीतः पावकः सर्वभक्षताम् ॥
सहस्रनेत्रः शक्रोऽपि कृतो विप्रमहात्मभिः ।
ब्राह्मणानां तु वचनात् ब्रह्महत्या विनश्यति ॥
अश्वमेधफलं साग्रं लभन्ते नात्र संशयः ।
व्यासवाल्मीकिवचनात्पराशरवसिष्ठयोः ॥
गर्गगौतमधौम्यानां कश्यपाङ्गिरसां तथा ।
वचनान्नारदादीनां पूर्णं भवतु मे व्रतम् ॥
एवं विधिविधानेन गृहीत्वा ब्राह्मणो व्रजेत् ।
दाता तदनुगन्तव्यं ब्राह्मणस्य गृहं स्वयम् ॥
ततः पञ्चमहायज्ञान्निवर्त्य भोजनादिकम् ।
एवं यः कुरुते भक्त्या व्रतमेतन्नरोत्तम ॥
तस्य सम्पूर्णतां याति तद्व्रतं यत्पुरा कृतम् ।
खण्डं सम्पूर्णतां याति प्रसन्ने व्रतदैवते ॥
भग्नानि यानि मदमोहवशाद् गृहीत्वा
जन्मान्तरेष्वपि नरेण समत्सरेण ।
सम्पूर्णपूजनपरस्य पुरो भवन्ति
सर्वव्रतानि परिपूर्णफलप्रदानि ॥' इति ।
*प्रतिमासं चेति । चण्डिकां प्रति श्रीकृष्णवाक्यम् । आर-

मम चैवाखिलान्कामान्स संप्राप्स्यत्यसंशयम् ॥'

तथा—

'अनेन विधिना यस्तु प्रतिमासं नरेश्वर।
करोति वत्सरं पूर्णं यावदागमनं हरेः॥
दद्यात्कन्यां सुसंपूर्णां गोभी रत्नैरलंकृताम् ॥'

इति जन्माष्टमीव्रतम् ॥

भाद्रामावास्यायां कुशग्रहणमुक्तं हेमाद्रौ हारीतेन-
'*मासे नभस्यमावास्या, तस्यां दर्भोच्चयो मतः।

नभस्त्वस्य रोहिणीयुताष्टम्याम्। अत्रोत्सङ्गावस्थितचतुर्भुजबालस्वरूपश्रीकृष्णाया देवक्याः प्रतिमा, तत्र श्रीकृष्णपूजादि, देवक्यर्घ्यः, प्रतिमादानादि।

'ततः पुष्पाञ्जलिं दत्त्वा यामे यामे प्रपूजयेत्।' इति।

सुवासिनीनामपि एतद्व्रते अधिकारः। अयं विशेषः—उक्तपूजोत्तरमरुणोदये रक्तवस्त्रं परिधाय स्वां स्वां प्रतिमां गृहीत्वा नदीतीरं, महत्सरो वा गत्वा तत्र स्वयं स्नात्वा प्रतिमां स्नापयित्वा किञ्चिद्विहृत्य सह प्रतिमया स्वं स्वं गृहमागत्य मधवाज्यमरिचेक्षुविकारसंस्कृतं यवान्नं बन्धुभिः सह भुञ्जीरन्निति। पञ्चमृत्तिकापूजायां जन्माष्टम्यां मृत्तिकागोकुलपूजा कार्या। इति जन्माष्टमी।

*मासे इति। यत्तु शङ्खः-

'अमायां चैव न च्छिन्द्यात्कुशांश्च समिधस्तथा।'

इति, तत्तत्कालकर्मातिरिक्तपरम्।

'कुशान् काशांश्च दूर्वाद्यान् गवार्थं च तृणादिकम्।
निषिद्धे चापि गृह्णीयादमावास्याहनि द्विज ॥'

इति जाबाल्युक्तेः। वनस्पतिसंज्ञकमुहूर्ते च निषेधः 'वनस्पतिगते सोमे' इति वक्ष्यमाणवचनात्। मरीचिः—

'आर्द्रान् लुनीयाद्रात्रौ च लुनीयाद्वापि सन्ध्ययोः।'

*अयातयामास्ते दर्भा विनियोज्याः पुनः पुनः ॥'

नभः श्रावणः । तेन दर्शान्तमासे जन्माष्टम्यनन्तरं दर्शो लभ्यते । *मदनरत्ने तु-

'मासे नभस्येऽमावास्या, तस्यां दर्भोच्चयो मतः ।'

इति मरीचिवाक्यमुक्तम् । नभस्यः=भाद्रपदः । तेन महालयान्तर्गतदर्शो लभ्यते । गौणमुख्यचान्द्राभ्यामेक एव दर्श इत्यन्ये ॥

भाद्रपदशुक्लतृतीयायां हरितालि(१)काव्रतम् । तत्र परा ग्राह्या ।

'मुहूर्तमात्रसत्त्वेऽपि दिने गौरीव्रतं परे ।
शुद्धाधिकायामप्येवं गणयोगप्रशंसनात् ॥'

पाद्मे—

'न दर्भाञ्छेदयेच्छूद्रो न पिबेत्कापिलं पयः ।'

*अयातयामाः=उपयुक्ता अपि अपवादं विहायान्यत्र प्रयोज्याः ।

समित्पुष्पकुशादीनां द्वितीयः प्रहरो मतः ।

इत्युक्तेस्तद्व्यापिनी अपि ग्राह्या, अधिकमग्रे । *मदनरत्ने त्विति तु नाऽरुचिः । शुक्लादिकृष्णादिमासभेदेन एकस्यैव चान्द्रस्य ग्रहीतुं शक्यत्वात् ।

भाद्रशुक्लप्रतिपदि रुद्रव्रतं, तत्र पूर्वविद्धा ग्राह्या ।

'रुद्रव्रतेषु सर्वेषु कर्तव्या सम्मुखी तिथिः ।

---

(१) हरितालिकेति । एतदन्वर्थकं नाम 'आलीभिर्हरिता यस्मात्तस्मात्सा हरितालिका ।' इति वचनात् । अत्र च भवानीशिवयोः पूजा, मन्त्रः 'मन्दारमालाकुलितालकायै कपालमालाङ्कितशेखराय । दिव्याम्बरायै च दिगम्बराय नमः शिवायै च नमः शिवाय ॥' इति तत्कथायामुक्तः ।

इति माधवोक्तेः। चतुर्थीयुक्तायां फलाधिक्यम्।

माधवीये आपस्तम्बः—

'चतुर्थीसहिता या तु सा तृतीया फलप्रदा।
अवैधव्यकरा स्त्रीणां पुत्रपौत्रप्रवर्धिनी ॥'

द्वितीयायोगे प्रत्यवायमाह स एव—

'द्वितीयाशेषसंयुक्तां या करोति विमोहिता।
सा वैधव्यमवाप्नोति प्रवदन्ति मनीषिणः ॥' इति।

'आद्या मधुस्रावणिका कज्जली हरितालिका।
चतुर्थीसंश्रिता स्त्रीभि*र्दिवानक्ते विधीयते ॥
तृतीया नभसः शुक्ला मधुस्रावणिका स्मृता।
भाद्रस्य कज्जली कृष्णा, शुक्ला च हरितालिका ॥'

इति दिवोदासोदाहृतवचनाच्च ॥

*भाद्रशुक्लचतुर्थी मध्याह्नव्यापिनी ग्राह्या।

'प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृप।'

इति हेमाद्रौ भविष्ये तत्रैव पूजोक्तेः। मदनरत्नेऽप्येवम्-

अन्येषु व्रतकल्पेषु यथोद्दिष्टामुपावसेत् ॥'

इति ब्रह्मवैवर्तात्। आद्या=परेद्युरौदयिकी, मधुस्रावणिकेत्यत्र दन्त्यः सकारो न तु तालव्यः शकारः। मधुस्रवारुयेत्युक्तेः। *दिवानक्ते=अहोरात्रसाध्ये व्रते। *भाद्रस्येति 'नभसः कज्जली कृष्णा' इति दिवोदासपाठाच्छ्रावणकृष्णतृतीया कज्जलीति कृत्यरत्नावली।

वरदेति।

'सुरासुरानाप्नुवतो गणेशं बुद्धिपूर्वकम्।
तस्यां प्रादाद्वरं यस्मात्तस्माद्वरचतुर्थिका ॥'

इति पुराणान्तरे तद्विवरणात्।

*अंशेनेति। परेद्युरधिकव्याप्तौ परेद्युराधिक्यादिति के-

म् । परदिने एकदेशेन*साकल्येन वा मध्याह्नव्याप्त्यभावे सर्वपक्षेषु पूर्वा ग्राह्या । तथा च बृहस्पतिः—

'चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते ।
मध्याह्नव्यापिनी चेत्स्यात्परतश्चेत्परेऽहनि ॥' इति ।
'मातृविद्धा प्रशस्ता स्याच्चतुर्थी गणनायके ।
मध्याह्ने परतश्चेत्स्यान्नागविद्धा प्रशस्यते ॥'

इति माधवीये स्मृत्यन्तराच्च । तत्र गणेशरूपं स्कान्दे—

'एकदन्तं शूर्पकर्णं नागयज्ञोपवीतिनम् ।
पाशाङ्कुशधरं देवं ध्यायेत्सिद्धिवि(१)नायकम् ॥' इति ।

इयं रविभौमवारयोरतिप्रशस्ता ।

'भाद्रशुक्लचतुर्थी या भौमेनार्केण वा युता ।
महती साऽत्र विघ्नेशमर्चित्वेष्टं लभेन्नरः ॥'

इति निर्णयामृते वाराहोक्तेः ।

अत्र चन्द्रदर्शनं निषिद्धम् । तथा चापरार्के मार्कण्डेयः—

'*सिंहादित्ये शुक्लपक्षे *चतुर्थ्यां चन्द्रदर्शनम् ।

चित् । या तु पूर्वेद्युः किंचिन्मध्याह्नं व्याप्य परेद्युः कृत्स्नं मध्याह्नं व्याप्नोति सा परा; संपूर्णकर्मकालव्याप्तेः । संदिग्धे हि 'मातृविद्धा प्रशस्यते' 'मातृविद्धा प्रशस्ता स्यात्' इत्यादीनि प्रवर्तन्ते ।

*सिंहादित्ये इति । कन्यादित्यसिंहादित्यशब्दयोः चान्द्रो भाद्रपद इत्यर्थः । *चतुर्थ्यामिति । अत एव कृत्यरत्नाव-

(१) अत्र 'मूलमन्त्रादिमूर्तौ प्राणप्रतिष्ठापूर्वकं विनायकं षोडशोपचारैः संपूज्य मोदकैश्च नैवेद्यं दत्त्वा अनन्तरमेकविंशतिदूर्वा गृहीत्वा—'गणाधिपाय उमापुत्राय अघनाशनाय विनायकाय ईशपुत्राय सर्वसिद्धिप्रदाय एकदन्ताय इभवक्त्राय मूषकवाहनाय कुमारगुरवे' इति दशनामभिर्दूर्वाद्वयं द्वयं समर्प्यावशिष्टामेकां दूर्वां पुनर्दशनामभिः समर्पयेत् । दश मोदकान् विप्राय दत्त्वा दश स्वयं भुञ्जीत' इति संक्षेपतः पूजाविधिर्धर्मसिन्ध्वाद्युक्तः । विस्तरस्तु व्रतराजादिग्रन्थेभ्योऽवगन्तव्यः ।

मिथ्याभिदूषणं कुर्यात्तस्मात्पश्येन्न तं तदा ॥'
चतुर्थ्यां न पश्येदित्यन्वयः। प्रधानक्रियान्वयला-
भात्। तेन चतुर्थ्यामुदितस्य पञ्चम्यां न निषेधः।
गौडा अप्येवमाहुः। पराशरोऽपि—

'कन्यादित्ये चतुर्थ्यां तु शुक्ले चन्द्रस्य दर्शनम्।
मिथ्याभिदूषणं कुर्यात्तस्मात्पश्येन्न तं तदा ॥
तद्दोषशान्तये सिंहः प्रसेनमिति वै पठेत्'। इति।

श्लोकस्तु विष्णुपुराणे—

'सिंहः प्रसेनमवधीत्सिंहो जाम्बवता हतः।
सुकुमारक मा रोदीस्तव ह्येषः स्यमन्तकः॥' इति॥

भाद्रपदशुक्लपञ्चमी=ऋषिपञ्चमी। सा मध्याह्नव्या-
पिनी ग्राह्या।

'पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथिः।'

इति माधवीये हारीतोक्तेः। दिनद्वये तत्त्वे *हेमा-
द्रिमते परा। 'सिता परयुता स्यात्पञ्चमी' इति दीपि-

ल्याम्—

'पञ्चाननगते भानौ पक्षयोरुभयोरपि।
चतुर्थ्यामुदितश्चन्द्रो नेक्षितव्यः कदाचन ॥'

इति तिथितत्त्ववाक्ये चतुर्थ्यां नेक्षितव्य इति सम्बन्ध इति
व्याख्यातम्। दिवादर्शने च न दोषः। सकृत्पाठेऽपि तन्निवृत्तिः।
पाठश्च प्राङ्मुखेनोदङ्मुखेन वा कार्यः। तथा च पुराणान्तरम्—

'ततश्चतुर्थ्यां रात्र्यां तं प्रमादाद्वीक्ष्य मानवः।
पठेत्पौराणिकं वाक्यं प्राङ्मुखो वाऽप्युदङ्मुखः॥' इति।

सिंहः प्रसेनमिति मन्त्रेणामन्त्रितं जलं पिबेत्, स्यमन्तको-
पाख्यानं च श्रोतव्यमाचारादिति स्मार्ताः।

*हेमाद्रीति। तत्त्वं तु सामान्यनिर्णये दर्शितम्। वस्तुत-

कोक्तः। माधवमते पूर्वा। 'सर्वत्र पञ्चमी पूर्वा' इत्युक्तेः। युग्मवाक्यान्निर्णयस्तु युक्तः। क्वापि पञ्चमी षष्ठीयुतैवेति दिवोदासः। *अत्र ऋषीन्प्रतिमास्तु पूजयित्वाऽकृष्टभू-

---

स्तु मध्याह्नव्यापिनी ग्राह्या।

'पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथिः।'

इतिवचनात् मनुष्यदैवत्यत्वाच्च। मध्याह्नव्याप्त्या निर्णयाभावे तु पूर्वविद्धा ग्राह्या युग्मवाक्यात्। *अत्रोक्तं।

'नभस्ये शुक्लपक्षे तु यदा भवति पञ्चमी।
नद्यादिषु तदा स्नानं कृत्वा नियमेन च॥
विधाय नित्यकर्मादि गत्वा द्वारवतीमृषीन्।

(द्वारवती=अग्निहोत्रशाला धूमनिर्गमनद्वारैर्बहुभिर्युतत्वात्।)

स्नापयेद्विधिवद्भक्त्या पञ्चामृतरसैः शुभैः॥
चन्दनागरुकर्पूरैर्विलिप्य च सुगन्धिभिः।
पूजयेद्विविधैः पुष्पैर्गन्धधूपादिदीपकैः॥
समाच्छाद्य तथा वस्त्रैः सोपवीतैर्यथाविधि।
ततो नैवेद्यसंपन्नमर्घ्यं दद्याच्छुभैः फलैः॥
कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः।
जमदग्निर्वसिष्ठश्च सप्तैते ऋषयः स्मृताः॥
गृह्णन्त्वर्घ्यं मया दत्तं तुष्टा भवत सर्वदा।' इति।
'अकृष्टपृथिवीजातशाकाहारं प्रकल्पयेत्।
शयीत ब्रह्मचर्येण ऋषीन् ध्यात्वा समाहितः॥
अनेन विधिना सप्त वर्षाणि व्रतमाचरेत्॥'

इति च ब्राह्मात्। अत्र ब्राह्मण्यादीनां सर्वासामधिकारः।

'ब्राह्मणी क्षत्रिया वैश्या शूद्रा वाऽपि वरानने'।

इति ब्राह्मात्।

भाद्रशुक्लषष्ठी=सूर्यषष्ठी। सा परयुता, युग्मवाक्यात्।

मिजशाकेन वर्तनम् । एवं सप्तवर्षाणि कृत्वा सप्तकुम्भेषु प्रतिमाः सम्पूज्य परेऽह्नि तत्तन्मन्त्रैरष्टोत्तरशतं तिलाञ्जुहुत्वा सप्त ब्राह्मणान्भोजयेत्' इति निर्णयामृते ॥

भाद्रशुक्लषष्ठी=सूर्यषष्ठी । सा सप्तमीयुतेति दिवोदासः ।

'शुक्ले भाद्रपदे षष्ठ्यां स्नानं भास्करपूजनम् ।
प्राशनं पञ्चगव्यस्य अश्वमेधफलाधिकम् ॥'

इति वचनात् । कल्पतरौ भविष्ये—

'येयं भाद्रपदे मासि षष्ठी स्याद्भरतर्षभ ।

'शुक्ले भाद्रपदे षष्ठ्यां स्नानं भास्करपूजनम् ।
प्राशनं पञ्चगव्यस्य अश्वमेधशताधिकम् ॥'

भविष्ये—

'येयं भाद्रपदे मासि षष्ठी स्याद्भरतर्षभ ।
योऽस्यां पश्यति गाङ्गेयं दक्षिणापथवासिनम् ॥
ब्रह्महत्यादिपापैस्तु मुच्यते नात्र संशयः ।'

गाङ्गेयं=स्वामिकार्तिकम् ।

इयमेव भौमवारे विशाखावैधृतियोगे चम्पाषष्ठी । तदुक्तं स्कान्दे—

'षष्ठी भाद्रपदे शुक्ला वैधृतेन समन्विता ।
विशाखाभौमवाराभ्यां सा चम्पेतीह कीर्तिता ॥
पञ्चम्यामेकभक्ताशी चम्पाषष्ठ्यामुपोषितः ।
रथे दलद्वादशके पूजयेत्सूर्यदेवताम् ॥
आदित्यस्तपनः पूषा भानुमान् भानुरर्यमा ।
विश्वचक्रोंऽशुमान् देवः सहस्रांशुर्विनायकः ॥
सूरः सूर्यः खगः कर्ण्यामादित्यः प्राग् दलादिषु ।
तपनादींश्च संपूज्य सप्तम्यां जुहुयात्तिलान् ॥' इति ।

देव इति विशेषणम् । रोगनिवृत्त्यर्थमिदं व्रतमिति प्रतीमः ।

गोऽष्टम्यां पक्षयांति गाङ्गेयं दक्षिणापथवासिनम् ॥
ब्रह्महत्यादिपापैस्तु मुच्यते नात्र संशयः ॥'
गाङ्गेयः=स्वामिकार्तिकेयः ॥

भाद्रपदशुक्लसप्तम्यां मुक्ताभरणव्रतम्। तत्र सप्तमी पूर्वयुता ग्राह्या। 'षण्मुन्योः' इति युग्मवाक्यात्।

भाद्रपदशुक्लाष्टमी=दूर्वाष्टमी। सा पूर्वा ग्राह्या।
'श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी॥
*पूर्वविद्धा तु कर्तव्या शिवरात्रिर्बलेर्दिनम्॥'
इति हेमाद्रौ बृहद्यमोक्तेः।

'शुक्लाष्टमी तिथिर्या तु मासि भाद्रपदे भवेत्।
दूर्वाष्टमी तु सा ज्ञेया नोत्तरा सा विधीयते॥'
इति पुराणसमुच्चयाच्च। *यत्तु

'मुहूर्ते रौहिणेऽष्टम्यां पूर्वा वा यदि वा परा।
दूर्वाष्टमी तु सा कार्या ज्येष्ठा मूलं च वर्जयेत्॥'
इति मदनरत्ने उक्तम्, तत् पूर्वदिने* ज्येष्ठादियोगे द्रष्टव्यम्।

'दूर्वाष्टमी सदा त्याज्या ज्येष्ठामूलर्क्षसंयुता।'

---

*पूर्वेति। 'शुक्लपक्षेऽष्टमी चैव' इत्यस्यापवादः। हुताशनी-होलिका, बलिदिनमिति बलेः राज्यमस्तीति यस्मिन्नद्दिने। दूर्वाव्रते भाद्रशुक्लाष्टमी पूर्वा ग्राह्येत्युक्तं तत्र। भाद्रशुक्लाष्टमी ज्येष्ठामूलशून्यरौहिणमुहूर्तव्यापिनी ग्राह्येति दर्शयति- *यत्तु मुहूर्ते इति। निर्बन्धन-कृतस्तु दूर्वाव्रतं ज्येष्ठामूलयोगरहितायां तिथौ सूर्येऽगस्त्येऽनुदिते मध्याह्नव्यापिन्यां कार्यमित्याहुः। *पूर्वदिने इति। रौहिणे मुहूर्ते इति शेषः। यत्र दिनद्वये रौहिणे मुहूर्तेऽष्टमी पूर्वदिने च ज्येष्ठादियोगस्तत्रेति भावः। दिनद्वये रौहिणे ज्येष्ठादि-योगे पूर्वैव 'श्रावणी दुर्गनवमी' इति वचनात्। एवं परदिने

तथा—

'ऐन्द्रर्क्षे पूजिता दूर्वा हन्त्यपत्यानि नान्यथा ।
भर्तुरायुर्हरा मूले तस्मात्तां परिवर्जयेत् ॥'

इति तत्रैव तन्निषेधात् । इदमगस्त्योदये कन्यार्के च न कार्यम् ।

'शुक्ले भाद्रपदे मासि दूर्वासंज्ञा तथाऽष्टमी ।
सिंहार्क एव कर्तव्या न कन्यार्के कदाचन ॥
सिंहस्थे सोत्तमा सूर्येऽनुदिते मुनिसत्तम ॥'

कर्मकालस्पर्शाभावे ज्येष्ठादियोगेऽपि पूर्वैव । कर्मकालशास्त्रादिति भावः । 'कन्यार्के च'इति निषेधो व्यर्थः । "न कन्यार्के कदाचन'इति तु 'नान्तरिक्षे न दिवि'इतिवत् । यथा कन्यार्के न कदाचन तथा सिंहार्केऽपि अगस्त्योदयानन्तरं नेति वाऽर्थः । लौगाक्षिस्त्वन्यत्राप्याह—

'उद्यानिकाशिवपवित्रकमेघपूजा-
दूर्वाष्टमीव्रतविरूढकजागराणि ।
स्त्रीणां व्रतानि निखिलान्यपि वार्षिकाणि
कुर्यादगस्त्य उदिते न शुभानि लिप्सुः ॥'इति ।

अस्यार्थः—उद्यानिका=उद्याने स्वेष्टदेवतापूजादि, तत्प्रीत्यर्थं ब्राह्मणभोजनादिरूपव्रतविशेषः । शिवपवित्रकम्=आषाढ-श्रावण-भाद्रपदान्यतमचतुर्दशीविहितं शिवपवित्रारोपणम् । मेघपूजा=व्रतविशेषः । दूर्वाष्टमी=भाद्रशुक्लाष्टमी । व्रतविरूढकं=भाद्रशुक्लचतुर्दशीविहितं पालीसंज्ञं कदलीव्रतम् । जागरम्=आश्विनपूर्णिमाविहितं कोजागरम् , कार्तिकशुक्लचतुर्दशीविहितं जागरं वा । अत्रोभयत्रापि अगस्त्योदयस्यावश्यतया विध्यनवकाशापत्तेर्विकल्पः । वार्षिकाणि=वर्षासु भवन्ति, न तु वर्षासु भवानि इति । शरदादिग्रीष्मान्तमगस्त्योदयानुवृत्तेस्तत्र स्त्रीव्रतानामनारम्भापत्तेर्विध्यन-

इति मदनरत्ने स्कान्दोक्तेः ।

'अगस्त्ये उदिते नात्र पूजयेद्दूर्वोद्भवाम् ।
वैधव्यं पुत्रशोकं च दश वर्षाणि पञ्च च ॥'

इति तत्रैव दोषोक्तेश्च । *भाद्रपदशुक्लाष्टम्यामगस्त्योदये भाविनि सति पूर्वकृष्णाष्टम्यामेव कुर्यादिति हेमाद्रिः । दीपिकाऽप्येवम् । इदं च व्रतं *स्त्रीणां नित्यम् ।

'या न पूजयते दूर्वां मोहादिह यथाविधि ।
त्रीणि जन्मानि वैधव्यं लभते नात्र संशयः ॥
तस्मात्संपूजनीया सा प्रतिवर्षं वधूजनैः ॥'

इति पुराणसमुच्चयात् । यदा ज्येष्ठादिकं विनाऽष्टमी न लभ्यते तदा तत्रैवोक्तम्

'कर्तव्या चैकभक्तेन ज्येष्ठा मूलं यदा भवेत् ।
दूर्वामभ्यर्चयेद्भक्त्या न वन्ध्यं दिवसं नयेत् ॥' इति ।

अत्र विधिर्मदनरत्ने भविष्ये—

'शुभे देशे प्रजातानां दूर्वाणां ब्राह्मणोत्तम ।

वकाशनिबन्धनाष्टांशोपग्रस्तांशकल्पापत्तेर्वा वर्षाकालीनानामेव निषेधौचित्यादिति । कदा चेयं भाद्रकृष्णाष्टमी ग्राह्येत्यत आह—*भाद्रेति । *स्त्रीणामिति । स्त्रीणामेवाधिकार इति मयूखः । ज्येष्ठामूलग्रहणं निषिद्धकालमात्रोपलक्षणम् । तत्राप्यपेक्षासत्त्वात् । अत्र निषिद्धयोगाभावे स्त्रीभिः स्वयमेव पूजां कृत्वाऽनग्निपक्वादिभक्षणं कार्यम् । तद्योगे तु पूजा ब्राह्मणेन कार्या स्वयं त्वेकभक्तं कार्यमिति यस्मिन् कस्मिन् दिने यस्यां कस्यां चित्पूर्वस्यां परस्यां वाऽष्टम्याम् ।

'कन्यास्थार्केऽष्टमी शुक्ला ज्येष्ठर्क्षे महती स्मृता ।
अलक्ष्मीपरिहाराय ज्येष्ठां तत्र प्रपूजयेत् ॥'

इति वाक्यात् । अत्र कन्यार्कयोगः स्तावकः 'मासि भाद्रपदे' इति

स्थाप्य लिङ्गं ततो गन्धैः पुष्पैर्धूपैः समर्चयेत् ॥
दध्यक्षतैर्द्विजश्रेष्ठ अर्घ्यं दद्यात्त्रिलोचने ।
दूर्वाशमीभ्यां विधिवत्पूजयेच्छ्रद्धयाऽन्वितः ॥'

मन्त्रस्तु—

'त्वं दूर्वेऽमृतजन्मासि वन्दितासि सुरासुरैः ।
सौभाग्यं सन्ततिं देहि सर्वकार्यकरी भव ॥
यथा शाखाप्रशाखाभिर्विस्तृताऽसि महीतले ।
तथा ममापि सन्तानं देहि त्वमजरामरम् ॥' इति ।

अत्रानग्निपक्वं भक्षयेत् ।

'अनग्निपक्वमश्नीयाद्दन्नं दधि फलं तथा ।
अक्षारलवणं ब्रह्मन्नश्नीयान्मधुनाऽन्वितम् ॥'

इति तत्रैव भविष्योक्तेः । भाद्रपदेऽधिमासे सति निर्णयदीपे स्कान्दे—

'अधिमासे तु सम्प्राप्ते नभस्य उदये मुने ।
अर्वाग्दूर्वाव्रतं कार्यं परतो नैव कुर्याचन ॥'

अत्रैव ज्येष्ठापूजोक्ता माधवीये स्कान्दे—

'मासि भाद्रपदे शुक्लपक्षे ज्येष्ठर्क्षसंयुता ।
रात्रिर्यस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपूजनम् ॥' इति ।

इयं ज्येष्ठायोगवशेन पूर्वा परा वा ग्राह्या । *दिनद्वययोगे परा* । पूर्वेऽह्नि रात्रियोगे पूर्वैव* ।

'नवम्या सह कार्या स्यादष्टमी नात्र संशयः ।
मासि भाद्रपदे शुक्लपक्षे ज्येष्ठर्क्षसंयुता ।
रात्रिर्यस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपूजनम् ।'

चान्द्रभाद्रपदग्रहणात् । *दिनद्वयेति दिवाद्वयस्पर्शोपलक्षणम् । *परेति । अत्र प्रमाणं नवम्या सहेति । *पूर्वैवेति । अत्र

इति मन्त्रैवोक्तेः। *अस्यापवादः—

'यस्मिन्दिने भवेज्ज्येष्ठा मध्याह्नादूर्ध्वमप्यणुः।

तस्मिन्हविष्यं पूजा च न्यूना चेत्पूर्ववासरे॥' इति।

*इदं केवलतिथौ नक्षत्रे चोक्तम्। तत्राद्यं केवल-तिथौ कार्यम्। अन्त्यं केवलर्क्षे। तदुक्तं मात्स्ये-

'प्रत्याब्दिकं तिथावुक्तं यज्ज्येष्ठादेवतव्रतम्।

प्रतिज्येष्ठाव्रतं यच्च विहितं केवलेऽहनि॥

तिथावेवाचरेदाद्यं द्वितीयं केवलर्क्षतः॥' इति।

अत एव मदनरत्ने भविष्ये नक्षत्रमात्रे उक्तम्-

'मासि भाद्रपदे पक्षे शुक्ले *ज्येष्ठा यदा भवेत्।

रात्रौ जागरणं कृत्वा एवं भक्त्या प्रपूजयेत्॥' इति।

दाक्षिणात्यास्त्विदृक्ष एव कुर्वन्ति। हेमाद्रौ स्कान्देऽपि-

'मासि भाद्रपदे शुक्लपक्षे ज्येष्ठर्क्षसंयुते।

यस्मिन्कस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपूजनम्॥' इति।

प्रमाणं रात्रीति। सामान्यवाक्यापवादः। *अस्य=रात्रियोगस्य।

'तत्राष्टम्यां यदा वारो भानोर्ज्येष्ठर्क्षमेव च।

नीलज्येष्ठेति सा प्रोक्ता दुर्लभा बहुकालिकी॥'

इति तु स्तावकम्। एतच्च तिथिसापेक्षमेव व्रतं ज्येष्ठादिवशेन पूर्वं परं वा भवतीति माधवः। स्वसम्मतं मतमाह—*इदमिति। *ज्येष्ठा यदेति। अष्टमीसम्बन्धव्युदासः। एवम्—

'मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठर्क्षसंयुते।

यस्मिन्कस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपूजनम्॥' इति।

'कृतस्नानो नरः कुर्यात्तस्यामन्यत्र वा दिने।

भक्तियुक्तः शुचिर्भूत्वा ज्येष्ठायाः परिपूजनम्॥'

इति च। अत्र नाष्टमीसंबन्धः। नक्षत्रमात्रापेक्षे 'यस्मिन् कस्मिन् दिने' 'तस्यामन्यत्र वा दिने' इत्यस्य यस्यां कस्यां चित्तिथावित्य-

तथा—

'*मैत्रेणावाहयेद्देवीं ज्येष्ठायां तु प्रपूजयेत्।
मूले विसर्जयेद्देवीं त्रिदिनं व्रतमुत्तमम् ॥' इति।

मन्त्रस्तु—

'एह्येहि त्वं महाभागे सुरासुरनमस्कृते।
ज्येष्ठे त्वं सर्वदेवानां मत्समीपगता भव॥
(इत्यावाह्य 'तामग्निवर्णाम्' इति संपूज्य)
ज्येष्ठायै ते नमस्तुभ्यं श्रेष्ठायै ते नमो नमः॥
शर्वायै ते नमस्तुभ्यं शांकर्यै ते नमो नमः।
ज्येष्ठे श्रेष्ठे तपोनिष्ठे ब्रह्मिष्ठे सत्यवादिनि॥
एह्येहि त्वं महाभागे अर्घ्यं गृह्ण सरस्वति॥'

इत्यर्घ्यः॥

भाद्रपदशुक्लद्वादश्यां श्रवणयोगरहितायां पारणं कुर्यात्। 'आभाकासितपक्षेषु' इति दिवोदासोदाहृतवचनात्।

'उपोष्यैकादशीं मोहात्पारणं श्रवणे यदि।

र्थात्। तत्र नक्षत्रस्य खण्डत्वेऽष्टमीभानुवारयुक् तदन्यतरयुग्वा नक्षत्रं ग्राह्यम्।

"तत्राष्टम्यां यदा वारो भानोर्ज्येष्ठर्क्षमेव च।
नीलज्येष्ठेति सा प्रोक्ता दुर्लभा बहुकालिकी॥"

इति स्कान्दात्। नीलज्येष्ठेति नक्षत्रनामैव। न च 'नीलज्येष्ठेति सा' इति गुणभूताष्टमीपरामर्शः, तस्या एवाधेयव्याप्यत्वेन प्राधान्यात्सा वैश्वदेवीतिवदिति वाच्यम्। तत्र देवताऽन्वयद्वारैव प्राधान्यं न त्विह तथेति वैषम्यात्। अन्यतरयोगस्याप्यभावे मध्याह्नादूर्ध्वमनुवर्तमानं ग्राह्यम्। "यस्मिन्दिने भवेत् ज्येष्ठा" इति वचनादिति।

*मैत्रेणेति। निर्णीतपूजादिनात् पूर्वेद्युरनुराधायामावाहनमुत्तरे-

करोति हन्ति तत्पुण्यं द्वादशद्वादशीभवम् ॥'

इति तत्रैव स्कान्दाच्च । अस्य तत्रैव प्रतिप्रसवः । मार्कण्डेयः—

'विशेषेण महीपाल श्रवणं वर्धते यदि ।
*तिथिक्षये न भोक्तव्यं *द्वादशीं लङ्घयेन्न हि ॥' इति ।

*केचित्तु—

'यदा त्वपरिहार्यो योगस्तदा श्रवणनक्षत्रे त्रेधाविभक्ते मध्यमांशस्थितघटिकायोगं त्यक्त्वा पारणं कार्यम् । तदुक्तं *विष्णुधर्मे—

श्रुतेश्च मध्ये परिवर्तमेति
सुप्तिप्रबोधपरिवर्तनमेव वर्ज्यम् । इति ।

केचित्तत्तुर्धा विभज्य मध्यपादद्वयं वर्ज्यमाहुः । अत्र मूलं चिन्त्यम् ॥

अत्रैव विष्णुपरिवर्तनोत्सवं कुर्यात् । सन्ध्यायां विष्णुं सम्पूज्य प्रार्थयेत् । मन्त्रस्तु तिथितत्त्वे उक्तः—

'ॐ वासुदेव जगन्नाथ प्राप्तेयं द्वादशी तव ।
पार्श्वेन परिवर्तस्व सुखं स्वपिहि माधव ॥' इति ।

अत्रैव शक्रध्वजोत्थापनमुक्तमपरार्के गर्गेण—

'द्वादश्यां तु सिते पक्षे मासि प्रौष्ठपदे तथा ।
शक्रमुत्थापयेद्राजा विश्वश्रवणवासवे ॥'

पुष्य मूले विसर्जनमित्यर्थः ।

*तिथिक्षये=एकादशीक्षये । अत्र हेतुमाह—

*द्वादशीमिति । विवेचनमतमाह—*केचित्त्विति । वस्तुत 'आभाकामित'इति 'मैत्राद्यपादे स्वपितीह'इति च निर्मूलम् । तदाऽप्युपोष्यैकादशीमित्यादि बोध्यम् । *विष्णुधर्मेति । "श्रुतेश्च मध्ये परिवर्तमेति"इति "सन्ध्यायां परिवर्तनम्"इति चोक्तेः ।

इयमेव श्रवणद्वादशी* । तत्रैकादश्यां*द्वादशीश्रवणयोगे सैवोपोष्या ।

'एकादशी द्वादशी च वैष्णव्यमपि तत्र चेत् ।

तद्विष्णुशृङ्खलं नाम विष्णुसायुज्यकृद्भवेत् ॥'

इति विष्णुधर्मोक्तेः । नारदीयेऽपि—

'संस्पृश्यैकादशीं राजन्द्वादशीं यदि संस्पृशेत् ।

श्रवणं ज्योतिषां श्रेष्ठं ब्रह्महत्यां व्यपोहति ॥

द्वादशी श्रवणस्पृष्टा स्पृशेदेकादशीं यदि ।

स एव वैष्णवो योगो विष्णुशृङ्खलसञ्ज्ञितः* ॥'

इति हेमाद्रौ मात्स्योक्तेश्च । *दिनद्वये द्वादशीश्रवणयोगेऽपि पूर्वा । निर्णयामृते त्वस्य पूर्वार्धमन्यथा पठितम्-

'द्वादशी श्रवणर्क्षं च स्पृशेदेकादशीं यदि ।' इति ।

तेन हेमाद्रिमते एकादश्याः श्रवणयोगाभावेऽपि तद्युक्तद्वादशीयोगमात्रेण विष्णुशृङ्खलं भवति । निर्णया-

---

*श्रवणद्वादशीति । अस्यां चाल्पश्रवणयोगेऽपि तन्निमित्तमुपवासादि कार्यम् ।

'द्वादशी श्रवणस्पृष्टा कृत्स्ना पुण्यतमा तिथिः' ।

इति मात्स्यात् । तत्र एकस्मिन्नेव दिने श्रवणयोगवती शुद्धाधिका विद्धाधिका वा, तत्र न सन्देहः । *एकादश्यामित्यादि योगे इत्यन्तम् । एकादशीदिन एव एकादशीद्वादश्योरुभयोः श्रवणयोगे इत्यर्थः । *संज्ञित इति ।

'उपोष्य तस्मिन्नहनि नरः संक्षीणकिल्बिषः ।

प्राप्नोत्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्लभाम् ॥' इति,

तत्र एकादशीद्वादशीप्रयुक्तोपवासद्वयं तन्त्रेण भवति । *दिनद्वय एवेति । विद्धाधिकाया दिनद्वये श्रवणयोगे एकादशीयुता ग्राह्येत्यर्थः । 'द्वादशी श्रवणस्पृष्टा'इत्युक्तेरिति भावः । अत्रो-

मूलमतें* तु 'श्रवणस्यैकादशीद्वादशीभ्यां योग एव विष्णुशृङ्खलं नान्यथेति । *यदा निशीथानन्तरं सूर्योदयावधि त्रिकलामात्रमपि श्रवणर्क्षं भवति तदाऽपि पूर्वैव । तदुक्तं तत्रैव नारदीये इमां प्रकृत्य—

'तिथिनक्षत्रयोर्योगो*योगश्चैव नराधिप ।

त्रिकलो यदि लभ्येत स ज्ञेयो ह्यष्टयामिकः ॥' इति ।

योगः शिवरात्र्यादौ शिवयोग आदिः ।

*'द्वादशी श्रवणस्पृष्टा कृत्स्ना पुण्यतमा तिथिः ।

*न तु सा तेन संयुक्ता तावत्येव प्रशस्यते ॥'

इति मदनरत्ने मात्स्याच्च । दिवोदासीये तु—

'रात्रेः प्रथमयामे चेच्छ्रवणं हरिवासरे ।

तदा पूर्वामुपवसेत्प्रातर्भान्ते च पारणम् ॥'

इत्युक्तम् । इदं तु निर्मूलत्वात्पूर्ववचोविरोधाच्चोपेक्ष्यम् । इयं बुधवारेऽतिप्रशस्ता ।

'बुधश्रवणसंयुक्ता सैव चेद्द्वादशी भवेत् ।

अत्यन्तमहती सा स्याद्दत्तं भवति चाक्षयम् ॥'

इति हेमाद्रौ स्कान्दात् । यत्तु पठन्ति—

अथात्र तन्त्रेणैकादशीद्वादशीप्रयुक्तमुपवासद्वयं वक्ष्यति । *मते इत्यन्ति । तुनाऽरुचिः । सकलधार्मिकग्रन्थपाठपरित्यागात् । शुद्धाधिकामधिकृत्याह *यदा निशीथेति । *योगश्चेति । शिवयोगादेः=शिवचतुर्दश्यादेः पुण्यतमत्वप्रयोजको योगश्चेत्यर्थः । अत्र यथा व्यतीपातादियोगा दानादिविषयस्तथाऽयमपि, उपवासे तु अन्ततः उदयास्तमयान्तत्वमपेक्षितमहोरात्रसाध्यत्वानुरोधादित्यभिप्रायेणाह—*द्वादशीति । *न त्विति ।

'यावती तेन संयुक्ता तावत्येव प्रशस्यते' ।

इति तु न । तेन तावत्यां यत्कर्तुं शक्यं स्नानादि तद्योगका-

*'उत्तराषाढसंयुक्ता श्रोणामध्याह्नगाऽपि वा ।
आसुरी मैत्र तारा स्याद्धन्ति पुण्यं पुराकृतम् ॥
उदयव्यापिनी ग्राह्या श्रोणा द्वादशिकायुता ।
विश्वर्क्षसंयुता सा च नैवोपोष्या शुभेप्सुभिः ॥'

इत्यादीनि विष्णुधर्मस्कान्दभविष्यादिवचनानि तानि निर्मूलानि । यदपि स्मृत्यर्थसारे 'उदयव्यापिनी ग्राह्या' इत्युक्तम्, यच्च बृहन्नारदीये–

'उदयव्यापिनी ग्राह्या श्रवणद्वादशी व्रते ।' इति,

तद्यदा शुद्धाधिका द्वादशी परदिन एवोदये श्रवणयोगः, पूर्वेद्युश्च तद्भिन्ने काले योगस्तत्परम् । दिनद्वये उदययोगे पूर्वैव बहुकर्मकालव्याप्तेरित्युक्तं मदनरत्ने । यदा त्वेकादश्येव श्रवणयुता न द्वादशी तदापि पूर्वैव । श्रवणद्वादशीव्रतं तु द्वादश्याः श्रवणयुक्ताया अलाभे एकादश्याश्च तद्युक्ताया लाभे तत्रैव कार्यम् ।

*'यदा न प्राप्यते ऋक्षं द्वादश्यां वैष्णवं क्वचित् ।
एकादशी तदोपोष्या पापघ्नी श्रवणान्विता ॥'

इति मदनरत्ने नारदीयोक्तेः । यदा परैवर्क्षयुता तदा परा । तत्र शक्तेनोपवासद्वयं कार्यम् ।

'एकादशीमुपोष्यैव द्वादशीं समुपोषयेत् ।

लिङ्गं तदेव स्यात् । इह तु श्रवणसंबन्धेन पूर्वोत्तरयोरपि काल-त्वादुपवासादि सुकरमित्यर्थः । *उत्तराषाढेति । उक्तस्थले पूर्वेत्युक्तमसङ्गतम्, उत्तराया औचित्यादित्यभिमानः । *यदा नेति । श्रवणद्वादशीप्रयुक्तमुपवासादि सर्वमप्येकादश्यां कार्यमित्यर्थः । विद्धाधिकाया अपि परदिने श्रवणयोगाभावे श्रवणयोगवती विद्धाऽपि ग्राह्या(१) ।

---

(१) 'ग्राह्या' इति कपुस्तके पाठः ।

न्याहुः । *भुक्त्वेति फलाद्याहारपरं न त्वन्नपरम् 'अन्ना-श्रितानि पापानि' इति निषेधात् ।

'उपवासद्वयं कर्तुं न शक्नोति नरो यदि ।
प्रथमेऽह्नि फलाहारी निराहारोऽपरेऽहनि ॥'

इति दिवोदासीये भविष्योक्तेश्च । *अशक्तौ तु *गृहीतैकादशीव्रतो यस्तं प्रति उक्तं मात्स्ये—

'द्वादश्यां शुक्लपक्षे तु नक्षत्रं श्रवणं यदि ।
उपोष्यैकादशीं तत्र द्वादश्यां *पूजयेद्धरिम् ॥' इति ।

पूजयेन्न *तूपवसेदित्यर्थः । *अगृहीतैकादशीव्रतश्चे-देकादश्यां भुक्त्वा द्वादश्यामुपवसेत् ।

*'एवमेकादशीं भुक्त्वा द्वादशीं समुपोषयेत् ।
पूर्ववासरजं पुण्यं सर्वं प्राप्नोत्यसंशयम् ॥'

दशीश्रवणोपवासयोरुपक्रम एव न सम्भवतीत्याशयेन एतद्विशे-ति । श्रवणद्वादशीव्रतपर्वत्वेनकारादरुचिः । एकादश्यां नरो भुक्त्वे-त्यस्याशक्तौ गौणमुख्योपवासाभ्यामुपवासद्वयमर्थ इत्याह—*भु-क्त्वेति । *अशक्तौ=गौणमुख्योपवासद्वयेऽप्यशक्तौ । *गृही-तैकादशीव्रतः=कृतैकादशीव्रतसंकल्पः । *पूजयेदिति । सं-कल्पितमेकादश्युपवासं विधाय श्रवणद्वादशीप्रयुक्तं विष्णुपूजादि कुर्यादित्यर्थः । तेन एकादश्युपवासहानौ संकल्पबाधापत्तिः । विष्णुपूजादेरकरणे शेषविरोधश्च समाहितः । ननूपवासाङ्गहरि-पूजायाः प्राप्तत्वादेव तद्विधिर्व्यर्थ इत्यत आह—* नतूपवसेदिति । पूजयेदिति सावधारणमिति भावः । *अगृहीतेति । प्रागेवोप-वासद्वयासामर्थ्यादसंकल्पितेत्यर्थः । उपक्रान्तश्रवणद्वादशीव्रतप्र-योगे इति शेषः । यद्यप्यत्र काम्यं नित्यस्य बाधकमिति न्यायेन एकादश्युपवासत्यागे दोषो नास्तीति सिद्धमेव तथापि तं स्पष्टी-कर्तुमाह—*एवमिति । एतच्च मयूखे न दृश्यते । उभयान्त इति

इति नारदीयोक्तेः । पारणं तु भयान्तेऽन्यतरान्ते वा कुर्यात् ।

'तिथिनक्षत्रनियमे तिथिभान्ते च पारणम् ।'

इति स्कान्दात् ।

'तिथिनक्षत्रसंयोगे उपवासो यदा भवेत् ।
पारणं तु न कर्तव्यं यावन्नैकस्य संक्षयः ॥'

इति नारदीयादिति हेमाद्रिः । यत्त्वत्र नक्षत्रमात्रान्तेऽपि पारणं प्रतिभाति, तथापि तिथिमात्रान्ते ज्ञेयम्, न त्वृक्षान्ते । तिथिभसंयोगेऽपि—

'याः काश्चित्तिथयः प्रोक्ताः पुण्या नक्षत्रयोगतः ।
ऋक्षान्ते पारणं कुर्याद्विना श्रवणरोहिणीम् ॥'

इति विष्णुधर्मे श्रवणारोहिण्योः पारणनिषेधात् । रोहिण्यां तु 'भान्ते कुर्यात्तिथेर्वापि' इति ब्रह्मपुराणात् तदन्तेऽप्यस्तु, न त्वत्रैवमस्तीति न ऋक्षान्तोऽनुकल्प इति । मदनरत्ने अशक्तौ तु—

'तिथ्यन्ते तिथिभान्ते वा पारणं यत्र चोदितम् ।
यामत्रयोर्ध्ववर्तिन्यां प्रातरेव हि पारणा ॥'

इति ज्ञेयम् । यत्तु मदनरत्ने—'द्वादशीवृद्धौ श्रवणवृद्धौ वा श्रवणान्त एव पारणं कुर्यात् ।

'पारणं तिथिवृद्धौ तु द्वादश्यामृक्षसंक्षयात् ।
वृद्धौ कुर्यात्त्रयोदश्यां तत्र दोषो न विद्यते ॥'

इति वह्निपुराणादित्युक्तम् । तत्प्रकरणादेतस्यामेव

मुख्यः कल्पः । यत्तु पारणादिने तिथ्यल्पतया ऋक्षस्याधिक्ये ति-थ्यन्ते पारणे कृते द्वादश्यामनिष्पत्त्या एकादश्युपवासासिद्धिरत-स्तत्र द्वादशीमध्य एव पारणं कार्यम् । तन्त्रिप्रसक्तिनोर्विरोधे त-न्त्रिणो बलीयस्त्वात् । दिनत्रयसाध्यमेकादशीव्रतं हि तन्त्रि, तत्प-

श्रवणयुक्तैकादश्यां *विहितेति विजयैकादशीव्रतपरं *न तु श्रवणद्वादशीपरमिति मदनरत्ने। गौडास्तु श्रवणद्वादशीपरमाहुः। अत्र विधिर्मदनरत्ने विष्णुधर्मे—

*'तस्मिन्दिने तथा स्नानं यत्र क्वचन संगमे।'

त्रिमध्यपातिश्रवणद्वादशीव्रतं तु प्रासाङ्गिक पशुपुरोडाशवदिति, तत्तु च्छम्। न्यायादपि वचनप्राबल्यात्। मदनरत्ने इत्यरुचिः। सा च विना श्रवणरोहिणीमिति पर्युदासः रोहिणीनिमित्तके इव श्रवणनिमित्तकेऽप्युपवासे उभयान्तपक्षस्य मुख्यत्वार्थः। एवं चोभयत्राप्यन्यतरपक्षो गौण इति सिद्ध्यति। अन्यथा रोहिण्यामृक्षान्तपारणस्य सर्वथा निषेद्धुमशक्यतया वैरूप्यापत्तेरिति। अत्रासम्भवे तु—

'तिथ्यन्ते तिथिभान्ते वा पारणं यत्र नोदितम्।
यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणम्।'

इति पाठं कल्पयन्ति केचित्। उभुद्धाविति पाठः। वृद्धौ कुर्यादिति पाठे वृद्धावुभयवृद्धावित्येवार्थः। *विहितेति। 'एकादशी यदा सा स्यात्' इत्यग्रिमवचनात्। *नास्तीति। तत्र तिथ्यन्तपक्षस्यापि सत्त्वात्। वस्तुतस्तु विजयैकादशीव्रतं भिन्नमिति प्रमादात् 'द्वादश्यास्ते विधिः' इत्यादिना पूजाप्रकारभेदस्य एषा व्युष्टिः इत्यादिना तत्प्रयुक्तफलभेदस्यैव चाभिधानात्। तस्मात् पारणातिथिवृद्धावित्येतद्विष्णुशृङ्खलं पारणापरमिति। *तस्मिन्निति। भविष्ये—

'मासि भाद्रपदे शुक्लद्वादशी श्रवणान्विता।
सर्वकामप्रदा पुण्या उपवासो महाफलः॥
श्रवणे सङ्गमाः सर्वे परव्युष्टिप्रदाः स्मृताः।
विशेषा द्वादशीयुक्ते बुधयुक्ते विशेषतः॥
सङ्गमे सरितां स्नात्वा द्वादशीं समुपोषितः।
समग्रं समवाप्नोति द्वादशद्वादशीफलम्॥'

तथा—

'दध्योदनयुतं तस्यां जलपूर्णं घटं द्विजे ।
वस्त्रसंवेष्टितं दत्त्वा छत्रोपानद्युगेन च ॥
न दुर्गतिमवाप्नोति गतिमग्र्यां च विन्दति ।'

मन्त्रस्तु भविष्ये घटे जनार्दनपूजाभिधाने–

'नमो नमस्ते गोविन्द बुधश्रवणसंज्ञक ।
अघौघसंक्षयं कृत्वा सर्वसौख्यप्रदो भव ॥
प्रीयतां देवदेवेशो मम संतापनाशनः ॥' इति ॥

वामनावतारनिमित्तायास्तु प्रशंसा हेमाद्रौ भविष्ये

'द्वादश्याख्ये तिथिः प्रोक्तः श्रवणेन युधिष्ठिर ।
सर्वपापप्रशमनः सर्वसौख्यप्रदायकः ॥
एकादशी यदा सा स्याच्छ्रवणेन समन्विता ।
विजया सा तिथिः प्रोक्ता भक्तानां विजयप्रदा ॥'

इत्युपक्रम्य—

'अथ काले बहुतिथे गते सा गुर्विणी सती ;
सुषुवे नवमे मासि पुत्रं सा वामनं हरिम् ॥'

इत्युक्त्वा

'एतत्सर्वं समभवद्द्वादश्यां युधिष्ठिर ।

वरुणासङ्गमे स्नानमुक्तं लैङ्गे—

'अतः परं तु संसर्प्य गङ्गावरुणसङ्गमम् ।' इति ।

भविष्ये—

'सवत्सां तुल्यवर्णां च शालिनीं गां पयस्विनीम् ।
चन्दनादिभिरालिप्य पुष्पमालाभिरर्चयेत् ॥
अर्घ्यं ताम्रमये पात्रे कृत्वा पुष्पाक्षतैस्तिलैः ।
पादमूले तु दद्याद्वै मन्त्रेणानेन पाण्डव ॥
क्षीरोदार्णवसम्भूते सुरासुरनमस्कृते ।

तेनेष्टा देवदेवस्य सर्वथा विजया तिथिः ॥
एषा व्युष्टिः समाख्याता एकादश्यां मया तव ।
पूर्वमेव समाख्याता द्वादशी श्रवणान्विता ॥'
इत्युपसंहारादेकादश्यामेव* । व्युष्टिः फलम् । भागवतेऽष्टमस्कन्धे तु द्वादश्यां वामनोत्पत्तिरुक्ता—
'श्रोणायां श्रवणद्वादश्यां मुहूर्तेऽभिजिति प्रभुः ।
ग्रहनक्षत्रताराद्याश्चक्रुस्तज्जन्मदक्षिणम् ॥
द्वादश्यां सवितातिष्ठन्मध्यंदिनगतो नृप ।
विजया नाम सा प्रोक्ता यस्यां जन्म विदुर्हरेः ॥
श्रोणायां चन्द्रे. अभिजित्=श्रवणप्रथमोंऽशः । गौडा अप्येवम् । अत्र कल्पभेदाद्व्यवस्था । तद्विधिश्च हेमाद्रौ वाह्निपुराणे—
'नदीनां सङ्गमे स्नात्वा गत्वाऽर्चयेदत्र वामनम् ।
सौवर्णवस्त्रसंयुक्तं द्वादशाङ्गुलमुच्छ्रितम् ॥'

सर्वदेवमये मातर्गृहाणार्घ्यं नमो नमः ।
ततो माषादिमिसिद्धान वटकान्विनिवेदयेत् ॥
सुरभिस्त्वं जगन्मातर्देवि विष्णुपदे स्थिता ।
सर्वदेवमये ग्रासं मया दत्तमिमं ग्रस ॥'
ततः—
'सर्वदेवमये देवि सर्वदेवैरलंकृते ।
मातर्ममाभिलाषितं सफलं कुरु नन्दिनि ॥'
इति प्रार्थयेत् ।
'तत्रैव तद्दिने तैलस्थालिपक्वं युधिष्ठिर ।
गोक्षीरं गोघृतं चैव दधि तक्रं च वर्जयेत् ॥' इति ।
*एकादश्यामेवेति । श्रवणसाहित्यात् । श्रवणसाहित्यं तु प्राशस्त्यार्थम् । 'भृङ्गारः=कनकालुका ॥'

(ततो विधिवत्संपूज्य)

हिरण्मयेन पात्रेण दद्यादर्घ्यं प्रयत्नतः ।
नमस्ते पद्मनाभाय नमस्ते जलशायिने ॥
तुभ्यमर्घ्यं प्रयच्छामि बालवामनरूपिणे ।
नमः कमलकिञ्जल्कपीतनिर्मलवाससे ॥
महाहवरिपुस्कन्धघृष्टस्कन्धाय चक्रिणे ।
नमः शार्ङ्गासिबाणपाणये वामनाय च ॥
यज्ञभुक्फलदात्रे च वामनाय नमो नमः ।
देवेश्वराय देवाय देवसंभूतिकारिणे ।
प्रभवे सर्वदेवानां वामनाय नमो नमः ॥
एवं संपूज्य तस्या तं द्वादश्यामुदये रवेः ।
शृङ्गारसहितं तं तु ब्राह्मणाय निवेदयेत् ॥
वामनः प्रतिगृह्णाति वामनोऽहं ददामि ते ।
वामनं सर्वतोभद्रं द्विजाय प्रतिपादयेत् ॥' इति ।

अनन्तभट्टोऽप्याह 'श्रवणद्वादश्यां जनार्दननामा विष्णुः पूज्यते । श्रवणैकादश्यां वामनावतारः' इति । श्रवणयुतद्वादश्यभावे तु दशमीविद्धाऽपि श्रवणर्क्षयुता कार्या ।

'दशम्येकादशी यत्र सा नोपोष्या भवेत्तिथिः ।
श्रवणेन तु संयुक्ता सा चेत्स्यात्सर्वकामदा ॥'

इति वह्निपुराणादिभ्युक्तं मदनरत्ने । पूजा च मध्याह्ने कार्या । 'अह्नि मध्ये वामनो रामरामौ' इति पूर्वोक्तवचनात् ॥

अत्रैव दुग्धव्रतं संकल्पयेत् । तदुक्तम्—'दुग्धमाश्व-

---

*दशमीति । विजयैकादशीव्रतस्य विकल्पमत्र परंतु श्रवणयोगाभावे तन्त्रमेव न तु परेऽप्युपवास इति भावः । भागवतात्

युजे मासि' इति । अत्रेदं चिन्त्यते—दुग्धव्रते पायसादि वर्ज्यं न वेति । नेति केचित् । न हि प्रकृतिवर्जने विकारवर्जनं युक्तम् । दधितक्रादीनामपि वर्जनापत्तेः । न च यत्र प्रकृतिरसोपलम्भस्तद्वर्जनमिति वाच्यम् । मांसविकारस्यौष्ट्रदुग्धादेश्चावर्जनापत्तेः । तस्माद्दुग्धादिवत्पायसादि भक्ष्यमिति । अत्र ब्रूमः—यत्र विकारे प्रकृतिरसोपलम्भस्तत्प्रत्यभिज्ञा वा तत्र विकारस्यापि निषेधः । अस्ति च मांसविकारे मांसप्रत्यभिज्ञा मांसत्वानपायात् । यत्तु—औष्ट्रदुग्धादेरनिषेधापत्तिरिति, तन्न । औष्ट्रमिति विकारतद्धितेन निषेधात् । तथा च विज्ञानेश्वरः—

'औष्ट्रमैकशफं स्त्रैणमारण्यकमथाविकम् ।'

इत्यत्र 'औष्ट्रमिति विकारतद्धिताच्छकृन्मूत्रादीनामपि निषेधः' इत्याह । नन्वेवं

'सन्धिन्यनिर्दशावत्सागोपयः परिवर्जयेत् ।'

इति सान्धिन्यादिक्षीरनिषेधेऽपि दध्यादिग्रहणं स्यात् । सत्यं प्राप्तम् । वचनेन परं निषेधः । तदाहापरार्के शङ्खः—

"क्षीराणि यान्यभक्ष्याणि तद्विकाराशने बुधः ।
सप्तरात्रं व्रतं कुर्यात्प्रयत्नेन समाहितः ॥" इति ।

व्रतं=गोमूत्रयावकम् । तस्मात्पायसे दुग्धरसोपलम्भात्तद्वर्जनम् । अत एवाऽऽमिक्षायां दधिसत्त्वेऽपि माधुर्योपलम्भात्पयोरूपत्वमुक्तं मीमांसकैः । तदुक्तम्—

'पय एव घनीभूतमामिक्षेत्यभिधीयते' । इति ।

'मध्यन्दिनगतोऽन्त्यः'इतीत्यादि । अत्रैव शक्रध्वजोत्थापनम् ।

"द्वादश्यां तु सिते पक्षे मासि प्रौष्ठपदेऽपि वा ।
शक्रमुत्थापयेद्राजा विश्वश्रवणवासव ॥"

इति गर्गोक्तेः ।

'दध्यादिषु तु तदभावादवर्जनम्' इति ।

एवं=दध्यादिव्रते न तक्रादीनां निषेधः । उक्तोभय-हेत्वभावादिति कश्चित् । पूर्वोक्तशास्त्रवचनात्सर्वविकार-निषेध इति युक्तं प्रतीमः ॥ इति दुग्धव्रतम् ॥

भाद्रपदशुक्लचतुर्दश्यामनन्तव्रतम् । तत्र *त्रिमुहूर्ता-प्यौदयिकी ग्राह्येति माधवः । तदुक्तम्—

'उदये त्रिमुहूर्तापि ग्राह्याऽनन्तव्रते तिथिः ।' इति ।

*'मध्याह्ने भोज्यवेलायाम्' इति कथायां श्रवणात् 'उपरि हि देवेभ्यो धारयति' इतिवद्विधिकल्पनात् ।

'पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथिः ।'

इति माधवीये वचनात् मध्याह्नव्यापिनी ग्राह्येति तु दिवोदासः । प्रतापमार्तण्डेऽप्येवम् । इदमेव च युक्तम् । निर्णयामृते तु घटिकामात्राऽप्यौदयिक्यभ्युक्ता ।

'तथा भाद्रपदस्यान्ते चतुर्दश्यां द्विजोत्तम ।

पौर्णमास्याः समायोगे व्रतं चानन्तकं चरेत् ॥'

इति भविष्योक्तेः ।

"मुहूर्तमपि चेद्भाद्रे पूर्णिमायां चतुर्दशी ।

सम्पूर्णां तां विदुस्तस्यां पूजयेद्विष्णुमव्ययम् ॥"

इति स्कान्दाच्चेति । *अत्र मूलं चिन्त्यम् । *ग्राह्येप्यौ-

---

*त्रिमुहूर्ताऽपीति । अपिस्त्वर्थः । पूजा तु तत्र मध्याह्न एव । साकल्यवचनापादिततिथिसत्त्वात् । मतान्तर-माह—*मध्याह्न इति । 'उपरि हि'इत्याद्यर्थवादो विधिसा-पेक्ष इति युक्तं तत्र विधिकल्पनम् । प्रकृते च साकल्यवच-नानुगृहीततिथिमादाय पूजोपपत्तेर्न तदित्यरुचिः । *अत्र मूलं चिन्त्यमिति । योगमुहूर्तादिवचनानां त्रिमुहूर्तस्ताव-कत्वेनोपपत्तेः स्वार्थमात्रे मानाभावात् । *ग्राह्येऽप्यौदयिकत्वे

दाविकृत्वे पूर्णत्वात्पूर्वेति युक्तम्। (तत्त्वं तु विध्यर्थवादयोर्भिन्नार्थत्वे एकवाक्यत्वायोगात् 'सन्दिग्धेषु एकवाक्यत्वात्' इति न्यायेन पूर्वा परा वा मध्याह्नव्यापिन्येव मुख्या। माधवस्तु सामान्यवाक्यान्निर्णयं कुर्वन् भ्रान्त एव। अनन्तव्रतस्य पुराणान्तरेष्वभावान्निबन्धान्तरेष्वभावाच्च वचनं निर्मूलमेवेति ॥)

अथागस्त्यार्घ्यः। तत्कालो व्रतहेमाद्रौ भविष्ये—

"कन्यायामागते सूर्ये अर्वाग्वा सप्तमे दिने।
कन्यायां समनुप्राप्ते ह्यर्घकालो निवर्तते॥"

तेन उदयोत्तरमपि सप्तदिनमध्ये इत्यर्थः। यत् पाद्मे—

"आ सप्तरात्रादुदयाद्यमस्य दानद्वयमेतत्सकलं नरेश।
यावत्समाः सप्तदशाऽथ वा स्युरर्घार्घमप्यत्र वदन्ति॥
केचित्॥"

यमस्य=अगस्त्यस्य। उदयकालश्च दिवोदासीये उक्तः—

"उदेति याम्यां हरिसंक्रमाद्वै-
रेकाधिकं विंशतिमे ह्यगस्त्यः॥
स सप्तमेऽस्तं वृषसंक्रमाच्च
प्रयाति गर्गादिभिरुच्यमानि॥"

अत्र विधिर्विष्णुरहस्ये—

"काशपुष्पमयीं रम्यां कृत्वा मूर्तिं तु वारुणेः।
प्रदोषे विन्यसेत्तां तु पूर्णकुम्भे स्वलङ्कृताम्॥
कुम्भस्थां पूजयेत्तां तु पुष्पधूपविलेपनैः।
दध्यक्षतबलिं दद्याद्रात्रौ कुर्यात्प्रजागरम्॥"

पूजा च वक्ष्यमाणार्घ्यमन्त्रेण कार्या—

"प्रभाते तां समादाय यायात्पुण्यं जलाशयम्।

इति। यत्र परेऽह्नि न त्रिमुहूर्त्ता तत्र विद्धापि पूर्वा बोध्या।

निशावसाने तां पश्यन् जलान्ते प्रतिमां मुनेः ॥
अर्घ्यं दद्यादगस्त्याय भक्त्या सम्यगुपोषितः ।"

मात्स्ये तु—

"अङ्गुष्ठमात्रं पुरुषं तथैव सौवर्णमत्यायतबाहुदण्डम् ।"

पूर्वं काशमयीत्युक्तौ—

"चतुर्भुजं कुम्भमुखे निधाय धान्यानि सप्ताङ्कुरसंयुतानि ।
सकाशपुष्पाक्षतशुक्तियुक्तं मन्त्रेण दद्याद् द्विजपुङ्गवाय'
धेनुं चतुर्क्षीरवतीं च दद्यात्सवत्सघण्टाभरणां द्विजाय।'

भविष्ये—

"विरूढैः सप्तधान्यैश्च वंशपात्रे निधापितैः ।
सौवर्णरूप्यपात्रेण ताम्रवंशमयेन वा ॥
मूर्ध्नि स्थितेन मन्त्रेण जानुभ्यां धरणीं गतः ।"

विष्णुरहस्ये—

*"अगस्त्यः खनमानेति पठन्मन्त्रमिमं मुनेः ।
अर्घ्यं दद्यादगस्त्याय, शूद्रे मन्त्राविधिस्त्वयम् ॥
काशपुष्पप्रतीकाश वह्निमारुतसम्भव ।
मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते ॥
विन्ध्यवृद्धिक्षयकर मेघतोयविषापह ।
रत्नवल्लभ देवेश लङ्कावास नमोऽस्तु ते ॥
वातापी भक्षितो येन समुद्रः शोषितः पुरा ।
लोपामुद्रापतिः श्रीमान्योऽसौ तस्मै नमो नमः ॥
येनोदितेन पापानि विलयं यान्ति व्याधयः ।
तस्मै नमोऽस्त्वगस्त्याय सशिष्याय च पुत्रिणे ॥
अगस्त्यः खनमानेति विप्रोऽर्घ्यं विनिवेदयेत् ।
राजपुत्रि महाभागे ऋषिपत्नि वरानने ॥

---

*अगस्त्य इति । "अगस्त्यः खनमानः खनित्रैः प्रजामपत्यं

लोपामुद्रे नमस्तुभ्यमर्घ्यं मे प्रतिगृह्यताम् ।
दत्त्वैवमर्घ्यं कौरव्य प्रणिपत्य विसर्जयेत् ॥
अर्चितस्त्वं यथाशक्त्या नमोऽगस्त्यमहर्षये ।
ऐहिकामुष्मिकीं दत्त्वा कार्यसिद्धिं व्रजस्व मे ॥
विसर्जयित्वाऽगस्त्यं तं विप्राय प्रतिपादयेत् ।
अगस्त्यो मे मनस्थोऽस्तु अगस्त्योऽस्मिन्घटे स्थितः ॥
अगस्त्यो द्विजरूपेण प्रतिगृह्णातु सत्कृतः ।"

दानमन्त्रः—

"अगस्त्यः सप्तजन्माद्यं नाशयत्वघगौरवम् ।
अतुलं विमलं सौख्यं प्रयच्छ त्वं महामुने ॥"

प्रतिग्रहमन्त्रो विष्णुरहस्ये

"त्यजेदगस्त्यमुद्दिश्य धान्यमेकं फलं रसम् ।
होमं कृत्वा ततः पश्चाद्वर्जयेन्मानवः फलम् * ॥"

होमश्चार्घ्यमन्त्रेणानेन । भविष्ये—

"दत्त्वाऽर्घ्यं सप्तवर्षाणि क्रमेणानेन पाण्डव ।
ब्राह्मणः स्याच्चतुर्वेदः क्षत्रियः पृथिवीपतिः ॥

बलमिच्छमानः । उभौ वर्णावृषिरुग्रः पुपोष सत्या देवेष्वाशिषो ज-
गाम" इति मन्त्रः । (१)*वर्जयेन्मानवः फलमिति । अगस्त्या-
र्घ्यदानं काम्यं न कुर्यादित्यर्थः । अधिकमन्यतोऽवगन्तव्यम् ।

१—अयं मन्त्रो ऋग्वेदसंहितायां द्वितीयाष्टके चतुर्थाध्याये । अ-
स्य व्याख्या च श्रीमत्सायणाचार्यकृता—'अयमगस्त्यो मद्गुरुः खनि-
त्रैः=फलस्योत्पादसाधनैः यज्ञस्तोत्रादिभिः खनमानः=फलमभिमतमुत्पा-
दयन् प्रजां प्रकर्षेण पुनःपुनर्जायमानमपत्यं=कुलस्यापतनसाधनं पुत्रा-
दिकं बलं चेच्छमानः सन्, यद्वा प्रजां=भृत्यादिरूपां चेच्छन् ऋ-
षिः=अतीन्द्रियद्रष्टा महानुभावः उग्रः=उद्गूर्णः संसारे संचरन्नप्यपापः
सन्नुभौ वर्णौ=वर्णनीयाकारौ कामं च तपश्च पुपोष । सत्या आशि-
षो देवेषु=देवेभ्यो जगाम=प्राप्तवान् । यतोऽयं महानुभावस्तस्मादस्मान्
पातीत्यर्थः इति ।

यपक्षे चावश्यकमिति प्रयोगपारिजाते । *अत्र माता-
महा अपि कार्याः ।

"पितरो यत्र पूज्यन्ते तत्र मातामहा अपि ।"

इति धौम्योक्तेः । पितृशब्दस्य च जनकपरत्वे बहु-
वचनानिरोधेन पितृभावापन्नपरत्वात् । वार्षिके तु वच-
नान्निवृत्तिः । नच जीवत्पितृकस्यान्वष्टकायां मातृश्राद्धे
तदापत्तिः । इष्टापत्तेः । अत एव स उक्तश्राद्धेषु स्वमातृ-
मातामहयोर्दद्यादिति मदनरत्नकालादर्शौ । एतच्च जी-
वत्पितृकश्राद्धे वक्ष्यामः । केचित्तु अजहल्लक्षणया पि-
त्रादयो यत्र तत्र मातामहास्तेनात्र नेत्याहुः । न चात्र
नाम्ना नान्दीश्राद्धधर्मातिदेशः । वैष्णवादिशब्दवद्देव-
तापरस्य कर्मनामत्वाभावात् । नापि नान्दीमुखत्वं पि-
तृविशेषणं पारिभाषिकत्वादिति दिक् । तथा निर्णय-
दीपे गार्ग्यः—

"पौर्णमासीषु सर्वासु निषिद्धं पिण्डपातनम् ।
वर्जयित्वा प्रौष्ठपदीं यथा दर्शस्तथैव सा ॥" इति ॥

इति श्रीमीमांसकरामकृष्णभट्टात्मजभट्टकमलाकरकृते
निर्णयसिन्धौ भाद्रपदमासः समाप्तः ॥

इति वचनात् वृद्धिश्राद्धस्य नान्दीमुखश्राद्धमिति नामधेयं
च । एतेनात्र नाम्ना नान्दीश्राद्धधर्मातिदेशः प्रत्युक्तः । वि-
ष्णवादिशब्दवदस्य देवतापरत्वेन कर्मनामत्वाभावाच्च । नापि
पित्रादेर्नान्दीमुखत्वम् । अश्रुमुखत्वात् । अन्यत्र पारिभाषि-
कत्वाच्च । 'पूर्वतरा' इति बहुवचनात् सपत्नीकत्वादिपार्वण-
विधानं च बोध्यम् । अविरोधात् । केषाञ्चिन्मतमाह—
*अत्रेति । दिगर्थस्तु पित्रापितृसमुदाये पितृशब्दलक्षणास्वीका-
रापत्तिमपेक्ष्य उक्तार्थस्यौचित्यमिति अत्रेदं दूषणम् । अतोऽत्र

कन्यासंक्रमे पराः षोडश घटिकाः पुण्याः, शेषं प्राग्वत्।

अथ महालयः। तत्र पृथ्वीचन्द्रोदये वृद्धमनुः—

*"आषाढीमवधिं कृत्वा पञ्चमं पक्षमाश्रिताः।

काङ्क्षन्ति पितरः क्लिष्टा अन्नमप्यन्वहं जलम्॥"

पौर्णमास्यां प्रोष्ठपद्यां स याति परमं पदम्॥

अष्टादशसहस्राणि पुराणं तत्प्रकीर्तितम्।" इति॥

ननु 'आश्विने श्राद्धं कुर्यात्' इत्यादौ आश्विनः सौर एव।

"कन्यागते सवितरि पितृराजानुशासनात्।

भवेत् प्रेतपुरी शून्या यावद् वृश्चिकदर्शनम्॥"

इति कन्यासम्बन्धेन श्राद्धविधानात्। एवं नभस्योऽपि सौर एव 'मीनमेषयोर्मेषवृषयोर्वा वसन्तः' इति सर्वमासानां द्वैविध्येन कन्यायां भाद्रत्वस्यापि सम्भवात्।

"मासः कन्यागते भानावसंक्रान्तो भवेद्यदि।

दैवं पित्र्यं तदा कर्म तुलास्थे कर्तुरक्षयम्॥"

इति वचनादनुकल्पत्वेन तुलार्केऽर्थस्याह *आषाढीमिति। इदं पक्षपदम् 'आश्वयुक्कृष्णपक्षे तु' इति पक्षपदं चाश्विनादेश्चान्द्रत्वे लिङ्गम्। 'मासः कन्यागते भानौ' इति तु न महालयपरमित्युक्तं प्राक्। महालयश्राद्धं च नित्यं काम्यं च।

'आषाढ्याः पञ्चमे पक्षे यः श्राद्धं न करिष्यति।

शाकेनापि दरिद्रोऽपि सोऽन्त्यजत्वमुपैष्यति॥'

इति नागरखण्डात्।

"शक्रध्वजनिपाताद्यो यः स्यात्पक्षस्तु पञ्चमः।

स विज्ञेयोऽपरः पक्षः श्राद्धं तत्र विधीयते॥

पुत्रानायुस्तथारोग्यमैश्वर्यमतुलं तथा।

प्राप्नोति पञ्चमं दत्त्वा श्राद्धकामांस्तु पुष्कलान्॥"

इति कार्ष्णाजिनिरुक्तेः।

कन्यायोगे पुण्यतमत्वमाह शाट्यायनिः—

"कन्यास्थार्कान्वितः पक्षः सोऽत्यन्तं पुण्यमुच्यते॥"

इति।

अत्र विशेषमाह वृद्धमनुः—

*"मध्ये वा यदि वाऽप्यन्ते यत्र कन्यां व्रजेद्रविः।
स पक्षः सकलः श्रेष्ठः श्राद्धषोडशकं प्रति॥"

तथा ब्रह्माण्डमार्कण्डेययोः—

"कन्यागते सवितरि*दिनानि दश पञ्च च।
पार्वणेनेह विधिना श्राद्धं तत्र विधीयते॥"

तथा च तत्रैव षोडशदिनान्युक्तानि—

"कन्यागते सवितरि यान्यहानि तु षोडश।
क्रतुभिस्तानि तुल्यानि देवो नारायणोऽब्रवीत्॥"

अत्र हेमाद्रिः षोडशत्वं द्वेधा व्याचकार। तिथिवृद्ध्या पक्षस्य षोडशदिनात्मकत्वं श्राद्धवृद्ध्यर्थमेकः पक्षः,

---

*मध्ये चेति।

"आषाढीमवधिं कृत्वा यः स्यात्पक्षस्तु पञ्चमः।
श्राद्धं तत्र प्रकुर्वीत कन्यां गच्छतु वा न वा॥"

इति आदित्यपुराणे। 'सूर्ये पक्षोपक्रमे' इति शेषात्सर्वस्य पक्षस्य कन्यायोगो नापेक्षित इत्यर्थः। कन्यायोगनैयत्येन यथाश्रुतासङ्गतेः। *दिनानीति। दिनपदं चान्द्रदिनपरतया तिथिपरम्।

'तिथिनैकेन दिवसश्चान्द्रमाने प्रकीर्तितः।'

इति विष्णुधर्मात्। एवम् 'अहानि' इत्यग्रिमपदमपि तिथिपरमेव।

'आश्वयुक्कृष्णपक्षे तु श्राद्धं कुर्याद्दिने दिने।'

इति पक्षमक्रमेण दिनपदस्य तिथिपरतया तदेकवाक्यत्वात्।

भाद्रपदपूर्णिमया सहेति द्वितीयः, आश्विनशुक्लप्रतिपदा सहेति तृतीयः। *अन्त्य एव तु युक्तः।

"अहः षोडशकं यत्तु शुक्लप्रतिपदा सह।
*चन्द्रक्षयविशेषेण सापि दर्शात्मिका स्मृता॥"

इति देवलोक्तेः। तत्र पञ्च पक्षाः। तदुक्तं हेमाद्रौ ब्राह्मे—

*"आश्वयुक्कृष्णपक्षे तु श्राद्धं कार्यं *दिनेदिने।
त्रिभागहीनं पक्षं वा त्रिभागं त्वर्धमेव वा॥"

दिने दिने इति पक्षपर्यन्तत्वमुक्तम्। त्रिभागहीनमिति पञ्चम्यादिपक्षः,

'भौजङ्गीं तिथिमारभ्य यावच्चन्द्रार्कसङ्गमम्।'

इति वाक्यात्। अर्धमित्यष्टम्यादिपक्षः। त्रिभागमिति दशम्यादिपक्षः। त्रिभागहीनमिति चतुर्दशीसहितप्रति-

---

अत्र तिथिवृद्ध्येति पक्षो न युक्तः षोडशत्वस्य नित्यवत्कृत्वणवि-रोधात्। नापि पूर्णिमासाहित्येनेति पक्षः। अपरपक्षश्रुतिविरोधादत आह *अन्त्य एवेति। *चन्द्रेति। न दृश्यते चन्द्रोऽस्यामिति व्युत्पत्त्या धातोश्चाक्षुषज्ञानार्थकतया तदुभयदर्शत्वेन शुक्लप्रतिप-दोऽप्येकीकाराच्चापरपक्षत्वविरोध इत्यर्थः। पञ्चसु पक्षेषु षोडश-तिथिपक्षः पञ्चदशतिथिपक्षश्चोक्तौ, शेषान् दर्शयितुमाह—*आश्व-युगिति। दिनपदं तिथिपरमित्युक्तं न तु—

'अहोरात्रेण चैकेन सावनो दिवसः स्मृतः।'

इति सावनदिनपरः पक्षोपक्रमात्। नन्वेवं पक्षस्य चतुर्दशसावना-त्मकत्वे षोडशतदात्मकत्वे वा कथं पञ्चदशैव श्राद्धानीत्यत्राह—*दि-नेदिनेइति। ह्रासे तिथिद्वयप्रयुक्तप्रयोगद्वयस्य तन्त्रं वृद्धौ च यद्य-प्येकदिनच्छेद एव प्राप्नोति गुणानुरोधेन प्रधानावृत्तेरन्याय्यत्वात् सकृत्करणादेव पञ्चदशश्राद्धसिद्धेः तथाऽपि 'अश्नमप्यन्वहं जलम्' इति वाक्यादविच्छेदेनानुष्ठानलाभापाचारादेकतिथिप्रयुक्तं श्राद्ध-

*'पञ्चम्यूर्ध्वं च तत्रापि दशम्यूर्ध्वं ततोऽप्यति ।'
इति विष्णुधर्मोक्तेः । षष्ठ्येकादश्यादिपक्षास्त्वपि ज्ञेयास्त्विति तत्त्वम् । कालादर्शेऽपि—

"पञ्चम्यादि च दर्शान्तं पञ्चम्यादि दिगादि च ।
अष्टम्यादि यथाशक्ति कुर्यादापरपक्षिकम् ॥"

पञ्चादिः प्रतिपत्, दिक् दशमी, दर्शान्तमिति सर्वत्र । गौतमोऽपि—'अथापरपक्षे श्राद्धं पितृभ्यो दद्यात् पञ्चम्यादि दर्शान्तमष्टम्यादि दशम्यादि सर्वस्मिंश्च' इति । तथैकस्मिन्नपि दिने श्राद्धमुक्तं हेमाद्रौ नागरखण्डे—

"आषाढ्याः पञ्चमे पक्षे कन्यासंस्थे दिवाकरे ।
यो वै श्राद्धं नरः कुर्यादेकस्मिन्नपि वासरे ॥
तस्य संवत्सरं यावत्संतृप्ताः पितरो ध्रुवम् ।" इति ।

अत्र शक्ताशक्तपरा व्यवस्थेति प्राञ्चः । तन्न । तथा-चकपदाभावात् । *त्रयोदश्यादिपक्ष एव नित्यः । तत्रैव निन्दाश्रुतेः । आद्ये एवकारेण तस्यैव पञ्चमपक्षायोग-व्यवच्छेदोक्तेः इति गौडाः । तन्न । एकस्मिन्नपीति *विरोधात् । तेन फलभूमार्थिनाऽन्यानि कार्याणीति तत्त्वम् । तत्र चतुर्दशीश्राद्धाभावे पञ्चम्यादिदशम्यादि-पक्षौ । तदसत्त्वे षष्ठ्येकादश्यादिकौ । एवं चतुर्दश्य-भावे द्वादश्यादिः । तदसत्त्वे त्रयोदश्यादिरिति व्यवस्था ॥

विधवायास्तु विशेषः । स्मृतिसंग्रहे—

---

*पञ्चम्यूर्ध्वमिति । तथा च विष्णुधर्मगौतमाभ्यां स्पष्टमुक्ताः प्रतिपत्पञ्चमीषष्ठीअष्टमीदशमीएकादशीप्रभृति षट् पक्षाः, तदेकवा-क्यतया वाक्यान्तरं योज्यमिति बोध्यम् । गौडमतमाह—*त्र-योदश्यादीति । *एवकारेण=अर्धमेवेत्येवकारेण । *विरोधा-

*सकृन्महालये च वर्ज्यतिथ्याद्युक्तं पृथ्वीचन्द्रोदयप्रयोगपारिजातादिषु । वसिष्ठः—

"नन्दायां भार्गवदिने *चतुर्दश्यां त्रिजन्मसु ।
एषु श्राद्धं न कुर्वीत गृही पुत्रधनक्षयात् ॥"

*जन्मभं तत्पूर्वोत्तरे च त्रिजन्मानि । वृद्धगार्ग्यः—

"प्राजापत्ये च पौष्णे च पित्र्यर्क्षे भार्गवे तथा ।

च चत्वारः पार्वणा इति । श्वश्रूणां निषेधेनेति च निर्मूलं प्रतिभाति । एकोद्दिष्टानि च तीर्थमहालयादौ स्वसम्बन्धिनास्याः पुत्रवद्भवन्त्येव । यत्तु—

"भर्तुः श्राद्धे तु या नारी मोहात्पार्वणमाचरेत् ।
न तेन तृप्यते भर्ता स्वयं च नरकं व्रजेत् ॥" इति,

तत्क्षयाहे एकोद्दिष्टपक्षप्रशंसार्थं न तु सर्वथा पार्वणनिषेधार्थमिति । *सकृन्महालये इति । कृष्णपक्षसामान्यनिमित्तकश्राद्धं हेमाद्रिमते आवृत्त्या, विवेचनकारादिमते तु सकृत् । तत्र यद्यपि काम्ये श्राद्धे याज्ञवल्क्येन चतुर्दशी वर्जिता तथाऽपि नित्येऽपि तत्र 'नभस्यस्यापरे पक्षे' इति कार्ष्णाजिनिना भाद्रपदापरपक्षे चतुर्दशीवर्जननिषेधादन्यत्र प्रतिपदादिपक्षे तद्वर्जनावगमात । दशम्यादिपक्षे च—

"कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीम् ।
श्राद्धे प्रशस्तास्तिथयो यथैता न तथेतराः ॥"

इति मनुवचनात् सुतरां च पञ्चम्यादिप्रतिपदादिपक्षयोस्तद्वर्जनावगमाच्च कृष्णपक्षसामान्य एव तद्वर्जनं नन्दादिकं च तद्वर्ज्यम् । इदं च चतुर्दशीनन्दादिवर्जनं भाद्रपदकृष्णपक्षेऽपि सकृत्करणपक्षे तदप्रवृत्तेर्निर्बीजत्वात् । पक्षान्तरेषु तु न नन्दादि वर्ज्यं संख्याहान्यापत्तेः, षोडशपञ्चदशपक्षयोस्तु न चतुर्दश्यपीत्यर्थः । *चतुर्दश्यामिति । त्रयोदश्यामिति विवेचने । *जन्मभामिति ।

'अमापाते भरण्यां च द्वादश्यां पक्षमध्यके ।
तथा तिथिं च नक्षत्रं वारं च न विचारयेत् ॥'

पराशरमाधवीये मदनपारिजातादिषु चैवम् । निर्णयदीपिकायां तु—* 'पितृमृताहे निषिद्धदिनेऽपि सकृन्महालयः कार्यः' इत्युक्तम् ।

'आषाढ्याः पञ्चमे पक्षे कन्यासंस्थे दिवाकरे ।
मृताहनि पितुर्यो वै श्राद्धं दास्यति मानवः ॥
तस्य संवत्सरं यावत्सन्तृप्ताः पितरो ध्रुवम् ॥'

इति नागरखण्डोक्तेः ।

'या तिथिर्यस्य मासस्य मृताहे तु प्रवर्तते ।
सा तिथिः पितृपक्षे तु पूजनीया प्रयत्नतः ॥
तिथिच्छेदो न कर्तव्यो विनाऽशौचं यदृच्छया ।
पिण्डश्राद्धं च कर्तव्यं विच्छित्तिं नैव कारयेत् ॥
अशक्तः पक्षमध्ये तु करोत्येकदिने यदा ।
निषिद्धेऽपि दिने कुर्यात्पिण्डदानं यथाविधि ॥'

इति कात्यायनोक्तेश्च । *अत्र मूलं चिन्त्यम् ।

तथा पक्षश्राद्धकरणेऽपि न नन्दादिषु पिण्डनिषेध इत्याह पराशरमाधवीये कार्ष्णाजिनिः—

'नभस्यस्यापरे पक्षे श्राद्धं कार्यं दिने दिने ।
नैव नन्दादि वर्ज्यं स्यान्नैव निन्द्या चतुर्दशी ॥' इति।

अत्र श्राद्धमित्येकवचनाद् *दिने दिने इति वीप्साव-

रसम्भवात् । *पितृमृताहे इति । शिष्टाचारसिद्धोऽयं पक्ष इति रघुनाथः। नन्वेवं 'नैव निन्द्या चतुर्दशी' इति चतुर्दशीग्रहणं वर्जयित्वा चतुर्दशीमिति तन्निषेधश्चेति विकल्पः स्यादित्यत्राह—*अत्रेति । एकेति । प्रकृत्यर्थानामिति व्युत्पत्त्या अत्यन्तसंयोगार्थक-

'प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीम् ।'
इति याज्ञवल्क्यीयं प्रयोगभेदपरं न तु पञ्चम्यादिपक्ष-
विषयम् । 'प्रतिपत्प्रभृतिषु' इति विशिष्योक्तेः । निर्णय-

एवं निमन्त्रणादिविसर्जनान्तश्राद्धप्रयोगस्य भेदे यदि ब्राह्मणा-
लाभस्तदाऽस्तु तैरेव ब्राह्मणैः सः ।

'कुशा दर्भादयो मन्त्रा ब्राह्मणाश्च बहुश्रुताः ।
न ते निर्माल्यतां यान्ति विनियोज्याः पुनः पुनः ॥'

इति ब्राह्मणानां विनियुक्तविनियोगाविरोधात् । वरणभरणरूपे तु
निमन्त्रणदक्षिणादाने प्रतिश्राद्धप्रयोगं भिन्ने एवानुष्ठेये । अत एव
पक्षश्राद्धार्थं ब्राह्मणैः सह सकृदेवोपसंवादेऽपि तेषामाशौचेऽभ्या-
सान्तरे त्यागोऽन्येषामुपादानम् ।

'निमन्त्रितस्य विप्रस्य स्वाध्यायाद्विरतस्य च ।
देहे पितृषु तिष्ठत्सु नाशौचं विद्यते क्वचित् ॥'

इति वाक्यस्य शास्त्रीयनिमन्त्रणाभावेनाप्रवृत्तेः । प्रयोगसङ्घ-
स्य सम्भूयैकफलजनकत्वं सायंप्रातरग्निहोत्रवत् । 'प्रतिपदि महा-
लयापरपक्षश्राद्धं करिष्ये' 'द्वितीयायां महालयापरपक्षश्राद्धं करिष्ये'
'तृतीयायां महालयापरपक्षश्राद्धं करिष्ये' इत्यादिप्रतितिथि सङ्क-
ल्पभेदाच्च पाकभेदाच्चान्तरा प्रतिबन्धानिश्चयेन केनचिदभ्यासपक्षे-
णारब्धे महालयश्राद्धे यद्यन्तरा श्राद्धकर्तुराशौचपातः, तदा 'श्राद्धे
पाकपरिक्रिया' इत्युक्तमुख्यप्रारम्भाभावात्सङ्कल्पाभावाच्च 'प्रारब्धे
सूतकं नास्ति' इत्यस्याप्रवृत्तेरनधिकारात्तत्र प्राप्ताः श्राद्धप्रयोगा
नानुष्ठेयाः । न चैवं सायमग्निहोत्रपौर्णमासानन्तराशौचपाते प्रातर-
ग्निहोत्रदर्शयोराशौचमध्येऽनुष्ठानं न स्यादिति वाच्यम् । तत्र—

'वैतानोपासनाः कार्याः क्रियाश्च श्रुतिचोदनात् ।'

इत्यधिकारप्रतिप्रसवात्तदनुष्ठानोपपत्तेः । न च यथा कृष्णपक्षे
यजमानमरणसम्भावनायां दर्शेष्टिपर्यन्ताग्निहोत्रहोमपूर्वकं तदानी-

*'तिथिनक्षत्रवारादिनिषेधो य उदाहृतः ।
स श्राद्धे तन्निमित्ते स्यान्नानुषङ्गकृते त्वसौ ॥'
इति दिवोदासीये वृद्धगार्ग्योक्तेस्तन्निमित्ते *पक्षान्तरे

'कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीम् ।'
इति मनूक्तश्चतुर्दशीवर्जनं दशम्यादिपक्षे । अन्यथा महाल-
यश्राद्धगता षोडशत्वसंख्या व्याहन्येत । अत एव 'नैव निन्द्या
चतुर्दशी' इत्यस्यापि सङ्गतिरित्याहुः । वस्तुतस्तु —
'शस्त्रेण तु हता ये वै तेभ्यस्तत्र प्रदीयते ।'
इति इतरदैवत्याबाधेन शस्त्रहतानां दैवतान्तरविधानात्सद्भावो
लुप्यते । यथाऽभ्युदयेष्टौ प्रकृतदेवताबाधाद्देवतान्तरविधानाद्योपां-
शुयाजः । मातामहादिवर्जितानां अपि शस्त्रहतपितृकं सत्येव
सङ्गच्छते । पाते दशम्यादावित्यादिपदेन पक्षान्तराणामपि ग्रहणम् ।
जीवत्पितृकाणां जीवत्पितृकाऽमावास्यायां तथाश्विनदुत्तरप्रतिपदादि-
ष्विव शस्त्रास्त्रमृतपितृकर्तृकमासिकाब्दिकश्राद्धत्वेन श्राद्धगता
षोडशत्वसंख्योपपत्तेः । अतो दैवतविरहेण चतुर्दशीश्राद्धं लुप्यत
एवेति युक्तमुत्पश्यामि । तत्त्वं त्विति क्वचित्पाठः । *तिथीति ।
तिथ्यादौ पिण्डदानादिनिषेधो 'नन्दाश्रुक्रामरव्यार' इत्यादिकः ।
तन्निमित्ते=नन्दादिनिमित्तके । अनुषङ्गकृते=नन्दादिसम्बन्धेन कृते
महालयादौ नेत्यन्वयः । यद्वा नन्दादेर्निषेध इत्येवार्थः । 'नन्दायां
भार्गवदिने' इत्यादिपुत्रवद्गृहिणो निषेधो नन्दादिनिमित्तक एव
न तु नन्दादौ पञ्चम्यादिपक्षेण क्रियमाणे महालये इत्यर्थः । *प-
क्षान्तरे इति । कृष्णपक्षान्तरे इत्यर्थः ।
'न नन्दासु भृगोर्वारे रोहिण्यां न त्रिजन्मसु ।
रेवत्यां च मघायां च कुर्यादापरपाक्षिकम् ॥'
इति नारदसंहितावचनात् । एतच्च नन्दाश्रुक्रामेत्यपि आप-
रपाक्षिकपरमेव एकवाक्यत्वात् । नन्वेवं सकृन्महालयेऽपि 'नन्दादि-

पिण्डदानं प्रकुर्वीत *युगादिभरणीमघे ॥
महालये गयाश्राद्धे मातापित्रोः क्षयेऽहनि ।
कृतोद्वाहोऽपि कुर्वीत पिण्डनिर्वपणं सदा ॥' इति ।

निर्णयदीपे तु नन्दादिनिषेधः प्रत्यहं भिन्नश्राद्धविषयः । षोडशाहव्यापिश्राद्धप्रयोगैकत्वे तु प्रत्यहं पिण्डदानं कार्यमेवेत्युक्तम् । तदयमर्थः सकृत्तः षोडशाहव्यापिश्राद्धैक्ये न पिण्डदाननिषेधः । मृताहे सकृन्महालयेऽपि तथेति केचित् । तत्रापि निषेधस्तु युक्तः, प्रत्यहं श्राद्धभेदेऽपि व्यतीपातादौ तथा । अन्यत्र *मृताहातिक्रमे महालये च पिण्डनिषेध इति ।

संन्यासिनां तु द्वादश्यां श्राद्धं कार्यम् ।
*'यतीनां च वनस्थानां वैष्णवानां विशेषतः ।
द्वादश्यां विहितं श्राद्धं कृष्णपक्षे विशेषतः ॥'
इति पृथ्वीचन्द्रोदये सङ्ग्रहोक्तेः ।

अत्र पक्षे श्राद्धाकरणे गौणकालमाह हेमाद्रौ यमः—
'हंसे कन्यासु वर्षास्थे शाकेनापि गृहे वसन् ।
पञ्चम्योरन्तरं दद्यादुभयोरपि पक्षयोः ॥'
आश्विनकृष्णशुक्लपञ्चम्योर्मध्य इत्यर्थः । *तत्राप्यसम्भवे भविष्ये—

तन्निमित्ते=महालयनिमित्ते । पितृयागे=पित्र्यष्टकायाम् । *युगादीति । सति सप्तमी, मृताहे इत्यधिकरणसप्तमी, तथा च न पिण्डनिषेधः । 'अपापाते' इत्युक्तेः । एवं च श्राद्धभेदे कदाचित्सपिण्डं कदाचिदपिण्डमित्यत्रेष्टापत्तिर्बोध्या । *अन्यत्र=अपरपक्षे पौर्णमास्यादिमृतश्राद्धे वा । *मृताहेति । सकृन्महालये इति शेषः । *यतीनामिति । सकृन्महालये नियमः । तेन तेषां पक्षान्तराण्यपि भवन्त्येव । *तत्राप्यसम्भवे इति । आश्विनशुक्लपञ्चम्यन्तं कस्मिंश्चिद्दिने

'यावच्च कन्यातुलयोः क्रमादास्ते*दिवाकरः।
शून्यं प्रेतपुरं तावद्वृश्चिकं यावदागतः॥'

ब्राह्मे—

'वृश्चिके *समतिक्रान्ते पितरो दैवतैः सह।
निःश्वस्य प्रतिगच्छन्ति शापं दत्त्वा सुदारुणम्॥'

यत्तु जातूकर्ण्यः—

'आकाङ्क्षन्ति स्म पितरः पञ्चमं पक्षमाश्रिताः।
तस्मात्तत्रैव दातव्यं दत्तमन्यत्र निष्फलम्॥'

इति, तत्फलातिशयग्रहातिपरम्। 'कन्यां गच्छतु वा न वा' इति तुरीयपादे वा पाठः। तत कन्यायोग प्राशस्त्यमात्रम्। अतः श्राद्धविधिकाले श्राद्धक ज्ञेयम्। इदं च श्राद्धमन्नेनैव कार्यं नाऽमान्नादिना।

'मृताहं च सपिण्डं च गयाश्राद्धं महालयम्।
आपन्नोऽपि न कुर्वीत श्राद्धमामेन कर्हिचित्॥'

इति स्मृतिदर्पणे गालवोक्तेः।

अथात्र देवताः। सङ्ग्रहे—

'ताताम्बात्रितयं, सपत्नजननी, मातामहादित्रयं
सस्त्रि, स्त्रीतनयादि, तात जननी-स्व-भ्रातरः सस्त्रियः।
ताताम्बात्मभगिन्यपत्यधवयुक्, जायापिता, सद्गुरुः,

तदुत्तरतुलादीनां तदनुकल्पत्वात्। *दिवाकर इति।

'तावच्छ्राद्धस्य कालः स्याच्छून्यं प्रेतपुरं तदा।'

इत्युत्तरार्द्धे ब्राह्मपाठानुसारेण रवेः कन्यातुलयोः क्रमावस्थानाक्रमाच्छ्राद्धस्य कालः स्यादित्यर्थः। *समतिक्रान्ते=यावद्वृश्चिके महालयश्राद्धं लुप्यते मोहादिना तत्करणेऽपि कर्तुः प्रत्यवायानुद्धारात् इत्यत्र तात्पर्यम्।

शिष्यासाः पितरौ सहान्तर्गर्भिणी, तीर्थे, तथा ॐतर्पणे ॥"

ॐतर्पणे इति । तर्पणस्य मध्याह्न एव मुख्यः कालः । कात्यायनादिसूत्रे माध्याह्निककर्मसु तत्पाठात् ।

"स्नानं माध्याह्निकं कृत्वा सन्ध्याकर्म निवर्त्य च ।
ब्रह्मयज्ञं विधायाथ गृहमेत्यानन्तरान ॥"

इति आत्रेयवाक्ये मध्याह्ने तदुक्तेश्च । ब्रह्मयज्ञाङ्गं च तर्पणम् ।

'संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ।'

इति वाक्यात् मध्याह्नसंध्यानन्तरं कार्यम् ।

"उपास्य विधिवत्संध्यामुपस्थाय च भास्करम् ।
गायत्रीं शक्तितो जप्त्वा तर्पयेद्देवताः पितॄन् ॥"

इति वृद्धपराशरोक्तेश्च, इति मदनरत्ने विस्तरः ।

यत्तु तर्पणं प्रकृत्य—

"तस्मात्सदैव कर्तव्यमकुर्वन्महतैनसा ।
युज्यते ब्राह्मणः कुर्वन् विश्वमेतद्बिभर्ति च ॥" इति,

तत्र सदापदस्य यावज्जीवमित्यर्थः ।

"अहन्यभ्यन्तरे पित्रोः पुत्रो दद्यात् जलाञ्जलीन् ।
द्वितीये तु यथा देयं तर्पणे सततं च ॥"

इति त्वनुकल्पः ।

यत्तु 'यत्रापि स्नानोदयात् प्रागेव तर्पणं कृतं तत्र मध्याह्ने स्नानाकरणेऽपि पुनस्तर्पणं कार्यम् । अहःकालिकतर्पणस्याऽवश्यकस्याकरणात् । उदयोत्तरं प्रातः स्नाने तु तर्पणे कृते पुनस्तन्न कार्यम् । तेनैव सिद्धेः । मध्याह्नस्नानस्य वैधत्वपक्षे तु तदनन्तरं पुनः कार्यम्' इति, तन्न । उदयात्पूर्वं तर्पणविध्यविध्योरभावात् । विधानाभावे चोदयात् प्रागनुष्ठानायोगात् ।

अथाधिकारिणः । मनुः—

"चतुर्णामपि वर्णानां तर्पणं तु भवेत्सदा ।"

अस्यार्थः-तानत्रयी=पितृत्रयी । अम्बात्रयी च । स्मृत्यर्थसारेऽपि-'महालये मातृश्राद्धं *पृथक् प्रशस्तम्' इति । अत्र विशेषः स्मृतिदर्पणे गालवः—

*'अनेका मातरो यस्य श्राद्धे चापरपाक्षिके ।
अर्घ्यदानं पृथक्कुर्यात्पिण्डमेकं तु निर्वपेत् ॥'

जीवन्मातृकस्तु सापत्नमातुरेकोद्दिष्टं कुर्यान्न पार्व-

वर्णानामिति न कर्मषष्ठी । सवर्णेभ्यो जलं देयम् । 'सवर्णेभ्य एव च' इति योगियाज्ञवल्क्यात् । एतच्च मातापितृव्यतिरेकेणेति प्राञ्चः । जीवत्पितृकस्यापि तर्पणं भवत्येव । 'जीवत्पितृकोऽप्येतान्' इति कात्यायनोक्तेः । एतान्=देवऋषिदिव्यपितृसनकादिमनुष्यान् । पितुर्जीवनेन तर्पणाधिकारात्

संन्यस्तपितृकादौ—

"येभ्य एव पिता दद्यात्तेभ्य एव प्रदापयेत् ।"

इति वचनात् तस्य । तीर्थेऽप्येतत् जीवत्पितृकश्राद्धवत् । मातृमरणेऽपि न तर्पणम्, उद्वाह इत्यादिवत् प्रतिप्रसवाभावात् 'सपितुः पितृकृत्येषु' इति निषेधाच्च । *पृथगिति ।

"अन्वष्टकासु वृद्धौ च प्रतिसम्वत्सरं तथा ।
महालये गयायां च सपिण्डीकरणात्पुरा ॥
मातुः श्राद्धं सुतः कुर्यादन्यत्र पतिना सह ।"

इति वाक्यात् 'नवदैवतमत्रेष्टम्' इति वचनाच्च । *अनेका मातर इति । सापत्नमातुर्मात्रा सहैकतन्त्रेण द्विपितृकश्राद्धवदित्यर्थः । इदमशुद्धम् । यत इदं वचनमान्वष्टक्य एव प्रवर्तते न तु तद्भिन्ने महालयादावपि सकृद्वे मातृत्रयानन्तरं सापत्नमातुरुक्तेः । जीवदजीवन्मातृकयोः प्रकारभेदानौचित्याच्च । अस्माकं तूभयत्रापि सापत्नमातुरेकोद्दिष्टमेवेति तदभेदात् । अधिकमन्यतोऽवगन्त-

श्वश्रूरप्यत्रोपलक्ष्या । अत्र *मूलं स्मृतिचन्द्रिकायां ज्ञेयम् । अत्र पार्वणिकोद्दिष्टयोर्व्यवस्थोक्ता हेमाद्रौ पुराणान्तरे——

*'उपाध्यायगुरुश्वश्रूपितृव्याचार्यमातुलाः ।
श्वशुरभ्रातृतत्पुत्रपुत्रर्त्विक्शिष्यपोषकाः ॥
भगिनीस्वामिदौहितृजामातृभगिनीसुताः ।
पितरौ पितृपत्नीनां पितुर्मातुश्च या स्वसा ॥

तत्त्वैतेयामिति व्यवस्थासम्भवात् । 'सस्त्रियः' इतिपाठः 'तत्स्त्रियः' इति पाठो न युक्तः, पितृव्यादेः सपत्नीकत्वस्यवौचित्यात् पितृष्वस्रादीनां सत्त्वात्तवत् । सापत्न्यत्वं तु पूरणीयम् । सतीषु=विद्यमानासु । *मूलमिति ।

"आद्यौ पिता ततो माता सापत्नजननी तथा ।
मातामहाः सपत्नीकाः स्वपत्नी तदनन्तरम् ॥
सुतभ्रातृपितृव्याश्च मातुलाश्च सपत्नयः ।
दुहिता भगिनी चैव दौहित्रो भागिनेयकः ॥
पितृष्वसा मातृष्वसा श्वशुरो गुरुरर्थिनः ।" इति ।

अस्यार्थः—सुतान्तानां क्रमो विवक्षितः । ततः तदनन्तरपदसत्त्वात् । ततो दुहितैव सापत्न्या सधवा । संबन्धासत्तेः दौहित्रभावुकयोस्तत्र निवेशनत्वम् । सुते पत्नीपुत्रयोरिव ।

'सुतस्तत्पुत्रदुहितृदौहित्रा भावुकः स्नुषा ।'

इति वचनान्तरेऽपि तथैव । गयायां तु केचित् पृथगेषां कुर्वन्ति । पितृव्यमातुलयोरन्ते भ्राता पितृष्वस्रोरन्ते भगिनी सम्बन्धासत्तेरिति । *उपाध्यायेति । श्वशुरः सपत्नीकः, न तु पृथक् श्वश्रूः, सापत्न्यश्च । नापि श्वशुरे जीवति सा । भ्राता सापत्न्यो न तु पृथक् तत्पुत्रः, सपत्नीकश्च । भगिनीदुहितरौ सधवे सापत्न्ये न तु भगिनीसुतः तत्स्वामी जामाता च पृथक् । 'पितरौ पितृपत्नीनाम्'

अत्रे *एकपाके *वैश्वदेवतन्त्रं पिण्डं बर्हिश्च *एक-मिति स्मृत्यर्थसारे उक्तम्। अत्र *पाणिहोमः *पिण्ड-श्राद्ध द्विजान्तिके इत्याह प्रयोगपारिजाते आचार्यः—

'काम्यमभ्युदयेऽष्टम्या*मेकोद्दिष्टमथाष्टमम्।

चतुर्ष्वेषु करे होमः पिण्डश्राद्ध द्विजान्तिके॥' इति।

पार्वणैकोद्दिष्टयोः समानतन्त्रत्वं तु अग्निसमीप एव। अत्र भुजिलोपनौ वैश्वदेवौ।

पार्वणैकोद्दिष्टयोः क्रममाह मरीचिः—

"यद्येकत्र भवेत्स्थानमेकोद्दिष्टं च पार्वणम्।

पार्वणं त्वभिनिर्वर्त्य एकोद्दिष्टं समारभेत्॥" इति।

एकपवित्रकम्=एका शलाका। अग्निकपत्र। *एकपाक इति।

"महालये गयाश्राद्धे गतासूनां क्षयेऽहनि।

तन्त्रेण श्रपणं कृत्वा श्राद्धं कुर्यात्प्रयत्नतः॥"

इति पौलस्त्यात्। *वैश्वदेवेति। 'यद्येकत्र भवेत्स्थानम्' इति वाक्यात्तादृशश्राद्धस्य पार्वणपूर्वकत्वाद्दमज्ञातविरोधितया-पक्रमप्राबल्यादेव वैश्वदेवसिद्धेः 'देवहीनम्'इति निषेधो न प्रव-र्तते। *एकमिति। 'एकत्र भवेत् स्थानम्' इत्यस्यान्यथा ऽनुपपत्तेः। प्रधानानुरोधेन गुणावृत्तिश्च तत्रैव यत्र तां विना न प्रधानसिद्धिरिति। *पाणिहोम इति। पार्वणे इत्यादिः न त्वेकोद्दिष्टे इत्यर्थः। *पिण्डश्चेति। पिण्डपितृयज्ञकल्पाभा-वात्। पार्वणैकोद्दिष्टयोः समानतन्त्रत्वे त्वग्निसमीप एवेति पाठः। तत्र प्रामाण्ये यद्याग्रहः तदाऽमावास्यायां* महालयकरणे(१) (कथं चिद्योज्यः। यद्वा बहृचगृह्यभाष्यकारैरेकोद्दिष्टे पाणिहो-पाङ्गीकारात्तत्र तन्मते तन्निषेधो न प्रवर्तते इत्याशयेन) *एको-द्दिष्टमिति। आन्वष्टक्यातिदेशेन यस्यां कस्यां चित्तिथौ श्रा-

(१) कंसान्तर्गतो ग्रन्थः कश्चित् पुस्तके नास्ति।

'वृद्धौ तीर्थे च *संन्यस्ते ताते च पतिते सति ।
येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः ॥'
इति कात्यायनोक्तेः । यत्तु कौण्डिन्यः—
'दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपाक्षिकम् ।
न जीवत्पितृकः कुर्यात्तिलैस्तर्पणमेव च ॥' इति,
तत्संन्यस्तादिपित्राद्यतिरिक्तविषयम् *काम्यश्राद्धपरं वा । *अत्र बहु वक्तव्यं श्रीपितृकृतजीवत्पितृकनिर्णये ज्ञेयम् । एतच्च जीवत्पितृकेण पिण्डरहितं कार्यम् ।
*'मुण्डनं पिण्डदानं च प्रेतकर्म च सर्वशः ।

मेकयमिति । अत्रेदं किंचिद्बीजम् । कात्यायनवाक्यस्योत्पत्तिपरतया कौत्पत्तिः क गुणविधिरिति विनिगमनाविरहात् समुच्चितानेकतिथिविशिष्टश्राद्धविधौ 'यदाऽऽग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति' इत्यत्रेव समुच्चितानेककालविशिष्टकर्मविधिकृतभेदवदिहाऽपि श्राद्धभेदस्यैवौचित्यात् । *संन्यस्ते इति । पितृयज्ञं होमान्तमनारम्भो वेति पक्षद्वयम् । आरम्भपक्षे होमान्तः पित्रादिदेवतानां वा पिण्डदानमित्यग्रे स्पष्टम् । सर्वस्मिन्नपि पक्षे संन्यस्तादिपितृकस्यामावास्याश्राद्धं स्मृत्युक्तं भवति स्मृतीनां सर्वसाधारण्यात् । *काम्येति । नित्यनिषेधबाधेन काम्यस्य प्रवृत्तेः । ननु वृद्धौ चेति सर्वश्राद्धप्रतिप्रसवस्यापरपाक्षिकनिषेधो बाधकोऽस्त्वित्यत आह—*अत्रेति । सामान्यतः—
'सपितुः पितृकृत्येषु अधिकारो न विद्यते ।'
इति सामान्यतोऽपरपक्षे श्राद्धनिषेधे सिद्धे कौण्डिन्यनिषेधस्य वैयर्थ्यवारणाय कृष्णपक्षान्तर्गतमध्याष्टकाश्राद्धं पिण्डपितृयज्ञकल्पेन न कार्यमिति व्याख्येयम् । न चानेन तदुपसंहारः । तथा सत्येतदन्यसर्वश्राद्धप्राप्ते जीवत्पितृकस्य प्रतिप्रसवान्तरवैयर्थ्यात् । *मुण्डनमिति । वस्तुतस्तु एतस्य निर्मूलत्वात्सपिण्डं भवत्येव ।

न जीवत्पितृकः कुर्यात् गुर्विणीपतिरेव च ॥'

इति दक्षेण तस्य निषेधात्। अन्वष्टक्यमातृ-
वार्षिकादौ तु वचनात्कुर्वन्तीति वक्ष्यामः। तथा छागलेयः-

'पितरौ यस्य निवृत्तौ स्यातां वापि कथंचन।
सांकल्यं तु सदा कार्यं नियमाद्ब्रह्मवादिभिः ॥'

सांकल्पस्वरूपं च वक्ष्यते।

अत्र श्राद्धाङ्गतर्पणं पक्षश्राद्धे प्रतिदिनं श्राद्धोत्तर-
म्। सकृन्महालये तु परेऽह्नि कार्यम्।

तदुक्तं नारदीये-

'पक्षश्राद्धं यदा कुर्यात्तर्पणं तु दिने दिने।
सकृन्महालये चैव परेऽहनि तिलोदकम् ॥'

गर्गोऽपि-

'पक्षश्राद्धे हिरण्ये च अनुव्रज्य तिलोदकम् ॥' इति।

तथा प्रयोगपारिजाते गर्गः-

'कृष्णे भाद्रपदे मासि श्राद्धं प्रतिदिनं भवेत्।
पितॄणां प्रत्यहं कार्यं निषिद्धाहेऽपि तर्पणम् ॥
सकृन्महालये श्वः स्यादष्टकास्वन्त एव हि ॥'

इदं निषिद्धदिनेऽपि कार्यम्।

'तिथितीर्थविशेषेषु कार्यं प्रेते च सर्वदा।'

इति स्मृत्यर्थसारोक्तेः।

'तीर्थे तिथिविशेषे च गयायां प्रेतपक्षके।
निषिद्धेऽपि दिने कुर्यात्तर्पणं तिलमिश्रितम् ॥'

इति स्मृतिरत्नावल्यां वचनाच्च ॥

एतच्च श्राद्धं मलमासे न कार्यम्। तदाह भृगुः-

'वृद्धिश्राद्धं तथा सोममग्न्याधेयं महालयम्।
राजाभिषेकं काम्यं च न कुर्याद्भानुलङ्घिते ॥' इति।

हेमाद्रौ नागरखण्डे—

*'नभो वाथ नभस्यो वा मलमासो यदा भवेत्।
सप्तमः पितृपक्षः स्यादन्यत्रैव तु पञ्चमः ॥'

एतच्च पित्रोर्मरणे प्रथमाब्दे *कृताकृतमिति त्रि-
स्थलीसेतौ भट्टाः।

इदं च नित्यं काम्यं च।

'पुत्रानायुस्तथाऽऽरोग्यमैश्वर्यमतुलं तथा।
प्राप्नोति पञ्चमे दत्त्वा श्राद्धं कामांश्च पुष्कलान् ॥'

इति(१) जाबालोक्तेः।

'वृश्चिके समतिक्रान्ते पितरो दैवतैः सह।
निःश्वस्य प्रतिगच्छन्ति शापं दत्त्वा सुदारुणम् ॥'

इति कार्ष्णाजिनिवचनाच्च। तदतिक्रमे प्रायश्चित्त-
मुक्तमृग्विधाने—

(२)'तुरोअश्वस्य' मन्त्रं च दशवारं दिनास्तयोः।

---

*नभो वेति। नन्वत्र यदाऽऽश्विनोऽधिकमासस्तदा तत्र कन्यार्क-
सत्त्वात् श्राद्धपक्षः। अत्र नव्याः—

'यातुधानप्रियो मासः कन्यार्के जायते यदा।
दैवं पित्र्यं तदा कर्म उत्तरे मासि युज्यते ॥'

इति वचनात्तुलार्के कार्यमित्याहुः। *कृताकृतमिति। कृ-

---

(१) 'याज्ञवल्क्योक्तेः' इति पुस्तकान्तरे पाठः।

(२) स मन्त्रो ऋग्वेदसंहितायां प्रथमाष्टके चतुर्थाध्याये—'तुरो अश्वस्य तुर इन्द्र गोरसि तुरो यवस्य वसुन इनस्पतिः। शिक्षानरः प्रदिवो अकामकर्शनः सखा सखिभ्यस्तमिदं गृणीमसि ॥' इति। अस्य व्याख्या—'हे इन्द्र, त्वम् अश्वस्य तुरो दाताऽसि, तथा गोः पश्वादेस्तुरो दाताऽसि, तथा यवस्य यवादेर्धान्यजातस्य तुरो दाताऽसि। वसुनः निवासहेतोर्धनस्येनः स्वामी पतिः सर्वेषां पालयिता। शिक्षानरः शिक्षा-तिर्दानकर्मा। शिक्षाया दानस्य नेताऽसि। प्रदिवः=पुराणः प्रगता दिवो

ज्ञेय इत्युक्तं निर्णयामृते, हेमाद्रौ च। *हस्तार्कस्तु फलातिशयार्थः।

'संयोगे तु चतुर्णां वै निर्दिष्टा परमेष्ठिना।'

इति तत्रैवोक्तेः। अत्र विशेषो हेमाद्रौ स्कान्दे—

*'देवदारु तथोशीरं कुङ्कुमं लामनःशिलाम्।
पत्रकं पद्मकं यष्टिं मधु गन्धेन पेषयेत्॥
क्षीरेणालोड्य कल्केन स्नानं कुर्यात्समन्त्रकम्।
आपस्त्वमसि देवेश ज्योतिषां पतिरेव च॥
पापं नाशय मे देव वाङ्मनःकायकर्मजम्।
पञ्चगव्यकृतस्नानः पञ्चभङ्गैस्तु मार्जयेत्॥'

पञ्चभङ्गः=पञ्चपल्लवैः। तथा—

'रत्नैर्नानाविधैर्युक्तं सौवर्णं कारयेद्रविम्।
शक्तितस्तु पलादूर्ध्वं तदर्धं कर्षतोऽपि वा॥
सौवर्णमरुणं कुर्यात्तोकां चैव तथा रथम्॥'

तथा—

'अल्पवित्तोऽपि यः कश्चित्सोऽपि कुर्यादिमं विधिम्।'

प्रभासखण्डे—

'स्थापयेद्व्रणं कुम्भं चन्दनोदकपूरितम्।
रक्तवस्त्रयुगच्छन्नं ताम्रपात्रेण संयुतम्॥

"अयनद्वितये श्राद्धं विषुवद्द्वितये तथा।
भरणीषु च सर्वासु पिण्डनिर्वपणं न हि॥"

इति पुलस्त्यनिषेधात्। 'युगादिभरणिमघे' इति प्रोक्तं तु सति सप्तम्या व्याख्यातम्। 'तिथिनक्षत्रवारादि' इति वचनात्। ननु वाराहे योगचतुष्टयं पुराणसमुच्चये च तत्पञ्चकमिति कथं कपिलाषष्ठ्यैक्यमित्यत्राह—*हस्तार्कस्त्विति। इयं च षष्ठी योगविशेषेण पूर्वा वा परा वा ग्राह्या। *देवदार्विति।

सप्तम्यादिषु त्रिष्वहःसु कार्यम्' इति नारायणवृत्तिः । हरदत्तस्तु मघायुक्तवर्षासु भवं त्रयोदश्याश्राद्धमिति व्याचख्यौ । पृथ्वीचन्द्रोदये ब्राह्मे—

'आषाढ्याः पञ्चमे पक्षे मघा माध्याष्टमी स्मृता ।
त्रयोदशी गजच्छाया मघातुल्या तु पैतृके ॥

आश्विनकृष्णाष्टम्यां *महालक्ष्मीव्रतम् । तत्र निर्णयामृते पुराणसमुच्चये—

'श्रियोऽर्चनं भाद्रपदे सिताष्टमीं
प्रारभ्य *कन्यामगते च सूर्ये ।
समापयेत्तत्र तिथौ च यावत्
सूर्यस्तु पूर्वार्धगतो युवत्याः ॥' इति ।

तत्रैव—

'कन्यागतेऽर्के प्रारभ्य कर्तव्यं न श्रियोऽर्चनम् ।
हस्तप्रान्तदलस्थेऽर्के तद्व्रतं न समापयेत् ॥
पूजनीया गृहस्थानामष्टमी प्रावृषि श्रियः ।
दीपैश्चतुर्भिः संत्यक्ता सर्वसंपत्करी तिथिः ॥'

तथा—

न्युक्ता एतेनेत्युक्तः । माध्यावर्षमिति पठित्वा मध्ये वर्षासु भवामिति केचिदाहुः । *महालक्ष्मीव्रतमिति । तदनुरोधेन पूर्वाणि पञ्चदश दिनानि ग्राह्याणीति भावः । अत्र भाद्रशुक्लाष्टमीमारभ्याश्विनकृष्णाष्टमीपर्यन्तं षोडशदिनेषु महालक्ष्मीयात्रा कार्या ।

((१)'महालक्ष्म्यष्टमीं प्राप्य तत्र यात्रा कृता नृणाम् ।
संपूजीतेह विधिवत् पद्मा स च न मुञ्चति ॥'

इति काशीखण्डात् । महालक्ष्म्यष्टमी=भाद्रशुक्लाष्टमी । तत्र ज्येष्ठापूजासत्त्वात्तां प्रारभ्य महालक्ष्म्यष्टमी=आश्विनकृष्णा-

---

(१) कंसान्तर्गतो ग्रन्थः क्वचित्पुस्तके नास्ति ।

'पूर्वा वा परविद्धा वा ग्राह्या चन्द्रोदये सदा ।
त्रिमुहूर्तापि सा पूज्या परतश्चोर्ध्वगामिनी ॥'

इति मदनरत्ने निर्णयामृते च सङ्ग्रहोक्तेः ।

'अर्धरात्रमतिक्रम्य वर्तते यापरा तिथिः ।
तदा तस्यां तिथौ कार्यं महालक्ष्मीव्रतं सदा ॥'

इति वचनाच्चेति सङ्क्षेपः ॥ इति महालक्ष्मीव्रतनिर्णयः ॥

अथ नवम्यामन्वष्टकाश्राद्धम् । तत्र कात्यायनः —

*'अन्वष्टकासु नवभिः पिण्डैः श्राद्धमुदाहृतम् ।
पित्रादिमातृमध्यं च ततो मातामहान्तकम् ॥'

पृथ्वीचन्द्रोदये ब्रह्माण्डे —

'पितॄणां प्रथमं दद्यान्मातॄणां तदनन्तरम् ।
ततो मातामहानां च अन्वष्टक्ये क्रमः स्मृतः ॥'

श्राद्धहेमाद्रौ छागलेयः —

'केवलास्तु क्षये कार्या वृद्धावादौ प्रकीर्तिताः ।
अन्वष्टकासु मध्यस्था नान्यथा कार्यास्तु मातरः ॥'

"कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी ।
पूर्वविद्धैव कर्तव्या परविद्धा न कुत्रचित् ॥"

इत्युक्तेः । अत्र अष्टम्याः श्राद्धं मघाश्राद्धसमफलम् ।

"आषाढ्याः पञ्चमे पक्षे मघामध्याष्टमी स्मृता ।
त्रयोदशी गजच्छाया गयातुल्या तु पैतृके ॥"

इत्युक्तेः । भाद्रकृष्णनवम्यामन्वष्टकाश्राद्धं मातृश्राद्धं च । तत्राद्यमभिप्रेत्याह — *अन्वष्टकास्विति । हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका अपरेद्युरन्वष्टक्यमिति चतस्रोऽन्वष्टकाः भाद्रकृष्णाष्टम्युत्तरा चान्वष्टका पञ्चमी 'प्रोष्ठपद्युत्तराभूयः' इति वचनात् । अथवा आश्वलायनानां माघ्यावर्षोत्तरनवम्यामन्वष्टकामष्टकां कुर्वन्ति । तथायं देवताक्रमः । अयमेवोत्तरान्वष्टक्ये ग्राह्यः ।

त्पितृकनिर्णये गुरुभिः । अत्र सर्वासां नामनिर्देशेनैकको ब्राह्मणोऽर्घः पिण्डश्च । नामैक्ये तु *द्विवचनादिप्रयोग इत्युक्तं नारायणवृत्तौ । अन्वष्टकाश्राद्धं *तद्यागश्च गोभिलीयानां मध्यमायामेव, न सर्वासु* ।

'अन्वष्टक्यं मध्यमायामिति गोभिलगौतमौ ।'

इति छन्दोगपरिशिष्टात् । अत्र भर्तृमरणोत्तरं पूर्वमृतमातृश्राद्धं न कार्यमिति केचिदाहुः । पठन्ति च—

'श्राद्धं नवम्यां कुर्वीत न मृते भर्तरि क्षणे ।' इति ।

तदेतन्निर्मूलत्वान्मूर्खप्रतारणमात्रम् । श्राद्धदीपकलिकायां त्वाह—

*'पितृमातृकुलोत्पन्ना याः काश्चित्तु मृताः स्त्रियः ।
श्राद्धार्हा मातरो ज्ञेयाः श्राद्धं तत्र प्रदीयते ॥' इति ।

*अत्र देशाचाराद्व्यवस्था ।

आन्वष्टक्यमधिकृत्यैवेयं इति: मातृश्राद्धेऽप्यालम्बनीया बाधकाभावात् । तत्र ब्राह्मणभेदेऽर्घदानभेदवाक्यं व्यर्थमित्यत उक्तम्—*एक इति । *अर्घ इति । अर्घदानं तु पृथक् । 'अनेका मातरो यस्य' इत्युक्तगालववाक्यात् । *द्विवचनादीति । एकशेषोत्तरमित्यादि । नामभेदे द्वन्द्वोत्तरम् । द्विवचनादेः सत्त्वात् । एतच्च सधवाया एव मातुर्मरणे अविधवानवमीसमाख्यानात् इत्येके । 'अविशेषाद्विधवाया अपि' इति मन्मूलः । तद्यागो=मातृयागः । न सर्वासु=न पूर्वपरयोः 'स्त्रीशूद्रौ नाधीयाताम्' इतिवद्विशेषतः प्राप्तेतरनिषेधात् । *पितृमात्रिति । मत्यामातामहविशेषपरिचयायेदम् । याः काश्चिदिति दर्शनात् । तेनापुत्रपत्न्यादेरपि श्राद्धसिद्धिः । पितृष्वस्रादेः श्राद्धपरमिति वदतां मते त्वाह—*अत्रेति । यस्तु जीवन्त्यां मातरि पितृष्वस्रादिभिः पालितः तद्धनग्राही वा तत्परमिति तु प्रतीमः । अत्र भार्यानिराहितः=अविवाहि-

*अङ्गस्याप्य*त्र प्रधानत्वं वचनात् । *(१)अवेष्टेरिव राज-
सूयान्तर्गताया 'एतयान्नाद्यकामं याजयेत्' इति फलार्थ-

इति यद्वचनवशेन पितृपदस्य जनकपरत्वादिह तदभावादपि-
न मातामहानां प्रसक्तिरिति भावः । *अङ्गस्येति । तावताऽपि
तदन्तर्गतमातृश्राद्धं स्वप्राधान्यप्रसक्त्येवेत्यप्याहुः । वस्तुतस्तु 'अमा-
वास्याष्टका' इति विधिः साधिकार एव । अन्वष्टक्यस्य पितृयज्ञकल्प-
नियतत्वात् । अनुपनीतादीनां च तत्कल्पासम्भवेनाप्राप्तेऽपि श्रा-
द्धमन्वष्टक्यातिदेशेन विधीयते इति मतमुपस्थापयति—तेनेति ।
मूलैक्यादिति । यानि कल्पसूत्राणि पुराणानि च तेषां सर्वेषां एकैव
श्रुतिर्मूलत्वेन कल्प्यते । साग्निनिरग्निभेदेन पितृयज्ञभावाभावौ तु
प्रयोगविधेरेव भेदकौ नोत्पत्तिविधेरिति भावः । ननु कश्चन प्र-
योगः पितृयज्ञकल्पेन कश्चित्तु तं विनापीति कथमुत्पत्तिविधेर्न
भेद इत्यत्राह—अष्टकेति । न चायमभ्यासः । अन्यपरपुनःश्रवणं हि
अभ्यासः । न चान्यपरतेति भावः । मूलैक्येऽपि प्रयोगभेदं दृष्टान्त-
मुखेन व्युत्पादयति—तेनेति । *अन्यत्र=साग्निप्रयोगे । *अत्र=
निरग्निप्रयोगे । वचनात्=एतच्चानुपनीतोऽपीति वाक्यात् ।
वस्तुतस्तु

"अष्टकान्वष्टकाश्विनस्तथैव च नृपोत्तम ।
एतांस्तु श्राद्धकालान्वै नित्यानाह प्रजापतिः ॥"

इति वाक्यभेदेन निर्देशादन्वष्टकाश्राद्धं स्वतन्त्रमेव न च क-
स्याप्यङ्गं न च बृहस्पतिसवन्दस्यापि प्रयोगबहिर्भूतगतत्वमस्तु
बृहस्पतिसवस्य पृथक् निर्देशाभावेन विशेषादिति ।
नन्वेवं कथं तस्येह प्राप्तिरित्यत आह—*अवेष्टेरिवेति । राजाभि-

---

(१) अवेष्टिः राजसूयान्तर्गतेष्टिः ।

स्त्रम् । *अत्राष्टका=अन्वष्टका *पूर्वानुरोधात् । तथा-
ग्निपुराणे—

'अन्वष्टकासु वृद्धौ च गयायां च क्षयेऽहनि ।
अत्र मातुः पृथक् श्राद्धमन्यत्र पतिना सह ॥'

आपस्तम्बानां तु 'अष्टकासु च वृद्धौ च' इति भाष्यकारैः पाठादष्टकायां मातृश्राद्धम् *(१)छन्दोगैस्त्वत्र मातृमातामहश्राद्धं न कार्यं किन्तु त्रिपुरुषमेव ।

'न योषिद्भ्यः पृथग्दद्यादवसानदिनादृते ।
(२)कर्षूसमन्वितं मुक्त्वा तथाद्यं श्राद्धषोडशम् ॥
प्रत्याब्दिकं च शेषेषु पिण्डाः स्युः षडिति स्थितिः ॥'

इति छन्दोगपरिशिष्टात् । 'अन्वष्टकासु तेषां कर्षूविधानात्' इति शूलपाणिः । यत्तु—

'*तमिस्रपक्षे नवमी पुण्या भाद्रपदे हि या ।
चत्वारः पार्वणाः कार्याः पितृपक्षे मनीषिभिः ॥'

इति, तद्देशाचारतो व्यवस्थितं ज्ञेयम् । इदं जीवत्पि-

यानुत्पादस्य फलत्वम् क्षेमत्वादिति निरूपणमभिप्रेत्य दार्ष्टान्तिके प्रधानत्वं, दृष्टान्ते च फलार्थत्वमित्यवोक्तम् । अन्यथा दार्ष्टान्तिके फलार्थत्वं ब्रूयात् । एतावताऽयमधिकारविधिविशेषमात्रं नोत्पत्तिविधिरिद इति भावः । एवं यथाऽऽतुरस्य मनसा वाचा वेत्युक्त्या कथंचित्प्रधानमात्रेण फलसिद्धिः । तथा जीवत्पितृकस्य मातृश्राद्धमात्रेणेति न कोऽपि दोषः । ननु अमावास्याष्टकेति अष्टकायामेवानुपनीतादेरधिकारः स्यादित्यत्राह—*अत्रेति । *पूर्वेति । प्रौष्ठपद्यष्टकेत्यर्थः । *छन्दोगैरिति । मृतमातृकैरपीत्यादि । *तमिस्रेति

---

(१) छन्दोगाः सामवेदिनः ।
(२) कर्षूप्रकारस्तृतीयपरिच्छेदोत्तरार्धे द्रष्टव्यः ।

विद्वान् श्राद्धमकुर्वाणो नरकं प्रतिपद्यते॥'

अकरणे च प्रायश्चित्तमुक्तमृग्विधाने—

'एभि(१)र्द्युभिर्जपेन्मन्त्रं शतवारं तु तद्दिने।

आन्वष्टक्यं यदा न्यूनं संपूर्णं याति सर्वथा॥' इति॥

एतत्पक्षे द्वादश्यां विशेषः पृथ्वीचन्द्रोदये वायवीये—

'संन्यासिनोऽप्याब्दिकादि पुत्रः कुर्याद्यथाविधि।

महालये तु यच्छ्राद्धं *द्वादश्यां पार्वणं तु तत्॥' इति।

सिन्यनावश्यकत्वार्थम्। एतदेव मातुराब्दिकादिसमस्तश्राद्धे सुवासिनीप्रापकम्। भोजनं=भोज्यपात्रम्। सहदाहेनेति। एतच्च सहदग्धाया मातुराब्दिकादाविव नवमीश्राद्धे सुवासिनीप्रापकं नवमीश्राद्धमपि प्रापयति। यवसम्=आर्द्रतृणम्, कक्षं=शुष्कतृणम्। उपोषेत्=दहेत्। अयं च—

आग्निना वा दहेत्कक्षं श्राद्धकाले उपागते।

तृणानि वा गवे दद्यात्पिण्डान्वाऽप्यथ निर्वपेत्॥

इत्यत्र वचनात्सर्वश्राद्धानुकल्पः। 'अष्टकासु च' इति चकारादन्वष्टकाग्रहः। अस्यामेव नवम्यां बिल्वशाखायां देवीबोधनं वक्ष्यति। *द्वादश्यामिति। सकृत्करणपक्षे वानप्रस्थादेरपि उक्तं

---

(१)—तत्र पूर्वं समान्वष्टक्याकरणजनितप्रत्यवायपरिहारार्थं शतवारमेभिर्द्युभिः सुमना इति मन्त्रजपं करिष्ये इति संकल्प्य तज्जपं कुर्यात्। मन्त्रस्तु—"एभिर्द्युभिः सुमना एभिरिन्दुभिर्निरुन्धानो अमतिं गोभिरश्विना। इन्द्रेण दस्युं दरयन्त इन्दुभिर्युतद्वेषसः समिषा रभेमहि॥" इति। ऋ० सं० अ० १ अ० ४। अस्य—'हे इन्द्र, एभिरस्माभिर्दत्तैर्द्युभिर्दीप्तैश्चरुपुरोडाशादिभिः एभिरिन्दुभिः पुरोवर्तिभिस्तुभ्यं दत्तैः सोमैश्च प्रीतस्त्वं अस्माकममतिं दारिद्र्यं गोभिस्त्वया दत्तैः पशुभिरश्विनाऽश्वयुक्तेन धनेन च निरुन्धानो निवर्तयन् सुमनाः शोभनमना भव। वयमिन्दुभिरस्माभिर्दत्तैः सोमैः प्रीतेनेन्द्रेण दस्युं उपक्षपयितारं शत्रुं दरयन्तो हिंसन्तः अत एव युतद्वेषसः पृथग्भूतशत्रुका भूत्वा इषा इन्द्रदत्तेनान्नेन संरभेमहि संरब्धा भवेम। संगच्छेमहीत्यर्थः।' इति श्रीमत्सायणाचार्यकृता व्याख्या।

अथ त्रयोदशीश्राद्धम्। तत्र चन्द्रिका—

"त्रयोदशी भाद्रपदी कृष्णा *मघायुक्ता पितृप्रिया।
तृप्यन्ति पितरस्तस्यां दत्तं पञ्चदशं समाः ॥
मघायुतायां तस्यां तु जलाद्यैरपि तर्पिताः।
तृप्यन्ति पितरस्तस्य वर्षाणामयुतायुतम् ॥"

प्रयोगपारिजाते शङ्खः—

'प्रौष्ठपद्यामतीतायां मघायुक्तां त्रयोदशीम्।
प्राप्य श्राद्धं तु कर्तव्यं मधुना पायसेन च ॥
प्रजामिष्टां यशः स्वर्गमारोग्यं च धनं तथा।
नृणां श्राद्धे सदा प्रीताः प्रयच्छन्ति पितामहाः ॥'

एतन्नित्यमपि। पृथ्वीचन्द्रोदये विष्णुधर्मे—

'प्रौष्ठपद्यामतीतायां तथा कृष्णत्रयोदशी।

प्राक्। अत्र

यत्किञ्चिन्मधुना मिश्रं प्रदद्यात्तु त्रयोदशीम्।
तदप्यक्षयमेव स्याद्वर्षासु च मघासु च ॥

इति मानवे मघासु चेति पृथक् चकारात् त्रयोदशीश्राद्धमघाश्राद्धयोर्भेदः। "यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति" इत्यत्र चकारादाग्नेयभेदवत्। तेन दिनान्तरगासु मघासु मघाश्राद्धं भवति। एवं च मघात्रयोदश्योर्योगे फलाधिक्यं दर्शयति—*त्रयोदशीति। अत्र

"आषाढ्याः पञ्चमे पक्षे गयापञ्चाष्टमी स्मृता।
त्रयोदशी गजच्छाया गयातुल्यं तु पैतृकं ॥"

इत्यादितोऽपरपक्षनिमित्तकमेव सकृत्पक्षाभिधेन पक्षेण महालयत्रयोदश्यां क्रियमाणं श्राद्धं त्रयोदशीश्राद्धमिति प्रतीयते। अतः महालयत्रयोदशीश्राद्धस्य अपरपक्षश्राद्धाद्भेदं व्युत्पादयति—त्रयोदशीति। *मघायुक्ता पितृप्रियेति। मघायुक्तां त्रयोदशीं प्राप्येति तथा कृष्णा त्रयोदशीति चोक्तेः अपरपक्षश्राद्धस्य

इत्युक्त्वा—

'एतांस्तु श्राद्धकालान्वै नित्यानाह प्रजापतिः ।
श्राद्धमेतेष्वकुर्वाणो नरकं प्रतिपद्यते ॥'

इत्युक्तेः । एतच्चाऽविभक्तैरपि पृथक्कार्यम् । तथा च हेमाद्रौ—

'विभक्ता वाऽविभक्ता वा कुर्युः श्राद्धं पृथक् सुताः ।
मघासु च ततोऽन्यत्र नाधिकारः पृथग्विना ॥' इति ।

अपरार्के वायवीये—

*'हंसे हस्तस्थिते या तु मघायुक्ता त्रयोदशी ।
तिथिर्वैवस्वती नाम सा छाया कुञ्जरस्य तु ॥'

*अत्र च—

प्रत्यभिज्ञानाच्च महालयत्रयोदशीश्राद्धमपरपक्षश्राद्धाद्भिन्नम् । अत एव तद्विशेषणान्महालयश्राद्धादपि भिन्नम् । एतत्त्रयोदश्याः कृष्णपक्षाविनाभूतत्वेऽपि न त्रयोदशीश्राद्धं कृष्णपक्षश्राद्धाविनाभूतं सकृत्करणपक्षे त्रयोदश्यां तदभावात् । अस्य नित्यत्वाच्च काम्यकृष्णपक्षश्राद्धादपि भेदः । युगादिश्राद्धात्तु त्रयोदशीश्राद्धं न भिद्यते, त्रयोदशीविशेषस्य युगादित्वाविनाभावात् । युगादिश्राद्धं विधाय त्रयोदशीश्राद्धविधानं तु अयनादिश्राद्धविधानवदावश्यकत्वार्थम्, फलातिशयार्थञ्च । *हंसे इति । पारिभाषिकी गजच्छाया । उक्तवचनेषु क्वचिन्मघायोगः स्मर्यते क्वचित्तु नेत्यतो विचारमारभते—*अत्र चेति । केवलमघावाक्यानां केवलत्रयोदशीवाक्यानां चार्थवादत्वोपरामादर्थवादानां विधिशेषत्वेन तदनुरोधेन नेयत्वादिति भावः । अत्रेदमरुचिबीजम्—लाघवमात्रेणैकविधिकल्पनास्वीकारे गजच्छायाख्ययोगयुक्तायामेव त्रयोदश्यां कुञ्जरस्याच्छाये एव श्राद्धं स्यान्नान्यत्रेति । अत्र च केवलापि त्रयोदशी कालः तद्वाक्ये त्रयोदशीपदस्य यथाश्रुतार्थकत्वेनैवोपपत्तेर्मघायुक्तत्वपरत्वे मानाभावात् ।

'अपि नः स कुले भूयाद्यो नो दद्यात्त्रयोदशीम् ।
पायसं मधुसर्पिर्भ्यां प्राक्छाये कुञ्जरस्य च ॥'

इति विष्णुमनुवचने केवलत्रयोदशीश्राद्धेऽपि गुण इति कल्पतरुः । शूलपाणिस्तु—'केवलमघायां त्रयोदश्यां वा-दत्त्वाद्विधौ च मघायोगश्रुतेर्विधिनाऽऽपवादिकविशिष्टत्वम्(१)

"अपि जायेत सोऽस्माकं कुले कश्चिन्नरोत्तमः ।
प्रावृट्कालेऽसिते पक्षे त्रयोदश्यां समाहितः ॥
मधुप्लुतेन यः श्राद्धं पायसेन समाचरेत् ।
कार्त्तिकं सकलं वाऽपि प्राक्छाये कुञ्जरस्य च ॥"

इति मन्वादिस्मृतौ त्रयोदशीमात्रप्रशंसनाच्च । कार्त्तिकं सकलं वापीति च पृथगेव प्रशंसाभिधा । सकलकार्त्तिकव्यापिनः मधुप्लुतपायसद्रव्यकस्य श्राद्धस्य विधिः । प्राक्छाये कुञ्जरस्येति च पृथगेव आपराह्णिकहस्तिच्छायाकालीनश्राद्धस्य । अत एव महाभारते—

"अपि नः स कुले जायात् यो नो दद्यात् त्रयोदशीम् ।
मघासु सर्पिषा युक्तं पायसं दक्षिणायने ॥
अनेन सर्वलोकेन मघासु च यतव्रतः ।
हस्तिच्छायासु च तथा कर्णव्यजनवीजितम्" ॥ इति ।
"परमान्नं तु यो दद्यात्पितृणां मधुना सह ।
छायायां कुञ्जरेन्द्रस्य पूर्वस्यां दक्षिणामुखः ॥"

इति विश्वामित्रोक्तञ्च । एवं महालयपक्षदिनान्तरगता-केवलमघाऽपि पृथक्कालः । 'मधुमांसैश्च' इतिवचने

यत् किञ्चित् मधुना मिश्रं प्रदद्यात्तु त्रयोदशीम् ।
तदप्यक्षयमेव स्याद्वर्षासु च मघासु च ॥"

इति मानवे च पृथक् मघासु चेति चकाराच्च । मधु च कलौ-

---

[१] विशिष्टशब्देन मघाविशिष्टं ज्ञेयम् ।

निमित्तम्' इत्याह । *वस्तुतस्तु—

'मधुमांसैश्च शाकैश्च पयसा पायसेन च ।
एष नो दास्यति श्राद्धं *वर्षासु च मघासु च ॥'

इति वासिष्ठवचने केवलमघाश्रुतेर्भिन्नगमकाभावा-दुभयं भिन्नं निमित्तं, पूर्वोक्तवचनाच्च योगाधिक्ये फला-धिक्यम् । अत एव याज्ञवल्क्यः ।

'तथा वर्षात्रयोदश्यां मघासु च विशेषतः ।' इति ।

त्रयोदशीश्राद्धं नित्यम् । अन्यत्काम्यम् ।

*अत्र 'त्रयोदश्यां *बहुपुत्रा युवमारिणस्तु भवन्ति'

वर्ज्यम्'श्राद्धे मांसं तथा मधु'इति वाक्यात् इत्यभिप्रेत्याह—*व-स्तुतस्त्विति । तस्य परस्परनिरपेक्षैकक्रियान्वयलक्षणसमुच्चयार्थ-त्वात् । अत एव न गुणः । आश्रयीभूतायास्त्रयोदश्या अत्रा-श्रवणाच्च । *वर्षास्विति । ऋतुसंवत्सराभिप्रायेण । मासचतु-ष्कात्मकवर्षर्तुमभिप्रेत्य—

"चतुरो वार्षिकान्मासान् यो मांसं परिवर्जयेत् ।
चत्वारि भद्राण्याप्नोति कीर्तिमायुर्यशो बलम् ॥"

इत्यादितद्व्यवहारात् । एतच्च त्रयोदशीविशेषणम् ।

"प्रावृट्काले ऽसिते पक्षे त्रयोदश्याम्" "तथा वर्षात्रयोदश्याम्"

इत्यादिवचनात् । योगाधिक्ये मघात्रयोदश्युभययोगे—

"यो नो मघात्रयोदश्योः कुञ्जरच्छायसंज्ञितः ।
भवेन्मघायां सिंहे च शशिन्यर्के करे स्थितः ॥"

इति ब्राह्मे कुञ्जरच्छाययोगे प्राशस्त्यातिशयात् । अत्र सा-मान्यकृष्णपक्षत्रयोदश्यां ज्ञातिश्रैष्ठ्यादिफलकं काम्यमेव श्राद्धम् । महालयापरपक्षत्रयोदश्यां तु पक्षश्राद्धाभ्यां भिन्नं युगादित्वनिमि-त्तकमितरयुगादिश्राद्धापेक्षयाऽत्यावश्यकमिति स्थिते त-न्निषेधं विचारयति—*अत्रेति । कृष्णत्रयोदशीसामान्यश्राद्धप-रोऽयं ग्रन्थः । त्रयोदश्यामित्येतावन्मात्रोक्तेः । हेमाद्रिप्रमुखा

इति काठकगृह्योक्तेः। यानि तु आङ्गिराः—

'त्रयोदश्यां कृष्णपक्षे यः श्राद्धं कुरुते नरः।

पञ्चत्वं तस्य जानीयाञ्ज्येष्ठपुत्रस्य निश्चितम्॥'

वामनपुराणे—

त्रयोदश्यां तु वै श्राद्धं न कुर्यात्पुत्रवान् गृही।'

इत्यादीनि वचनानि तानि*पुत्रवद्विषयाणि वा, (१)*(महालयस्थभिन्नत्रयोदशीविषयाणि वा, *काम्यश्राद्धविषयाणि वा,) *सपिण्डकश्राद्धविषयाणि वेति केचित्। हेमाद्रिप्रमुखास्तत्र कृयगश्राद्धविषयाणि।

विशिष्टनिमित्तकत्वेन सगतिकत्वेन च शुद्धमास एव कार्यं न मले इति सूचितम्। *ज्येष्ठपुत्रस्येति। समनन्तरजनिष्यमाणापेक्षया पूर्वोत्पन्नो ज्येष्ठ इति केचित्।

"ऋक्ष पिण्डप्रदानं तु ज्येष्ठपुत्रो विवर्जयेत्"॥

इति तत्सर्वज्येष्ठ एवेत्यन्ये। *पुत्रवदिति। पुत्रवत्पदश्रवणात्। *महालयेति। गजच्छायायाः श्राद्धकालत्वात्। *काम्येति। नित्यस्य निषेद्धुमशक्यत्वात्। *सपिण्डकेति। उक्तवचने कृष्णपक्षत्रयोदशीमात्रप्रतीतावपि—

"ऋक्षे पैत्रे यदा चन्द्रो हंसश्चैव करे स्थितः।

त्रयोदश्यां तु सा छाया विज्ञेया कुञ्जराभिधा॥

श्राद्धेष्वतिप्रशस्ता सा पितॄणां तृप्तिकारिणी।

अतो मघात्रयोदश्यामेतैरेव हि साधनैः॥

करोति श्रद्धया श्राद्धं तत्प्रभावमनुस्मरन्।

तस्य तद्वचनं श्रुत्वा ये चान्येऽपि जना भुवि॥

नभस्यस्य त्रयोदश्यां श्राद्धं चक्रुर्मुदान्विताः॥ इति।

अद्यप्रभृति यः श्राद्धं त्रयोदश्यां करिष्यति।

कन्यासंस्थे सहस्रांशौ तस्य स्याद्वंशसंक्षयः॥

---

[१] कंसान्तर्गतो ग्रन्थ आदर्शपुस्तके नास्ति।

'पितरो यत्र पूज्यन्ते तत्र मातामहा अपि ।'

इति धौम्योक्तेर्न केवलपितृवर्गस्य प्राप्तिस्तथापि त्र्यामोहादिप्राप्तनिषेधोऽयमित्याहुः । वयं तु पश्यामः—पुत्रवत्त्रिषयाण्येवेति ।

'असंतानस्तु यस्तस्य श्राद्धे प्रोक्ता त्रयोदशी ।
संतानयुक्तो यः कुर्यात्तस्य वंशक्षयो भवेत् ॥'

इति हेमाद्रौ नागरखण्डोक्तेः । पूर्ववाक्यमप्यसंतामात्रस्य । *आहुरिति । येषां सूत्रे मातामहा नाम्नातास्तान्प्रति सामान्यत एकपार्वणमेव प्राप्नोति

"यावत्किञ्चित्स्वगृह्योक्तं यस्य कर्म प्रचोदितम् ।
तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत् ॥"

इति वचनात्, तन्निषेधार्थत्वसम्भवान्मातामहानुसरणं व्यर्थम् । यत्तु उभयवर्गप्राप्तनिषेधवचोवैयर्थ्यापत्त्या जीवन्मातृमातामहवर्गकं प्रत्ययं निषेधस्तस्यैकवर्गप्राप्तेरिति, तत्र न तृप्ता इत्याद्योत्तराधिकार्थवादासंगतेरिति । वस्तुतस्तु दर्शश्राद्ध एव मातामहानावश्यकत्वस्य मिताक्षरायां दर्शनात्त्रयोदश्यामेकवर्गश्राद्धप्रसक्तौ तन्निषेधो युज्यते । एवंवृद्धिश्राद्धादौ

पद्भ्यः पितृभ्यस्तदनु श्राद्धदानमुपक्रमेत् ।

इति मातामहश्राद्धपुनर्वचनवादिति । मघेत्यादि (१)महालयश्राद्धकरणे तु तेन त्रयोदश्यादिश्राद्धानां प्रसङ्गसिद्धिः । बहुदैवत्यसपिण्डत्वादिभिर्विशेषग्रहणात् । तेन महालयश्राद्धस्य तन्त्रतोक्तिश्च नादेया । तत्राऽपत्नीकस्य पित्रादेः, त्रयोदश्यादौ तु सपत्नीकस्य तस्येति देवताभेदे तु न प्रसङ्गसिद्धिरपीति ।

(१) षड्देवतामहालयकरणे तु महालये पितृव्यादेरेकोद्दिष्टस्यापि सत्त्वाद्बहुदैवत्यत्वं, द्वादशदेवताकमहालये तु अपत्नीकपित्रादेर्देवतात्वं, त्रयोदश्यादौ तु सपत्नीकस्येति भेदे न प्रसङ्गोऽपि तु पृथक् ।

तामिति गौतमोक्तदुर्मरणोपलक्षणम् । एकयोगनिर्देशात्

'सर्वेषां तुल्यधर्माणामेकस्यापि यदुच्यते ।

सर्वेषां तत्समं ज्ञेयमेकरूपा हि ते स्मृताः ॥

इत्युशनसोक्तेश्च । तच्च कृतक्रियाणामेवेति वक्ष्यामः ।

मरीचिः—

'विषशस्त्रश्वापदाहितिर्यग्ब्राह्मणघातिनाम् ।

चतुर्दश्यां क्रियाः कार्या अन्येषां तु विगर्हिताः ॥'

अत्र *ब्राह्मणघाती तेन हतो न तु ब्रह्महा, तस्य पतितत्वादिति शूलपाणिः । अत्रोद्देश्यविशेषणस्याविवक्षितत्वात्स्त्रीणामपि शस्त्रादिहतानामेकोद्दिष्टं कार्यं (१)(न पार्वणमिति)श्रीदत्तोपाध्यायः । इदं विषादिहतानामेव न प्रसवादिमृतानामिति वाचस्पतिः । यत्तु शाकटायनः—

'जलाग्निभ्यां विपन्नानां संन्यासे वा गृहे पथि ।

श्राद्धं कुर्वीत तेषां वै वर्जयित्वा चतुर्दशीम् ॥' इति,

तत्*प्रायश्चित्तार्थजलादिमृतविषयमित्याकरे उक्तम् ।

"उपसर्गमृतानां च विषमृत्युमुपेयुषाम् ।

श्राद्धं तेषां प्रकर्तव्यं चतुर्दश्यां नराधिप ॥"

इति वाक्यात् । *ब्राह्मणेति । विषादिभिर्घातो येषामिति विग्रहः । एतच्च प्रायोनाशकशस्त्राग्निविषोदकोद्बन्धनप्रपतनैश्चेच्छतामिति गौतमोक्तदुर्मरणोपलक्षणम् । एकयोगनिर्देशात् ।

"सर्वेषां तुल्यधर्माणामेकस्यापि यदुच्यते ।

सर्वेषां तद्भवेत्कार्यमेकरूपा हि ते स्मृताः ॥"

इत्युशनसोक्तेः । इच्छयेत्युक्तेः प्रसवादिमृतानां नैतत् । *प्रायश्चित्तेति । सर्पादेः साहचर्याज्जलाग्न्यादयोऽननुज्ञाता एव

---

[१] कोष्ठान्तर्गतो ग्रन्थ आदर्शपुस्तके नास्ति ।

अत एव वैधत्वात्स्वर्गगमनेऽपि न कार्यमिति हेमाद्रिः।
एतच्च दैवयुक्तमेकोद्दिष्टं कार्यमित्युक्तं प्रयोगपारिजाते—

'प्रेतपक्षे चतुर्दश्यामेकोद्दिष्टं विधानतः।
दैवयुक्तं तु तच्छ्राद्धं पितॄणामक्षयं भवेत्॥
तच्छ्राद्धं दैवहीनं चेत्पुत्रदारधनक्षयः।
एकोद्दिष्टं दैवयुक्तमित्येवं मनुरब्रवीत्॥'

भविष्येऽपि—

'समत्वमागतस्यापि पितुः शस्त्रहतस्य च।
चतुर्दश्यां तु कर्तव्यमेकोद्दिष्टं महालये॥
चतुर्दश्यां तु तच्छ्राद्धं सपिण्डीकरणं कृते।
एकोद्दिष्टविधानेन तत्कार्यं शस्त्रघातिनः॥' इति।

संवत्सरप्रदीपे हारीतः—

'विश्वेदेवांश्च तत्रापि पूजयित्वा द्विजोऽमरान्।
ये वै शस्त्रहतास्तेषां श्राद्धं कुर्यादतन्द्रितः॥'

अत्रैकोद्दिष्टवचनानां निर्मूलत्वं, समूलत्वेऽपि पार्वणशास्त्रपराणि। *विकल्पवादिवचनैः प्रकरणात् कृष्णपक्षीयपार्वणावगतेरिति शूलपाणिः। तन्न। *वाक्येन प्र-

---

प्राप्ताः। अतः प्रमादपक्ष्याप्यादिपीडितानां जलाग्न्यादिप्रवेशेन भर्तृमरणनिमित्तकाग्निप्रवेशेन च मृतानां नेदं श्राद्धमित्यर्थः। युद्धमृतौ मार्गोनाशके च वैधत्वेऽपि वचनाद्भवतीति बोध्यम्। एवं च—

"शान्तिश्रेष्ठं त्रयोदश्यां चतुर्दश्यां तु सुव्रताः।
प्रीयन्ते पितरश्चात्र ये वै शस्त्रहता रणे॥"

इत्यादिकं त्ववैधमृतिविषयम्। पितरित्यादि पितृश्रुतपदं श्राद्धदेवता तदधिकारिपरम्। *विकल्पवादीति। कृष्णपक्षप्रकरणे "संभूते पार्वणं कुर्यात्" इत्यादीत्यर्थः। *वाक्येनेति। श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थ-

करणस्य बाधात् । पित्रादीनां पार्वणं भ्रात्रादीनामेकोद्दि-
ष्टमिति गौडाचार्याश्च । तन्न, पितुरित्यनेन विरोधाद् *वि-
शेषवाक्यवैयर्थ्यापत्तेश्च । अत्र शस्त्रहतस्यैव चतुर्दश्या-
मिति नियमो न तु चतुर्दश्यामेव शस्त्रहतस्येति ।

'श्राद्धं शस्त्रहतस्यैव चतुर्दश्यां महालये ।'

इति कालादर्शाद् वार्षिकादीनामकरणापत्तेश्च ।
तेन महालये एव दिनान्तरे पार्वणं मातामहादितृप्त्यर्थं

त्विप्रकर्षादिति बलाबलाधिकरणसूत्रम् । दर्शपूर्णमासप्रकरणे 'इ-
दं द्यावापृथिवी भद्रमभूत्' इति सूक्तवाकनिगदे "इद्राग्नी इदं हवि-
रजुषेतामवीवृधेतामहोज्यायोऽक्राताम्, अग्नीषोमाविदं हविरजुषे-
तामवीवृधेतां महोज्यायोऽक्राताम्" इतिवाक्यद्वयं श्रूयते । तत्र पौ-
र्णमास्याम् इद्राग्नी न देवते इति तत्पदमपनीयते असमवेतार्थत्वात् ।
एवं च येन सह यदेकवाक्यतापन्नं तेनैव सह तदपनयौचित्या-
त् वाक्येन 'अवीवृधेताम्' इत्यादीन्यप्यपनेयानि । अथासमवेता-
र्थतया देवतापात्रापनयेऽपि 'अवीवृधेताम्' इत्यादेरितिकर्त-
व्यताकाङ्क्षारूपप्रकरणाद् प्रयोगो दुर्वार इति चेत् । न, यतः प्रक-
रणस्य विनियोज्यस्वरूपसामर्थ्यमनपेक्ष्य न विनियोजकत्वम् ।
अत एव दर्शपूर्णमासप्रकरणपठितोऽपि 'पूष्णोऽहं देवयज्यायै' इति
पूषानुमन्त्रणमन्त्रस्तद्देवताविरहिणोस्तयोर्न प्रवर्तते । एवं तिस्र एव
साह्नस्योपसदो द्वादशाहीनस्येति एकाहसाध्यसोमयागरूपे साह्ने
द्वादशोपसत्त्वं न बोधयति सा पुनर्नानादिनसाध्यसोमयागरूपा-
हीनं नीयते तस्मात्प्रकरणेनाकाङ्क्षावशात् संबन्धं कल्पयित्वा ते-
न क्रमेण कल्पिताभ्यां सामर्थ्यश्रुतिभ्यां चतुर्थकाले विनियोगो
भवेत् । अतः प्रागेव च वाक्येन सामर्थ्यं कल्पयित्वा श्रुतिः
कल्प्येति तृतीयकाले विनियोग इति बलीयसा वाक्येन प्रकरणं
बाध्यते । एवं च लिङ्गेन यथा—'इन्द्राग्निभागोऽपनीयते' एतद्वा-

कार्यमेव । पितामहादेरपि—शस्त्रहतश्चेदेकोद्दिष्टमेव कार्यम् । तदुक्तं हेमाद्रौ स्मृत्यन्तरे 'एकस्मिन्द्वयोर्वैकोद्दिष्टम्' इति । त्रिषु शस्त्रहतेषु पार्वणमेव कार्यम् ।

यत्तु देवस्वामिनोक्तं त्रिष्वपि शस्त्रहतेषु पृथगे- को*द्दिष्टत्रयं कार्यं न तु पार्वणमाहत्यवचनाभावादिति, तदयुक्तम् ।

*'पित्रादयस्त्रयो यस्य शस्त्रैर्यातास्त्वनुक्रमात् ।
स भूते पार्वणं कुर्यान्नोद्दिष्टकानि पृथक् पृथक् ॥'

इति बृहत्पराशरोक्तेः

नयेन तच्छेषभागः, तत्र पदानां संबन्धस्य प्रत्यक्षसिद्धत्वात् । प्रकृते च 'समन्वयागतस्य' इति वाक्यस्य श्रुतेति प्रकृतत्वेन कृष्ण- पक्षप्रकरणं बाध्यते इत्यर्थः । *विशेषेति ।

"सपिण्डीकरणात्पूर्वं पितुरेव हि पार्वणम् ।
पितृव्यभ्रातृमातृणामेकोद्दिष्टं न पार्वणम् " ॥

इति पार्वणत्यादिसामान्यवाक्येनैव सिद्धेः समन्वयागतस्यापीत्यादि- वाक्यानां वैयर्थ्यमित्यर्थः ।

*एकोद्दिष्टत्रयमिति । 'एकस्मिन् द्वयोः' इत्येतद्यथाश्रुते वाक्यभेदभयेन तत्त्वोपलक्षणत्वात् शस्त्रहतत्वे निमित्ते एकोद्दिष्ट- विधिमात्रपरम् 'एकस्मिन्, द्वयोः' इति तु 'एकं वृणीते, द्वौ वृणीते' इत्यादिवदनुवाद इत्यर्थः । एकोद्दिष्टत्वादिकं तन्त्रेणेति बोध्यम् । *पित्रादय इति । 'शस्त्रेण तु हता ये वै' इति शस्त्रहतदेवता- नियमवचनादेकस्य द्वयोर्वा शस्त्रादिमरणेऽन्यथानुपपत्त्या सामान्ये- कोद्दिष्टम् एकस्मिन् इत्यादिनाऽनूद्यते न तु विधीयते । एवमेव विश्वेदेवस्यापि सिद्धेः 'पितृपक्षे चतुर्दश्याम्' इत्यादिरनुवादः । एवं नाप्यपराह्णिकत्वभङ्गः । एकोद्दिष्टस्य विधाने हि तदङ्गतया मध्याह्नोऽपेक्ष्येतापि, न त्विह तथा । एवं च त्रिषु मृतेषु 'ऊर्ध्वं पा-

'एकस्मिन्वा द्वयोर्वापि विशुच्छस्त्रेण वा हते।
एकोद्दिष्टं सुतः कुर्यात्त्रयाणां दर्शवद्भवेत् ॥'

इति स्मृत्यन्तराच्चेति पृथिवीचन्द्रोदय उक्तम्। अपरार्के हेमाद्रौ चैवम्। यस्तु अत्रैव शस्त्रादिना हतस्तस्य वार्षिकमेव पार्वणमे*कोद्दिष्टं वा कार्यं न तु श्राद्धद्वयं *प्रसङ्गासिद्धेरिति पृथिवीचन्द्रोदये। अत्र*श्राद्धाकरणेऽग्रिमापरपक्षे दिनान्तरे*पार्वणेनैव कार्यमिति तत्रैवोक्तम्। यद्यपि—

'शस्त्रविप्रहतानां च शृङ्गिदंष्ट्रिसरीसृपैः।
आत्मनस्त्यागिनां चैव श्राद्धमेषां न कारयेत् ॥'

र्वणवत्कुर्यात्' इति सपिण्डनोत्तरभावित्वेन सामान्यवाक्यप्राप्तपार्वणस्याबाधात् पार्वणमेव भवति। तथा च प्रोक्तवाक्यानां निर्मूलत्वं वदतामपि नैकोद्दिष्टसिद्धिरिति तु वस्तुगतिः। *एकोद्दिष्टं वेति। यथाचारमिति शेषः। *प्रसङ्गासिद्धेरिति। चतुर्दशीश्राद्धं न भवतीति भावः। संक्रान्तिव्यतीपातादिनिमित्तकं तु चतुर्दश्यां पार्वणमेव। चतुर्दशीनिमित्तकं तु पृथक् कार्यं सपिण्डकत्वरूपविरुद्धधर्मसत्त्वात्। *श्राद्धाकरणे इति। यदि महालये चतुर्दशीश्राद्धं न कृतं तदा वृश्चिकदर्शनपर्यन्तं कस्मिंश्चिद्दिने कार्यमित्यर्थः। *पार्वणेनैवेति।

''संक्रान्तावुपरागे च पर्वोत्सवमहालये।
निर्वपेदत्र पिण्डांस्त्रीनिति प्राह प्रजापतिः ॥''

इतिवाक्यस्य शस्त्रहतानां दिनान्तरे पार्वणप्रापकत्वादिति मयूखभावः। एकोद्दिष्टविधिनैव अन्तरितं कार्यम्। यथाप्राप्त एव गौणकालविधानात् न तु पार्वणं देवताविरहादिति नव्याः। चतुर्दश्यां पार्वणे प्राप्ते देवताभूतपित्रादिदुर्मरणनिमित्तक एकोद्दिष्टेतिकर्तव्यताकः प्रयोगो विधीयते न त्विदं कर्मान्तरं पार्वणत्वादग्रे पार्वणं का-

भावात् । प्रत्युत

"साग्निरग्नावनग्निस्तु द्विजपाणावथाप्सु वा ।
कुर्यादग्नौ क्रियां नित्यं लौकिकेनेति निश्चितम् ॥"

इति स्मृत्या तत्र निषेधः । नाप्यनग्निकविहिते पाण्यादौ साग्नित्वात् । तस्मात् परिशेषात्त्रेतायामेव कार्यः । तत्रापि दक्षिणाग्नावेव पित्र्यकर्माधिकरणत्वेन दृष्टत्वात् "अयं पितॄणामग्निः" इत्यादिमन्त्रवर्णाच्च । स च दर्शान्यदिने न लभ्यते । यदि हि श्राद्धीयहोमेऽपि स्वार्थतया तस्य विहरणमाहरणं वा प्रयुञ्जीत ततस्तत्रापि स लभ्येत । स च तदा तत्प्रयुञ्जीत यदि क्वापि तत्प्रयुक्तिं विना तन्न लभेत । शक्नोति तु दर्शे तां विनापि दर्शयागार्थं विहरणादेरेव तं लब्धुम् । तस्मात्सर्वाधानयाहिताग्निना दर्श एव कृष्णपक्षश्राद्धं कार्यं नान्यदिने इति । अत्रेदमस्वरसबीजम् । साक्षाद्वचनं विना श्राद्धीयहोमः श्रौताग्नौ कर्तुमशक्यः । तथा हि श्रौतानामग्नीनां प्रयोजनाकाङ्क्षया स्मार्ते कर्मणि विनियोगः । असंयुक्तोत्पन्नानामपि तेषां वाचनिकहोमादिभिरेव प्रयोजनाकाङ्क्षाशान्तेः । 'हुत्वाग्नौ पितृयज्ञवत्' इति च अग्निपदं न श्रौताग्निपरं 'गृह्याणि वक्ष्यामः' इति प्रतिज्ञा नागृह्यगतस्याग्निपदस्य 'कर्म स्मार्तं विवाहाग्नौ' इत्युक्तेः । स्मृतिगतस्य च तस्यौपासनाग्निपरत्वात् ।

नापि पितृयज्ञवदित्यतिदेशाद्दक्षिणाग्निप्राप्तिः । अग्नेरुपदेशासिद्धत्वेनातिदेशस्य तद्भिन्नधर्मविषयत्वात् । अन्यथा 'अग्नौ' इत्यस्य वैयर्थ्यात् । न च तस्य दक्षिणाग्निपरत्वं तथात्वेऽतिदेशाद्दक्षिणाग्निरेव प्राप्नुयादिति तन्निवृत्त्यर्थं तस्यौपासनाग्निपरत्वात् । एकस्यैवाग्निशब्दस्य गृह्याग्निमन्तं प्रति तत्परत्वं सर्वाधानिनं च प्रति दक्षिणाग्निपरत्वं च कथं स्यात् ? तस्माद् गृह्येषु स्मृतिषु चाग्निपदेन गृह्याग्नेरेव ग्रहणात्तदभावे निरग्नेरिव पाणावेव श्राद्धीयो होम उचितः ।

*अन्ते पूर्ववाक्यान्तर्गतादग्नेः आहिताग्नेः। पिण्डपितृयज्ञकल्पेन श्राद्धनिषेधार्थमिदम् *अत्र तु स्मार्तकल्पादेरपीत्यस्मद्गुर-

'अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत्' ।

इति मनुवचनात् । अत एव होमस्याधिकरणाकाङ्क्षया दक्षिणाग्निप्राप्तिरित्यपि न वाचनिकेन पाणिनैवाकाङ्क्षानिवृत्तेः संभवात् । यदि च

'आहिताग्निस्तु जुहुयाद्दक्षिणाग्नौ समाहितः' ।

इत्यादि वक्ष्यमाणवचनैरेव सर्वाधानिनामाहिताग्नेः श्राद्धीयहोमे दक्षिणाग्निप्रापकमिति मन्यसे तदा अर्धाधान्यादिभिरेव श्राद्धीयहोमेनापि तस्य विहरणादिसयुक्तिसंभवात् दर्शान्यदिनेऽपि दक्षिणाग्निः सुलभ एव स्यात् । तस्मात् दर्शेनस्येत्यस्य न पैतृयज्ञिय इत्यस्य हेतुत्वेन व्याख्यानमसंगतमेवेति सूचयन्नाह—*अन्ते इति । अयं भावः–द्वयोरप्याहिताग्न्योः 'न दर्शेन विना श्राद्धम्' इति वाचनिक एवार्थः । 'न पैतृयज्ञिय' इति वाक्यं तु पृथगेव

"आकल्प दक्षिणाग्निं तु होमार्थं वै प्रयत्नतः ।
अन्यार्थं लौकिकं वाऽपि जुहुयात्कर्मसिद्धये ॥"

इति पुराणोक्तलौकिकनिषेधार्थम् । निषिध्यते च कल्पतरोक्तमत्यन्तरेण यदुक्तं द्विभार्याणामपीति तत् । न च वायुपुराणे—'अन्यार्थं दक्षिणाग्निकार्यार्थं लौकिकं गृहम्' इत्युक्तत्वादग्नौकरणहोमे दक्षिणाग्निर्मुख्यस्तदभावे गृह्याग्निरित्येवास्त्विति वाच्यम् । स्ववाक्यगतप्रकृतपरामर्शकस्य सर्वनाम्नः तद्विशेषशब्दस्यैव वा दृष्टत्वात्सामान्यवाचिनाऽग्निशब्देन दक्षिणाग्निपरामर्शानुपपत्तेरिति । *इदानीमिति । न दर्शस्येत्यस्य यथाश्रुतार्थो न ग्राह्यः, तथा सति मृतपितृकेऽप्यन्वष्टक्यादिकरणप्रसङ्गात् , किंतु अग्निसाध्येषु दर्शं विना पिण्डपितृयज्ञकल्पं विना साग्निको नाधिकारीत्यर्थः । अग्निसाध्येष्वित्यध्याहारफलमाह—*अत्र त्विति ।

वः । *कृष्णपक्षश्राद्धमन्यदिनेषु प्राप्तमाहिताग्नेर्दर्शे नि-
यम्यत इति तु वयम् । *दर्शेन पार्वणेन विना श्राद्धं न ।
तेन क्वापि वार्षिकादावेकोद्दिष्टं नेति हरिहरः ॥

इति चतुर्दशी ॥

अमायां विशेषमाहापरार्के यमः-

*"हंसे करस्थिते या तु अमावास्या *करान्विता ।

अत्र दर्शपदे लक्षणापत्तिरग्निसाध्यानामनग्निसाध्यानां च सर्वे-
षामनुवादत्वे पर्यवसानं चास्वरसः । सिद्धान्तमाह—*कृष्णपक्षे-
ति । न दर्शेनेति वाक्यं नाहिताग्नेर्दर्शश्राद्धातिरिक्तश्राद्धनिषे-
धार्थं प्रतिसांवत्सरिकादेरकरणप्रसङ्गात् , दर्शपदे श्राद्धलक्षणा-
पाताच्च, नियममात्रपरत्वे सम्भवति अपूर्वनिषेधपरत्वे गौरवाच्च,
किन्तु कृष्णपक्षश्राद्धे यस्यां कस्यां चित्तिथौ कर्तव्ये दर्शकालनि-
यमार्थम् । एवं महालयापरपक्षश्राद्धमपि सकृत्पक्षे दर्श एवाहिताग्ने-
र्भवति । प्राप्ते सामान्यतः सकृत्त्वे तत्र कालविशेषनियममात्रकरणे
लाघवेन तत्रैव पक्षे पूर्ववचनप्रवृत्तेः । पक्षान्तराण्यप्याहिताग्नेरपि
संभवन्त्येव, यथा महालयश्राद्धस्य सकृत्करणपक्षे संन्यासिनः क-
स्यचित्तिथौ कर्तव्ये द्वादशीकालो नियम्यते तस्य महालये पक्षा-
न्तराणि भवन्त्येव, तद्वदिति । एतेनाहिताग्नेर्दर्शश्राद्धमेव नियतं तेन
विनाऽन्यच्छ्राद्धं तु न तस्य नियतमिति नियतपदाध्याहारेण
मेधातिथिविधानं प्रत्युक्तं, वार्षिकादेरनियतप्रसङ्गात् । *दर्शेने-
ति । सपत्नमात्रादेरेकोद्दिष्टविधिना वार्षिकाकरणापत्तिस्त्वरसः ।

*हंसे इति । करो हस्तः । रवीन्द्वोर्हस्तस्थयोरिति फलि-
तार्थः । गजच्छाया द्विविधा-यौगिकी पारिभाषिकी च । तत्रेयमन्त्या

"यथेन्दुः पितृदैवत्ये हंसश्चैव करे स्थितः ।
तिथिर्वैश्रवणीया च गजच्छाया प्रकीर्तिता ॥"

इति स्कान्दोक्तापि सैव । पितृदैवत्यं मघा, वैश्रवणीया तिथिः

इयं संगवव्यापिनी ग्राह्या इति निर्णयदीपे उक्तम्।

"प्रतिपद्याश्विने शुक्ले दौहित्रस्त्वेकपार्वणम्।
श्राद्धं मातामहं कुर्यात्सपिता संगवे सदा॥
जातमात्रोऽपि दौहित्रो जीवत्यपि च मातुले।
प्रातः संगवयोर्मध्ये *आर्यस्य प्रतिपद्भवेत्॥"

इति वचनात्। अत्र *समूलत्वं विमृश्यम्। *इदं च मलमासे न कार्यम्।

'स्पष्टमासविशेषाख्याविहितं वर्जयेन्मले।'

इति निषेधात्। इदं च *जीवत्पितृकेणैव कार्यमिति

"पुत्रः स्वोत्पत्तिमात्रेण संस्कुर्यादृणमोचनात्।
पितरं नाब्दिकाचौलात्पितृमेधेन कर्मणा॥"

इति वचनात्प्रथमवर्षचूडाया असत्त्वे यथा पितृश्राद्धेऽनधिकारस्तथाऽस्मिन्मातामहश्राद्धेऽपीति प्रतिभाति। मयूखकृतस्तु जातमात्र इति अधिकारी जात इत्येवार्थः। तस्मादुपनयनोत्तरमेवाधिकारो न ततः प्राक् इत्याहुः। *आर्यस्य=मातामहस्य। अत्र सपत्नीकानामेव देवतात्वम्। अमाश्राद्धान्तर्गतमातामहपार्वण इवेहापि सत्यपि पितृपारणाविकृतित्वे सपत्नीकत्वगुणलम्भकप्रमाणस्य

'स्वभर्तृपिण्डमात्राभ्यस्तृप्तिरासां यतः स्मृता।'

इति वचसः प्रतिबन्धासम्भवात्। *समूलत्वमिति। सङ्गवव्यापिनीग्राह्यत्वाद्येकवचनस्य निर्मूलत्वात् पार्वणत्वादपराह्णव्यापिनी ग्राह्येत्यर्थः। *इदञ्चेति। मातामहश्राद्धस्य कन्योपलक्षितापरपक्षनिमित्तकत्वात्कन्यायामधिमासे तदुत्तरप्रतिपद्येव कन्यायुक्तायामपरपक्षव्यवधानेनैव कार्यमिति भावः। तत्र कथंचिदन्तराये तु शुक्ल१अम्यादिगौणगौणोत्तरकाले कार्यम्। एवमेव जीवत्पितृकस्य मातृनवमीश्राद्धान्तरायेऽपीति। *जीवत्पितृकेणैवेति। ननु सपितेत्युक्ते शिष्टा इति किमेतत्? शृणु।

शिष्टाः। इदं च शिष्टाचारात्सपिण्डकं कार्यमिति केचित्। पिण्डरहितं तु युक्तम्। जीवत्पितृकस्य-

"मुण्डनं पिण्डदानं च प्रेतकर्म च सर्वशः।
न जीवत्पितृकः कुर्याद् गुर्विणीपतिरेव च॥"

इति दक्षेण पिण्डदाननिषेधात्। आत्मघ्नस्य च विशेषवचनाभावाच्चेति संक्षेपः॥ इति श्रीकमलाकरभट्टकृते निर्णयसिन्धौ महालयनिर्णयः॥

अथाश्विनशुक्लप्रतिपदि नवरात्रारम्भः। तन्निर्णयः। तत्र भार्गवार्चनदीपिकायां देवीपुराणे। सुमेधा उवाच-

"शृणु राजन् प्रवक्ष्यामि चण्डिकापूजनक्रमम्।

"कन्यागते सवितरि पितरो यान्ति वै सुतान्।
शून्या प्रेतपुरी तावत् यावद्वृश्चिकदर्शनम्॥"

इत्यर्थवादेनैषां श्राद्धे ये अधिकारिणस्तेषां कन्योपलक्षितापरपक्षश्राद्धं कर्तव्यमिति विधिः कल्प्यते। पितृसुताद्यं श्राद्धे देवतातद्दीपिकार्थकम्।

"ततस्तुलागतेऽप्यर्के सूर्ये वाऽस्तगते पार्थिव।
श्राद्धं स्ववंशजैर्दत्तं क्षुत्पिपासासमाकुलाः॥"

इति सामान्येन नागरखण्डाभिधानात्। तत्र मृतपितृकस्य पितृश्राद्धेन सहैव मातामहश्राद्धं, जीवत्पितृकस्य तु तेन विनेति, प्रतिपदि तत्करणं तु केषाञ्चिदाचारात्। कल्पितेनोक्तविधिना च

"दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपक्षकम्।
न जीवत्पितृकः कुर्यात्तिलैः कृष्णैश्च तर्पणम्॥"

इति जीवत्पितृकस्यापरपक्षकमात्रान्यनिषेधो बाध्यते, एवं मातृनवमीश्राद्धेऽपि तद्बाध इति क्रमेण मपितेति सिद्धिरिति। 'मुण्डनम्' इति वाक्यस्य निर्मूलत्वं वदतां मते तु सपिण्डमिति।

इति महालयनिर्णयः॥

आश्विनस्य सिते पक्षे प्रतिपत्सु शुभे दिने ॥"

इत्युपक्रम्योक्तम्।

*"शुद्धे तिथौ प्रकर्तव्यं *प्रतिपच्चोर्ध्वगामिनी।

आद्यास्तु नाडिकास्त्यक्त्वा षोडश द्वादशापि वा ॥

अपराह्णे च कर्तव्यं शुद्धसंततिकाङ्क्षिभिः ॥"

इदं *चापराह्णयोगिन्याः प्राशस्त्यं द्वितीयदिने प्रतिपदोऽभावे ज्ञेयम्। तथा तत्रैव देवीपुराणे डामरतन्त्रे च देवीवचः—

*"अमायुक्ता न कर्तव्या प्रतिपत् पूजने मम।

मुहूर्तमात्रा कर्तव्या द्वितीयादिगुणान्विता ॥

*आद्याः षोडश नाडीस्तु लब्ध्वा यः कुरुते नरः।

कलशस्थापनं तत्र ह्यरिष्टं जायते ध्रुवम् ॥"

मार्कण्डेयदेवीपुराणयोः—

"पूर्वविद्धा तु या शुक्ला भवेत् प्रतिपदाश्विनी।

नवरात्रव्रतं तस्यां न कार्यं शुभमिच्छता ॥

देशभङ्गो भवेत्तत्र दुर्भिक्षं चोपजायते ॥

नन्दायां दर्शयुक्तायां यत्र स्यान्मम पूजनम् ॥" इति।

स्कान्देऽपि—

"प्रतिपद्याश्विने मासि सा शुद्धा शुभदा भवेत्।

भाद्रपञ्चदर्शी कृष्णा तया युक्ता न शस्यते ॥

विरुद्धफलदा सा हि पुत्रदारभयावहा ॥" इति।

*शुद्धे=अमास्पर्शरहिते। अमास्पर्शे त्वाह—*प्रतिपच्चेति। ऊर्ध्वगामिनी अमोर्ध्वगा। *इदञ्चेति। एतावताऽमायुतायाः क्षयवृद्धिभ्यां क्रमेण ग्राह्यत्वाग्राह्यत्वे दर्शिते, तदनुरोधेन स्फुटममायुक्तान् निषेधांस्तद्विधींश्च व्यवस्थापयितुं तन्निषेधानाह—*अमायुक्तेति। *आद्या इति। परेद्युः प्रतिपदः द्वौ१ एतदेव स्पष्टयति—

"*प्रातरावाहयेद्देवीं प्रातरेव प्रवेशयेत्।
प्रातः प्रातश्च संपूज्य प्रातरेव विसर्जयेत् ॥"

तत्रैव—

*"शरत्काले महापूजा क्रियते या च वार्षिकी।
सा कार्योदयगामिन्यां *न तत्र तिथि(१)युग्मता ॥"

तथा—

"कुहूकाष्ठोपसंयुक्तां वर्जयेत्प्रतिपत्तिथिम्।
राज्यनाशाय सा प्रोक्ता *निन्दिता चाश्वपूजने॥" इति।

एषु वचनेषु कलशस्थापनग्रहणात्तदेव प्रथमदिने नि- पिध्यते, न तूपवासादि। तस्य 'प्रतिपद्यप्यमावास्या' इति युग्मवाक्यात्, 'शुक्ला स्यात्प्रतिपत्तिथिः प्रथमतः' इति दीपिकोक्तेः, 'शुक्लपक्षे दर्शाविद्धा' इति माधवोक्तेश्च पूर्वदिने प्राप्तस्य बाधे मानाभावादिति केचित्। वस्तुतस्तु पूर्वोक्त- वाक्येषु चण्डिकार्चनपूजाग्रहणादुपवासादेश्चा *ङ्गत्वात्

प्रतिपत्सद्वितीया चेत्तदावाहनकालात्तमाह—*प्रातरिति। यद्यपीदं पत्रपूजाविषयमेव तथापि देवीपूजायामपि योजितं बाध- काभावात्। एवञ्च प्रातस्तदभावे पूजा न, किन्तु तल्लाभ एवेत्यर्थ- तोऽमायुक्ताव्यावृत्तिः। *शरत्काल इति। वार्षिकी वर्षादौ संवत्सरादौ चैत्रशुक्लप्रतिपदमुपक्रम्य नवम्यन्ता पूजा विधीय- ते। शरद्वसन्तयोस्तुल्य एव दुर्गोत्सवः कार्य इत्यर्थः। *न तत्र तिथियुग्मेति। युग्मवाक्यानुरोधेन दुर्गापूजायां न निर्णय इत्य- र्थः। *निन्दिता चेति। लोहाभिसारिकाभिप्रायम्। यद्वा अश्वपू- जनम् आश्विनमासीयदेवीपूजनं, रेवन्तनामा देवानामश्वः अश्व- पीडाशान्त्यर्थंक्रियमाणं तत्पूजनं वा। *अङ्गत्वादिति।

'आश्विनस्य सिते पक्षे नवरात्रमुपोषितः।

(१)युग्मवाक्यानुसरणमत्र नेष्टमित्यर्थः।

प्रधानदेवीपूजादावपि परैव युक्ता । कलशस्थापनग्रह-
णं तूपलक्षणम् । अत एव देवलः

"वर्षोपवासनियमे घटिकैकापि या भवेत् ।
सा तिथिस्तद्दिने पूज्या विपरीता तु पैतृके ॥" इति ।

अत्र घटिका मुहूर्त इति गौडाः । यदा तु पूर्वदिने
संपूर्णा शुद्धा च भूत्वा परदिने वर्धते तदा संपूर्णत्वादमा-
योगाभावाच्च पूर्वैव । यानि च *द्वितीयायोगनिषेधकानि
वचनानि कैश्चित्पठ्यन्ते तान्यपि शुद्धाधिकानिषेधपरा-
णि । परदिने प्रतिपदोऽत्यन्तास्तत्वे तु दर्शयुताऽपि पूर्वैव
ग्राह्या । तदाह व्यासः—

तिथिः शरीरं तिथिरेव कारणं
तिथिः प्रमाणं तिथिरेव साधनम् । इति ।

यानि तु *'अमायुक्ता प्रकर्तव्या' इत्यादीनि नृसिंहप्रसादे
वचनानि तानि समूलत्वे सत्येतद्विषयाणि । अत्रेदं तत्त्व-
म् पूर्वोक्तवाक्यानां सर्वेषां हेमाद्र्याद्यलिखितत्वेन
निर्मूलत्वात्सौत्रान्त्यनिर्णयस्यानुक्तेः *सामान्यनिर्णयात्पूर्व-

---

युक्तामतिक्रमेणैव पूर्वाह्णे पूजयेच्चण्डिकाम्' ॥
इति देवीपुराणे । शेषा इत्यादिः, अनुपदं तद्बीजं स्फुटम् ।
*द्वितीयेति ।

'द्वितीयांशसंयुक्ता प्रतिपच्चण्डिकार्चने ।
मोहात्संस्थापयेद्यस्तु कुर्यात्पुत्रविनाशनम् ॥'

इत्यादीनीत्यर्थः । इदानीममायुक्तविषयं व्यवस्थापयति -*या-
नि त्विति । *अमेति ।

"अमायुक्ता प्रकर्तव्या प्रतिपच्चण्डिकार्चने ।
न ग्राह्या परसंयुक्ता शुद्धमन्त्रविकाङ्क्षिभिः ॥"

इत्यादीनीत्यर्थः । *सामान्यनिर्णयात् युग्मादिवाक्यात् ।

प्राप्तावपि गौडनिबन्धेषु *विशेषनिर्णयादौदयिकी ग्राह्या । तत्रापि घटिकैकेत्यस्य त्रिमुहूर्तस्तुतित्वोक्तत्रिमुहूर्ता ग्राह्या । (१)'उदिते दैवतं भानौ' इत्यत्र 'त्रिमुहूर्ते त्रिरह्नश्च' इति औदयिक्या त्रिमुहूर्तत्वनिगमात् । तेन *'उदये द्विमुहूर्तापि' इत्याद्यनुसारोऽपि 'मुहूर्तमात्रा कर्तव्या' इति त्रिमुहूर्तस्तुतिः । अन्यथा त्रिमुहूर्तविधिवैयर्थ्यात् । केचित्तु मुहूर्तमात्रेति वचनात्ततो न्यूनत्वे परा नेत्याहुः ।

---

*विशेषनिर्णयात् 'सा कार्योदयगामिन्याम्' इति देवीपुराणात् । *उदये इति ।

'उदये द्विमुहूर्ताऽपि ग्राह्या सोदयगामिनी ।

इत्यर्थः । *गौडा अपीति ।

'सुस्नातास्तिलतैलेन पूर्वाह्णे पूजयेच्छिवाम' ।

इत्युक्तवचनात्पूर्वाह्णः कर्मकालः । कर्मकालशास्त्राच्च पूर्वाह्णव्यापिनी प्रतिग्राह्या ।

'शरत्काले महापूजा क्रियते या च वार्षिकी । '

'सा कार्योदयगामिन्याम्' इत्यादि समस्तमुदयव्यापित्वं पूर्वाह्णव्यापित्व एवेति तत्रैव तात्पर्यं न तु द्विमुहूर्तव्यापित्वे । 'प्रातरावाहयेद्देवीम्' इति प्रातःशब्दोऽपि पूर्वाह्णपर एव ।

'सम्यक्कल्पोदितां पूजां यदि कर्तुं न शक्नुयात् ।

उपचारांस्तथा दातुं, पञ्चैतान्वितरेत्तदा ॥"

गन्धं पुष्पं च धूपं च दीपं नैवेद्यमेव च ।

अभावे पुष्पतोयाभ्यां तदभावे तु भक्तितः ॥"

इति संक्षेपपूजोपदर्शनात् विस्तारपूजायाः पूर्वाह्णं विना दु-

---

(१)एतद्वचनं तु—

'उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ ।

त्रिमुहूर्ते त्रिरह्नश्च सा तिथिर्हव्यकव्ययोः ॥'इति ।

*गौडा अप्येवम्। अत्र *देवीपूजैव प्रधानम्, उपवासादि त्वङ्गम्।

*'अष्टम्यां च नवम्यां च जगन्मातरमम्बिकाम्।
पूजयित्वाऽऽश्विने मासि विशोको जायते नरः॥'

इति हेमाद्रौ भविष्ये तस्या एव फलसंबन्धात्,

'नवमीतिथिपर्यन्तं वृद्ध्या पूजा जपादिकम्।'

इति तत्रैव देवीपुराणात्,

'शरत्काले महापूजा क्रियते या च वार्षिकी।'

इति मार्कण्डेयपुराणाच्च। पूर्ववचनादष्टमीनवमीपूजैव प्रधानमन्यत्सर्वमङ्गमिति गौडाः। एकाहपक्षोऽपि(१) कालिकापुराणे —

त्वङ्गमित्यादिति नवरात्रादावनन्नुपायिनां शास्त्रतात्पर्याच्च। *देवीपूजैवेति। पूर्वकालेन 'एकत्र विन्ध्यवासिन्याम्' इत्यादिप्रतिपादके-नोपवासादिनानाकर्माभिधानात्तेषां प्राधान्यमिति शङ्कानिरासः। *अष्टम्यामिति।

"आश्विने मासि संप्राप्ते महिषासुरमर्दिनीम्।
देवीं संपूजयित्वाऽथ अर्द्धरात्रेऽष्टमीषु च॥
क्रीडन्ति विविधैर्भोगैर्देवलोके सुदुर्लभैः।
नाधयो व्याधयस्तेषां न च शत्रुभयं भवेत्॥"

इति स्कान्दे नवरात्रपूजाया अपि फलसम्बन्धाभिधानादित्यपि द्रष्टव्यम्। यद्वा कुमारीभोजनादष्टम्यां वा पूजयित्वा पूजां समाप्ये-त्यर्थात् सकृत्पक्षसङ्गतिः। नवमीत्यादि च न प्राधान्यबोधकं, किन्तु पूजादिवृद्धिविधायकमिति तु वस्तुगतिः। गौडा इत्यरुचिः। एक-त्र विन्ध्यवासिन्यामित्यादिना नवरात्रपूजाया एव मुख्यकल्प-त्वावगमात्सप्तम्यादिरनुकल्पो वक्ष्यते। तदनुकल्पो वैकल्पिकः।

---

(१)'देवीपुराणे' इति पाठान्तरम्।

'यस्त्वेकस्यामथा*ष्टम्यां नवम्यामथ साधकः ।
पूजयेद्वरदां देवीं महाविभवविस्तरैः ॥' इति ।

*तत्त्वं तु राजसूयेऽन्ययागैः समप्रधानायाः सहितायाः अप्ययष्टेः "एतयान्नाद्यकामं याजयेत" इत्येकत्वान्मध्ये विधानाच्च यथा फलार्थो बहिःप्रयोगस्तथा नवरात्रमध्यस्थाया अष्टम्या नवम्या वा फलार्थः पृथक्प्रयोगः ।

रूपनारायणधृतदेवीपुराणे—

'महानवम्यां पूजेयं सर्वकामप्रदायिका ।
सर्वेषु चैव वर्णेषु तव भक्त्या प्रकीर्तिता ॥
कृत्वाप्नोति यशोराज्यपुत्रायुर्धनसंपदः ॥'

सा च काम्या नित्या च ।

'एवमन्यैरपि तथा देव्याः कार्यं प्रपूजनम् ।
विभूतिमतुलां लब्धुं चतुर्वर्गप्रदायकम् ॥' इति,
'यो मोहादथवाऽऽलस्याद्देवीं दुर्गामहोत्सवे ।
न पूजयति दम्भाद्वा द्वेषाद्वाऽप्यथ भैरवी ॥
क्रुद्धा भगवती तस्य कामानिष्टान्निहन्ति वै ॥'

इति कालिकापुराणे फलनिन्दाश्रुतेः

'वर्षे वर्षे विधातव्यं स्थापनं च विसर्जनम् ।'

इति तिथितत्त्वे देवीपुराणाच्च ।

---

*अष्टम्यां नवम्यामिति । षष्ठ्यादिपक्षस्तु पत्रीपूजायामेव ।

*तत्त्वमित्यादि । इदन्तु चिन्त्यम् । एतयेति सर्वनाम्ना प्रकृतपरामर्शाद्युक्तोऽप्येष्टेरेव बहिः प्रयोगः, न त्विह तथा परामर्शकं किञ्चिदस्ति अष्टमीनवम्योः पृथगग्रे पूजाविधानादेतद्वचनस्य तदेकवाक्यता सम्भवति ।

'शरत्काले महापूजा क्रियते या च वार्षिकी' ।

इति मार्कण्डेयन्तु न नित्यत्वव्यञ्जकं वीप्साभावात् ।

वस्त्रालंकारदानैश्च संतोष्याः प्रतिवासरम् ॥
*बलिं च प्रत्यहं दद्यादोदनं मांसमाषवत् ।
*त्रिकालं पूजयेद्देवीं जपस्तोत्रपरायणः ॥' इति ।
नन्दिका प्रतिपत्तिथिरिति मैथिलाः, षष्ठीति गौडाः।
तच्च पूजनं रात्रौ कार्यम् ।
'आश्विने मासि मेघान्ते महिषासुरमर्दिनीम् ।
निशासु पूजयेद्भक्त्या सोपवासादिकः क्रमात् ॥'
इति देवीपुराणात् । संग्रहेऽपि—
'आश्विने मासि मेघान्ते प्रतिपद्या तिथिर्भवेत् ।
तस्यां नक्तं प्रकुर्वीत रात्रौ देवीं च पूजयेत् ॥
रात्रिरूपा यतो देवी दिवारूपो महेश्वरः ।
रात्रिव्रतमिदं देवि सर्वपापप्रणाशनम् ॥
सर्वकामप्रदं नृणां सर्वशत्रुनिबर्हणम् ।
रात्रिव्रतमिदं तस्य रात्रौ कर्तव्यतेष्यते ॥
नक्तव्रतमिदं यस्मादन्यथा नरके गतिः ॥'
इत्यादिवचनाच्च । रात्रिव्रतमेवाभिप्रेत्य माधवेनोक्तम्—

नन्दिका प्रतिपत्प्रथमोपस्थितत्वात् । तथा च आश्विनशुक्लप्रतिपदमारभ्याग्रिमनवमीपर्यन्तं देवीपूजनं कार्यमित्यर्थः । तत्रैव—

'महानवम्यां पूजेयं स्वर्गमोक्षप्रदायिनी ।'

इत्युत्तरसंदर्भात् । अयमेव मुख्यकल्पः । षष्ठ्यादिपूजाकल्पानामग्रे वाच्यत्वात्

'मासि चाश्वयुजे शुक्ले नवरात्रे विशेषतः ।'

इत्यग्रिमवाक्ये नवरात्रपूजोक्तेश्च । परन्तु तत्रैव तन्मते नक्तपदं पाक्षिकोपवासादेरुपलक्षणम् । *बलिमिति । मांसादि ब्राह्मणान्यपरम् । *त्रिकालमिति ।

'प्रातःस्नायी जितद्वन्द्वस्त्रिकालं शिवपूजकः ।'

'तस्य नक्तव्रतत्वादिति, न तु रात्रिभोजनात्' इति । ननु

'मासि चाश्वयुजे शुक्ले नवरात्रे विशेषतः ।
संपूज्य नवदुर्गां च नक्तं कुर्यात्समाहितः ॥
नवरात्राभिधं कर्म नक्तव्रतमिदं स्मृतम् ।
आरम्भे नवरात्रस्य'

इत्यादिस्कान्दात् माधवोक्तेश्च नक्तमेव प्रधानमिति चेन्न । न, 'नवरात्रोपवासतः' इत्यादेरनुपपत्तेः । तेन रूपाद्यर्थकनक्तानुवादोऽयम् । नित्यानित्यसंयोगविरोधात् । न चाग्निहोत्रे दशापवर्गे प्राप्तस्य 'दध्ना जुहोति' (१)इत्यस्येन्द्रियकामहोमेऽनुवादो यद्वत्, (२)नित्यवदनुवादायोगात् इत्युक्तं वार्तिके, तथात्रापि । तेनात्र तद्वदेव गुणात्फलार्थमिति ज्ञेयम् । ननु रात्रेः कर्मकालत्वेन तद्व्यापिनी पूर्वैव प्रतिपत्स्यादनुरागात् । सत्यम् । तथापि प्राप्तावपि पूर्वोक्तवचनैर्बाधात् । यथा पूर्वेद्युः कर्मकालव्यापिनीमपि त्यक्त्वा द्व्यहव्यापि परैव रामनवमीति प्रागुक्तम्, यथा

इत्यत्र तु शिवश्च शिवा च शिवौ तयोः पूजक इत्यर्थः । तत्र हेमाद्रिमाधवादिमते इदं नक्तव्रतम् । तत्र रात्रिपूजैव मुख्या । प्राधान्याङ्गपूजाद्युपलक्षम् । रात्रिभोजनादिति । तस्याङ्गत्वात्प्रासङ्गिकत्वाच्चेति भावः । नक्तं=रात्रिभोजनम् । रूपाद्यर्थकमिति । यत्तु यथा दशापवर्गे प्राप्तस्य दध्नो 'दध्नेन्द्रियकामस्य' इति न नित्यवदनुवादस्तद्वत्प्रकृतेऽपि प्रासङ्गिकत्वात्कथमनुवादः । किन्तु स यथा फलार्थं गुणविधिस्तथाऽयमपि स्यादिति । तन्न । दध्नः प्रधानत्वान्नक्तस्याङ्गत्वेनादोषात् । एवञ्च माधवमते पूजाङ्गप्रधानस्य नक्तकालत्वेन नवरात्रव्रते प्रदोषव्यापिनी प्रतिपद्ग्राह्या ।

(१)'दध्ना इन्द्रियकामस्य जुहुयात्' इति ।
(२)नित्यस्यानित्योऽनुवादो न भवतीति तदर्थः ।

वा निशीथे सतीमपि पूर्वां जन्माष्टमीं त्यक्त्वा रोहिणी-

प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा ।'

इति वाक्यात् 'कर्मणो यस्य यः कालः' इति कर्मकालशास्त्राच्च । अतश्च तत्र पूर्वेद्युरेव प्रदोषव्याप्तौ पूर्वा, अमायुक्ताविधानाद् द्वितीयायुक्तानिषेधाच्च । दिनद्वये तद्व्याप्तौ तत्स्पर्शे वा परा, द्वितीयायुताविधानादमायुतानिषेधाच्च । अत एव दिनद्वये तद्व्याप्तावपि परैव

'अन्यथात्वे परत्र स्यादस्तादर्वाग्यतो हि सा ।' इति ।

"प्रदोषव्यापिनी न स्याद्दिवानक्तं विधीयते ।
तन्नक्तं नक्तमित्याहुर्न नक्तं निशि भोजनम् ॥"

इति च सायाह्नरूपगौणकालव्याप्तिपरत्वात् । भोजनं तु रात्रावेव 'सायाह्ने तु भुञ्जिक्रियाम्' इतिवदिह विशेषवचनाभावेनावश्यकरात्रिसम्बन्धत्यागे मानाभावात् । न चात्र पूर्वोक्तयुक्त्या 'स्वकालादुत्तरः कालः' इति रीत्या गौणकाललाभात् पूजाद्युपक्रमस्य तिथ्यस्पर्शोऽपि प्रदोषे 'तिथ्यादौ च भवेद्यावान्' इत्याद्यापादितसाकल्यस्याभावाच्चेति चेन्न । एवं विशेषस्य माधवादिग्रन्थेऽदर्शनेन सर्वस्यापि नक्तनिर्णयस्य तदनियतत्वात् द्वितीयायुताविधानादमायुक्तानिषेधाच्च । द्विमुहूर्तापीत्यपिशब्दे कैमुत्यन्यायोपबन्धात्कलादिशब्दा अप्यविरुद्धाः । न च

'आद्यास्तु नाडिकास्त्याज्याः षोडश द्वादशापि वा ।'

इत्यादिषोडशादिनाडीत्यागानुपपत्तिः, प्रदोष एव पूजोपक्रमविधानादिति वाच्यम् । तस्य कुलाचारविशेषप्राप्तकलशस्थापनमात्रपरत्वात् ।

'आद्याः षोडशनाडीस्तु लब्ध्वा यः कुरुते नरः ।
कलशस्थापनम्' इति वचनात्कलशस्थापनं चामायुक्तप्रतिपदि न कार्यम् ।

"अमायुक्ता सदा चैव प्रतिपन्निन्दिता तथा ।

न्यूनाधिकत्वापत्तेः अत्र मूलाभावाच्च। तेन तिथिवाच्ये-
वाग्रम्। तदुक्तम्—

"तिथिवृद्धौ तिथिह्रासे नवरात्रमपार्थकम्।
*अष्टरात्रे न दोषोऽयं नवरात्रतिथिक्षये॥" इति।

स च नवरात्रशब्दः क्वचि*ल्लक्षणया कर्मवाची। यथा 'प्रारम्भो नवरात्रस्य' इत्यत्रेति दिक्॥

प्रतिपदि च वैधृत्यादियोगनिषेधो भार्गवार्चनदी-
पिकायां देवीपुराणे—

न्योरिति। अमावास्यारात्रौ प्रतिपत्प्रवेशाभावेऽपि प्रतिपत्प्र-
भृत्येवात्यन्तापचयेनाऽष्टरात्रप्रतिवृद्ध्याऽष्टम्यहोरात्रास्पर्शिनीं नवमीं
गृहीत्वा दशरात्रे तिथिवृद्धाविति शङ्कायामाह—*अष्टरात्रे
इति। रात्रिशब्दस्य तिथिवाचित्वादिति भावः। *लक्षणयेति।
'रथन्तरसामा सोमः' इत्यादौ सोमादिपदवत्। दिगर्थस्तु 'नवरात्राभि-
धं कर्म' इत्यादौ अभिधापदं न शक्त्यर्थकम्। 'सुरा वै वाजिनं
सुरा सोमः' इति नामातिदेशोक्तिवत् संज्ञासंज्ञिसम्बन्धस्य शा-
स्त्रप्रमेयत्वाभावात् तद्गमकस्य सामानाधिकरण्यादेरभावस्योक्त-
प्रायत्वात्, किन्तु प्रतिपत्त्यर्थकमिति। अत्र एकमपि पूजाद्यात्म-
कं प्रधानमसम्भवात्समुच्चयकालत्वाभ्यानातिथिष्वावर्तते, दिनन्यूनता-
यां तन्त्रेण, तदाधिक्ये तु व्रतप्रयोगस्य सकलतिथिव्याप्त्यर्थमावृ-
त्तिः। अत एव भविष्ये—

'व्रती सम्पूजयेद्देवीं सप्तम्यादिदिनत्रये।
द्वाभ्यां चतुरहोभिर्वा ह्रासवृद्धिवशात्तिथेः॥"

इत्युक्तम्। न चैवं ह्रासे वृद्धौ वा उपवासादिकर्मणो नवत्व-
नियमभङ्गप्रसङ्ग इति वाच्यम्, इष्टत्वात्। यथा एकदिने क्रियमाणे
षोडशप्रेतश्राद्धे प्रधानानामेकदेशकालकर्तृत्वादङ्गवत्तन्त्रेणानुष्ठाने
प्रसक्ते सम्बुद्धिभेदेनानुष्ठानं तथेह न, उपवासादिकर्मगतनवत्व-

'न रात्रौ स्थापनं कार्यं न च कुम्भाभिषेचनम्।'

इति मात्स्योक्तेः।

*"भास्करोदयमारभ्य यावत्तु दश नाडिकाः।

प्रातःकाल इति प्रोक्तः स्थापनारोपणादिषु॥"

इति विष्णुधर्मोक्तेश्च। रुद्रयामले—

*"स्नानं माङ्गलिकं कृत्वा ततो देवीं प्रपूजयेत्।

शुद्धाभिर्मृत्तिकाभिश्च पूर्वं कृत्वा तु वेदिकाम्॥

यवान्वै वापयेत्तत्र गोधूमांश्चापि संयुतान्।

तत्र संस्थापयेत्कुम्भं विधिना मन्त्रपूर्वकम्॥

सौवर्णं राजतं वापि ताम्रं मृन्मयजं तु वा॥" इति॥

अथ पूजाविधिः—सा च जयन्तीमन्त्रेण नवाक्षरेण वा कार्या। तदुक्तं दुर्गाभक्तितरङ्गिण्यां देवीपुराणे—

"कुर्याद्देव्यास्तु मन्त्रेण पूजां क्षीरघृतादिभिः।

(इत्युक्त्वा-)

जयन्ती मङ्गला काली भद्रकाली कपालिनी॥

दुर्गा क्षमा शिवा धात्री स्वधा स्वाहा नमोऽस्तु ते।

अनेनैव तु मन्त्रेण जपहोमौ तु कारयेत्॥" इति।

*'ॐ दुर्गे दुर्गे रक्षिणि स्वाहा' इति*नवाक्षरः।

ति मतभेदः। *भास्करोदयमिति। पूर्वाह्णस्य कर्मकालत्वपक्षे एतदप्यनुकूलम्: एतन्मात्रमापाततः 'प्रातरावाहयेद्देवीम्' इत्यादौ प्रातःकालः पूर्वाह्णः। कलशस्थापनं च सति सम्भवे प्रतिपद आद्यनाडीषोडशकं त्यक्त्वा कार्यम्। 'आद्याः षोडशनाडीस्तु' इति प्रामाणिकवचनात्। *स्नानमिति। तत्र 'सुस्नातस्तिलतैलेन' इत्युक्तेः तिलतैलेन कार्यम्।

*दुर्गे दुर्गे इति द्विरुक्तं, प्रणवस्तु नवाक्षरानन्तर्गत इति बोध्यम्। *नवाक्षर इति।

तत्र प्रतिपदि *प्रातरभ्यङ्गं कृत्वा देशकालौ संकीर्त्य ममेह

यमाग्न्यन्तः सपितृकान् विश्वान्देवान्यजेद्बुधः ॥
यमनिर्ऋतिमध्ये तु सप्तयक्षानथो यजेत् ।
रक्षोवरुणयोर्मध्ये भूतनाथानथो यजेत् ॥
गन्धर्वाप्सरसो देवान्मध्ये वरुणवाययोः ।
स्कन्दनन्दीश्वरौ शूलमहाकालौ च सोमतः ॥
ब्रह्मणः सप्तयक्षादीनीशानादिन्द्रतो यजेत् ।
(ब्रह्मसोममध्ये ईशानसोममध्ये इत्यादिरर्थः ।)
दुर्गाविष्णू स्वधामग्नेर्यमाद्वै मृत्युरोगकान् ॥
निर्ऋतेः श्रीगणपतिं वरुणाद्य एव च ।
वायुतो मरुतश्चैव ब्रह्मपादे धरां यजेत् ॥
कर्णिकाधश्च तत्रैव नदीर्गङ्गादिका यजेत् ।
तत्रैव सागरान्सप्त पूजयेद्वरुणालयात् ॥
(ब्रह्मपादमूले कर्णिकाधः पूर्वां नदीः सागरांश्च यजेदित्यर्थः ।
एतदन्तो वैदिको वा नाममन्त्रो वा पूजाहोममन्त्रः ।)
तस्योपरि सुमेरुं च मण्डलाद्बाह्यतोऽप्युदक् ।
(उदीचीक्रमेण सोमादि क्रमेणेति यावत् ।)
गौतमश्च भरद्वाजो विश्वामित्रश्च कश्यपः ॥
जमदग्निर्वसिष्ठोऽत्रिररुन्धत्या च नित्यशः ।
पूर्वादितश्च तद्बाह्ये ऐन्द्रीं कौमारिकामपि ॥
ब्राह्मीं तथा च वाराहीं चामुण्डां वैष्णवीं तथा ।
माहेश्वरीं वैनायकीमष्टशक्तीः समर्चयेत् ॥" इति ।
"सोमादेरायुधानीह क्रमेण स्थापयेद्बुधः ।
गदाशूले वज्रशक्ती दण्डखड्गौ तथैव च ॥
पाशाङ्कुशौ च तद्बाह्ये क्रमेणाथ यजेदृषीन् ।"

*प्रातरिति । प्रातःकालीनव्रतादिसंकल्पस्तु प्रातःसन्ध्यां

'पूर्णा दर्वि' इति पूर्णपात्रं निधाय तत्र वरुणं संपूज्य जीर्णायां नूतनायां वा प्रतिमायां दुर्गामावाह्य पूजयेत्। तद्यथा—*पूर्वोक्तं मन्त्रमुक्त्वा—

"आगच्छ वरदे देवि दैत्यदर्पनिषूदनि।
पूजां गृहाण सुमुखि नमस्ते शंकरप्रिये॥
सर्वतीर्थमयं वारि सर्वदेवसमन्वितम्।
इमं घटं समागच्छ तिष्ठ देवगणैः सह॥
दुर्गे देवि समागच्छ सान्निध्यमिह कल्पय।
बलिं पूजां गृहाण त्वमष्टाभिः शक्तिभिः सह॥"

इत्यावाह्य पूर्वोक्तमन्त्रेण षोडशोपचारैः पूजयित्वा माषभक्तबलिं कूष्माण्डादिबलिं वा निवेदयेत्।

"सुवर्णं रजतं मुक्ता राजावर्तं प्रवालकम्।
पञ्चरत्नं समाख्यातं पावनं पावनेषु तत्॥"

कालिकापुराणे—

"कनकं हीरकं नीलं पद्मरागं च मौक्तिकम्।
एतानि पञ्चरत्नानि रत्नशास्त्रविदो विदुः॥"

जीर्णां प्रतिमाञ्च कुम्भे ततः पश्चाद्वा स्थाप्य नूतनायां तु धातुमय्यामग्न्युत्तारणं कार्यम्। ततः प्राणप्रतिष्ठा कार्या। मृदादिमय्यां च केवलप्राणप्रतिष्ठैव नाग्न्युत्तारणमिति विशेषः। *पूर्वोक्तं 'जयन्ती मङ्गला काली' इति, नवाक्षरं वा। 'आगच्छ' इत्यादि अयं घटे दुर्गावाहनप्रकारः। प्रतिमायां तु—

"एहि दुर्गे महाभागे रक्षार्थं मम सर्वदा।
आवाहयाम्यहं देवि सर्वकामार्थसिद्धये॥
अस्यां मूर्तौ समागच्छ स्थितिं मत्कृपया कुरु।
रक्षां कुरु सदा भद्रे विश्वेश्वरि नमोऽस्तु ते॥"

'भगवति दुर्गे इहागच्छ इह तिष्ठ इह सन्निधेहि स्थिरा भव सु-

बाणं शूलं गदां शङ्खं डमरुं चक्रमूसलम् ॥"

इति ध्यात्वा प्रचण्डां पूर्ववदावाह्य 'ॐ ह्रीं श्रीं प्रचण्डायै नमः' इति मन्त्रेण पूर्ववत् पूजयेत् प्रणमेच्च—

"प्रचण्डे पुत्रदे नित्यं प्रचण्डगणसंस्थिते ।
सर्वानन्दकरे देवि तुभ्यं नित्यं नमो नमः ॥" इति ।

प्रणवः ह्रीं श्रीं सर्वत्र तत्तच्छक्तिनाम चतुर्थ्यन्तं तत्र तत्र बोध्यम् । ततो याम्यपत्रे चतुर्दशभुजा चण्डोग्रा । तद्ध्यानम् ।

"चामुण्डां घोरमेघाभां चतुर्दशभुजान्विताम् ।
खेटकं कार्मुकं घण्टां कपालं फलकं ध्वजम् ॥
दर्पणं वामतो दक्षे धारिणीं खड्गशूलकं ।
बाणं शङ्खं डमरुकं चक्रं मुसलमेव च ॥"

इति ध्यात्वा चण्डोग्रामावाह्य संपूज्य प्रणमेत्—

धात्री त्वं सर्वभूतानां सर्वभूतभयंकरी ।
देवि त्वं सर्वकार्येषु वरदा भव सर्वदा ॥" इति ।

निर्ऋतिपत्रे द्वादशभुजा चण्डनायिकाध्यानम्—

"ॐ चण्डनायिकां कृष्णां भुजैर्द्वादशभिर्युताम् ।
खेटकं कार्मुकं घण्टां कपालं फलकं ध्वजम् ॥
वामेषु धारिणीं दक्षे खड्गं बाणं त्रिशूलकम् ।
शङ्खं च मुसलं चक्रं सर्वशत्रुविनाशिनीम् ॥

चण्डनायिकाऽऽवाहनादि कृत्वा प्रणमेत्—

"या सिद्धिरिति नाम्ना च देवेशवरदायिनी ।
कलिकल्मषनाशाय नमामि चण्डनायिकाम् ॥" इति ।

वारुणपत्रे दशभुजाचण्डाध्यानम्—

"तमालाभां चण्डरूपां दशहस्तां च खेटकम् ।
कार्मुकं फलकं घण्टां कपालं वामबाहुषु ॥
दक्षिणे खड्गशूले वै चक्रं डमरुमूसले ॥"

इत्यावाहनादि प्रणमेत्

"देवि चण्डात्मिके चण्डि चण्डारिविजयप्रदे ।
धर्मार्थमोक्षदे देवि नित्यं मे वरदा भव ॥" इति ।

वायव्यपत्रे अष्टभुजां चण्डवतीं ध्यायेत्—

चण्डवतीं घनश्यामामष्टबाहुं च खेटकम् ।
कार्मुकं च कपालं च ध्वजं वामेषु धारिणीम् ॥
दक्षे खड्गं च त्रिशूलं च बाणं चक्रं च मुद्गरम् ।

ततश्चण्डवतीं चावाह्य प्रणमेत्—

"या सृष्टिस्थितिसंहारगुणत्रयसमन्विता ।
या पराः शक्तयस्तस्यै चण्डवत्यै नमो नमः ॥" इति ।

सौम्यपत्रे षड्भुजाचण्डरूपाध्यानम्

"षड्भुजां चण्डरूपिणीं कपालं खेटकं धनुः ।
वामेन बिभ्रतीं दक्षे खड्गं बाणं त्रिशूलकम् ॥"

अथावाहनं पूजनं च कृत्वा प्रणमेत्—

"चण्डरूपात्मिके चण्डि चण्डनायकनायिके ।
सर्वसिद्धिप्रदे देवि नित्यं तुभ्यं नमो नमः ॥" इति ।

ईशानपत्रे चतुर्भुजातिचण्डाध्यानम्—

"चण्डासुरस्य मथिनीं कृष्णवर्णां चतुर्भुजाम् ।
चापं कपालं वामे वै दक्षिणे शूलसायकं ॥"

अतिचण्डिकामावाह्य संपूज्य प्रणमेत्—

"बालार्कारुणनेत्रा या सर्वदा भक्तवत्सला ।
चण्डासुरस्य मथिनी वरदा त्वतिचण्डिका ॥" इति ।

येषां कुले कुम्भस्थापनं बलिदानादि नास्ति तैस्तन्न कार्यम् । दुर्गा प्रतिमा महिषघ्नीत्यादि प्रार्थना प्रतिमाया अभावे ऊहश्चात्र बोध्यः ।

ततः कुमारीपूजा । तदुक्तं हेमाद्रौ स्कान्दे—

*"एकैकां पूजयेत्कन्यामेकवृद्ध्या तथैव च ।
द्विगुणं त्रिगुणं वाऽपि प्रत्येकं नवकं तु वा ॥"

तथा—

"नवभिर्लभते भूमिमैश्वर्यं द्विगुणेन तु ।
एकवृद्ध्या लभेत्क्षेममेकैकेन श्रियं लभेत् ॥
एकवर्षा तु या कन्या पूजार्थं तां विवर्जयेत् ।
गन्धपुष्पफलादीनां प्रीतिस्तस्या न विद्यते ॥"

तेन *द्विवर्षामारभ्य दशवर्षापर्यन्ता एव पूज्या न त्वन्याः । तासां च क्रमेण—कुमारिका, त्रिमूर्तिः, कल्याणी, रोहिणी, काली, चण्डिका, शाम्भवी, दुर्गा, सुभद्रा इति नामभिः पूजा कार्या । आसां च प्रत्येकं पूजामन्त्राः फलविशेषाश्च तत्रैव ज्ञेयाः ।

---

*एकैकामिति पञ्च पक्षाः । देव्युपासकस्तु शुक्लाष्टम्यादावपि कुमारीं भोजयेत् ।

"शुक्लाष्टमीचतुर्दश्योर्नवम्यां च विशेषतः ।
कृष्णपक्षे विशेषेण भोजयेत्तु कुमारिकाम् ॥"

इति देवीपुराणात् । *द्विवर्षामिति ।

"द्विवर्षकन्यामारभ्य दशवर्षावधिक्रमात् ।
कुमारिका द्विवर्षा च त्रिवर्षा च त्रिमूर्तिनी ॥
चतुर्वर्षा तु कल्याणी पंचवर्षा तु रोहिणी ।
षड्वर्षा तु भवेत्काली सप्तवर्षा तु चण्डिका ॥
अष्टवर्षा शाम्भवी तु (१)कन्या तु नवभिः स्मृता ।
दशवर्षा सुभद्रेति नामभिः परिकीर्तिता ॥"

---

(१)यद्यप्यत्र सर्वेष्वादर्शपुस्तकेषु 'कन्या' इत्येव पाठो दृश्यते तथाऽपि मूले, पूजामन्त्रेषु चात्र दुर्गाया एव दर्शनात् 'दुर्गा तु नवभिः स्मृता' इत्येव पाठोऽपेक्ष्यते इति बोध्यम् ।

"जगत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्वरूपिणि ।
पूजां गृहाण कौमारि जगन्मातर्नमोऽस्तु ते ॥"

इति कुमार्याः पूजामन्त्रः ।

"त्रिपुरां त्रिपुराधारां ज्ञानमार्गस्वरूपिणीम् ।
त्रैलोक्यवन्दितां देवीं त्रिमूर्तिं पूजयाम्यहम् ॥"

इति (१)त्रिमूर्त्याः ।

"कामार्तानां कामपूर्तिं करुणाहृदयां शिवाम् ।
कल्याणजननीं नित्यं कल्याणीं पूजयाम्यहम् ॥"

इति कल्याण्याः ।

"अणिमादिगुणाधारामकाराद्यक्षरात्मिकाम् ।
अनन्तशक्तिकां लक्ष्मीं रोहिणीं पूजयाम्यहम् ॥"

इति रोहिण्याः ।

"कामचारीं कालरात्रिं कालचक्रस्वरूपिणीम् ।
कामदां करुणाधारां कालीं संपूजयाम्यहम् ॥"

इति काल्याः ।

"चण्डवीरां चण्डमायां चण्डमुण्डप्रभञ्जनीम् ।
पूजयामि सदा देवीं चण्डिकां चण्डविक्रमाम् ॥"

इति चण्डिकायाः ।

"सदानन्दकरीं शान्तां सर्वदेवनमस्कृताम् ।
सर्वभूतात्मिकां लक्ष्मीं शाम्भवीं पूजयाम्यहम् ॥"

इति शाम्भव्याः ।

"दुर्गमे दुस्तरे कार्ये भवदुःखविनाशिनीम् ।
पूजयामि सदा भक्त्या दुर्गां दुर्गार्तिनाशिनीम् ॥"

इति दुर्गायाः ।

"सुन्दरीं स्वर्णवर्णाभां सर्वसौभाग्यदायिनीम् ।
सुभद्रजननीं देवीं सुभद्रां पूजयाम्यहम् ॥"

---

(१)अत्र सर्वत्र पूजामन्त्र इत्यनुषज्यते ।

इति सुभद्रायाः। अथ पूजाफलानि।

"आयुष्यबलवृद्ध्यर्थं कुमारीं पूजयेन्नरः।
आयुष्कामस्त्रिमूर्तिन्तु त्रिवर्गस्य फलाप्तये॥
अपमृत्युव्याधिपीडादुःखानामपनुत्तये।
सौख्यधान्यधनारोग्यपुत्रपौत्रादिवृद्धये॥
कल्याणीं पूजयेद्धीमान्नित्यं कल्याणसिद्धये।
आरोग्यसुखकामी च जयकामी तथैव च॥
यशःकामी नरो नित्यं रोहिणीं परिपूजयेत्।
विद्यार्थी विजयार्थी च राज्यार्थी च विशेषतः॥
शत्रूणां च विनाशार्थी कालिकां पूजयेन्नरः।
ऐश्वर्यशुभकामी च स्वर्गकामी च यो नरः॥
संग्रामे जयकामी च चण्डिकां परिपूजयेत्।
दुःखदारिद्र्यनाशाय नृपसंमोहनाय च॥
महापापविनाशाय शाम्भवीं च प्रपूजयेत्।
सर्वोत्कटानां शत्रूणामुग्रसाधनकर्मणि॥
दुर्गां दुर्गार्तिनाशाय पूजयेद्यत्नतो बुधः।
सौभाग्यधनधान्यादिवाञ्छितार्थफलाप्तये॥
सुभद्रां पूजयेन्मर्त्यो दासादीनां विवृद्धये॥" इति।

अलाभे तु देवीपुराणे—

"तावत्संपूजयेत्कन्यां यावत्पुष्पं न दृश्यते।"

पूजाप्रकारो देवीपुराणे—ब्रह्मोवाच—

"न तथा तुष्यते शक्र होमदानजपेन तु।
कुमारीभोजनेनात्र यथा देवी प्रसीदति॥
(अ। नवरात्र)
प्रक्षाल्य पादौ सर्वासां कुमारीणां च वासव।

जात्यन्धां केकरां काणीं कुरूपां*तनुरोमशाम् ॥
संत्यजेद्रोगिणीं कन्यां दासीगर्भसमुद्भवाम् ॥"

तथा—

'ब्राह्मणीं सर्वकार्येषु जयार्थे नृपवंशजाम् ।
लाभार्थे वैश्यवंशोत्थां सुतार्थे शूद्रवंशजाम् ॥
दारुणे चान्त्यजातानां पूजयेद्विधिना नरः ॥' इति ॥

अत्र वेदपारायणमप्युक्तं रुद्रयामले—

"एवं चतुर्वेदविदो विप्रान्सर्वान् प्रसादयेत ।
तेषां च वरणं कार्यं वेदपारायणाय वै ॥" इति ।

तथा—

*एकोत्तराभिवृद्ध्या तु नवमी यावदेव हि ।

कुलां तथा' इति पाठान्तरम् । *तनुरोमशामिति कर्मधारयः ।

*एकोत्तरेति । प्रदोषे निशीथतः पूजानन्तरं रात्रौ चण्डीपाठः, तदसम्भवे प्रातर्गीतवादित्रनिर्घोषैः पूजाऽनन्तरं कार्यः । जपो जापश्च नारायणादीन्नमस्कृत्य कार्यः ।

"नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥"

इति भविष्यात् । जयश्च—

"अष्टादशपुराणानि रामस्य चरितं तथा ।
विष्णुधर्मादिशास्त्राणि शिवधर्माश्च भारत ॥
कार्ष्णश्च पञ्चमो वेदो यन्महाभारतं स्मृतम् ।
शैवधर्माश्च राजेन्द्र मानवोक्ता महीपते ॥
जयेति नाम चैतेषां प्रवदन्ति मनीषिणः ॥"

इति भविष्ये विस्तरः । देवीगृहेऽहोरात्रं दीपाश्च ज्वालनीयाः । पाठकोऽपि ब्राह्मण एव कार्यः ।

"ब्राह्मणं वाचकं विद्यान्नान्यवर्णजमादरात् ।

स्वयं च लिखितं यच्च*शूद्रेण लिखितं भवेत् ।
*अब्राह्मणेन लिखितं तच्चापि विफलं भवेत् ॥
ऋष्यादिच्छन्दादिकं न्यस्य पठेत्स्तोत्रं विचक्षणः ।
स्तोत्रे न दृश्यते यत्र प्रणवं तत्र विन्यसेत् ॥
सर्वत्र पाठो विज्ञेयस्त्वन्यथा विफलं भवेत् ॥'

एवं नवमीपर्यन्तं प्रत्यहं कुर्यात् । अत्र विशेषो हेमाद्रौ-देवीपुराणे—

'यदाद्ये दिवसे कुर्याच्चण्डिकापूजनादिकम् ।

महारणविमोक्षाय विंशावर्तं पठेत्सुधीः ॥
पञ्चविंशावर्तनात्तु भवेद्बन्धविमोक्षणम् ॥
संकटे समनुप्राप्ते दुश्चिकित्स्यामये तथा ॥
जातिध्वंसे कुलोच्छेद आयुषो नाश आगते ।
वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये ॥
तथैव त्रिविधोत्पाते तथा चैवातिपातके ।
कुर्याद्यत्नाच्छतावृत्तं ततः संपद्यते शुभम् ॥
श्रियो वृद्धिः शतावृत्त्याद्राज्यवृद्धिस्तथा परा ।
मनसा चिन्तितं देवि सिद्ध्येदष्टोत्तराच्छतात् ॥
शताश्वमेधयज्ञानां फलमाप्नोति सुव्रते ।
सहस्रावर्तनाल्लक्ष्मीरावृणोति स्वयं स्थिरा ॥
भुक्त्वा मनोरथान्कामान् नरो मोक्षमवाप्नुयात् ।
यथाऽश्वमेधः क्रतूनां देवानां च यथा हरिः ॥
स्तवानामपि सर्वेषां तथा सप्तशतीस्तवः ।
अथवा बहुनोक्तेन किमेतेन वरानने ॥
चण्ड्याः शतावृत्तिपाठात्सर्वाः सिद्ध्यन्ति सिद्धयः ॥" इति ।

*शूद्रेणेति । 'कृतिना' इति वा पाठः । कारुणा लेखोपजीविनेति यावत् । *अब्राह्मणेनेति । तदनुपजीव्यर्थकं भवेदिति ।

*शान्तिः स्वस्त्ययनं कार्यं तदा तेषां दिने दिने ।
धान्यं भल्लातकं कुष्टं वचा सिद्धार्थकास्तथा ॥
पञ्चवर्णेन सूत्रेण ग्रन्थिं तेषां तु बन्धयेत् ।
*वारुणैर्वारुणैः सौरैः शाक्तैर्मन्त्रैः सवैष्णवैः ॥
वैश्वदेवैस्तथाग्नेयैर्होमः कार्यो दिने दिने ॥'

कल्पतरौ त्वेतदग्रेऽन्यदपि—

'ऐरावणोऽथ पुरा तत्र गजाश्चाष्टौ महाबलाः ।
पृथिवीमावहन्पूर्वं सशैलवनकाननाम् ॥
कुमुदैरावणौ पद्मः पुष्पदन्तोऽथ वामनः ।
सुप्रतीकोऽञ्जनो नीलस्तस्मात्तांस्तत्र पूजयेत् ॥
शाकाद्वक्षात्समारभ्य नवम्यन्तं च पूर्ववत् ॥'
अष्टवक्त्रोमादीत्यर्थः ॥

अथ प्रतिपदादिषु विशेषो दुर्गाभक्तितरङ्गिण्यां भविष्ये—

'केशसंस्कारद्रव्याणि प्रदद्यात् प्रतिपद्दिने ।
*पक्वतैलं द्वितीयायां केशसंयमहेतवे ॥
(पट्टडोरमिति गौडपाठः ।)
दर्पणं च तृतीयायां सिन्दूरालक्तकं तथा ।

आद्यारम्भे विरामः स्यात् द्वितीयादौ न चिन्तयेत् ।
मलमासे न कर्तव्यं नवदुर्गोत्सवव्रतम् ॥''
इति देवीपुराणात् ।

*शान्तिः=अश्वशान्तिर्गजशान्तिश्च शान्तिमयूखादौ प्रसिद्धा । *वारुणैरिति । वैदिकैर्नाममन्त्रैर्वाऽष्टोत्तरशतं होमः ।
*पक्वतैलमिति । 'पट्टडोरम्' इति वा पाठः । सिन्दूरं भाले, अलक्तकं पादयोः । द्विवेति बोधने नवमीपूर्वाह्णः कालः दिनद्वययोगे तु आर्द्रायोगः । उपवासोऽप्यस्यामुक्तः ।
''तस्मादियं महापुण्या नवमी पापनाशिनी ।

अत्र स्त्रीव्रते विशेषः परिभाषायां ज्ञेयः ॥

अत्राशौचे विशेषो निर्णयामृते विश्वरूपनिबन्धे—

'आश्विने शुक्लपक्षे तु प्रारब्धे नवरात्रके ।
शावाशौचे समुत्पन्ने क्रिया कार्या कथं बुधैः ॥
सूतके वर्तमाने च तत्रोत्पन्ने सदा बुधैः ।
देवीपूजा प्रकर्तव्या पशुयज्ञविधानतः ॥
सूतके पूजनं प्रोक्तं दानं चैव विशेषतः ।
देवीमुद्दिश्य कर्तव्यं तत्र दोषो न विद्यते ॥' इति ।

कालादर्शे विष्णुरहस्येऽपि—

'पूर्वसंकल्पितं यच्च व्रतं सुनियतव्रतैः ।
तत्कर्तव्यं नरैः शुद्धं *दानार्चनविवर्जितम् ॥' इति ।

*गौडनिबन्धे तिथितत्त्वेऽप्युक्तम्—'आश्विनकृष्णनवम्यादि शुक्लप्रतिपदादि षष्ठ्यादि सप्तम्यादि वैकं कर्म । अतश्च मध्ये आशौचपातेऽपि न दोषः, *'संकल्पो व्रतसत्रयोः' इति विष्णूक्तेः' इति । *आरब्धं स्वयमेव कार्यम्, अनारब्धं त्वन्येन कारयेदिति दिवोदासः । रजस्वला त्वन्येन कारयेत् । सूतकादिवद्विशेषवचनाभा-

---

षङ्गमप्यधिकृत्याह—*दानार्चनेति । नन्वस्तु प्रधानयोरप्यर्चनदानयोर्निषेध इत्यत आह—*गौडेति । *संकल्प इति । एतच्चाशौचेन संकल्पत्यागो मा प्रसाङ्क्षीत् इत्येतदर्थम् । आशौचं निमित्तीकृत्यापूर्वसंकल्पविधौ गौरवात् । ततश्च कर्तव्यत्वेन साङ्गप्रधानं प्राप्नुयात् । तत्र दानार्चनविवर्जितमित्यङ्गयोरेव दानार्चनयोर्निषेधो न तु प्रधानयोस्तयोः । अन्यथा व्रतान्तरेऽङ्गयोरत्र तु प्रधानयोरिति वैरूप्याद् अत्र प्रधानयोस्तयोर्निषेद्धुमशक्यत्वाच्च । एवञ्च व्रतशब्देन प्रधानभूतपूजाबलिदानादिव्रतस्यापि ग्रह इति भावः । वर्तमाने तत्रोत्पन्ने इत्यनयोः फलमाह—*आरब्धमिति । पूर्वसंकल्पितत्वाविशेषणाच्च ।

रुद्रयामलेऽपि—
'मूलऋक्षे सुराधीश पूजनीया सरस्वती।
पूजयेत्प्रत्यहं देव यावद्वैष्णवमृक्षकम्॥
नाध्यापयेन्न च लिखेन्नाधीयीत कदाचन।
पुस्तके स्थापिते देव विद्याकामो द्विजोत्तमः॥'
(१)(संग्रहे—
'आश्विनस्य सिते पक्षे मेधाकामः सरस्वतीम्।
मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत्॥')
मूलस्याद्यपादे आवाहनमिति शिष्टाः। श्रवणाद्यपादे च विसर्जयेत्।
'आदिभागो निशायां तु श्रवणस्य यदा भवेत्।
संप्रेषणं तदा देव्या दशम्यां च महोत्सवः॥'
इति चिन्तामणौ ब्रह्माण्डपुराणात्॥
अथ षष्ठी। गौडनिबन्धे देवीपुराणे—
'व्रतस्यास्य फलं प्रोक्तं जागरे मुनिसत्तम'।
इति जागरस्य फलसम्बन्धात् प्रधानमिति वाच्यम्। करण्डपिधानं प्रकृत्य—
'तत्पूजयभिजगृहे परां वृद्धिमवाप्स्यति।'
इति फलसम्बन्धात् पूजैव प्रधानं "धातुसम्बन्धे प्रत्ययाः" (पा० सू० ३-४-१) इति पाणिनिस्मरणात्, जागरस्तु वापनदानादिवदङ्गम्। फलवत्सन्निधावफलं तदङ्गमिति न्यायात् व्रतस्यास्येति तु जागराभिन्नत्वेन प्रतीतेस्तस्यैव जागरे सति फलसम्बन्धबोधकं न तु जागरप्राधान्यबोधकमिति भावः। वस्तुतस्तु भुक्त्वा जागरणवाक्यं तत्प्रधानकव्रतपरम्। अङ्गानुरोधेन निर्णयस्याप्रासिद्धत्वात्। तस्मादिह मध्याह्नव्याप्त्यैव निर्णयः। पूजाव्रतोक्तिस्युक्तेः।

(१) कंसान्तर्गतो ग्रन्थ आदर्शपुस्तके नास्ति।

*'ज्येष्ठानक्षत्रयुक्तायां षष्ठ्यां बिल्वाभिमन्त्रणम् ।
सप्तम्यां मूलयुक्तायां पत्रिकायाः प्रवेशनम् ॥
पूर्वाषाढायुताष्टम्यां पूजाहोमाद्युपोषणम् ।
उत्तरेण नवम्यां तु बलिभिः पूजयेच्छिवाम् ॥
श्रवणेन दशम्यां तु प्रणिपत्य विसर्जयेत् ।'

कालिकापुराणे—

*बोधयेद्बिल्वशाखायां षष्ठ्यां देवीं फलेषु च ।

वेदयेत् । तत्र मन्त्रः—

"पक्वान्नं फलसंयुक्तं सघृतं दक्षिणान्वितम् ।
द्विजवर्याय दास्यामि व्रतसंपूर्तिहेतवे ॥"

अथवा—

"उपाङ्गललिते देवि व्रतसंपूर्तिहेतवे ।
वायनं द्विजवर्याय सहिरण्यं ददाम्यहम् ॥"
"ततः कथां समाकर्ण्य वायनान्नस्य संख्यया ।
स्वयमश्नात्तदेवान्नं वाग्यतस्सह बान्धवैः ॥"

तदेवान्नमित्यत्रान्तरपरिसंख्या न च त्रैदोष्यमत्रकारेणाऽन्यनिवृत्तेरुक्तत्वात् । "अत्र ह्येवावपन्ति" इतिवत् । सप्तम्यां बिल्वशाखापूजा कार्या ।

"आश्विनस्य सिते पक्षे सुमुहूर्त्तेन सप्तमी ।
तस्यां च पत्रिकापूजा कर्त्तव्या नरनायकैः ॥
प्रशस्तां सफलां बिल्वशाखामारुह्य पूजयेत् ॥"

इति वचनात् । तत्र बोधनकालः कृष्णनवमी तदुत्तरषष्ठी वा, तत्र षष्ठीप्रभृति पत्रिकापूजाविधानं श्रयति—*ज्येष्ठेति । तिथिनक्षत्रयोगलाभार्थमाश्विनकृष्णनवम्यादिशुक्लप्रतिपदादिपक्षौ निरूपितौ, तत्राशक्तस्य षष्ठ्यादिपक्षविधिमाह—*बोधयेदिति । पूर्वकल्पयोरपि षष्ठ्यां बोधनं पूर्वमेवोक्तम् । एतत्कल्पे स्वत्र कर्मार-

'षष्ठ्यां सायं प्रकुर्वीत बिल्ववृक्षेऽधिवासनम् ।'
इति पूर्ववचनादिति कल्पतरुः । सायंश्रुतिः फलाति-
शयमात्रार्था न तु कर्मलोप इत्याचार्यचूडामणिः । अत्र
क्रमः—बिल्वसमीपं गत्वा*देवीं बिल्वं च संपूज्य प्रार्थ-
येत् । तत्र मन्त्रः-

'रावणस्य वधार्थाय रामस्यानुग्रहाय च ।
अकाले ब्रह्मणा बोधो देव्यास्त्वयि कृतः पुरा ॥
*अहमप्याश्रितः षष्ठ्यां सायाह्ने बोधयाम्यतः ।
*श्रीशैलशिखरे जातः श्रीफलः श्रीनिकेतनः॥
नेतव्योऽसि समागच्छ पूज्यो दुर्गास्वरूपतः ॥' इति ।

"ज्येष्ठा याऽप्यथवा षष्ठी सायंकाले न चेद्भवेत् ।
सायमेव तथापि स्याद्बिल्वशाखाभिमन्त्रणम् ॥
पूर्वां षष्ठीं सनक्षत्रां सायं प्राप्तामपि त्यजेत् ।
यदा तु पत्रिकापूजा परेद्युर्न भविष्यति ॥
सान्निकृष्टे तु यत्पूर्वं पत्रिकादिवसस्य तु ।
तद्दिने वरणं कृत्वा परशाखामपूजयेत् ॥"
इति मत्स्यसूक्तादिति । *देवीं बिल्वं चेति । आर्थक्र-
मानुरोधाच्छाब्दक्रमत्यागः । तथा च—'बिल्ववृक्षाय नमः' इति
बिल्वतरुं संपूज्य बिल्ववृक्षं 'जयन्ती' इत्यादि 'दुर्गे इहागच्छ' इत्यादि
च दुर्गामावाह्य पूजयित्वा गीतवाद्यपुरःसरं देवीं बोधयेदित्यर्थः ।
*अहमपीति । नवमीबोधनपक्षे-

"इषे मास्यसिते पक्षे नवम्यामार्द्रयोगतः ।
श्रीवृक्षे बोधयामि त्वां यावत्पूजां करोम्यहम् ॥"
इति मन्त्रः स्मर्तव्यः । *श्रीशैलेति ।
"मेरुमन्दरकैलासहिमवच्छिखरे गिरौ ।
जातः श्रीफलवृक्ष त्वमम्बिकायाः सदाप्रिय ॥"

इतिदेवलोक्तेरिति गौडाः । *दाक्षिणात्यास्तु पूर्ववचन-मदृष्ट्वा युग्मवाक्यात्पूर्वां कुर्वन्ति । पत्रिकापूजा च *पूर्वाह्ण एव कार्या न तु मूलानुरोधान्मध्याह्नादाविति कृत्यतत्त्वार्णवे उक्तम् । पत्रिकास्तु

'रम्भा कच्वी हरिद्रा च जयन्ती बिल्वदाडिमौ ।
अशोको मानवृक्षश्च धान्यादिनवपत्रिकाः ॥'

इति तत्रैवोक्ताः ।

अस्यामेव सप्तम्यां देवीत्रिरात्रमुक्तं हेमाद्रौ । प्रतिपदादिनवतिथिषु उपवासकरणासामर्थ्ये सप्तम्यादिदिनत्रयं वा कुर्यात् । तदाह धौम्यः—

आश्विने मासि शुक्ले तु कर्तव्यं नवरात्रकम् ।
प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत् ॥
त्रिरात्रं वाऽपि कर्तव्यं सप्तम्यादि यथाक्रमम् ॥'

अत एव हेमाद्रौ देवीपुराणे मङ्गलाव्रते

'आश्विने वाथवा माघे चैत्रे वा श्रावणेऽपि वा ।
कृष्णाष्टम्यादि कर्तव्यं व्रतं शुक्लावधि हरेः ॥
यावच्छुक्लाष्टमी शक्र उपोष्या तु विधानतः ।
दानं होमो जपः पूजा कन्या भोज्यास्तथान्वहम् ॥

केचित । *दाक्षिणात्यास्त्विति । अरुचिः स्पष्टैव । 'पूर्वाह्णे पूजयेच्छिवाम्' इत्युक्तेः । *पूर्वाह्ण एवेति । तदुक्तम् —

"पूर्वाह्णे नवपत्रिका शुभकरी सर्वार्थसिद्धिप्रदा
आरोग्यं धनदा करोति विजयं चण्डीप्रवेशे शुभा ।
मध्याह्ने जनपीडनक्षयकरी संग्रामघोरावहा
सायाह्ने वधबन्धनादिकलहं सर्वक्षतं सर्वदा ॥
सप्तम्यामस्तगायां यदि विशति गृहं पत्रिका श्रीफलाढ्या
राज्ञः सप्ताङ्गराज्यं जनसुखमखिलं हन्ति मूलानुरोधात् ।

अत्र विशेषो निर्णयामृते भविष्ये—

"सप्तम्यां नव गेहानि दारुजानि नवानि च ।
एकं वा *वित्तभावेन कारयेत्तु समाहितः ॥
दुर्गागृहं प्रकर्तव्यं चतुरस्रं सुशोभनम् ।
तन्मध्ये वेदिकां कुर्याच्चतुर्हस्तां समां शुभाम् ॥
तस्यां सिंहासनं क्षौमं कम्बलाजिनसंयुतम् ।
तत्र *दुर्गां प्रतिष्ठाप्य सर्वलक्षणसंयुताम् ॥
भुजैश्चतुर्भिः रुचिरैर्दशभिर्वा विभूषिताम् ।
तप्तहाटकवर्णाभां त्रिनेत्रां शशिशेखराम् ॥

"व्रती संपूजयेद्देवीं सप्तम्यादिदिनत्रये ।
द्वाभ्यां चतुर्भिर्होमैर्वा ह्रासवृद्धिवशात्तिथेः ॥"

इति भविष्यात् । त्रिरात्रपक्षे तु मुख्यकल्पत्वेन निर्णयस-त्त्वान्नाकाङ्क्षा । *वित्तभावेनेति । वित्ताभावे तु पूर्वगृहमेव व-स्त्रादिभिः कदलीस्तम्भादिभिश्च भूषणीयमिति सूचितम् । *दु-र्गामिति । सर्वलक्षणानि सामुद्रशास्त्रोक्तानि मात्स्ये—

"जटाजूटसमायुक्तामर्द्धेन्दुकृतशेखराम् ।
लोचनत्रयसंयुक्तां पूर्णेन्दुसदृशाननाम् ॥
अतसीपुष्पवर्णाभां सुप्रतिष्ठां सुलोचनाम् ।
('तप्तकाञ्चनवर्णाभाम्' इति प्रमाणान्तरादतसीपुष्पं स्वर्णपुष्पं ग्राह्यं, तच्च पीतम् ।)
नवयौवनसंपन्नां सर्वाभरणभूषिताम् ॥
सुचारुदशनां तद्वत्पीनश्रोणिपयोधराम् ।
त्रिभङ्गस्थानसंस्थानां महिषासुरमर्दिनीम् ॥
त्रिशूलं दक्षिणे दद्यात्खड्गं चक्रं क्रमादधः ।
तीक्ष्णं बाणं तथा शक्तिं वामतोऽपि निबोधत ॥
खेटकं पूर्णचापं च पाशमङ्कुशमूर्द्धतः ।

देवीधृतकरग्रीवं शूलेनोरसि ताडितम् ।
नागपाशेन विक्षिप्तं हर्यक्षेणापि विद्रुतम् ॥
वमद्रुधिरवक्त्रेण धुन्वतोर्ध्वं सटान् रुषा ।
सर्वतो मातृचक्रेण सेव्यमानां सुरैस्तथा ॥" इति ।
"तत्र देवी प्रकर्तव्या हैमी वा राजती तथा ।
मृद्वार्क्षी लक्षणोपेता खड्गशूले च*पूजयेत् ॥"
वार्क्षी=दारुमयी ।

देवीमूर्तिस्थापने विशेषो दुर्गाभक्तितरङ्गिण्यां देवी-पुराणे—

'वारुणास्या शुभदा दुर्गा पूर्वास्या जयवर्धिनी ।
पश्चिमाभिमुखी नित्यं, न स्थाप्या सौम्यदिङ्मुखी ॥'

प्रतिमाऽभावे विशेषस्तत्रैव—

"हैमराजतमृद्धातुशैलचित्रार्पितापि वा ।
खड्गे शूलेऽर्चिता देवी सर्वकामफलप्रदा ॥
यत्नास्त्यायुधं प्रोक्तं नास्मिस्तां प्रतिपूजयेत् ।
देवी भक्त्यार्चिता पुंसां राज्यायुः सुतसौख्यदा ॥"

कृत्यतत्त्वार्णवे कालिकापुराणे—

"लिङ्गस्थां पूजयेद्देवीं मण्डलस्थां तथैव च ।
पुस्तकस्थां महादेवीं पावके प्रतिमासु च ॥
चित्रे च त्रिशिखे खड्गे जलस्थां वापि पूजयेत् ।
बिल्वपत्रैर्यजेद्देवीं तथा जातीप्रसूनकैः ॥
नानापिष्टकनैवेद्यैर्धूपदीपैर्मनोहरैः ॥

आयुधद्वयधारणेन दशभुजा । *पूजयेदिति ।
"मृन्मयीं प्रतिमां कृत्वा बिल्वे वा यस्तु पूजयेत् ।
आत्मवित्तानुसारेण स लभेन्मौक्तिकं फलम् ॥"

छित्त्वा*संपूज्य—'ॐ चामुण्डे चल चल' इति*वाद्यघोषेण देवीं तां च*गृहं प्रवेश्य—

न्त्रः । उपदेशादिहीनानान्तु वानस्पत्यमन्त्रः । स च 'वानस्पत्योसि बार्हस्पत्योसि' इत्यादिः । फलद्वययुतामपराजितां दिगन्तां शाखां छेदयेत् । *संपूज्येति । नाममन्त्रेण बिल्वशाखां तत्र मनिमां देवीं चावाहनपूर्वकं संपूज्य माषभक्तादिबलिं दत्त्वा दोलनादिना शाखां देवीं च गृहमानयेत् । तत्राह—*वाद्येति ।

"गीतवादित्रनिर्घोषं देव्या अग्रे च कारयेत् ।
घण्टा भवेदशक्तस्य सर्ववाद्यमयी यतः" ॥

इति मात्स्यात् । गृहाङ्गणे पीठात्रस्थितां शुद्धोदकेन स्नापयित्वा माषभक्तादिबलिं च दत्त्वा पूजागृहस्थानि भूतानि नाममन्त्रेण गन्धादिभिः संपूज्य बलिं दद्यात् । तत्र मन्त्रः—

भूताः प्रेतपिशाचाश्च ये वसन्त्यत्र भूतले ।
ते गृह्णन्तु मया दत्तो बलिरेष प्रसाधितः ॥
पूजिता गन्धपुष्पाद्यैर्बलिभिस्तर्पितास्तथा ।
देशादस्माद्विनिष्क्रम्य पूजां पश्यन्तु मत्कृताम् ॥"

भूतेभ्य एष माषभक्तबलिर्नमम इति । ततः सर्षपान्विकिरेत्—

"अपसर्पन्तु ते भूता ये भूता भूमिपालकाः ।
भूतानामविरोधेन देवीपूजां करोम्यहम् ॥"

'फट्' इति तान्यपसारयेत् । एतच्चावश्यकम् ।

"स्थितेषु तत्र भूतेषु नैवेद्यं मण्डलं तथा ।
विलुम्पन्ति महालुब्धा न च गृह्णन्ति देवताः ॥
तस्माद्यत्नेन कर्तव्यं भूतानामपसारणम् ॥"

इति कालिकापुराणात् ।

"लाजचन्दनसिद्धार्थफलपुष्पकुशाक्षताः ।
विकिरा इति संप्रोक्ताः सर्वविघ्नविनाशकाः ॥

यज्ञभागान् गृहाण त्वं योगिनीकोटिभिः सह॥" इति।

ततो मूलमन्त्रेण पाद्यादिगन्धान्तोपचारैः—

"अमृतोद्भवं च श्रीवृक्षं शंकरस्य सदा प्रियम्।
बिल्वपत्रं प्रयच्छामि पवित्रं ते सुरेश्वरि॥"

इति बिल्वपत्रम्।

"ब्रह्मविष्णुशिवादीनां द्रोणपुष्पं सदा प्रियम्।
तत्ते दुर्गे प्रयच्छामि सर्वकामार्थसिद्धये॥"

इति द्रोणपुष्पं निवेद्य *धूपादिदक्षिणान्तां पूजां मूलेन कृत्वा प्रार्थयेत—

"ॐ महिषघ्नि महामाये चामुण्डे मुण्डमालिनि।
आयुरारोग्यमैश्वर्यं देहि देवि नमोऽस्तु ते॥
कुङ्कुमेन समालब्धे चन्दनेन विलेपिते।
बिल्वपत्रकृतापीडे दुर्गेऽहं शरणं गतः॥
रूपं देहि यशो देहि भगं भवानि देहि मे।
पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे॥"

*'सर्वमङ्गलमाङ्गल्ये' इति च संप्रार्थ्य पश्चात् पूज-

ताञ्जलिः पठेत्। मूलमन्त्रेण जयन्तीमन्त्रेण 'दुर्गायै नमः' इत्यनेन वा पुष्पगन्धाक्षतकुङ्कुमदधिदूर्वाकुशतिलबिल्वपत्रयुतजलेनार्घ्यमाचमनं पञ्चामृतं स्नानादि पुनराचमनीयम्। वस्त्रयुग्ममाचमनं गन्धपुष्पाञ्जलित्रयं समर्प्य। *धूपादीति। पुष्पधूपदीपनैवेद्याचमनताम्बूलदक्षिणाः मूलेन जयन्तीमन्त्रेण 'दुर्गायै नमः' इत्यनेन वा समर्प्य स्तुतिभिः स्तुत्वा प्रणम्य बद्धाञ्जलिः प्रार्थयेदित्यर्थः। *सर्वमङ्गलेति।

"सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते॥"

इति श्लोकेन।

नमः' इत्यादि संपूज्य प्रणमेत्—

निशुम्भशुम्भमथने सेन्द्रैर्देवगणैः सह।
पूजिताऽसि जयन्ती त्वमस्माकं वरदा भव॥"

'बिल्वस्थशिवे' इत्याद्यावाह्य—'ह्रीं बिल्वस्थाशिवायै नमः' इति संपूज्य प्रणमेत्—

"महादेवप्रियकरो वासुदेवः प्रियस्सदा।
उमाप्रीतिकरो वृक्षो बिल्ववृक्ष नमोऽस्तु ते॥"

'दाडिमस्थरक्तदन्तिके' इत्याद्यावाह्य—'ह्रीं दाडिमस्थरक्तदन्तिकायै नमः' इति संपूज्य प्रणमेत्—

"दाडिम त्वं पुरा युद्धे रक्तबीजस्य सम्मुखे।
उमाकार्यं कृतं तस्मादस्माकं वरदा भव॥"

'अशोकस्थशोकरहिते' इत्याद्यावाह्य—'ह्रीं अशोकस्थशोकरहितायै नमः' इत्यादि संपूज्य प्रणमेत्—

"हरप्रीतिकरो वृक्षो अशोकः शोकनाशनः।
दुर्गाप्रीतिकरो यस्मान्मामशोकं सदा कुरु॥"

'मानस्थचामुण्डे(१)' इत्याद्यावाह्य—'ह्रीं मानस्थचामुण्डायै नमः' इत्यादि संपूज्य प्रणमेत्—

"यस्य पत्रे वसेद्देवी मानवृक्ष शचीप्रिय।
मम चाऽनुग्रहार्थाय पूजां गृण्ह प्रसीद मे॥"

'धान्यस्थलक्ष्मि इहागच्छ' इत्याद्यावाह्य 'ह्रीं धान्यस्थलक्ष्म्यै नमः' इत्यादि संपूज्य प्रणमेत्—

"जगतः प्राणरक्षार्थं ब्रह्मणा निर्मितं पुरा।
उमाप्रीतिकरं धान्यं तस्मात्त्वं रक्ष मां सदा॥" इति।

एवं संपूज्यापराजिताख्यल्लतया ता आवेष्ट्य 'अपराजितान-

(१) चाण्डके इति पाठान्तरम्।

विन्ध्यस्थां विन्ध्यनिलयां दिव्यस्थाननिवासिनीम् ।
योगिनीं योगमातां च चण्डिकां प्रणमाम्यहम् ॥
ईशानमातरं देवीमीश्वरामीश्वरप्रियाम् ।
प्रणतोऽस्मि सदा दुर्गां संसारार्णवतारिणीम् ॥
य इदं पठते स्तोत्रं शृणुयाद्वापि यो नरः ।
स मुक्तः सर्वपापैस्तु मोदते दुर्गया सह ॥"

अथ महाष्टमी । सा च*परयुता ।

"शुक्लपक्षेऽष्टमी चैव शुक्लपक्षे चतुर्दशी ।
पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुता ॥"

इति ब्रह्मवैवर्तात् । मदनरत्ने स्मृतिसंग्रहे—

"शरन्महाष्टमी पूज्या नवमीसंयुता सदा ।
सप्तमीसंयुता नित्यं शोकसंतापकारिणी ॥
जम्भेन सप्तमीयुक्ता पूजिता तु महाष्टमी ।
इन्द्रेण निहतो जम्भस्तस्माद्दानवपुङ्गवः ॥
तस्मात्सर्वप्रयत्नेन सप्तमीमिश्रिताष्टमी ।
वर्जनीया प्रयत्नेन मनुजैः शुभकाङ्क्षिभिः ॥
सप्तमीं शल्यसंयुक्तां मोहादज्ञानतोऽपि वा ।
महाष्टमीं प्रकुर्वाणो नरकं प्रतिपद्यते ॥
सप्तमी कलया यत्र परतश्चाष्टमी भवेत् ।
तेन शल्यमिदं प्रोक्तं पुत्रपौत्रक्षयप्रदम् ॥"

तथा—

"पुत्रान्हन्ति पशून्हन्ति हन्ति राष्ट्रं सराजकम् ।
हन्ति जातानजातांश्च सप्तमीसहिताष्टमी ॥"

*तेन नात्र त्रिमुहूर्तवेधः । तदा घटिकामात्राप्यौद-

---

*परयुतेति । पत्रीपूजाऽतिरिक्ते देवीपूजायामित्यादिः । शुद्धाधिका तु पूर्वैव संपूर्णत्वात् । *तेन 'सप्तमी कलया' इति

लेशमात्रेण सप्तम्या अपि स्याद्यदि दूषिता ॥" इति ।

महाष्टमी पूर्वेद्युः पूर्वाह्णव्यापित्वे पूर्वाऽन्यथा परेवे-ति निर्णयदीपमतम् । एतच्च*तुच्छत्वादुपेक्ष्यम् । रूपना-रायणधृते देवीपुराणे—

"सप्तमीवेधसंयुक्ता यैः कृता तु महाष्टमी ।
पुत्रदारधनैर्हीना भ्रमन्तीह पिशाचवत् ॥"

यत्तु—

"सप्तम्यामुदिते सूर्ये*परतो याऽष्टमी भवेत् ।
तत्र दुर्गोत्सवं कुर्यान्न कुर्यादपरेऽहनि ॥"

इति विश्वरूपनिबन्धवचनं तदाश्विनकृष्णाष्टमीविषयम् ।

"कन्यायां कृष्णपक्षे तु पूजयित्वाष्टमीदिने ।
नवम्यां बोधयेद्देवीं गीतवादित्रनिःस्वनैः ॥"

इति देवीपुराणे तत्रापि*पूजोक्तेरिति हेमाद्रौ नि-र्णयामृते चोक्तम् । यानि तु—

*"भद्रायां भद्रकाल्याश्च मध्ये स्यादर्चनक्रिया ।
तस्माद्वै सप्तमीविद्धा कार्या दुर्गाष्टमी बुधैः ॥" इति,

यच्च मोहचूलोत्तरे ब्राह्मे च—

*"आश्विनस्य सिताष्टम्यामर्धरात्रे तु पार्वती ।
भद्रकाली समुत्पन्ना पूर्वाषाढासमायुता ॥" इति,

सम्भवात् ।

*तुच्छत्वादिति । ऋक्षयोगेऽप्यनादरवचनात् । *पर-त इति । 'शुद्धा' इति शेषः । अत एव 'न कुर्यात्' इत्यादि । ए-तेनेदं परदिने शुद्ध्यभावे सप्तमीविद्धाग्राह्यत्वार्थकमिति शङ्काऽपा-स्ता । *पूजोक्तेरिति । नवमीप्रबोधनाङ्गपूजायां कृष्णपक्षाष्टम्याः पूर्वविद्धात्वस्य युक्तत्वात् । *भद्रायां सप्तम्याम् । *आश्विन-स्येति । निशीथो जन्मकालः । स एव कर्मकाल इति सप्तमीयोगो

तथा—

"तस्यामष्टम्यां भद्रकाली दक्षयज्ञविनाशिनी ।
प्रादुर्भूता महाघोरा योगिनीकोटिभिः सह ॥" इति,

तच्च मदनरत्ने—

"महाष्टम्यादिवेन यापि शुक्ला कल्याणकारिणी ।
सप्तम्यापि युता कार्या मूलेन तु विशेषतः ॥" इति,

तानि परदिनेऽष्टम्यभावविषयाणीति मदनरत्ने उक्तम् । यत्तु तत्रैव परदिनेऽष्टमीसत्त्वेऽपि पूर्वविद्धाविधायकं वचनम्—

"यदाष्टमीं तु संप्राप्य याम्यं याति दिवाकरः ।
तत्र दुर्गोत्सवं कुर्यान्न कुर्यादपरेऽहनि ॥
दुर्भिक्षं तत्र जानीयादनवम्यां यत्र पूजनं ॥" इति,

तत् परदिने दशम्यां नवम्यभावविषयम् ।

'यदा सूर्योदये न स्यान्नवमी चापरेऽहनि ।
तदाष्टमीं प्रकुर्वीत सप्तम्या सहितां नृप ॥"

इति तत्रैव स्मृतिसंग्रहोक्तः

"उत्तरास्तिथयो यत्र क्षयं याति नराधिप ।
पूर्वाष्टमीं तदा कुर्यादन्यथा त्वशुभं भवेत् ॥"

इति दुर्गोत्सवांकोक्तेति मदनरत्ने । *वस्तुतस्तु इदं वचनद्वयं*मष्टमीनवम्योः सूर्योदयद्वयासंबन्धपरम् । अत एव 'नवमी च' इति चकारादष्टमी च । तिथय इति

युक्त इति भावः । *न कुर्यादिति । एतेन परदिने ग्राह्यत्वे । तत्राद्यवाक्ये नवमीसत्त्वो न वर्तते, द्वितीयवाक्ये च दशमीसत्त्वे च पूर्वाष्टम्याघातविरिव्यत आह—*वस्तुतस्त्विवति । *अष्टमीति । नवमी चेति चकारादष्टमी ग्राह्या । उत्तरास्तिथय इति

बहुवचनादष्टमी नवमी दशम्युक्ता । अन्यथा*पूर्वोक्तवि-
रोधादिति दिक् ।

यत्तु-

"अहं भद्रा च भद्राहं नावयोरन्तरं क्वचित् ।
सर्वसिद्धिं प्रदास्यामि भद्रायामर्चिता ह्यहम् ॥"

इति देवीपुराणे, तद्विष्टिकरणमध्ये पूजाविधानार्थम् ।

"विष्टिं त्यक्त्वा महाष्टम्यां मम पूजां करोति यः ।
तस्य पूजाफलं न स्यात्तेनाहमवमानिता ॥"

इति तत्रैवोक्तेरिति निर्णयामृते । तथा कालिकापुराणे-

*"सप्तम्यां पत्रिकापूजा अष्टम्यां चाप्युपोषणम् ।
पूजा च जागरश्चैव नवम्यां विधिवद्बलिः ॥" इति ।

बहूत्वं तन्त्रम् । अष्टमीक्षये तात्पर्यात् । *पूर्वोक्तेति । 'सप्तमीशल्य-
संविद्धा' इति प्रकृत्य—'यस्यां सूर्योदयो भवेत्' इत्युक्तेरित्यर्थः ।
तेनाष्टमीक्षये सप्तमीग्राह्यत्वव्यञ्जनात् । दिगर्थस्तु—

"महाष्टम्याश्विने मासि शुक्ला कल्याणकारिणी ।
सप्तम्याऽपि युता कार्या मूलेन तु विशेषतः" ॥

इत्यपि अष्टमीक्षय एव सप्तमीविद्धाग्रहार्थम् । किन्तु मूलवैशि-
ष्ट्यविधौ सप्तमीयुतत्वमपिशब्दश्रवणादर्थवादः 'वैश्वदेवे तु न-
क्षत्रे' इति निषेधे विद्धयुक्तापीत्यपिशब्दवदिति ।

*विष्टिमिति । निर्णीताष्टम्यां विष्टिभागे पूजेत्यर्थः । *सप्त-
म्यामिति दिवापूजाभिप्रायम् । अयं च नवरात्रपक्षः । व-
स्तुतस्त्वयं षष्ठ्यादिपक्षः पत्रिकापूजापदात् । सप्तम्यादित्रिदिन-
देवीपूजापक्षोऽपि—

'त्र्यहं संपूजयेद्देवीं सप्तम्यादिदिनत्रयम् ।'

इति भविष्योत्तरे चोक्तः । अष्टमीनवम्योरेव वा
देवी पूज्या ।

उपोषितैर्वस्त्रधूपमाल्यस्नानानुलेपनैः ॥
पशुभिः पानकैर्हव्यै रात्रौ जागरणेन च ।
*दुर्गागृहे च शस्त्राणि पूजितव्यानि पण्डितैः ॥
वाद्यभाण्डानि चिह्नानि कवचान्यायुधानि च ॥"

अत्र *विशेषो हेमाद्रौ निर्णयामृते च भविष्ये—

"आश्वयुक्शुक्लपक्षस्य अष्टमी मूलसंयुता ।
सा महानवमी नाम त्रैलोक्येऽपि सुदुर्लभा ॥
कन्यागते सवितरि शुक्लपक्षेऽष्टमीयुता ।
मूलनक्षत्रसंयुक्ता सा महानवमी स्मृता ॥
नवम्यां पूजिता देवी ददात्यभिमतं फलम् ।
सा पुण्या सा पवित्रा च सा धन्या सुखदायिनी ॥
तस्यां सदा पूजनीया चामुण्डा मुण्डमालिनी ॥
(सदेत्युक्तेर्नित्यताऽपि ।)
तस्यां ये वत्युपयन्ते प्राणिनो महिषादयः ।
सर्वे ते स्वर्गतिं यान्ति घ्नतां पापं न विद्यते ॥
यावन्न चालयेद्गात्रं पशुस्तावन्न हन्यते ।
न तथा बलिदानेन पुष्पधूपविलेपनैः ॥
यथा संतुष्यते मेषैर्महिषैर्विन्ध्यवासिनी ।
एवं च विन्ध्यवासिन्या नवरात्रोपवासतः ॥
एकभुक्तेन नक्तेन स्वशक्त्यायाचितेन च ।
पूजनीया जनैर्देवी स्थाने स्थाने पुरे पुरे ॥

पञ्चाब्दं लक्षणोपेतं गन्धधूपस्रगर्चितम् ॥
विधिवत्कालिकाली ति जप्त्वा खड्गेन घातयेत् ॥"

इति देवीपुराणात् । पञ्चाब्दं महिषमजं वा । अष्टम्यां होमो वक्ष्यते । *दुर्गागृहे इति । अष्टम्यामस्त्रादिपूजा । लोहाभिसारिकापूजा त्वन्यैव तस्याः प्रतिपद्येवारम्भात् । *विशेषो दिवापू-

हृतशेषं*तुरङ्गाणां राजानमुपहारयेत् ॥
लोहाभिसारिकं कर्म तेनैव ऋषिभिः स्मृतम् ।
धृतपल्ययनानश्वान् गजांश्च समलंकृतान् ॥
भ्रामयेन्नगरे नित्यं बन्दिघोषपुरःसरम् ।
प्रत्यहं नृपतिः स्नात्वा संपूज्य पितृदेवताः ॥
पूजयेद्राजचिह्नानि फलमाल्यविलेपनैः ।
तस्याभिसरणाद्राज्ञो विजयः समुदाहृतः ॥
पूजामन्त्रान्प्रवक्ष्यामि पुराणोक्तानहं तव ।
यैः पूजिताः प्रयच्छन्ति कीर्तिमायुर्यशो बलम् ॥"

अथ मन्त्रा विष्णुधर्मोत्तरोक्ताः । छत्रस्य—

"यथा ऽम्बुदश्छादयति शिवायैतां वसुन्धराम् ।
तथाऽऽच्छादय राजानं विजयारोग्यवृद्धये ॥"

चामरस्य—

"शशाङ्ककरसंकाशक्षीरडिण्डीरपाण्डुर ।
प्रोत्सारयाशु दुरितं चामरामरदुर्लभ ॥"

अश्वानां वृद्ध्यर्थं रेवन्तपूजनमहं करिष्ये ।

इति वचनात् ।

*तुरङ्गाणामिति । हृतशेषदानं च श्रेष्ठे गजेऽपि—
'हृतशेषं प्रदात्वयमौपनायनिके गजे ।'

इति वाक्यात् । तत्र प्रथमतः पूजको ब्राह्मणः प्रार्थयेत्—
यथा चन्द्रश्छादयति शिवायैतां वसुन्धराम् ।
तथाऽऽच्छादय राजानं विजयारोग्यवृद्धये ॥" इति ।

पूजा च षोडशोपचारा पदार्थाऽनुसमयेन काण्डाऽनुसमयेन वा सर्वत्र कार्या । तत्र छत्रादिमन्त्रैः छत्रादिदेवता आवाह्य गन्धादिपञ्चोपचारानन्तरं फलताम्बूलदक्षिणान्ता, विसर्जनस्थाने च पुष्पाञ्जलिः कार्या । ततश्चामरमन्त्रेण चामरानन्यादिक्रमेणेति ।

शक्रः सेनापतिः स्कन्दो वरुणश्चाश्रितास्त्वयि ॥
प्रदहन्तु रिपून्सर्वान्राजा विजयमृच्छतु ।
यानि प्रयुक्तान्यरिभिरायुधानि समन्ततः ॥
पतन्तूपरि शत्रूणां हतानि तव तेजसा ।
हिरण्यकशिपोर्युद्धे युद्धे देवासुरे तथा ॥
कालनेमिवधे यद्वद्यद्वत्त्रिपुरघातने ।
शोभितासि तथैवाद्य शोभयास्मांश्च संस्मर ॥
नीलान्श्वेतानिमान्दृष्ट्वा नश्यन्त्वाशु नृपारयः ।
व्याधिभिर्विविधैर्घोरैः शस्त्रैश्च युधि निर्जिताः ॥
पूतना रेवती नाम्ना कालरात्रिश्च या स्मृता ।
दहत्वाशु रिपून्सर्वान्पताके त्वं मयार्चिता ॥"

अथ गजस्य—

"कुमुदैरावणौ पद्मः पुष्पदन्तोऽथ वामनः ।
सुप्रतीकोऽञ्जनो नील एतेऽष्टौ देवयोनयः ।
तेषां पुत्राश्च पौत्राश्च वनान्यष्टौ समाश्रिताः ।
मन्दो भद्रो मृगश्चैव गजः संकीर्ण एव च ।
वने वने प्रसूतास्ते *यूथानि सुमहान्ति च ।
पान्तु त्वां वसवो रुद्रा आदित्याः समरुद्गणाः ।
भर्तारं रक्ष नागेन्द्र स्वामिवत्प्रतिपाल्यताम् ॥
अवाप्नुहि जयं युद्धे गमने स्वस्ति नो व्रज ।
श्रीस्ते सोमाद्बलं विष्णोस्तेजः सूर्याज्जवोऽनिलात् ॥
स्थैर्यं मेरोर्जयं रुद्राद्यशो देवात्पुरंदरात् ।
युद्धे रक्षन्तु नागास्त्वां दिशश्च सह दैवतैः ॥
अश्विनौ सह गन्धर्वैः पान्तु त्वां सर्वतः सदा ॥" इति ।

---

*यूथानि सुमहान्तिचेति । 'स्मरयोनि महागज' इति वा

अथ खड्गमन्त्रः—

"असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः ।
श्रीगर्भो विजयश्चैव धर्मपालस्तथैव च ॥
एतानि नव नामानि स्वयमुक्तानि वेधसा ।
नक्षत्रं कृत्तिका ते तु गुरुर्देवो महेश्वरः ॥
रोहिणी च शरीरं ते दैवतं च जनार्दनः ।
पिता पितामहो देवस्त्वं मां पालय सर्वदा ॥
नीलजीमूतसंकाश तीक्ष्णदंष्ट्र कृशोदर ।
भावशुद्धो मर्षणश्च अतितेजास्तथैव च ॥
इयं येन धृता क्षोणी हतश्च महिषासुरः ।
तीक्ष्णधाराय शुद्धाय तस्मै खड्गाय ते नमः ॥"

अथ छुरिकायाः—

"सर्वायुधानां प्रथमं निर्मितासि पिनाकिना ।
शूलायुधाद्विनिष्कृष्य कृत्वा मुष्टिग्रहं शुभम् ॥
चण्डिकायाः प्रदत्तासि सर्वदुष्टनिबर्हिणी ।
तया विस्तारिता चासि देवानां प्रतिपादिता ॥
सर्वसत्त्वाङ्गभूतासि सर्वाशुभनिबर्हिणि ।
छुरिके रक्ष मां नित्यं शान्तिं यच्छ नमोऽस्तु ते ॥"

अथ कट्टारकपूजा—

'रक्षाङ्गानि गजान् रक्ष रक्ष वाजिधनानि च ।
मम देहं सदा रक्ष कट्टारक नमोऽस्तु ते ॥'

कट्टारको मध्यदेशे 'कटारी' इति प्रसिद्धा ।

अथ धनुःपूजा—

"सर्वायुधमहामात्र सर्वदेवारिसूदन ।
चाप मां समरे रक्ष साकं शरवरैरिह ॥
धृतं कृष्णेन रक्षार्थं संहाराय हरेण च ।

त्र्यक्षीमूर्त्तिगतं देवं धनुरस्त्रं नमाम्यहम् ॥"

अथ कुन्तपूजा—

"प्रास पातय शत्रूंस्त्वमनया नाकमागया ।

गृहाण जीवितं तेषां मम सैन्यं च रक्षताम् ॥"

अथ चर्मपूजा—

"शमप्रदस्त्वं समरे चर्म सैन्ये यशोऽस्य मे ।

रक्ष मां रक्षणीयोऽहं तापनेय नमोऽस्तु ते ॥"

अथ कनकदण्डमन्त्रः—

"प्रोत्सारणाय दुष्टानां साधुसंरक्षणाय च ।

ब्रह्मणा निर्मितश्चासि व्यवहारप्रसिद्धये ॥

यशो देहि सुखं देहि जयदो भव भूपतेः ।

ताडयस्व रिपून्सर्वान्हेमदण्ड नमोऽस्तु ते ॥"

अथ दुन्दुभिमन्त्रः—

"दुन्दुभे त्वं सपत्नानां घोरो हृदयकम्पनः ।

भव भूमिपसैन्यानां तथा विजयवर्धनः ॥

यथा जीमूतघोषेण प्रहृष्यन्ति च बर्हिणः ।

तथास्तु तव शब्देन हर्षोऽस्माकं मुदावहः ॥

यथा जीमूतशब्देन स्त्रीणां त्रासोऽभिजायते ।

तथात्र तव शब्देन त्रस्यन्त्वस्मद्विषो रणे ॥"

अथ शङ्खमन्त्रः—

"पुण्यस्त्वं शङ्ख पुण्यानां मङ्गलानां च मङ्गलम् ।

विष्णुना विधृतो नित्यमतःशान्तिप्रदो भव ॥"

अथ सिंहासनमन्त्रः—

"विजयो जयदो जेता रिपुघाती शुभङ्करः ।

पाठः । हृदयवर्धनः हृदयच्छेदनः, हृदयकम्पनइति वा पाठः । वि-जयवर्धनः विना ? । पुण्यशङ्खानां शङ्खपुण्यानामिति वा पाठः ।

कुमुदैः सपद्मपुष्पैः सधूपदीपैः सनैवेद्यैः ।
मांसैर्बल्युपहारैर्मङ्गलशब्दैः समुच्छलितैः ॥
विहितकुङ्कुमयानैः स्यन्दनासितशस्त्रधारिजनलोकैः ।
तुष्टैः पञ्चम्यादि तु निवेद्यते सर्वमेव भगवत्यै ॥
दुर्गा सा पूजनीया च तद्दिने द्रोणपुष्पकैः ।
ततः खड्गं नमस्कृत्य शत्रूणां वधसिद्धये ॥
इच्छेत विजयं राज्यं सुभिक्षं चात्मने नृपः ।
पुनः पुनः प्रणम्यार्यां संस्मरन्हृदये शिवाम् ॥
सर्वं कृत्वेति कौरव्य *अष्टम्यां जागरं निशि ।
नटनर्तकगीतैश्च कारयेच्च महोत्सवम् ॥
एवं हृष्टैर्निशां नीत्वा प्रभाते अरुणोदये ।
घातयेन्महिषान्मेषानग्रतो नतकन्धरान् ॥
शतमर्धशतं वापि तदर्धं वा यथेच्छया ।
सुरासवभृतैः कुम्भैस्तर्पयेत्परमेश्वरीम् ॥
कापालिकेभ्यस्तद्देयं दासीदासजने तथा ।
ततोऽपराह्णसमये नवम्यां वै रथे स्थिताम् ॥
भवानीं भ्रामयेद्राष्ट्रे स्वयं राजा सशब्दवान् ।

दर्पः=कस्तूरी । *शैलं शैलेयम् । साऽत्रमान्येति कुत इत्यत्राह—*सुरेशान्या इति ।

यतस्तस्याः सुरेशान्या अग्रेऽयं साधको रुद्र इत्यन्वयः । अत्र-मानं तु तमेव नाशयेत् इति भावः । प्रसिद्धश्च श्रीमद्भागवते जडभरतबलिदानार्थं प्रवृत्तानां शूद्राणामेव नाशो देवीकृतः । सर्वादिनाकृत्यं सायंपूजान्तम् । निशीथकृत्यमाह—*अष्टम्यामिति ।

"पुनः पूजा तथाऽष्टम्यां विशेषेण समाचरेत् ।
जागरं च स्वयं कुर्याद्बलिदानं महानिशि ॥"

इति कालिकापुराणसंवादात् । पुनः सायंपूजानन्तरं

सा महानवमी प्रोक्ता त्रैलोक्येऽपि सुदुर्लभा ॥' इति।

मूलमुपलक्षणम् ।

'दुर्गापूजासु नवमी *मूलाद्यृक्षत्रयान्विता ।
महती कीर्तिता तस्यां दुर्गा महिषमर्दिनी ॥'

इति मदनरत्ने लिङ्गात् । अत्र पूजयेदित्यग्रे शेषः । यानि तु—'सा (१)कार्योदयगामिन्याम्' इत्यादि प्रागुक्तानि तानि नवमीभिन्नतिथिपराणि । नवम्यां विशेषोक्तेः । वेधश्च मुहूर्तत्रयेणैव ज्ञेयः । यद्यपि हेमाद्रिमते मुहूर्तद्वयात्मकोऽपि वेधोऽस्ति, तथापि सूर्योदय एव सः । सायं तु त्रिमुहूर्त एव । तदुक्तं दीपिकायाम्—'त्रिमुहूर्तगा तु सकला सायम्' इति । माधवोऽपि—

'सायं तूत्तरगा तद्वन्न्यूनया न तु विध्यते ।' इति ।

तेन त्रिमुहूर्तयोगे पूर्वा नवमी, पूर्वोक्तवचनात्

'न कुर्यान्नवमी तात दशम्यां तु कदाचन ।'

इति स्कान्दे परानिषेधाच्च । त्रिमुहूर्तयोगाभावे तु निषिद्धाऽपि परैव कार्येति *निष्कर्षः ।

संयुता नवमीत्यर्थः । *मूलादीति । आदिना पूर्वाषाढापरिग्रहः ।

"पूर्वयाऽषाढया वाऽपि ऋक्षद्वययुताऽथ वा" ।

इति वचनात् ।

"मूलाभावे तु कर्तव्या अष्टमी नोपसंयुता ।
विश्वयुक्ताऽपि कर्तव्या अष्टमी नवमीयुता ॥"

इत्युत्तराषाढावाक्यं त्वनर्थकम् ।

"मूलेन पूजयेद्देवीं तथा सलिलदैवते ।
वैश्वदेवे तु नक्षत्रे पूजिता दुःखदा भवेत् ॥"

इति वचनात् । *निष्कर्ष इति । पूर्वविद्धायां नवम्यां

१—एतदग्रे—'तिथावुत्तरगामिन्याम्' इत्यधिकः क्वचित्पाठः ।

ध्येवम् । *यत्तु—

'अष्टम्यां बलिदानेन पुत्रनाशो भवेद् ध्रुवम् ।'

इति कालिकापुराणं, तत्संधिपूजापरम् ।

'अष्टमीनवमीसन्धौ *तृतीया खलु कथ्यते ।'

इति तत्रैव तदुक्तेः । कामरूपनिबन्धे—

*'अष्टम्याः शेषदण्डश्च नवम्याः पूर्व एव च ।
तत्र या क्रियते पूजा विज्ञेया सा महाफला ॥'
अष्टमीमात्रे *भवत्येव ।
'आश्विने पूजयित्वा तु अर्धरात्रेऽष्टमीषु च ।
घातयन्ति *पशून्भक्त्या ते भवन्ति महाबलाः ॥'
तथा—
'कन्यासंस्थे रवावीशे शुक्लाष्टम्यां प्रपूजयेत् ।
सोपवासो निशार्धे तु महाविभवविस्तरैः ॥'
तथा—
'पशुघातश्च कर्तव्यो गवयाजवधस्तथा ।'

नवम्यां तत्र सम्पूज्या दुर्गा दुर्गार्तिनाशिनी ।"
(इति) प्रातर्नवम्यां बल्यर्थपूजाविधानात् परेद्युर्नवमी, तदभावे
तु पूर्वेद्युर्नवमीमध्य एव बल्यादि कार्यम् ।

"दशम्यां बलिदानन्तु दीयते यत्र मानवैः ।
तद्राष्ट्रं नाशमायाति मारकोपद्रवैः समम् ॥"

इति शुद्धदशम्यां नवमीयुक्तबलिदानकरणे दोषोक्तेः । *य-
त्त्विति । अष्टमीयुक्तबलिदानस्य तत्रैव कर्तव्यत्वात्कथमेतत् ?
*तृतीयेति । सायंपूजा प्रथमा निशीथपूजा द्वितीया सन्धिपूजा
तृतीयेत्यर्थः । सन्धिपूजाविधिमाह—*अष्टम्या इति ।
*भवत्येवेति । बलिदानमित्यादि । *पशूनिति । बहुकु-
लाचाराभिप्रायं कार्यं वा । राजा तु महानवम्यामुपवास-

न्ति। *समुच्चयस्तु युक्तः। रुद्रयामले तु विकल्प उक्तः, तत्तु निर्मूलम्। दुर्गाभक्तितरङ्गिण्यादिगौडग्रन्थेष्वपि नवम्यां होम उक्तः।

*होमे च विशेष उक्तो डामरतन्त्रे—
'पायसं सर्पिषा युक्तं तिलैः शुक्लैर्विमिश्रितम्।
होमयेद्विधिवद्भक्त्या दशांशेन नृपोत्तम॥
*रुद्राध्याये यथा होमं मन्त्रेणैकेन साधयेत्।
तथा*स्तोत्रजपे होमं श्लोकेनैकेन साधयेत्॥

---

*शुक्लाधिकेति। नन्दापूर्णाभद्रात्रयेति शेषः। *समुच्चयस्त्विति। वस्तुतस्तु यद्यपि

'जपहोमसमायुक्तः कन्यकां भोजयेन्मुदा।'

इति वचनात् प्रत्यहं होमः प्रतीयते तथापि अष्टम्यामेव नवम्यामेव वा कार्यः। 'तत्राष्टम्यां भद्रकालि' इत्युपक्रम्य 'होमैर्ब्राह्मणतर्पणैः' इति ब्राह्मे अष्टमीकृत्यमध्ये पाठात् नवमीकृत्यमध्ये—'नवम्यां बलिदानं च' इति कालिकापुराणाच्च। अथ वा—

'पूर्वाषाढायुताऽष्टम्यां पूजाहोमाद्युपोषणम्'।

इत्यष्टम्याम्

'नवम्यां बलिदानं च कर्तव्यं वै यथाविधि।
जपं होमं च विधिवत्' इति नवम्यां च विधानात्तथा शिष्टाचाराच्चाष्टम्यामारभ्य नवम्यां समापनीयः। होमद्रव्यं च तिलाज्यादि।

'पूजयेत्तिलहोमैश्च दधिक्षीरघृतादिभिः।'

इति दुर्गापुराणात्। होमश्च गुरूपदिष्टमन्त्रेण सप्तशतीमन्त्रेण जयन्तीमन्त्रेण इति मन्त्रत्रयम्। तत्राद्यमभिप्रेत्याह—*होमे चेति। कात्यायनीतन्त्रोक्तमार्गेणायं होम इति मान्त्रिकाः। द्वितीयमभिप्रेत्याह—*रुद्राध्याये इति। रुद्राध्याये मन्त्रविभागो बौधायनाद्युक्तः, अत्र तु कात्यायनीतन्त्रोक्तः। *स्तोत्रज-

*रहस्ये तु—

'प्रतिश्लोकं च जुहुयात्पायसं तिलसर्पिषा ।'

इत्युक्तम् । *दुर्गाभक्तितरङ्गिण्यां तु *तिलैर्जयन्ती-मन्त्रेण च होम उक्तः ।

'पुरश्चरणकार्ये तु बिल्वपत्रयुतैस्तिलैः ।'

इति कालिकापुराणाद्बिल्वपत्रैश्चेति स्मार्ताः, तन्न । अन्यत्र मानाभावात् ॥

अथ बलिदानम् । तत्राश्वमेधच्छागमाहिषस्वमांसा-नामुत्तरोत्तरप्राशस्त्यं फलविशेषश्चान्यतोऽवसेय इति दिक् । बलिप्रकारस्तु देवीपुराणे—

'कन्यासंस्थे रवौ शक्र: शुक्लाष्टम्यां प्रपूज्य तु ।

द्रोणपुष्पैश्च बिल्वाम्रजातीपुन्नागचम्पकैः ॥

तपः प्रकृत्यै भद्रायै नियताः प्रणताः स्मृताम् ॥''

*रहस्ये त्विति । तिलसर्पिर्मात्रोपादानं वचनान्तरोक्त-दध्यादेरुपलक्षणं तदावश्यकत्वार्थं वा । तृतीयमाह-*दुर्गाभक्तीति । *तिलैरिति । तिलाज्यादिभिरित्यर्थः ।

'पूजयेत्तिलहोमैश्च दधिक्षीरघृतादिभिः ।'

इति देवीपुराणात् । मन्त्रश्च जयन्तीत्यादिः ।

'अनेनैव तु मन्त्रेण जपहोमादि कारयेत् ।'

इति देवीपुराणात् । होमद्रव्यप्रमाणन्तु सिद्धान्तशेखरे—

'होमद्रव्यप्रमाणानि वक्ष्यन्तेऽथ यथाक्रमम् ।

कर्षप्रमाणमाज्यं स्यान्मधुक्षीरं च तत्समम् ॥

तण्डुलानां शुक्तिमात्रं पायसं प्रसृतेः समम् ।

कर्षमात्राणि भक्ष्याणि लाजा मुष्टिमिता मताः ॥

अन्नं ग्रासमयं प्राह्यं शाकं ग्रासार्धमात्रकम् ।

मूलानान्तु त्रिभागः स्यात्कन्दानामष्टमोऽशकः ॥

सूकरी सर्वाङ्गुलयो हंसी मुक्तकनिष्ठिका ।
मृगी कनिष्ठतर्जन्यौ मुद्रात्रयमुदाहृतम् ॥
आभिचारिकहोमे च सूकरी कथ्यते बुधैः ।
यज्ञे शान्तिककल्याणे मृगी हंसी प्रकीर्तिते ॥
स्यात् त्रिमुद्रा मृगी मुद्रा होमे सर्वफलप्रदा ।" इति ।

शारदायाम्—
"अथात्र होमद्रव्याणां प्रमाणमभिधीयते ।
कर्षमात्रं घृतं होमे शुक्तिपात्रं पयः स्मृतम् ॥
उक्तानि पञ्चगव्यानि तत्समानि मनीषिभिः ।
तत्समं मधु दुग्धान्नमक्षमात्रमुदाहृतम् ।
दधि प्रसृतिमात्रं स्यात् लाजाः स्युर्मुष्टिसम्मिताः ।
पृथुकास्तत्प्रमाणाः स्युः सक्तवोऽपि तथोदिताः ।
गुडं पलार्धमानं स्याच्छर्कराऽपि तथा स्मृता ।
ग्रासार्धं चान्नमानं स्यादिक्षुः पर्वावधिः स्मृतः ॥
एकैकं पत्रपुष्पादि तथा धूपादि कल्पयेत् ।
कदलीफलनारङ्गफलान्येकैकशो विदुः ।
मातुलुङ्गं चतुःखण्डं पनसं दशधा स्मृतम् ॥
अष्टधा नारिकेलानि खण्डितानि विदुर्बुधाः ।
त्रिधा कृतं फलं बैल्वं कपित्थं खण्डितं द्विधा ।
उर्वारुकफलं होमे चोदितं खण्डितं त्रिधा ॥
फलान्यन्यान्यखण्डानि समिधः स्युर्दशाङ्गुलाः ।
दूर्वात्रयं समुद्दिष्टं गुडूची चतुरङ्गुला ॥
व्रीहयो मुष्टिमात्राः स्युर्मुद्गमाषयवा अपि ।
तण्डुलास्तु तदर्धांशाः कोद्रवा मुष्टिसम्मिताः ।
गोधूमा रक्तकलमा विहिता मुष्टिमानतः ॥
तिलाश्चुलुकमात्राः स्युर्सर्षपास्तत्प्रमाणतः ।
शुक्तिप्रमाणं लवणं मरीचान्येकविंशतिः ।

'कूष्माण्डमिक्षुदण्डं च*मांसं मारणमेव च ।
एते बलिसमाः प्रोक्तास्तृप्तौ छागसमाः सदा ॥'

रुद्रयामलेऽपि—
'छागाभावे तु कूष्माण्डं श्रीफलं वा मनोहरम् ।
वस्त्रसंवेष्टितं कृत्वा छेदयेच्छुरिकादिना ॥'

तथा—
'ब्राह्मणेन सदा देयं कूष्माण्डं बलिकर्मणि ।
श्रीफलं वा सुराधीश छेदं नैव तु कारयेत् ।'
(छेदे विकल्पः ।)
*माषान्नेन बलिर्देयो ब्राह्मणेन विजानता ।'

कालिकापुराणे—

ब्राह्मणस्य तु—
'सात्त्विकी जपहोमाद्यैर्नैवेद्यैश्च निरामिषैः ।'

इति वचनात् सात्त्विक्यामेवैतत्पूजायामधिकारात् श्रीमद्भगवद्गीतादिषु ब्राह्मणस्य सात्त्विक्यामत्राधिकारात् । एवं सुरया स्वगात्ररुधिरेण च पूजाऽपि न ब्राह्मणस्य ।

'मद्यं दत्त्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते ।
स्वगात्ररुधिरं दत्त्वा ब्रह्महत्यामवाप्नुयात् ।"

इति कालिकापुराणे एव तन्निषेधात् । मयूखे तु—
पशुबली राज्ञा देयः "विजयार्थं नृपोत्तम" इति वचनादित्युक्तम् । *मांसं मारणमेव चेति । 'मद्यमांसवदेव च' इति पाठः । तत्र मारणं मद्यम् । मद्यं मांसं च ब्राह्मणस्य वर्ज्यम् ।

'राजसी बलिदानाद्यैर्नैवेद्यैः सामिषैस्तथा ।'

इति मांसबलिदानादे राजसत्वोक्तेर्मद्यनिषेधाच्च । *माषान्नेति ।

'भिस्सा स्त्री भक्तमन्धोऽन्नमोदनोऽस्त्री स दीदिविः ।'

बलिदाने तु दुर्गायाः सर्वत्रायं विधि स्मृतः ॥'

मत्स्यसूक्ते–

*'नवम्यां *पूर्ववत्पूजा कर्तव्या भूतिमिच्छता ।

दक्षिणां वस्त्रयुग्मं च आचार्याय निवेदयेत् ॥'

अथात्र प्रसङ्गाच्छतचण्डीविधानमुच्यते । रुद्रयामले–

'शतचण्डीविधानं च प्रोच्यमानं शृणुष्व तत् ।

सर्वोपद्रवनाशार्थं शतचण्डीं समारभेत् ॥

पतिः । पूजामन्त्रः शालिहोत्रे–

"नमो देवाधिदेवाय तुरङ्गवलधारिणे ।

सूर्यपुत्राय देवाय तुरङ्गसहिताय च ॥

तुरङ्गपरिगस्य नृगजोपरि धावति ।

साऽश्वमस्त्राधिपं त्वद्य स तूर्णं त्वां व्रजाम्यहम् ॥

मन्त्रेणानेन रेवन्तं पाद्यार्घैरर्चयेत्सुधीः ॥" इति ।

ततः—

'सूर्यपुत्र महाबाहो छायाहृदयनन्दन ।

शान्तिं कुरु तुरङ्गाणां रेवन्ताय नमो नमः ॥"

इति मन्त्रेण प्रार्थयेत् । एवं नवम्यां होमादि कृत्वाऽनन्तरं स्तु-

(कृ)त्यमाह—*नवम्यामिति । *पूर्ववत्पूजेति । कुमारीपूजा

इत्यर्थः । अत्र ब्राह्मणपूर्वकं ब्राह्मणभोजनादि द्रष्टव्यम् ।

"अभोजयित्वा विप्राग्र्यानसम्पूज्य च तानपि ।

अदत्त्वा दक्षिणां तेभ्यो भूयसीं चापि पापकृत् ॥

यो मां पूजयते हृष्टः स मां द्वेष्टि नराधमः ॥"

इति वचनात्

'गजाश्वशय्यावस्त्रादि दद्याद्धर्मादि वा पुनः ।'

इति वचनात् 'व्रतान्ते विप्रभोजनम्' इति वचनात्

'तदन्ते भोजयेद्विप्रान्दानं दद्याच्च शक्तितः ।'

पट्टकूलयुगच्छन्नां देवीं मध्ये निधापयेत् ॥
देवीं संपूज्य विधिवज्जपं कुर्युर्दश द्विजाः ।
शतमादौ शतं चान्ते जपेन्मन्त्रं नवार्णवम् ॥
चण्डीं सप्तशतीं मध्ये संपुटोऽयमुदाहृतः ।
एकं द्वे त्रीणि चत्वारि जपेद्दिनचतुष्टयम् ॥
रूपाणि क्रमशस्तद्वत्पूजनादिकमाचरेत् ।
पञ्चमे दिवसे प्रातर्होमं कुर्याद्विधानतः ॥
गुडूचीं पायसं दूर्वां तिलाञ्शुक्लान्यवानपि ।
चण्डीपाठस्य होमं तु*प्रतिश्लोकं दशांशतः ॥
होमं कुर्याद्ग्रहादिभ्यः समिदाज्यचरून्क्रमात् ।
हुत्वा पूर्णाहुतिं दद्याद्विप्रेभ्यो*दक्षिणां क्रमात् ॥
कपिलां गां नीलमणिं श्वेताश्वं छत्रचामरे ।
अभिषेकं ततः कुर्युर्यजमानस्य ऋत्विजः ॥
अलङ्कृतभुजामिभिरायुधैः कमलासनाम् ।
सर्वदेवमयीमीशां महालक्ष्मीमिमां नृप ॥
पूजयेत्सर्वलोकानां स देवानां प्रभुर्भवेत् ॥" इति ।

*अष्टभुजा यथा—
"देवी चाष्टभुजा बाणमूसले शूलचक्रभृत् ।
शङ्खं घण्टां लाङ्गलं च कार्मुकं वसुधाधिप ॥
एषा सम्पूजिता भक्त्या सर्वज्ञत्वं प्रयच्छति ॥" इति ।

अत्र—
"खड्गबाणगदाशूलशङ्खचक्रभुशुण्डिभृत् ।
परिघं कार्मुकं शीर्षं निश्चोतद्रुधिरं दधत् ॥"
इति दशभुजा च नोक्ता । स्फुरद्दशनदंष्ट्राया भीमरूपत्वा-
युक्ता नवमा भयप्रदत्वात् । *प्रतिश्लोकमिति । श्लोकाः मन्त्र-
त्वाद्विभागा नागांनभिद्वांक्षः । *दक्षिणामिति ।

जातिभ्रंशो कुलोच्छेदेऽप्यायुषो नाश आगते ॥
वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये ।
तथैव त्रिविधोत्पाते तथा चैवोपपातके ॥
कुर्याद्यत्नात्कुत्रायमं ततः संपद्यते शुभम् ।
श्रियो वृद्धिः शतावृत्त्या राज्यवृद्धिस्तथापरा ॥
मनसा चिन्तितं देवि सिद्ध्येदष्टोत्तराच्छतात् ।
सहस्रावर्तनाल्लक्ष्मीरावृणोति स्वयं स्थिरा ॥
भुक्त्वा मनोरथान्कामान्नरो मोक्षमवाप्नुयात् ।
चण्ड्याः शतावृत्तिपाठात्सर्वाः सिद्ध्यन्ति सिद्धयः ॥'

इति शतचण्डीसहस्रचण्डीविधिः ॥

अथ नवरात्रपारणानिर्णयः । *सा च दशम्यां कार्या ।

*'आश्विने मासि शुक्ले तु कर्तव्यं नवरात्रकम् ।
प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत् ॥
त्रिरात्रं वापि कर्तव्यं सप्तम्यादि यथाक्रमम् ॥'

इति हेमाद्रौ भविष्यवचनात् ।

*'नवमीतिथिपर्यन्तं वृद्ध्या पूजाजपादिकम् ।'

इति प्रागुक्तवचनैर्नवमीपर्यन्तं प्रधानभूतपूजाद्युक्ते-रुपवासादेश्चाङ्गत्वेन तत्पर्यन्तत्वादादिशब्देनोपवासो-क्तेः *पूर्वोक्तत्रिरात्रव्रते नवम्या अप्युपोष्यत्वाच्च ।

---

*सा चेति । विसर्जने दशम्यां संपूज्य प्रेषणं कुर्यात् । 'दशम्यां शारदोत्सवैः' इत्युक्तभविष्यात् पारणस्य नियमत्याग-रूपस्य विसर्जनोत्तरकालत्वात्तदपि विसर्जनोत्तरं दशम्यामेव कार्यमित्यर्थः । तत्र नियमं नवमीपर्यन्तं दर्शयति—*आश्विने इति । यावच्छब्दो न मर्यादार्थः किन्त्वभिविध्यर्थः । अत एवाह—*नवमीति । परिशब्दोऽनर्थकः, नवमीतिथ्यन्तमित्यर्थः । नन्वत्र-*पूर्वोक्तेति । त्रिरा-भूत उपवासो नवम्यां न कार्य इत्यत आह—*पूर्वोक्तेति । त्रिरा-

'जयाभिलाषी नृपतिः प्रतिपत्प्रभृतिक्रमात् ।
लौहाभिसारिकं कर्म कारयेद्यावदष्टमी ॥'

इति भविष्येऽष्टमीपर्यन्तमेवोक्तः । रूपनारायणेन तु नन्दादिव्रतप्रयोगं पृथगेवोक्त्वा तस्य नवम्यां पारणमुक्तम् । यदपि निर्णयदीपे—

'आश्विने शुक्लपक्षे तु नवरात्रमुपोषितः ।
नवम्यां पारणं कुर्याद्दशमीमिश्रिता न चेत् ॥
दशमीमिश्रिता यत्र पारणे नवमी भवेत् ।
दुःखदारिद्र्यदा ज्ञेया तथा व्रतविनाशिनी ॥'

इति ब्राह्मनाम्ना लिखितं वचनम्, यच्च रुद्रयामले इति वदन्ति—

'अष्टम्या सह कार्या स्यान्नवमी पारणादिने ।
यो मोहाद्दशमीविद्धे नवम्यां चण्डिकां यजेत् ॥
पारणं च प्रकुर्याद्वै तस्य पुण्यं निरर्थकम् ।
नवम्यां पारिता देवी कुलवृद्धिं प्रयच्छति ॥
दशम्यां पारिता देवी कुलनाशं करोति वै ।
तस्मात् पारणं कुर्यान्नवम्यां विबुधाधिप ॥'

इत्यादीनि, तानि यदि समूलानि तदा लौहाभिसारिकनन्दादिव्रतचतुष्टयविषयाणि । तस्याऽष्टमीपर्यन्तमेवोक्तेरित्युक्तं प्राक् । अन्यथा महाष्टम्यां परविद्धायां पारणाविधाने पूर्वनिबन्धैर्*विरोधो दुर्वारः स्यात् । यानि तु कैश्चिल्लिखितानि नवम्यां पारणाविधायकानि वचनानि तानि हेमाद्र्यादिविरुद्धत्वादिनिर्मूलानि । समूलत्वेऽपि यदा*दिनद्वये नवमी, तदा*द्वितीयदिन उपोष्य

द्यर्थानि । *विरोध इति । अष्टमीविद्धायां नवम्यामष्टम्युपवासविधानादिति भावः । *दिनद्वये नवमीति । अष्टमीविद्धा नवमी

'व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे ।
प्रारब्धे सूतकं न स्यादनारब्धे तु सूतकम् ॥'

इति विष्णुवचनाच्चाशौचमध्येऽपि तत्कर्तव्यतावगतेः । पारणान्तत्वाद्*व्रतस्य । प्रारम्भस्तु तेनैवोक्तः—

'प्रारम्भो वरणं यज्ञे संकल्पो व्रतसत्रयोः ।
नान्दीमुखं विवाहादौ श्राद्धे पाकपरिक्रिया ॥' इति ।

रुद्रयामलेऽपि—

'सूतके पारणं कुर्यान्नवम्यां होमपूर्वकम् ।
तदन्ते भोजयेद्विप्रान्दानं दद्याच्च शक्तितः ॥' इति ।

तदन्ते*सूतकान्ते । एवं स्त्रीभिरपि*रजोदर्शनमध्ये क-

अयाचितं तु सप्तम्यामष्टम्यां समुपोषितः ॥
नवम्यां पारणं कुर्यादित्येवं पञ्चरात्रकम् ॥"

इति द्वैतनिर्णये विस्तरः । तथा चाष्टरात्रादिपक्षाभिप्रायेण नवमीपारणविधिः सार्थकः । किं च येषां द्वितीयायुक्तप्रतिपदि घटस्थापनं तद्दिनमारभ्यैव जपपूजाद्युपवासश्च नवमीपूर्वदिनपर्यन्तमिति कुलाचारस्तेषां नवम्यां पूजाहोमब्राह्मणभोजनादि कृत्वा पारणं भवत्येव कुलाचारादिति ।

*व्रतस्येति । व्रतशब्देन पारणाया अपि ग्रहणमिति भावः । *सूतकान्त इति । ब्राह्मणभोजनं भूयस्यादिदानं च सूतकान्ते इत्यर्थः । रामचन्द्रभट्टास्तु—'नवरात्रे होमस्य पूजारूपत्वेन प्रधानत्वात् तस्य चानन्यसाध्यत्वेनाशौचे ऽसम्भवात् 'न त दानार्चनजपम्'इति निषेधात्तत्समाप्तिं विना च नियमरूपोपवाससमाप्त्यसम्भवादाशौचान्ते होमादि कृत्वा पारणं कुर्यात् । यैस्तु होमो न क्रियते तेषां सूतकादिमध्ये पारणं भवत्येवेत्याहुः । *रज इति । पूजा त्वन्येन कार्या ।

'ततः प्रातः पूजयित्वा दशम्यां विधिपूर्वकम् ।
संप्रेषणं तु कर्तव्यं गीतवादित्रनिःस्वनैः ॥
रूपं देहि यशो देहि भगं भगवति देहि मे ।
पुत्रान्देहि धनं देहि सर्वकामांश्च देहि मे ॥
महिषघ्नि महामाये चामुण्डे मुण्डमालिनि ।
आयुरारोग्यमैश्वर्यं देहि देवि नमोऽस्तु ते ॥
इति *संप्रार्थ्य देवीं तु तत उत्थापयेद्बुधः ।
उत्तिष्ठ देवि चण्डेशि शुभां पूजां प्रगृह्य च ॥
कुरुष्व मम कल्याणमष्टाभिः शक्तिभिः सह ।
गच्छ गच्छ परं स्थानं स्वस्थानं देवि चण्डिके ॥
व्रज स्रोतोजलं वृद्ध्यै स्थीयतां च जले त्विह ॥'

इति उत्थाप्य जलं नीत्वा—

'दुर्गे देवि जगन्मातः स्वस्थानं गच्छ पूजिते ।
संवत्सरे व्यतीते तु पुनरागमनाय वै ॥
इमां पूजां मया देवि यथाशक्त्योपपादिताम् ।
रक्षार्थं त्वं समादाय व्रज स्वस्थानमुत्तमम् ॥'

व्याधिमासोपवासाद्यैकप्रयोगविषयं तथाऽपि वर्षादिपर्यन्तमभ्यासेन फलसाधनेष्वपि प्रारब्धेषु योजयितुं शक्यमिति भावः । रजःपदमाशौचोपलक्षणम् । केचिदित्यरुचिः । निषेधस्य रागप्राप्तगोचरत्वेन वैधपारणगोचरत्वायोगात् । विधवाया भोजननिषेधादर्शनाच्चेति । तत इत्युपलक्षणम् ।

'ततः संप्रेषणं कुर्याद्दशम्यां शाबरोत्सवैः ।'

इत्यपि द्रष्टव्यम् । शाबरोत्सवाः प्रागुक्ताः । एवं पूजां विधाय प्रणम्य 'दुर्गां शिवां शान्तिकरीम्' इति पूर्वोक्तं स्तोत्रं पठेत् ।

*संप्रार्थ्येति ।

'विधिहीनं क्रियाहीनं भक्तिहीनं यदर्चितम् ।

क्षेपु पूर्वैव । मदनरत्नेऽप्येवम् । ज्योतिर्निबन्धे रत्नकोशे
च नारदः—

*'ईषत्संध्यामतिक्रान्तः किंचिदुद्भिन्नतारकः ।
विजयो नाम कालोऽयं सर्वकार्यार्थसिद्धिदः ॥
इषस्य दशमीं शुक्लां पूर्वविद्धां न कारयेत् ।
श्रवणेनापि संयुक्तां राज्ञां पट्टाभिषेचने ॥
सूर्योदये यदा राजन्दृश्यते दशमी तिथिः ।
आश्विने मासि शुक्ले तु विजयां तां विदुर्बुधाः ॥'

*अत्रायं निर्गलितोर्थः—अपराह्णो मुख्यः कर्मकालः, तत्रैव
पूजाद्युक्तेः । प्रदोषो गौणः । तत्र दिनद्वयेऽपराह्णव्याप्तित्वे
पूर्वा । प्रदोषव्याप्तेराधिक्यात् । दिनद्वये प्रदोषव्याप्तित्वे
परा । अपराह्णव्याप्तेराधिक्यात् । श्रवणस्तु (१)रोहिणी-
वदप्रयोजकः । दिनद्वयेऽपराह्णास्पर्शे तु पूर्वा । तत्रापि
परादिनेऽपराह्णे श्रवणसत्त्वे परैवेति दिक् ।

इदानीं मतान्तरमवतारयितुं प्रदोषरूपं कालान्तरमाह—*ईष-
दिति । *अत्रायमिति । इदं पुनरिह विधातव्यम्—दशमी शमी-
पूजायां रात्रौ नक्षत्रोदयव्यापिनी, 'ईषत्संध्यामतिक्रान्तः' इति
वचनात्

"आश्विनस्य सिते पक्षे दशम्यां तारकोदये ।
स कालो विजयो ज्ञेयः सर्वकामार्थसिद्धये ॥"

इति चिन्तामणावुक्तेश्च । दिनद्वये तद्व्याप्तौ पूर्वैव । 'या पूर्णा
नवमीयुक्ता' इति वचनात्

"दशमीं यः समुल्लङ्घ्य प्रस्थानं कुरुते नरः ।
तस्य संवत्सरं राज्ये न क्वापि विजयो भवेत् ॥"

---

(१) रोहिणीवदिति यथा जन्माष्टमीनिर्णये रोहिणी अप्रयोजिका
तद्वदित्यर्थः ।

इति भविष्यात् । शमीरहितदेशे तु अश्मन्तकं पूजयेत् समाचारात् ।

"अश्मन्तक महावृक्ष महादोषनिवारण ।
इष्टानां दर्शनं देहि शत्रूणां च विनाशन ॥"

इति प्रार्थयेत् । राजा तु विजयकामो विजयमुहूर्ते प्रस्थानं कृत्वा अपराजितापूजां कुर्यात् । प्रस्थानं तु प्रास्थानिकविधिं कृत्वा कार्यम् । प्रास्थानिकविधिश्च गोपथब्राह्मणे विवाहमुद्दिश्योक्तः । स यथा–जन्येषु गमिष्यत्सु पार्थिवा वानस्पत्यदुन्दुभयःस्युः, वीणाश्चोपवादयेरन्, हृष्टाश्चालंकृताश्चारुवदनाः केशश्मश्रुलोमनखानि वापयित्वा सम्भारानुपकल्प्य मैत्रं मुहूर्तमुपसमाधाय शान्तिमतिसरं कारयित्वा वासो गन्धान् स्रजश्चाबध्य पुरःस्थातारं स्थापयित्वा कर्ताऽन्वालभ्य जुहोति–अभयैः, अपराजितैः, आयुष्यैः, स्वस्त्ययनैः, शर्मवर्मभिः, जनवेदनैश्च हुत्वा 'पार्थिवस्य' इति 'माद्रगाम' इति च हुत्वा 'आगच्छता-गस्य' इतीन्द्रं स्थालीपाकेनेष्ट्वा 'आतिष्ठ जिष्णुः' 'अनृक्षरा ऋजवः सन्तु पन्था' इति पन्थानमास्थाय जपेत् । इमौ पादौ "यत इन्द्र" "त्रातरमिन्द्र" "मा विदन्नभयं" "सोमो बृहस्पतिर्नः परिपातु पश्चात" इति त्रीन् विष्णुक्रमान् क्रान्त्वेति प्रस्थानम् । यथा–

"अलंकृतो भूषितभृत्यवर्गः परिष्कृतो तुङ्गतुरङ्गनागः ।
वादित्रनादप्रतिनादिताशः सुमङ्गलाचारपरम्पराशीः ॥
राजा निर्गत्य भवनात्पुरोहितपुरोगमः ।
प्रास्थानिकविधिं कृत्वा प्रतिष्ठेत्पूर्वतो दिशि ॥
गत्वा नगरसीमान्तं वास्तुपूजां समारभेत् ।
संपूज्य चाऽथ दिक्पालान् पूजयेत्पथि देवताः ॥
मन्त्रैर्वैदिकपौराणैः पूजयेच्च शमीतरुम् ।
अमङ्गलानां शमनीं शमनीं दुष्कृतस्य च ॥
दुःस्वप्नशमनीं धन्यां प्रपद्येऽहं शमीं शुभाम् ।
ततः कृताशीः पूर्वस्यां दिशि विष्णुक्रमान् क्रमेत् ॥

अत्रैव बालिनीराजनमुक्तं कृत्यरत्ने। तत्र मन्त्रः—

'चतुरङ्गबलं मह्यं निरारित्वं व्रजात्विह।

सर्वत्र विजयो मेऽस्तु त्वत्प्रसादात्सुरेश्वरि ॥' इति।

गौडनिबन्धे ज्योतिषे—

'कृत्वा नीराजनं राजा बलवृद्ध्यै यथाक्रमम्।

शोभनं *खञ्जनं पश्येज्जलगोगोष्ठसंनिधौ ॥'

"सदाऽपराजिते यस्मात्त्वं लतासूत्तमा स्मृता।

सर्वकामार्थसिद्ध्यर्थं तस्मात्त्वां धारयाम्यहम् ॥

भवापराजिता देवी मम सर्वसमृद्धये।

पूजितायां त्वयि श्रेयो ममास्तु दुरितं हतम् ॥"

इति तद्वलयमभिमन्त्र्य—

"जयदे वरदे देवि दशम्यामपराजिते।

धारयामि भुजे दक्षे जयलाभाभिवृद्धये ॥

बलमाधेहि मयि च मम शत्रौ पराजयम्।

त्वद्धारणाद्भवेयुर्मे धनधान्यसमृद्धयः ॥"

इति मन्त्रेण दक्षिणबाहौ धृत्वा—

"इमां पूजां मया देवि यथाशक्त्या निवेदिताम्।

रक्षार्थन्तु समादाय व्रज स्वस्थानमुत्तमम् ॥"

इति विसर्जयेत्। सर्वे च जनास्तस्यामपराण्हे ग्रामसीमामुल्लङ्घ्य अपराजितां पूजयेयुः। तदुक्तं ग्रन्थ एव 'दशम्यां च जनैः सम्यक्' इत्यादि। *खञ्जनमिति। तत्र मन्त्रस्थितितत्त्वे—

"नीलग्रीव शुभग्रीव सर्वकामफलप्रद।

पृथिव्यामवतीर्णोऽसि खञ्जरीट नमोऽस्तु ते ॥"

यमनन्तरार्मे—

त्वं योगयुक्तो मुनिपुत्रकस्त्वं संदृश्यतामेषि शिखोद्गमेन।

संदृश्यसे प्रावृषि निर्गतायां त्वं खञ्जनाश्चर्य नमो नमस्ते ॥"

तथा

'निशीथे वरदा लक्ष्मीः को जागर्तीति भाषिणी ।
तस्मै वित्तं प्रयच्छामि अक्षैः क्रीडां करोति यः ॥' इति॥

अत्रैवाश्वयुजीकर्मोक्तमाश्वलायनेन 'आश्वयुज्यामाश्वयुजीकर्म' इति, तच्चैवपर्वणि कार्यम् । विकृतित्वात् । तत्र *पूर्वाह्णव्यापिनी ग्राह्या । दैवकर्मत्वात् । आग्रयणं तु पर्वणि कार्यम् ।

"नारिकेलोदकं पीत्वा अक्षैः क्रीडां समारभेत् ।
नारिकेलैश्च पिष्टकैः पितॄन्देवान्समर्चयेत् ॥
बन्धूंश्च प्रीणयेत्तेन स्वयं तदशनो भवेत् ॥"

इति च द्रष्टव्यम् । अत्र नारिकेलोदकपानमप्युक्तं, तच्च निन्द्यम् ।

"पात्रान्तरगतं यत्तु नारिकेलाम्बुसेवनम् ।
नालिकेलमधुकफलानां रसमेव च ॥
स्वर्णपात्रगतं क्षीरं सुरापानसमानि वै ॥"

इति हारीतस्मृतौ पात्रान्तरस्थे आकरे तत्पाने प्रायश्चित्तोक्तेः । यद्यपि निषेधो रागप्राप्तनारिकेरोदकपानपरस्तथापि निशि अक्षद्यूतजागरणं लक्ष्म्यादिपूजनं च प्रधानम् । नारिकेलपिष्टकभोजनादिनारिकेलोदकपानं चाङ्गम् । तथा च येषां तत्पानेऽधिकारस्तैरेवेदं सर्वं कार्यं नान्यैः । अत एव 'उद्यानिका शिवपत्रिका' इति श्लोके जागरणे विहितप्रतिषिद्धत्वाद्विकल्प इत्युक्तम् । स च विकल्पो व्यवस्थितविकल्प इत्यभिमत्य ग्रन्थे नारिकेलोदकपानस्मरणं नोल्लिखितम् । अस्यां च पौर्णमास्यां दीपदानारम्भः ।

"अतः तदर्थप्रयुतं सहस्रं शतमेव वा ।
घृतेन दीपयेद्दीपांस्तिलतैलेन वा पुनः ॥"

इति वाक्यात् । *पूर्वाह्णेति । 'शेषपर्वणि कार्यं विकृतित्वात्' इति पाठो नारायणवृत्तिसम्मतः । आश्वयुजीकर्मणाऽऽग्रयणस्य

'गृहमेधी व्रीहियवाभ्यां *शरद्वसन्तयोर्यजेत श्या-
माकैर्नीवारैर्वा *वर्षास्वाग्रयणकालेनानेन पुराणैर्वा' इति ।
आपस्तम्बोऽपि—'वर्षासु श्यामाकैर्यजेत शरदि व्रीहि-
भिर्वसन्ते यवैः* ग्रीष्मर्तु वेणुयवैः' इति । तत्रापि श्यामाका-

---

वर्जयेत् देवतानां स्वस्वनामपरिहाणाय" इति श्रुतेः, तदाग्रयणह-
विःषु प्राकृतहविरुत्तरकालत्वमेव पशुपुरोडाशकर[वद्?]प्रसाङ्गित्वात् ।
प्राकृतस्यैव तन्त्रस्य भावादिति देवयाज्ञिकादयः । वस्तुतस्तु
यदि 'वपया प्रचर्य पुरोडाशमनु निवर्तयेत्' 'जपमनु प्रावर्षत्'इतिवत्
'पौर्णमासेन प्रचर्याग्रयणहविषि निर्वपेत् पौर्णमासमनुनिर्वपेत्"इति
तन्त्राकर्षमवचनीयानुयाजानीयत्वाद्वितीयान्यस्मादपि तदा तत्र पूर्व-
श्रुतिबाधेनोत्तरकालत्वप्रत्ययः । तदेव तु न 'अनुवर्तयेत्' इत्येव
श्रुतेः । अयं ह्यनुरुपसर्ग एव सङ्कल्पप्रभृत्यासमाप्ति सम्बन्धे ता-
त्पर्यग्राहक एव 'सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयम्' इत्यादिव-
त् । नन्वत्रापि 'अनु अनुवर्तनीयम्'इति एव कुतो नार्थः ? आदौ-
मध्ये चानुवृत्तिदर्शनात् । अत एव श्रुतिहृदयज्ञेन सूत्रे तत्तत्स-
मानतन्त्रा वा दर्शपूर्णमासाभ्यामिति तन्त्रपदमेवोक्तम् । यानि
प्रकृतिसाधारणान्यङ्गानि विहरणादीनि तान्येवात्रापीत्येतावदेव ।
तस्मादुक्तविरोधादाग्रयणोत्तरत्वं प्रकृतेर्यथायथं भवति इति कौ-
स्तुभकारादयः । *शरत् आश्विनकार्तिकौ, *वसन्तः चैत्रवै-
शाखौ, *वर्षा श्रावणभाद्रपदौ । नन्वत्र 'मीनमेषयोः' इति न्यायेन
मासान्तरस्यापि ग्रहीतुं शक्यम् । शाखान्तरे विशेषरूपेण तत्तन्मासग्र-
हणात् । *ग्रीष्मर्तु वेणुयवैरिति । कात्यायनेन तु वैणवो ग्रीष्म इति
वेणुयवाग्रयणे ग्रीष्म एवोक्तः । एषां चाग्रयणानां प्रकृतावुपयो-
गः । 'व्रीहिभिरिष्ट्वा व्रीहिभिरेव यजेत यवैरिष्ट्वा यवैरेव
यजेत व्रीहिभ्यः' इति श्रुतेः । दर्शपूर्णमासयोरेककर्मत्वेन द्रव्यैक्य-
नियमात् । परिशिष्टेऽपि—

प्रागग्रन्दुं गुज्यतेऽवश्यं न ह्यत्राग्रयणात्ययः ॥'

त्रिकाण्डमण्डनोऽप्येवम् । यदा त्वेतदाश्विनपौर्णमास्यां क्रियते तदेककालत्वादाश्वयुजीकर्मणोऽस्य च समानतन्त्रता भवति । तदेतद्वृत्तिकृता—'एकबर्हिरिध्मा-

*आश्वयुजीकर्मणोऽस्येति । जीर्णतण्डुलचरुणाऽऽश्वयुजीकर्मप्रधानहोमं कृत्वा नूतनतण्डुलचरुणाऽऽग्रयणप्रधानहोमः, दर्शश्राद्धादिवदाश्वयुजीव्रीह्याग्रयणयोस्तन्त्रेण प्रयोगः । आश्वयुजीव्रीह्याग्रयणश्यामाकाग्रयणानां च तन्त्रेण प्रयोगो गृह्याग्निसागरादवगन्तव्यः । इदं चात्र बोध्यम्—आवर्तनात्प्राक् सन्धौ प्रकृतिविकृतिप्रयोगप्राप्तौ पर्वणि आश्वयुजीकर्माग्रयणपार्वणस्थालीपाकाः समानतन्त्रा एव ।

"पाकयज्ञान्समासाद्य एकाज्यानेकबर्हिषः ।
एकस्विष्टकृतः कुर्यान्नानापि सति दैवते ॥"

इति कात्यायनात् । तदपवादेन तु पर्वणि पूर्वेद्युरेव सतन्त्रमाग्रयणाश्वयुजीकर्म परेद्युः सान्ध्यमपि प्रकृतिः तस्याः प्रतिपद्यपि शुक्लत्वादिति । आग्रयणं च नवान्नं क्रीत्वाऽपि भवति । अन्यथा—

"स नेदकृत्वाऽऽग्रयणं नवमश्नाति मोहितः ।
देवेभ्यः कल्पितं भागं भक्षयित्वाऽऽर्तिमाप्नुयात् ॥"

इति दोषस्मरणात् । आग्रयणादिने षड्दैवत्यं श्राद्धमपि हेमाद्रौ—

"श्यामाकैरिक्षुभिश्चैव पितॄणां सर्वकामिकम् ।
कुर्यादाग्रयणं यस्तु स शीघ्रं सिद्धिमाप्नुयात् ॥
नवधान्यं समायाते गृही श्राद्धं समाचरेत् ।
नवान्नलाभे देवा हि कामकालौ सदैव हि ॥"

इत्युक्तः । ग्रन्थेऽपि—

'व्रीहिपाकं च कर्तव्यं यवपाके च पार्थिव ।'

अथ कार्त्तिकमासः

तुलासंक्रमे प्रागपरा दश घटिकाः पुण्याः । रात्रौ तु प्रागुक्तम् ।

अथ कार्त्तिकस्नानम् । तत्र पृथ्वीचन्द्रोदये विष्णुस्मृतिपाद्मयोः—

'तुलामकरमेषेषु प्रातःस्नानं विधीयते ।
हविष्यं ब्रह्मचर्यं च महापातकनाशनम् ॥'

इति सौरमास उक्तः । प्राच्यास्त्वेतदेवाद्रियन्ते । दाक्षिणात्यास्तु—

'आश्विनस्य तु मासस्य या शुक्लैकादशी भवेत् ।
कार्त्तिकस्य व्रतानीह तस्यां वै प्रारभेत्सुधीः ॥'

इति पाद्मोक्तेः । भार्गवार्चने च—

'प्रारभ्यैकादशीं शुक्लामाश्विनस्य तु मानवः ।
प्रातःस्नानं प्रकुर्वीत यावत्कार्त्तिकभास्करः ॥'

इति विष्णुरहस्योक्तेः । हेमाद्रावादित्यपुराणे—

'पूर्णे आश्वयुजे मासि पौर्णमास्यां समाहितः ।'

इत्युक्त्वा—

'मासं समग्रं परया च भक्त्या
समापयेत् कार्त्तिकपौर्णमास्याम् ।'

इत्यन्तेऽभिधानाच्चाश्विनशुक्लैकादश्यां पौर्णमास्यां वाऽऽरभ्य कार्त्तिकशुक्लद्वादश्यां पौर्णमास्यां वा समापयेदित्याहुः । मदनपारिजाते विष्णुः—

*'कार्त्तिकं सकलं मासं नित्यस्नायी जितेन्द्रियः ।

---

* कार्त्तिकव्रतानामाश्विनशुक्लैकादश्यामारम्भोक्तेः । तानि दर्शयति कार्त्तिकमित्यादिना ।

इमं मन्त्रं समुच्चार्य मौनी स्नायाद्व्रती नरः ॥' इति ।
अर्घ्यमन्त्रोऽपि तत्रैव—
व्रतिनः कार्तिके मासि स्नानस्य विधिवन्मम ।
गृहाणार्घ्यं मया दत्तं दनुजेन्द्रनिषूदन ॥
*नित्यनैमित्तिके कृष्ण कार्तिके पापनाशने ।
गृहाणार्घ्यं मया दत्तं राधया सहितो हरे ॥
इमौ मन्त्रौ समुच्चार्य योऽर्घ्यं मह्यं प्रयच्छति ।
सुवर्णरत्नपुष्पाम्बुपूर्णशङ्खेन पुण्यवान् ॥
सुवर्णपूर्णा पृथिवी तेन दत्ता न संशयः ॥' इति ।
एवं संपूर्णस्नानाशक्तौ त्र्यहं स्नायात् ।
'वाराणस्यां पञ्चनदे त्र्यहं स्नातास्तु कार्तिके ।
अमी ते पुण्यवपुषः पुण्यभाजोऽतिनिर्मलाः ॥'
इति काशीखण्डोक्तेः ।

अथ मालाधारणम् । तत्र स्कान्दे द्वारकामाहात्म्ये—
'निवेद्य केशवे मालां तुलसीकाष्ठसंभवाम् ।
वहते यो नरो भक्त्या तस्य वै नास्ति पातकम् ॥
न जह्यात्तुलसीमालां धात्रीमालां विशेषतः ।
महापातकसंहर्त्री धर्मकामार्थदायिनीम् ॥'
विष्णुधर्मे—
'स्पृशन्ति यानि लोमानि धात्रीमाला कलौ नृणाम् ।
तावद्वर्षसहस्राणि वैकुण्ठे वसतिर्भवेत् ॥
मालायुग्मं तु यो नित्यं धात्रीतुलसिसंभवम् ।
वहते कण्ठदेशे तु कल्पकोटिदिवं वसेत् ॥

*नित्यनैमित्तिके इति।स्नाने नैमित्तिके इति वा पाठः । कार्तिकस्नानं च प्रातःस्नानसन्ध्यावन्दनादि कृत्वा कार्यं तेन विनाकर्मानधिकारात् । न च प्रातःसन्ध्यायाः सूर्योदयानन्तरं

समाः सहस्रं सुप्रीतो भवेत्तु मधुसूदनः ॥'

पूर्वचन्द्रोदये पाद्मे—

'कार्तिके नार्चितो यैस्तु कमलैः कमलेक्षणः ।
जन्मकोटिषु विप्रेन्द्र न तेषां कमला गृहे ॥'

तथा—

'कार्तिके केशवे पूजा येषां नाम्ना सुतैः कृता ।
ते निर्भत्सर्य रवेः पुत्रं वसन्ति त्रिदिवे सदा ॥
तुलसीदललक्षेण कार्तिके योऽर्चयेद्धरिम् ।
पत्रे पत्रे मुनिश्रेष्ठ मौक्तिकं लभते फलम् ॥'

तथा स्कान्दे कार्तिकमाहात्म्ये—

'धात्रीच्छायेतु यः कुर्यात्पिण्डदानं महामुने ।
मुक्तिं प्रयान्ति पितरः प्रसादान्माधवस्य तु ॥
धात्रीफलविलिप्ताङ्गो धात्रीफलविभूषितः ।
*धात्रीफलकृताहारो नरो नारायणो भवेत् ॥
धात्रीच्छायां समाश्रित्य योऽर्चयेच्चक्रधारिणम् ।
पुष्पे पुष्पेऽश्वमेधस्य फलं प्राप्नोति मानवः ॥'

तथा स्कान्दे—

'कार्तिके मासि विप्रेन्द्र धात्रीवृक्षोपशोभिते ।
वने दामोदरं विष्णुं चित्राद्यैस्तोषयेद्विभुम् ॥

"श्रुतयो विभिन्नाः स्मृतयो विभिन्ना
नानाऋषीणां च मतं विभिन्नम् ।
धर्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः ॥"

इति माधवोक्तेः । समूलत्वेत्यादिग्रन्थस्तु केनचिदुत्तानेन मलिनो न तु प्राचीनपुस्तके दृश्यते । *धात्रीफलकृताहारः शीर्णधात्रीफलविषयः, चातुर्मास्ये नूतनस्य वर्जितत्वात् ।